VEDIC CONCORDANCE OF MANTRAS
AS PER DEVATĀ AND ṚṢI
(वैदिक-देवताऋष्यनुसारी मन्त्रानुक्रमकोषः)

(द्वितीयो भागः)

Vol. 2

(ऋक् सामनी से होत्रादयः तक)

By

Prof. Ravi Prakash Arya

Sh. Ram Narain Arya

Amazon Books, USA

In association with

Indian Foundation for Vedic Science

1051, Sector-1, Rohtak, Haryana, India

Whatsapp Contact: 9313033917; 9650183260

email : vedicscience@rediffmail.com; vedicscience@gmail.com

web: www.vedicscience.net

Third Revised and Updated Edition

Kali era : 5127 (c. 2026)

Kalpa era :1,97,29,49,127

Brahma era :15,50,21,97,9,49,127

Price: Rs. 2000/- (Vol.)
Rs. 4000/- (Set of 2 Vols.)

ISBN: 978-81-87710-78-3 (Vol.2)
978-81-87710-07-3 (Set)

© Author

All rights are reserved. No part of this work may be reproduced or copied in any form or by any means without written permission from the author

Printed by

Indian Foundation for Vedic Science, 1051, Sector-1, Rohtak-124001, Haryana

My beloved father, late Sh. Ram Narain Arya, Co-Author
A Vedic scholar par excellence, Rainmaker,
Colloborator, Guide and a Great Source of Inspiration
behind this endevour

Introduction

Indian Foundation for Vedic Science has been established with the sole objective of preserving the ancient Vedic heritage and culture of India by way of promoting scientific researches into Vedic philology, exegesis and sciences.

The aims and objectives of the foundation are as under:

१. To preserve ancient Vedic heritage and culture of India.

2. To unravel the mysteries of the Vedas and the Allied literature.

३. To promote and promulgate the rational and scientific outlook of Vedic seers and scholiasts of ancient India.

४. To conduct research into various aspects of Vedic learning and to seek its relevance to the modern living.

5. To function as a nodal international agency for information about the current status of Vedic research, Vedic research scholars and Institutions and a liaison agency.

6. To be a competent body of scholars who can authoritatively proclaim decisions and evaluate research in the field of Vedic philology, Vedic exegesis and Vedic Sciences.

7. To bring together the Vedic scholars who evinced a great deal of interest for promotion of Vedic studies on scientific lines and Modern scientists or scholars interested into Vedic scientific vision to co-ordinate for synthesis of modern scientific knowledge with the Vedic one so that it may diffuse following the Vedic vision for upkeep, advancement, safety and development of mankind and not for ecological crisis, destruction and extinction of mankind.

8. To disseminate the knowledge, information, training scope, for advanced research of direct and interdisciplinary nature for all those who are desirous of learning and contributing in the field of Vedic exegesis, Vedic philology and Vedic sciences.

9. To construct a computer library and to prepare a computer concordance by computerizing the entire bulk of Vedic literature.

१0. To undertake the publication of research work done from time to time by the scholars under the auspices of the foundation.

११. To promote such a vision (as discovered by the seers of this land in the times of yore) as could bring about social reforms leading to harmony, friendship, fraternity and common culture to the present day trouble torn world of mankind and help in the cause of national and international peace thus suggesting the

modern science for more and more active role for upkeep and safety of living organisms and the planet.

In tune with the aims and objectives of the foundation it was thought that a proper apparatus be produced first to facilitate the in-depth scientific studies and commentaries on the Vedas, since the presently available translations and commentaries on the Vedas and allied literature, leaving a few cases, are not able to present the actual and factual significance of this oldest literature of the world. Most of the translations are based on prejudices and preconceived notions of the translators and so are misleading and far fetched ones. The position is known to everyone. We need not elaborate upon this fact. In the absence of factual interpretation of the Vedas, no factual data can be collected and in absence of the factual data nobody, howsoever be reputed or eminent he may be in his field of studies, is able to do justice with the ancient most world of humanity or say Vedic life and thought. Under the circumstances it becomes the paramount duty of an institute like the **Indian Foundation For Vedic Science** not only to preserve the ancient most intellectual and scientific heritage of the globe, but also (1) to present it in the most modern terms and try to seek the relevance of this ancient most scientific treasure of the globe in context of the modern scientific advancement and the modern living. (2) To see whether and to what extent Vedic scientific vision can contribute for the furtherance of modern science or say to seek the possibility of updating the modern scientific advancement with the help of Vedic scientific vision. (3) To find out the possible areas of collaboration between Vedic scientific vision and modern science. (4) To find the equivalence between Vedic scientific vision and modern science. (5) To present the state of art of different disciplines in the Vedas and allied literature in terms of documentation, sources and past and present experiments, etc. To pursue the work along the above cited facts and to define the Vedic age and culture in right perspective, it is imminent to have accurate interpretations of the Vedas and allied literature. Since the Vedas can best be interpreted with the help of the Vedas only, as the famous convention is 'Vedas are homomensura or *svataḥ pramāṇa*' On the other hand to interpret the Vedas with the help of Vedas, it is highly essential to have the deep rooted knowledge and understanding of the cultural and the scientific background of the Vedic period. When we look out for such an apparatus as could help us best to interpret Vedas with the help of Vedas. we come across with threefold apparatus designed to facilitate and deepen the study of the Vedas . First one among these is the Universal Word Index to the Vedas published in 16 vols. by Vishvabandhu et al. from VVRI Hoshiarpur Punjab under the title 'Vedic Word Concordance' or "वैदिक पदानुक्रम कोष". Second is the Vedic Index of Names and Subjects by Macdonell. Third one is an index of each and every Mantra-pāda to the Vedas consisting of the Published Vedic literature available by the time of its publication in 1906, published by Bloomfield under the title 'A Vedic Concordance'. On careful examination it was found that only these threefold concordances available in the market are though suffice to facilitate

the deep study of the Vedas, are not enough to help pluck out the actual estimate of the Vedas. To interpret the Vedas with the help of Vedas, it is highly essential to have the deep rooted knowledge and understanding of the cultural and the scientific background of the Vedic period which is only possible through the knowledge of the actual intention of the Vedic seers and the deities or the subject matter dealt with by them. A full detail of the Mantras compiled under a particular Devatā-head revealed to a particular seer in various Saṅhtās would also facilitate readers and researchers of the Vedas to make out the actual intention of the seer behind his revelation or visualization of various laws of nature known as various deities. Keeping in view the desideratum of such an apparatus as could help facilitate the readers and researchers make out the actual intention of the seers behind the visualization of various laws of nature at physical, astrophysical and metaphysical level, the foundation comes forward with the four-fold apparatus. Firstly named as 'A Vedic Concordance of Ṛṣi and Devatās' or वैदिक–ऋषि–देवता–पदानुक्रम कोषः- Secondly with 'A concordance of Vedic Mantras as per Ṛṣi and Devatās' or वैदिक–ऋषि–देवतानुसारी मन्त्रानुक्रम कोषः- Thirdly, 'A Vedic Concordance of Devatās and Ṛṣi' or वैदिक–देवता–ऋषि–पदानुक्रम कोषः- Fourthly, 'A Concordance of Vedic Mantras as per Devatās and Ṛṣi or वैदिक–देवता–ऋष्यनुसारीमन्त्रानुक्रम कोषः Fifthly, it was also decided to produce Bloomfield's Vedic Concordance in Devanāgarī script in an updated, revised and improved manner by including citations from the works not available by the time of publication of this work during his period so that Vedic researcher can find in updated Devanāgarī version .

It is a matter of great pleasure and pride that after completing the first three tasks of producing

(1) Concordance of Vedic Ṛṣi and Devatās or वैदिक–ऋषि–देवता–पदानुक्रम कोषः-

(2) A concordance of Vedic Mantras as per Ṛṣi and Devatā or वैदिक–ऋषि–देवतानुसारी मन्त्रानुक्रम कोषः

(3) 'A Vedic Concordance of Devatās and Ṛṣi ' or वैदिक–देवता–ऋषि–पदानुक्रम कोषः

We are coming out with the fourth most important work, i.e. 'A Concordance of Vedic Mantras as per Devatā and Ṛṣi and' or वैदिक–देवता–ऋषि–पदानुक्रम कोषः running into two vols. of total 921+96 pages. With the publication of this work a long felt need of an apparatus useful to comprehend the actual intention of the visionaries of the Vedas has fulfilled. It is fervently hoped that this work will be welcomed by the entire community of Vedic scholars and the researchers.

The foundation is also coming out soon with the fifth monumental work, i.e. 'A Vedic Concordance' or 'वैदिक–मन्त्रपादानुक्रम कोषः', an updated and revised Devanāgarī version of Bloomfield's Vedic concordance running into 2000 pages. The work is ready for publication.

Introductory To The Present Concordance

In preparing the present Concordance following works have been used :

1. *Ṛgveda Saṅhita* : Edited by Dr. Ravi Prakash Arya, Delhi, 1997.
2. *Ṛgveda Saṅhita* (Mantras only) : Vaidika Yantralaya, Ajmer.
3. *Yajurveda Saṅhita* (Mantras only) : Vaidika Yantralaya, Ajmer.
4. *Sāmaveda* : Edited by Dr. Ravi Prakash, Delhi 1996.
5. *Sāmaveda* : Edited by Sātavalekara, Svādhyāya Maṇḍala, Paradi. 1985.
6. *Sāmaveda* : By R.T.H. Griffth, Delhi. 1978.
7. *Sāmavedārṣeyadīpa* of Bhaṭṭa Bhāskarādhvbarīndra : Edited by Ramachandra Sharma, Tirupati. 1957.
8. *Atharvaveda* : Vaidika Yantrālaya, Ajmer.
9. *Ṛksarvānukramaṇī* of Sāyaṇa.

This work has been prepared by compiling various Devatās of the four Vedas. Under a particular Devatā head, the names of the various Ṛṣi along with the Mantra / or Mantras revealed to them on the particular subject Devatā were also compiled. The names of Devatās and Ṛṣi have been arranged alphabetically. While compiling the names of various Devatās and Ṛṣi of particular Mantra / or Mantrās, the author came across the variant readings regarding the names of Devatās and their Ṛṣi in the various works cited above. All those variant readings have been cited in the concordance with reference to the works that contain those readings. For instance,

विश्वेदेवाः – ऋ. १०.१२६.१–८

अंहोमुग् वामदेव्यः (साग्री. सास्वा. सार्षेदी.); कुल्मल वर्हिषः शैलूषि अंहोमुग् वा वामदेव्यः (ऋसर्व.)

In the above cited entry Ṛgvedic mantrās of 10th Maṇḍala and 126th sūkta have been recorded in various additions to have been revealed to varying seers. Sāyaṇabhāṣya of Sāmaveda, Sāmaveda by Sātavalekara and Sāmvedārṣeyadīpa of Bhaṭṭa Bhāskarādhvarindra register **अंहोमुग् वामदेव्यः** as the seer, where as Ṛksarvānukramaṇī of Śaunaka registers **कुल्मल वर्हिषः शैलूषि अंहोमुग् वा वामदेव्यः** as the seer. These variant readings have been shown in the above cited entry quoting the original works, in their abbreviated form, containing these readings.

Significance of the present work

Vedas represent the knowledge of the creation of the universe acquired first ever by humanity on the globe. The knowledge of creation came into being as soon as the creation got materialized. Vedic seers were the masters of vision. They visualized this knowledge and the laws of nature, creation and de-creation beyond time and space in their SamÈdhi. They encoded all those secret laws revealed to them in the form of Mantras. Since those laws of nature, creation and de-creation were visualized and encoded in the form of Mantras by the Vedic scholars, they were known as the seers or Ṛṣi of that / those particular Mantra or Mantras which

revealed to them. The secret laws of the nature that were encoded by way of the Mantras came to be known as the deities or the Devatās. Thus the knowledge of the Vedas lies in the knowledge of the seers and the deities. We find that a particular phenomenon or deity was visualized and encoded in the form of Mantras by more than one seer. Consequent upon which all the four Saṅhitās recorded various seers on a particular Devatā and various Devatās visualized by one particular seer. Under the circumstances, it would be interesting to conduct a comparative and critical study of the nature and types of the various laws or deities of the nature visualized by various seers from their various subjective angles. This comparative analysis would provide a clear-cut picture as to what extent the various seers have differed or agreed in their visualization of a particular phenomenon. This study would also provide a great help in deducing the actual intention of the original seer while interpreting the Vedic texts. In addition, the comparative picture of the various seers and deities would also help solve the various riddles impregnating the actual names of the seers, their surnames and the deities visualized by them.

To enable the readers and the researchers to carry out such comparative studies regarding the seers and their respective visualizations, this concordance has been prepared. This concordance is a ready reference to all the deities, and the seers who worked on them along with the mantras revealed to them deity-wise as compiled in the four major Saṅhitās of the Vedas. This concordance has listed 95१ Devatās underlying great laws of the spiritual, astronomical and physical nature visualized by various high spirited Ṛṣi in the beginning of the origin of the human civilization on this globe. The various names of seers enlisted under a particular Devatā head also reveal the extensive interest of various seers for the particular field of the research in the beginning of humanity on the Globe. The publication of this concordance also marks the beginning of the rational, scientific and factual translation of ancient-most scientific literature of the world. This concordance is followed by a 'Bibliography of Vedic Ṛṣi' and 'Researches into Vedic Devatās - The Subject Matter of Vedas'.

Prof. Ravi Prakash Arya
President
Vedic Science Virtual Vishva Vidyapeeth USA

ABBREVIATIONS

Following abbreviations have been used in this volume:

ऋ. – *Ṛgveda*
सा. – *Sāmaveda*
अ. – *Atharvaveda*
य. – *Yajurveda* of *Vājasaneyī Saṅhitā*
सार्षदी. – *Sāmavedārṣeyadīpa* of Bhaṭṭa Bhāskarādhvarindra
सास्वा. – *Sāmaveda* of *Svādhyāya Maṇḍala Pāraḍī* edited by Sātavalekara
साग्री. – Sāmaveda Sāyaṇa Bhāṣya or *Sāmaveda* edition of Griffith
ससर्व. – *Ṛksarvānukramaṇī* of Śaunaka
अजमेर – *Ṛgveda* edition of Vaidika Yantralaya Ajmer.

CONTENTS

	Introduction		५—१०
२६७.	ऋक् सामनी		७५
	१.	ब्रह्म	७५
२६८.	ऋक्षाश्वमेध्योर् दानस्तुतिः		७५
	१.	प्रियमेध आंगिरसः (साग्री. ३५४; ३६०) प्रियमेधः (ऋसर्व.)	७५
२६९.	ऋतवः		७५
	१.	इन्द्राग्नी	७५
	२.	विश्वेदेवाः	७५
	३.	मेधातिथिः काण्वः	७५
२७०.	ऋतवोऽग्निर्वा		७५
	१.	विश्वामित्रः	७५
२७१.	ऋत्विज अग्निर् वा		७६
	१.	विश्वामित्रो गाथिनः	७६
२७२.	ऋभवः		७६
१.	कुत्स आंगिरसः		७६
	२.	दीर्घतमा औचथ्यः	७६
	३.	मेधातिथिः काण्वः	७७
	४.	वसिष्ठः	७७
	५.	वामदेवो गौतमः	७७
	६.	विश्वामित्रो गाथिनः	८०
	७.	विश्वेदेवाः	८०
	८.	सुनुर् भार्गवः	८०
२७३.	ऋभवो विश्वेदेवा वा		८०
	१.	वसिष्ठः	८०
२७४.	ऋषभः		८०
	१.	ब्रह्म	८०
२७५.	ऋषयः		८१
	१.	प्रजापत्यो यज्ञः	८१
२७६.	एक रुद्रः		८१
	१.	बृहस्पतिः	८२
२७७.	एक वृषः		८२
	१.	अथर्वा (वृषकामः)	८२
	२.	विश्वामित्रः	८२
२७८.	ओजः प्रभृतीनिः		८२

१. ब्रह्म ८2
2७६. ओषधिः ८2
१. कपिंजलः ८2
2. प्रतिवेदनः ८2
३. प्रजापतिः ८2
४. मातृनामा ८३
2८०. ओषधि (अजशृंगी) ८३
१. बादरायणिः ८३
2८१. ओषधयः ८३
१. अगस्त्यो मैत्रावरुणिः ८३
2. भिषग् ८४
2८2. औदुम्बरमणिः ८४
१. सविताः (पुष्टिकामः) ८४
2८३. ओषधीस्तुतिः ८४
१. भिषग् आथर्वणः ८४
2८४. औषधिः ८५
१. कपिंजलः ८५
2. प्रजापतिः ८५
2८५. कः ८५
१. हिरण्यगर्भः ८५
2. हिरण्यगर्भः प्राजापत्य ८५
2८६. कपिंजल इव इन्द्रः ८६
१ . गृत्समदः शौनकः ८६
2८७. कपोतापहतौ प्रायश्चित् वैश्वदेवम् ८६
१. कपोतो नैर्ऋतः ८६
2८८. कर्माणि ८६
१. अथर्वा ८६
2८६. कवचसोम वरुण ८६
१. पायुर् भरद्वाजः ८७
2६०. कामः८७
१. अथर्वा ८७
2. उद्दालकः ८८
३. ब्रह्म ८८
2६१. कामात्मा ८८
१. जमदग्निः ८८
2६2. कामेषु मित्रावरुणौ ८८
१. भृगुः ८८

२९३. कालः ८९
१. भृगुः ८९
२९४. कासाः ८९
१. उन्मोचनः ८९
२९५. कुरुंगस्य दानस्तुतिः ८९
१. देवातिथिः काण्वः ९०
२९६. कुरुश्रवणस्य त्रासदस्यवस्य दानस्तुतिः ९०
१. कवष ऐलूषः ९०
२९७. कुष्ठः ९०
१. भृग्वंगिरा ९०
२९८. कुष्ठः तक्मनाशनम् ९०
१. भृग्वंगिरा ९०
२९९. कुहुः ९१
१. अथर्वा ९१
३००. कृत्याप्रतिहरणम् ९१
१. शुक्रः ९१
३०१. कृषिबलाः ९१
१. आदित्या देवाः ९१
३०२. कृषीवलाः ९१
१. कुमारहारितः ९१
३०३. कृषीवलाः कवयो वा ९2
१. विश्वावसुः ९2
३०४. केशिनः ९2
१. ऋष्यश्रृंगः ९2
2. एतशः ९2
३. करिक्रतः ९2
४. जूतिः ९2
५. मुनयो वातरशनाः ९2
६. वातजूतिः ९2
७. वृषाणकः ९2
८. विप्रजूतिः ९2
३०५. क्रिमिजम्भनम् ९2
१. काण्वः ९2
३०६. क्षत्रपतिः ९2
१. मयोभूः ९2
2. शुनः शेपः ९३

३०७. क्षेत्रपतिः ६३
१. देववातः ६३
2. वरुणः ६३
३. वामदेवो गौतमः ६३
४. सविता ६३
३०८. क्षेत्रिय (यक्ष्मकुष्ठादि) नाशनम् ६३
१. भृग्वंगिरा ६३
३०९. गणपतिः ६३
१. प्रजापतिः ६३
2. शुनः शेपः ६४
३१०. गन्धर्वाप्सरसः ६४
१. बादरायणिः ६४
2. मातृनामा ६४
३११. गर्भदृंहणम् ६४
१. अथर्वा ६४
३१2. गर्भदोषनाशनम् ६४
१. रक्षोहाः ६४
३१३. गर्भसंस्रावे प्रायश्चित्तम् ६४
१. रक्षोहा ब्राह्मः ६४
३१४. गायत्रीः ६५
१. ब्रह्म : ६५
३१५. गावः ६५
१. ब्रह्म ६५
2. भरद्वाजो बार्हस्पत्यः ६५
३. भागलिः ६५
४. वामदेवो गौतमः ६५
५. शबरः काक्षीवतः ६६
३१६. गावः इन्द्रो वा ६६
१. भरद्वाजो बार्हस्पत्यः ६६
३१७. गुल्गलः ६६
१. अथर्वा ६६
३१८. गुरुत्मान् ६६
१. श्यावाश्वः ६६
३१९. गृध्रौ ६६
१. कपिंजलः ६६
३2०. गृहपतयः ६६

१. अत्रिः ६६
2. कुत्सः ६७
३. गोतमः ६७
४. देवाः ६७
५. भरद्वाजः ६७
६. मधुच्छन्दाः ६८
३2१. गृहपतिः ६८
१. हैमवर्चिः ६८
३22. गृहपतयो विश्वेदेवाः ६८
१. भरद्वाजः ६८
३2३. गृहाः वास्तोष्पतिः ६८
१. ब्रह्म ६८
३2४. गौ विराट् अध्यातमम् ६८
१. ब्रह्म ६८
३2५. गौः १००
१. उपरिबभ्रवः १००
2. उपरिबभ्रवः सार्पराज्ञी वा : १००
३. जमदग्निः भार्गवः १००
४. ब्रह्मः १००
३2६. गौष्ठः अर्यमादयो मन्त्रोक्ताः १०१
१. ब्रह्म १०१
३2७. ग्रावाणः १०१
१. अर्बुदः काद्रवेयः सर्पः १०१
2. उर्ध्वग्रावार्बुदः १०१
३. वसिष्ठः १०२
३2८. ग्रीष्मर्तुः १०2
१. उशना १०2
2. परमेष्ठी १०2
३2६. चन्द्रः १०2
१. अथर्वा १०2
३३०. चन्द्रमा १०2
१. अथर्वा १०2
2. अथर्वा (स्वस्त्ययनकामः) १०३
३. अथर्वांगिरा १०३
४. शन्तातिः १०३
५. सावित्री सूर्या १०३

६. सूर्या सावित्री १०३
३३१. चातुर्मास्यामरुतः १०३
१. सप्तर्षयः १०३
३३2. चिकित्सुः १०३
१. भिषग् १०३
३३३. चित्रस्य दानस्तुतिः १०४
१. सोभरिः काण्वः १०४
३३४. चैद्यस्य कसोर् दानस्तुतिः १०४
१. ब्रह्मातिथिः काण्वः १०४
३३५. छन्दांसि १०४
१. ब्रह्म १०४
2. विश्वेदेवाः १०४
३३६. जरिमा आयुः १०४
१. शम्भूः १०४
३३७. ज्ञानम् १०४
१. वृहस्पतिः १०४
३३८. जगदीश्वरः १०५
१. विश्वेदेवाः १०५
३३९. जंगिडमणिः १०५
१. अथर्वा १०५
३४०. जंगिडो वनस्पतिः १०५
१. अंगिराः १०५
३४१. जलादयः १०६
१. प्रजापतिः १०६
३४2. ज्या १०६
१. पायुर् भरद्वाजः १०६
३४३. ज्वरः १०६
१. अथर्वांगिरा १०६
३४४. जातवेदः (अग्नि) १०६
१. शुक्रः १०६
३४५. जातवेदः (ब्रह्म) १०६
१. शुक्रः १०६
३४६. जातवेदः (भूमिः) १०६
१. शुक्रः १०६
३४७. जातवेदः (यमः) १०६
१. शुक्रः १०६

३४८. जातवेदः (वरुणः) १०७
  १. शुक्रः १०७
३४६. जातवेदः (वायुः) १०७
  १. शुक्रः १०७
३५०. जातवेदः (सूर्यः) १०७
  १. शुक्रः १०७
३५१. जातवेदः (सोमः) १०७
  १. शुक्रः १०७
३५2. जातवेदा १०७
  १. अथर्वा (पण्यकामः) १०७
  2. अथर्वांगिरा १०७
  ३. आदित्या देवाः १०७
  ४. कबन्धः १०७
  ५. गोतमः १०७
  ६. मरीचिः काश्यपः १०७
३५३. जातवेदाः १०८
  १. अथर्वा १०८
३५४. जातवेदाः मन्त्रोक्ता १०८
  १. चातनः १०८
३५५. जातवेदाः त्वष्टा सविता १०६
  १. अथर्वा १०६
३५६. जातवेदसोऽग्निः १०६
  १. ब्रह्म १०६
३५७. जायान्याः १०६
  १. अथर्वा १०६
३५८. जायापतिः १०६
  १. गृत्समदः १०६
३५६. जिज्ञासुः १०६
  १. प्रजापतिः १०६
३६०. जीवेश्वरौ १०६
  १. त्रितः १०६
३६१. तक्मनाशनः ११०
  १. भृग्वंगिरा ११०
३६2. तताः ११०
  १. अथर्वा ११०
३६३. ततामहाः ११०

१. अथर्वा ११०
३६४. तनूनपात् ११०
१. मेधातिथिः काण्वः ११०
३६५. तपः १११
१. ब्रह्म १११
३६६. तरन्तो वैददश्विः १११
१. श्यावाश्व आत्रेयः १११
३६७. तार्क्ष्यः १११
१. अथर्वा (स्वस्त्ययनकामः) १११
३६८. तार्क्ष्यः (अरिष्टनेमिः) १११
१. अरिष्टनेमिस् तार्क्ष्यः १११
३६९. तिरिन्दिरस्य पारशव्यस्य दानस्तुतिः १११
१. वत्सः काण्वः १११
३७०. तिस्रो देव्यः (सरस्वती–इळा–भारत्यः) १११
१. मेधातिथिः काण्वः १११
३७१. तृषिका: १११
१. भार्गवः १११
३७2. त्रसदस्योर् दानस्तुतिः १११
१. सोभरिः काण्वः १११
३७३. त्रिवृत् १११
१. भृग्वंगिरा १११
३७४. त्रिवृत् (अग्न्यादयः) ११2
१. अथर्वा ११2
३७५. त्रिषन्धिः ११३
१. भृग्वंगिरा ११३
३७६. त्रैककुदांजनम् ११४
१. भृगुः ११४
३७७. त्वष्टा ११४
१. अथर्वा ११४
2. दीर्घतमा ११५
३. दीर्घतमा औचथ्यः ११५
४. ब्रह्म ११५
५. मेधातिथिः ११५
६. मेधातिथिः काण्वः ११५
७. वामदेवः ११५
८. सङ्कुसुको१यामायनः ११५
९. बृहदुक्थो वामदेव्यः ११५

३७८. त्वष्टा पर्जन्य ब्रह्मणस्पति अदितिः (साग्री. सास्वा.)बहुदेवते इत्येके (सार्षेदी.)
१. वामदेवो गौतमः ११५
३७९. त्वष्टा शुक्रश्च ११५
१. गृत्समदः शौनकः ११५
३८०. त्वष्ट्रादयः ११५
१. अथर्वा (स्वस्त्ययनकामः) ११५
३८१. त्विषिः बृहस्पतिः ११६
१. अथर्वा (वर्चस्कामः) ११६
३८2. दक्षिण इन्द्रः तिरश्चिराजिः पितरः ११६
१. अथर्वा ११६
३८३. दक्षिणा तद्दातारो वा ११६
१. दिव्यो दक्षिणा वा प्राजापत्याः ११६
३८४. दधिक्रा ११६
१. वामदेवः ११६
2. वामदेवो गौतमः ११७
३८५. दधिक्रावा ११७
१. वामदेवो गौतमः ११७
३८६. दम्पतिः ११८
१. परमेष्ठी ११८
३८७. दम्पती ११८
१. अत्रिः ११८
2. कक्षीवान् दैर्धतमसः औशिजः ११८
३. गृत्समदः ११८
४. गोतमः ११८
५. प्रजापतिः ११८
६. मेधातिथिः ११८
७. विश्वेदेवाः ११९
३८८. दम्पत्ती ११९
१. मधुच्छन्दाः ११९
2. मनुर् वैवस्वतः ११९
३८९. दम्पत्त्योराशिषः ११९
१. मनुर् वैवस्वतः ११९
३९०. दम्पत्योः परिपथिनाशनौ ११९
१. सावित्री सूर्या ११९
३९१. दर्भः ११९

१. भृगुः (आयुष्कामः) ११६
३६2. दर्भमणिः १२०
१. ब्रह्म १२०
३६३. दिग् १२१
१. अप्रतिरथः १२१
३६४. दिगादयो लिंगोक्ता १२१
१. दीर्घतमा १२१
३६५. दिव चन्द्रमसः १२१
१. अंगिराः १२१
३६६. दिवादित्यौ १२१
१. अंगिराः १२१
३६७. दिव्या आपः १२१
१. अथर्वा १२१
३६८. दिशः १२१
१. अथर्वा १२१
2. प्रजापतिः १२२
३. प्रजापतिर् वैश्वामित्रो वाच्यो वा १२२
४. वसिष्ठः १२२
५. विश्वेदेवाः १२२
३६६. दुःष्वप्ननाशनम् १२२
१. अंगिराः प्रचेता यमश्च १२२
2. यमः १२२
४००. दुःस्वप्नघ्नम् १२७
१. प्रचेताः १२७
४०१. दुन्दुभिः १२७
१. अथर्वा १२८
2. गर्गः १२८
४02. दुन्दुभिः इन्द्रश्च १२८
१. गर्गः १२८
४०३. दूर्वा शालाः १२८
१. प्रमोचनः १२८
४०४. देवता ? १२८
१. ऋषि ? १२८
2. ऋषि ? १२८
३. गृत्समदः आंगिरसः शौनहोत्रो भार्गवः १३३
४०५. देवपत्न्यः १३३
१. अथर्वा १३३

2. प्रतिक्षत्र आत्रेयः १३३

४०६. देवभूमिः बृहस्पति–इन्द्र सोम १३४

१. गर्गः १३४

४०७. देवलः १३४

१. अग्निः १३४

2. सोमः १३४

४०८. देववातः १३४

१. अग्निः १३४

2. अग्न्यादयो मन्त्रोक्ताः १३४

३. इन्द्रः १३४

४. क्षेत्रपतिः १३४

५. प्रजापतिः १३४

६. रक्षोघ्नः १३४

७. यजमानः १३४

४०९. देववात भरतौ १३५

१. अग्निः १३५

४१०. देवाः १३५

१. अग्निः सौचीकः १३५

2. अथर्वा १३५

३. एवद्यूर् नौधसः १३५

४. देवापिर् आर्ष्टिषेणः १३५

५. प्रगाथः काण्वः १३६

६. बृहस्पतिर् वा लौक्य अदितिर् वा दाक्षायणी १३६

७. ब्रह्म १३६

८. भरद्वाजः १३६

९. वसिष्ठः १३६

१०. वृहद्दिवोऽथर्वा १३७

११. सावित्री सूर्या १३७

१2. सूर्या सावित्री १३७

४११. देवाः (अग्निः) १३७

१. अथर्वा (पण्यकामः) १३७

४१2. देवाः (इन्द्रः प्रजापतिः सविता सोमः अग्निः) १३७

१. अथर्वा (पण्यकामः) १३७

४१३. देवा ब्रह्म च १३७

१. पायुर् भरद्वाजः १३७

४१४. देवीर् द्वारः १३७

१. मेधातिथिः काण्वः १३७

४१५. देव्यः १३७

१. अग्निः १३७

2. मेधातिथिः काण्वः १३७

४१६. देव्यो द्वारः १३७

१. दीर्घतमा औचथ्यः १३७

४१७. देव्यौ होतारौ १३७

१. दीर्घतमा औचथ्यः १३७

४१८. देव्यौ होतारौ प्रचेतसौ १३७

१. मेधातिथिः काण्वः १३७

४१९. द्यावापृथिवी १३८

१. अथर्वा १३८

2. आथर्वणः दध्यङ् १३८

३. गोतमः १३८

४. दध्यङ् आथर्वणः १३८

५. दीर्घतमा १३८

६. परमेष्ठी प्रजापतिः १३८

७. ब्रह्म १३८

८. भरद्वाजो बार्हस्पत्यः १३८

९. मृगारः १३८

१०. मेधातिथिः १३९

११. वामदेवो गौतमः १३९

४२०. द्यावापृथिवी मित्रः बृह्मणस्पतिः सविता च १३९

१. भृग्वंगिरा १३९

४२१. द्यावापृथिवी मित्रावरुणौ च अग्निः १३९

१. परमेष्ठी प्रजापतिः १३९

४22. द्यावापृथिवी सप्तसिन्धवः १३९

१. गरुत्मान् १३९

४2३. द्यावापृथिव्यादयः १३९

१. शम्भूः १३९

४2४. द्यावापृथिव्यादयो मन्त्रोक्ता १३९

१. प्रजापतिः १३९

४2५. द्यावापृथिव्याविन्द्रश्च १३९

१. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः १४०

४2६. द्यावापृथिव्यौ १४०

१. अगस्त्यो मैत्रावरुणिः १४०

2. गृत्समदः शौनकः १४०

३. दीर्घतमा औचथ्यः १४०
४. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः १४१
५. भरद्वाजः १४१
६. भरद्वाजो बार्हस्पत्यः १४१
७. मधुच्छन्दाः १४१
८. मेधातिथिः काण्वः १४१
९. वसिष्ठः १४१
१०. वामदेवो गौतमः १४२
४2७. द्यावापृथिव्यौ (प्रथमपादस्य) अगिनः (द्वितीयस्य) १४२
१. कुत्स आंगिरसः १४२
४2८. द्यावापृथिव्यौ विश्वेदेवाः १४२
१. वामदेवः १४२
४2९. द्यावापृथिव्यौ विश्वेदेवाः मरुतः आपः १४2
१. अथर्वा १४2
४३०. द्यावापृथिव्यौ हविर्धाने वा १४३
१. गृत्समदः शौनकः १४३
४३१. द्यौ १४३
१. अथर्वा १४३
४३2. द्यौरित्यादयः १४३
१. प्रजापतिः १४३
४३३. द्रविणोदा १४३
१. गृत्समदः १४३
2. गृत्समदः शौनकः १४३
३. मयोभूः १४३
४. मेधातिथिः काण्वः १४३
५. ऋषि–? १४३
४३४. द्रविणोदा अग्निः शुद्धोग्निर् वा १४३
१. कुत्स आंगिरसः १४४
४३५. द्रविणोदादयः १४४
१. वृहद्दिवोऽथर्वा १४४
४३६. द्रुघण इन्द्रो वा १४४
१. मुद्गलो भार्म्यश्वः १४४
४३७. धन अन्न दान प्रशंसा १४५
१. भिक्षुः १४५
४३८. धनपतिः १४५
१. प्रतिवेदनः १४५

४३९. धनुः १४५
१. पायुर् भरद्वाजः १४५
४४०. धनुर्वेदाध्यापकाः १४५
१. भरद्वाजः १४५
४४१. धर्मः अश्विनौ पृत्यृचं मन्त्रोक्ता वा १४५
१. अथर्वा १४५
४४2. धाता १४६
१. सङ्कुसुको यामायनः १४६
४४३. धात्रादयो मन्त्रोक्ता १४६
१. भृगुः १४६
४४४. ध्रुवः १४६
१. अथर्वा १४६
४४५. ध्रुवा विष्णु कल्माषग्रीवः वीरुधः १४७
१. अथर्वा १४७
४४६. नक्षत्राणि १४७
१. गार्ग्यः १४७
४४७. नक्षत्रादयः १४७
१. प्रजापतिः १४७
४४८. नद्यः १४८
१ . विश्वामित्रो गाथिनः १४८
2. वसिष्ठः १४८
३. सिन्धुक्षित् प्रैयमेधः १४८
४४९. नराशंसः १४९
१. मेधातिथिः काण्वः १४९
४५०. नितत्नी वनस्पतिः १४९
१. वीतहव्यः (केशवर्धन कामः) १४९
४५१. निर्ऋति १४९
१. आयुर्वर्चोबलकामः १४९
४५2. निर्ऋतिः १४९
१. द्रुह्वणः (आयुर्वर्चोबलकामः): १४९
2. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः १४९
३. भगः १४९
४. मधुच्छन्दाः १५०
४५३. निर्ऋति द्यावापृथिव्यादयो मन्त्रोक्ता १५०
१. भृग्वंगिरा १५०
४५४. निर्ऋतिः सोमश्च १५०

१. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः १५०
४५५. निविदः १५१
१. ब्रह्म १५१
४५६. न्यायधीशः १५१
१. प्रजापतिः १५१
४५७. पंच प्रदिशः १५१
१. वसिष्ठः १५१
४५८. पणयः १५१
१. सरमा देवशुनी १५१
४५९. पत्नी १५१
१. अग्निः १५१
2. कुसुरुबिन्दुः १५१
३. मधुच्छन्दाः १५१
४६०. पथ्या स्वस्तिः १५२
१. गयः प्लातः १५२
४६१. पन्थानः १५२
१. अथर्वा (पण्यकामः) १५२
४६2. पक्ष्मनाशनी १५२
१. सावित्री सूर्या १५२
४६३. परमात्मा १५२
१. कौण्डिन्यः १५२
2. प्रजापतिः १५२
३. मेधाकामः १५२
४. वरुणः १५२
५. वसिष्ठः १५२
६. स्वयम्भुर् ब्रह्म १५२
४६४. परमात्मा देवाश्च १५३
१. भृग्वंगिरा १५३
४६५. परमेश्वरः १५३
१. नारायणः १५३
2. प्रजापतिः १५३
३. विवस्वान् १५३
४. शंयुर् बार्हस्पत्यः १५३
५. स्वयम्भुर् ब्रह्म १५४
४६६. परमेश्वरविद्वांसौ १५४
१. मेधाकामः १५४

४६७. परमेष्ठी प्रजापतिः १५४
१. वसिष्ठः १५४
४६८. पराशरः इन्द्रः १५४
१. अथर्वा १५४
४६९. पर्जन्यः १५४
१. अत्रिर् भौमः १५४
2. अथर्वा १५४
३. वसिष्ठः कुमारो वा आग्नेयः १५५
४७०. पर्जन्यादयो मन्त्रोक्ताः १५५
१. अथर्वा १५५
४७१. पवमानः १५५
१. अरुण त्रसदस्यू १५५
2. जमदग्निः भार्गवः १५६
४७2. पवमानः सोमः १५६
१. अकृष्टा माषा १५६
2. अग्नयो (धिष्ण्या) ऐश्वराः १५७
३. अग्नयो धिष्ण्या ऐश्वराः १५७
४. अग्नयो धिष्ण्या ऐश्वराः (ऋसर्व. साग्री.सास्वा.); वाजिनः(सार्षेदी.) ऋण त्रसदस्यू (सास्वा.) १५८
५. अग्नयो धिष्ण्या ऐश्वराः(ऋसर्व. साग्री.सास्वा.); वामदेवः(सार्षेदी.) ऋण त्रसदस्यू (सास्वा.) १५८
६. अग्निश् चाक्षुषः १५८
७. अत्रिर् भौमः १५८
८. अनानतः पारुच्छेपिः १५९
९. अन्धीगुः श्यावाश्विः १६०
१०. अमहीयुः १६०
११. अमहीयुर् आंगिरसः १६०
१2. अम्बरीष ऋजिष्वा च १६२
१३. अम्बरीषो वार्षागिरः ऋजिष्वा भारद्वाजश्च १६२
१४. अयास्यः १६३
१५. अयास्य आंगिरसः १६३
१६. अवत्सारः १६३
१७. अवत्सारः काश्यपः १६४
१८. असितः काश्यपो देवलो वा (ऋसर्व.साग्री.); असितः काश्यपः (सार्षेदी.) ४७५; ७६; ८५; ८६ १६५
१९. इध्मवाहो दार्ढच्युतः १७१

२०.	इन्द्र प्रमतिर् वासिष्ठः	१७१
२१.	उचथ्यः	१७२
22.	उचथ्य आंगिरस	१७२
२३.	उपमन्युः वासिष्ठः	१७३
२४.	प्रमन्युर् वासिष्ठः	१७३
२५.	उरु	१७३
२६.	उरुर् आंगिरसः	१७३
२७.	उर्ध्वसद्मा	१७३
२८.	उशना	१७३
२९.	उशना काव्यः	१७४
३०.	ऊर्ध्व सद्मा आंगिरसः	१७५
३१.	ऋणंचयः	१७५
३2.	ऋणंचयो आंगिरसः	१७५
३३.	ऋणंचयो राजर्षिः	१७५
३४.	ऋजिष्वा	१७५
३५.	ऋजिश्वा भारद्वाजः	१७५
३६.	ऋषभो वैश्वामित्रः	१७६
३७.	कक्षीवान (दैर्धतमसः औशिजः)	१७६
३८.	कण्वः	१७६
३९.	कण्वो घौरः	१७७
४०.	कर्णश्रुत्वासिष्ठः	१७७
४१.	कर्णश्रुद्वासिष्ठः(साग्री. सास्वा. ऋसर्व.); दृढीको वासिष्ठः(सार्षेदी.)	१७७
४2.	कविः	१७७
४३.	कविर् भार्गवः	१७८
४४.	कश्यपः	१८०
४५.	कश्यपो मारीचः	१८२
४६.	कुत्स आंगिरसः	१८२
४७.	कृतयशा आंगिरसः	१८३
४८.	गृत्समदः शौनकः (साग्री.सास्वा.ऋसर्व.); कुत्स आंगिरसः(सार्षेदी.)	१८३
४९.	गृत्समदः शौनकः(सार्षेदी.) कुत्स आंगिरसः गृत्समदः(साग्री.सास्वा.)	१८३
५०.	गोतमः	१८३
५१	गोरवीति शाक्त्यः	१८४
५2.	गौरिवीतिः	१८४
५३.	चक्षुर् मानवः	१८४
५४.	जमदग्निः	१८४
५५.	जमदग्निः भार्गवः	१८५

५६.	जेता माधुच्छन्दसः	१८६
५७.	त्रय ऋषिगणाः	१८६
५८.	त्रित आप्त्यः	१८६
५६.	यरुणस् त्रैवृष्णः त्रसदस्युः पौरुकुत्स्यः	१८७
६०.	दृळहच्युतः आगस्त्यः	१८८
६१.	द्वित आप्त्यः	१८८
६2.	नहुषो मानवः	१८८
६३.	निध्रुविः काश्यपः	१८६
६४.	नृमेधः	१६०
६५.	नृमेधः आंगिरसः	१६०
६६.	नृमेध आंगिरसः (प्रथमः पादः) इध्मवाहो दार्ढच्युतः (त्रयः पादाः)	१६१
६७.	नोधा	१६१
६८.	नोधा गौतमः	१६१
६६.	नोधा गौतमः (साग्री.सास्वा.ऋसर्व.) नृमेधा काक्षीवतः (सार्षेदी.)	१६१
७०.	परमेष्ठी	१६१
७१.	नोधा गौतमः (साग्री. सास्वा. ऋसर्व.) नृमेधा काक्षीवतः (सार्षेदी.)	१६१
७2.	पराशरः शाक्त्यः	१६१
७३.	पर्वतः नारदौ	१६२
७४.	पर्वतनारदौ काण्वौ	१६२
७५.	पर्वतनारदौ काण्वौ शिखण्डिन्यौ अप्सरसौ काश्यपौ वा	१६३
७६.	पवित्रः	१६३
७७.	पवित्र आंगिरसौ	१६४
७८.	पवित्र अंगिरसो वा वसिष्ठो वा उभौ वा	१६४
७६.	पृश्निय अजाः	१६४
८०.	प्रजापतिर्वाच्यः	१६५
८१.	प्रजापतिर् वैश्वामित्रः (साग्री.५५३); प्रजापतिः (ऋसर्व.)	१६५
८2.	प्रजापतिर् वैश्वामित्रो वाच्यो वा (साग्री.सास्वा.); प्रजापतिः(सार्षेदी.ऋसर्व.)	१६५
८३.	प्रतर्दनो दैवोदासिः	१६५
८४.	प्रन्धीमुश्यावाश्विः	१६७
८५.	प्रभूवसुः	१६७
८६.	प्रभूवसुर् आंगिरसः	१६७
८७.	प्रस्कण्वः	१६८
८८.	प्रस्कण्वः काण्वः	१६८
८६.	प्रियमेधः	१६८
६१.	प्रियमेध आंगिरसः	१६८
६2.	प्रियमेध आंगिरसः (प्रथमः पाठः) नृमेध आंगरिसः (त्रयःपादाः)	१६८

९३. बिन्दुः	१९९
९४. बृहन्मतिर् आंगिरसः	१९९
९५. भरद्वाजः	१९९
९६. भरद्वाजो बार्हस्पत्यः	१९९
९७. भृगुर्वारुणिर् जमदग्निर् भार्गवो वा	२००
९८. भृगुर्वारुणिः जमदग्निर्भार्गवो वा	२०१
९९. मधुच्छन्दाः	२०१
१००. मधुच्छन्दा वैश्वामित्रः	२०१
१०१. मनुर् आप्स्वः	२०१
१०2. मनुः सांवरणः	२०२
१०३ मन्युर् वासिष्ठः	२०२
१०४. मन्युर् वासिष्ठः (साग्री. सास्वा.); इन्दुर् वासिष्ठः (सार्षेदी.)	२०२
१०५. मृळीको वासिष्ठः	२०२
१०६. मेधातिथिः	२०३
१०७. मेधातिथिः काण्वः	२०३
१०८. मेध्यातिथिः	२०३
१०९. मेध्यातिथिः काण्वः	२०४
११०. ययातिर् नाहुषः	२०४
११०. रहूगणः	२०४
१११. रहूगण आंगिरसः	२०४
११2. रेणुर् वैश्वामित्रः	२०५
११३. रेभसूनू काश्यपौ	२०५
११४. वत्सप्रिर्भालन्दनः	२०६
११५. वत्सप्रिर् भालन्दनः (साग्री. सास्वा. ऋसर्व.); वत्स (सार्षेदी. ७४); वत्सप्रिय (सार्षेदी. ७७)	२०६
११६. वसिष्ठः	२०७
११७. वासिष्ठो मैत्रावरुणिः	२०७
११८. वासुर् भरद्वाजः	२०८
११९. वसुर्भारद्वाजः	२०८
१2०. वसुश्रुत आत्रेयः	२०९
१2१. विश्वामित्रः	२०९
१22. विश्वेदेवाः	२०९
१2३. वृषगणो वासिष्ठः	२०९
१2४. वृहन्मतिः	२१०
१2५. वेनो भार्गवः	२१०
१2६. शक्तिः	२११

१2७. शक्तिर्वासिष्ठः २११
१2८. शतं वैखानसः २११
१2९. शिशुः २१२
१३०. शुनःशेप आजीगर्तिः; देवरातः कृत्रिमो वैश्वामित्रः (साग्री. सास्वा.); शुनःशेप (ऋसर्व.) २१२
१३१. श्यावाश्वः २१३
१३2. श्यावाश्व आत्रेयः २१३
१३३. श्रुतकक्षः सुकक्षो वा आंगिरसः २१३
१३४. सप्तर्षयः २१३
१३५. सिकता निवावरी २१६
१३६. हरिमन्तः २१७
१३७. हिरण्यस्तूपः २१८
१३८. हिरण्यस्तूपः आंगिरसः २१८
४७३. पवमानः सोमः पूषा वा २१९
१. अत्रिर् भौमः २१९
४७४. पवमानाध्येता २१९
१. पवित्र अंगिरसो वा वसिष्ठो वा उभौ वा २१९
४७५. पवित्रकर्त्ता २१९
१. वैखानसः – य. १९.४2 २१९
४७६. पशवः २१९
१. सविता २१९
४७७. पशुपतिः २२०
१. अथर्वा २२०
४७८. पाकस्थाम्नः कौरयाणस्य दानस्तुतिः २२०
१. मेध्यातिथिः काण्वः २२०
४७९. पाप्मा २२०
१. ब्रह्म २२०
४८०. पितृमेधः २२०
१. सङ्कुसुकोऽयामायनः २२०
४८१. पितृमेधः प्रजापतिर् वा २२०
१. सङ्कुसुकोऽयामायनः २२०
४८2. पितरः २२०
१. अथर्वा २२०
2. आदित्या देवा वा २२१
३. प्रजापतिः २२१
४. वामदेवः २२१
५. वैखानसः २२२

६. शङ्खः २२२
७. शंखो यामायनः २२२
८. सोमाहुतिः २२३
४८३. पुरीष्या अग्नये २२३
१. गाथी कौशिकः २२३
४८४. पुरुमीळहो वैददश्विः २२३
१. श्यावाश्व आत्रेयः २२३
४८५. पुरुरवा ऐळः २२३
१. उर्वशी २२३
४८६. पुरुषः २२४
१. नारायणः २२४
2. नारायणः (साग्री. सास्वा.) साध्यो नारायणः (सार्षेदी.) २२६
४८७. पुरुषः ब्रह्मप्रकाशनम् २२६
१. नारायणः २२६
४८८. पुरुषेश्वरः २२८
१. प्रजापतिः २२८
४८९. पुरोहित–यजमानौ २२८
१. नाभानेदिष्टः २२८
४९०. पूषा २२८
१. अर्थवणः २२८
2. उपरिबभ्रवः २२९
३. ऋजिष्वा २२९
४. कण्वो घौरः २२९
५. देवश्रवा यामायनः २२९
६. परुच्छेपो दैवोदासिः २२९
७. भरद्वाजो बार्हस्पत्यः २३०
८. मेधातिथिः काण्वः २३१
९. विमद ऐन्द्रः वसुकृद्वा वासुक्रः (साग्री. सास्वा.) विमद ऐन्द्रः वसुकृद्वावसुक्रो वा प्राजापत्यः(ऋसर्व.); वसुकृदृषि विमदो वा (सार्षेदी.) २३१
१०. विश्वामित्रो गाथिनः २३१
११. शंयुर् बार्हस्पत्यः २३१
४९१. पूषाः २३१
१. अथर्वा २३१
2. सुहोत्रः २३२
४९2. पूषादयः २३२

१. प्रजापतिः २३२
४६३. पूषादयो मन्त्रोक्ताः २३२
१. अथर्वा २३२
2. तापसः २३२
४६४. पूषादयो लिंगोक्ताः २३२
१. दीर्घतमा २३२
४६५. पृथिवी २३२
१. अत्रिर् भौमः २३२
2. आथर्वणः दध्यङ् २३२
३. दध्यङ् आथर्वणः २३३
४. मेधातिथिः २३३
५. मेधातिथिः काण्वः २३३
४६६. पृथिव्यग्नी २३३
१. अंगिराः २३३
४६७. पृथिव्यादयः २३३
१. विश्वेदेवाः २३३
४६८. पृथिव्यादयो मन्त्रोक्ताः २३३
१. वृहच्छुक्रः २३३
४६९. पृथिव्यन्तरिक्षे २३३
१. वसिष्ठः २३३
५००. पृथिवी पर्जन्यः २३३
१. अथर्वा २३३
५०१. पृथुश्रवसः कानीनस्य दानस्तुतिः २३४
१. वशोऽश्व्यः २३४
५०2. पृश्निर्द्यावा भूमी वा २३४
१. शंयुर् बार्हस्पत्यः २३४
५०३. पौर्णमासी २३४
१. अथर्वा २३४
५०४. पृश्निपर्णी २३४
१. चातनः २३४
५०५. प्रजा २३४
१. गोतमः २३४
५०६. प्रजाः२३४
१. प्रजापतिः २३४
५०७. प्रजापतिः २३५
१. आदित्या देवाः २३५
2. इन्द्राग्नी २३५

३. उशना २३५
४. गालवः २३५
५. गृत्समदः २३५
६. गोतमः २३५
७. त्रिशिराः २३५
८. दीर्घतमा २३५
९. देववातः २३५
१०. देवश्रवाः २३६
११ देवाः २३६
१2. परमेष्ठी २३६
१३. परमेष्ठी प्रजापतिः २३६
१४. प्रजापतिः २३६
१५. बृहस्पतिः २३७
१६. यमः २३७
१७. वत्सः २३७
१८. वत्सारः काश्यपः २३७
१९. वरुणः २३७
२०. वसिष्ठः २३७
२१. वामदेवः २३७
22. वामदेवो गौतमः २३८
2३. विश्वकर्मा २३८
2४. विश्वामित्रः २३८
2५. विश्वेदेवाः २३८
2६. विहव्यः २३८
2७. शुनःशेप आजीगर्ति कृत्रिमो देवरातो वैश्वामित्रो वा (साग्री. सास्वा.)
शुनःशेप आजगर्ति कृत्रिमो देवरातो वैश्वामित्रः (ऋसर्व.);
शुनःशेपः (सार्षेदी.) २३८
2८. शुनः शेपः २३९
2९. शङ्खः २३९
३०. हिरण्यगर्भः २३९
३१. प्रजापतिः २३९
५०८. प्रजापतयः २३९
१. देवाः २३९
2. देवाः २३९
५०९. प्रजापतयो गृहस्थाः २३९
१. देवाः २३९

५१०. प्रजापतिः धाता २३९
१. ब्रह्म २३९
५११. प्रजापतिः स्तनयित्नुः २३९
१. अथर्वा २३९
५12. प्रजा–सेनापतिः २४०
१. भरद्वाजः २४०
५१३. प्रजापत्यादयः २४०
१. विश्वेदेवाः २४०
५१४. प्रजापत्यादयः २४०
१. प्रजापतिः २४०
५१५. प्रतीची वरुणः पृदाकु अन्नम् २४१
१. अथर्वा २४१
५१६. प्रतोदः २४१
१. पायुर् भरद्वाजः २४१
५१७. प्रपणः विक्रयश्च २४१
१. अथर्वा (पण्यकामः) २४१
५१८. प्रयत्नवन्तो जीवादयः २४१
१. प्रजापतिः २४१
५१९. प्रष्ट्रसमाधातारौ २४१
१. प्रजापतिः २४१
५20. प्रष्ठा २४१
१. प्रजापतिः २४१
५2१. प्रस्कण्वस्य दानस्तुतिः २४१
१. कृशः काण्वः २४१
2. पृषध्रः काण्वः २४२
५22. प्रस्तोकस्य सार्जयस्य दानस्तुतिः २४२
१. गर्गः २४२
५2३. प्राणः २४२
१. उशना २४२
2. गोतमः २४२
३. ब्रह्म २४२
४. लोपामुद्रा २४२
५. वेदर्भिः भार्गवः २४२
५2४. प्राणाः २४३
१. कण्वः २४३
५2५. प्राणादयः २४३

१. प्रजापतिः २४३

५2६. प्राणादयो लिंगोक्ताः २४४

१. दीर्घतमा २४४

५2७. प्राणपानौ २४४

१. ब्रह्म 2४४

५2८. प्राची अग्निः असितः आदित्या दक्षिण इन्द्रः तिरश्चिराजिः पितरः 2४४

१. अथर्वा 2४४

५2६. बर्हिः 2४४

१. दीर्घतमा औचथ्यः 2४४

५३०. बलासः 2४४

१. बभ्रुपिङ्गलः 2४४

५३१. बाद्यहः 2४४

१. मेधातिथिः काण्वः 2४४

५३2. बार्हस्पत्यौदनः 2४४

१. अथर्वा 2४४

५३३. बृबुतक्षा 2४५

१. शंयुर् बार्हस्पत्यः 2४५

५३४. बृहस्पतिः 2४५

१. अगस्त्यो मैत्रावरुणिः 2४५

2. अथर्वा 2४५

३. अथर्वा (वर्चस्कामः) 2४६

४. अप्रतिरथ ऐन्द्रः 2४६

५. अयास्यः 2४६

६. आथर्वणः दध्यङ् 2४८

७. इन्द्राग्नी 2४८

८. उपरिबभ्रवः 2४८

६. कण्वो घौरः 2४८

१०. गृत्समदः शौनकः 2४६

११. तपुर्मूर्धा बार्हस्पत्यः 2५०

१2. दधिक्रावा 2५०

१३. दध्यङ् आथर्वणः 2५०

१४. दीर्घतमा 2५०

१५. नाभानेदिष्टः 2५०

१६. परमेष्ठी प्रजापतिः 2५०

१७. परुच्छेपो दैवोदासिः 2५०

१८. प्रजापतिः 2५०

१९. भरद्वाजः २५०
20. भरद्वाजो बार्हस्पत्यः २५१
21. मेधातिथिः २५१
22. वसिष्ठः २५१
23. वामदेवः २५१
24. वामदेवो गौतमः २५२
25. विप्रबन्धुः २५२
26. विश्वामित्रो गाथिनः २५२
५३५. बृहस्पतिः अश्विनौ २५२
१. अथर्वा (वर्चस्कामो यशस्कामश्च) २५२
५३६. बृहस्पतिः आदित्यः २५२
१. वेनः २५२
५३७. बृहस्पत्यादयः २५३
१. उच्छोचनः २५३
५३८. बृहस्पति युक्ता अवस्वन्तः २५३
१. अथर्वा २५३
५३९. बृहस्पतिर् अग्नीषोमौ च २५३
१. चातनः २५३
५४०. ब्रह्म २५३
१. ब्रह्म २५३
2. ब्रह्म २५३
५४१. ब्रह्मः २५४
१. दीर्घतमा २५४
५४2. ब्रह्मगवी २५४
१. कश्यपः २५४
2. मयोभूः २५६
५४३. ब्रह्मणम् २५७
१. ब्रह्म २५७
५४४. ब्रह्मजाया २५७
१. मयोभूः २५७
५४५. ब्रह्मणस्पतिः २५८
१. अथर्वा २५८
2. अथर्वांगिरा – अ. ६.१०१.१–३ २५८
३. कण्वः – य. ३४.५६–५७ २५८
४. गृत्समदः २५८
५. गृत्समदः शौनकः २५८
६. ब्रह्म २६०

७.	मेधातिथिः काण्वः	2६०
८.	मातृनामा	2६०
६.	शिरिम्बिठोभारद्वाजः	2६०
१०.	सत्यधृतिर्–वरुणिः	2६०
५४६.	ब्रह्मणस्पतिः अभीवर्तमणिः	2६१
१.	वसिष्ठः	2६१
५४७.	ब्रह्मणस्पतिर् इन्द्रश्च	2६१
१.	गृत्समदः शौनकः	2६१
५४८.	ब्रह्मणस्पतिर्–इन्द्र–सोमश्च	2६१
१.	मेधातिथिः काण्वः	2६१
५४६.	ब्रह्मणस्पतिदक्षिणे	2६१
१.	मेधातिथिः काण्वः	2६१
५५०.	ब्रह्मणस्पतिः दन्ता	2६१
१.	अथर्वा	2६१
५५१.	ब्रह्मणस्पतिः (विषभैषज्यं)	2६१
१.	अथर्वा	2६१
५५2.	ब्रह्मणस्पत्यादयः	2६१
१.	अथर्वा	2६१
५५३.	ब्रह्म आत्मा	2६१
१.	वेनः	2६२
५५४.	ब्रह्म आदित्यः	2६२
१.	अथर्वा	2६२
५५५.	ब्रह्मचारी	2६२
१.	ब्रह्म	2६२
५५६.	ब्रह्मा	2६३
१.	प्रजापतिः	2६३
५५७.	ब्रह्मादयः	2६३
१.	प्रजापतिः	2६३
५५८.	ब्रह्मादित्यङ्गे	2६३
१.	अथर्वा	2६३
५५६.	ब्राह्मणः	2६४
१.	गरुत्मान्	2६४
५६०.	ब्रह्मौदनः	2६४
१.	ब्रह्म	2६४
५६१.	भगः	2६६
१.	अथर्वा	2६६

2. ब्रह्म 2६६
३. वसिष्ठः 2६६
५६2. भवाशर्वौ 2६६
१. मृगारः 2६६
५६३. भाववृत्तम् 2६७
१. अधमर्षणो माधुच्छन्दसः 2६७
2. प्रजापतिः परमेष्ठी 2६७
३. यज्ञः प्राजापत्यः 2६७
४. यमी 2६७
५६४. भिषग्वराः 2६८
१. वरुणः 2६८
५६५. भिषजः 2६८
१. वरुणः 2६८
५६६. भूमिः 2६८
१. अथर्वा 2६८
2. उद्दालकः 2७०
३. प्रजापतिः 2७०
५६७. भूम्यादयः 2७१
१. प्रजापतिः 2७१
५६८. भूवादयो मन्त्रोक्ताः 2७१
१. अथर्वा 2७१
५६९. भेषजम् 2७१
१. भागलिः 2७१
५७०. भैषज्य आयुष्यं ओषधयः 2७१
१. अथर्वा 2७१
५७१. मण्डूकाः 2७२
१. अथर्वा 2७२
2. वसिष्ठः 2७२
५७2. मघवा 2७३
१. गोतमः 2७३
५७३. मधुला औषधिः 2७३
१. विश्वामित्रः 2७३
५७४. मधुवनस्पतिः 2७३
१. अथर्वा 2७३
५७५. मनः 2७३
१. अथर्वा 2७३
2. प्रजापतिः 2७४

३. बन्धुः २७४
४. शिवसङ्कल्पः २७४
५. शौनकः २७४
५७६. मन आदयो दैव्याऋषयः २७४
१. ब्रह्मा २७४
५७७. मन आवर्त्तनम् २७४
१. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः २७४
५७८. मनुष्यः २७५
१. जमदग्निः भार्गवः २७५
५७९. मनुष्याः २७५
१. जमदग्निः भार्गवः २७५
2. बृहदुक्थो वामदेव्यः २७५
५८०. मनुष्येषवः २७५
१. ब्रह्म २७५
५८१. मन्त्रोक्ता २७५
१. अथर्वा २७५
२. कौशिकः २७६
३. परुच्छेपो दैवोदासिः २८०
४. प्रजापतिः २८०
५. ब्रह्म २८०
६. शौनकः २८०
५८2. मन्त्रोक्ताः २८१
१. अंगिराः २८१
2. अंगिराः प्रचेता यमश्च २८१
३. अथर्वा (अभयकामः) २८१
४. अथर्वांगिरा २८१
५. तापसः २८२
६. प्रत्यंगिरसः २८२
७. प्रस्कण्वः २८३
८. मातृनामा २८३
९. यमः २८४
१०. वसिष्ठः २८४
११. विश्वामित्रः २८५
१2. विश्वेदेवाः २८५
१३. शन्तातिः २८५
१४. शुक्रः २८६

५८३. मन्त्रोक्ताः अथवा मातृनामा 2८७
१. मातृनामा 2८७
५८४. मन्युः 2८८
१. ब्रह्मास्कन्दः 2८८
2. भृग्वंगिरा 2८६
३. मनुस् तापसः 2८६
५८५. मन्युः अध्यातमम् 2६०
१. कौरुपथिः 2६०
५८६. मन्यु विनाशनम् 2६०
१. शुनः शेपः 2६०
५८७. मन्युशमनम् 2६१
१. भृग्वंगिरा 2६१
५८८. मरुतः 2६१
१. अगस्त्यः 2६१
2. अगस्त्यो मैत्रावरुणिः 2६१
३. अंगिराः 2६२
४. अथर्वा 2६३
५. अप्रतिरथः 2६३
६. एवयामरुद् आत्रेयः 2६३
७. कण्वो घौरः 2६४
८. कण्वो घौरः (सार्षेदी.सर्व. १.३७.१०) प्रस्कण्वः काण्वः(साग्री.सास्वा.) 2६५
६. गृत्समदः शौनकः 2६५
१०. गृत्समदः २६६
११. गोतमः 2६६
१2. गोतमो राहूगणः 2६६
१३. दीर्घतमा 2६७
१४. परमेष्ठी 2६७
१५. परुच्छेपो दैवोदासिः 2६७
१६. पुनर्वत्सः काण्वः 2६७
१७. प्रजापतिः 2६८
१८. प्रस्कण्वः काण्वः (साग्री. सास्वा. ए सार्षेदी.) कण्वो घौरः (सर्व.१.३७.१०) 2६८
१६. बिन्दुः पूतदक्षो वा (ऋसर्व.) बिन्दुः पूतदक्षो वा आंगिरसः (सास्वा.) 2६८
2०. ब्रह्म 2६६
2१. भरद्वाजः 2६६
22. भरद्वाजो बार्हस्पत्यः 2६६
2३. मधुच्छन्दाः ३००

2४. मधुच्छन्दा वैश्वामित्रः ३००
2५. मृगारः ३००
2६. मेधातिथिः ३००
2७. मेधातिथिः काण्वः ३००
2८. वसिष्ठः ३००
2९. वासिष्ठो मैत्रावरुणिः ३०३
३०. विश्वामित्रो गाथिनः ३०३
३१. शन्तातिः ३०३
३2. शंयुर् बार्हस्पत्यः ३०३
३३. श्यावाश्व आत्रेयः ३०३
३४. सप्तर्षयः ३०७
३५. सोभरिः काण्वः ३०८
३६. सौभरिः काण्वः ३०९
३७. स्यूमरश्मिर्भार्गवः ३०९
३८. ऋषि–? ३१०

५८९. मरुतः पूषा बृहस्पतिः अग्निश्च ३१०
१. ब्रह्म ३१०

५९०. मरुतः इन्द्रश्च ३१०
१. मधुच्छन्दा वैश्वामित्रः ३१०

५९१. मरुतः (साग्री. सास्वा. ऋसर्व.) रुद्रः (सार्षेदी.) ३१०
१. एवयामरुद्आत्रेयः ३१०

५९2. मरुतां पिता ३१०
१. अथर्वा ३१०

५९३. मरुतो माधवश्च ३१०
१. गृत्समदः शौनकः ३१०

५९४. मरुतो लिंगोक्ता वा ३१०
१. शंयुर् बार्हस्पत्यः ३१०

५९५. मरुतो वाग्निश्च ३१०
१. श्यावाश्व आत्रेयः ३१०

५९६ महावीर सेनापतिः ३११
१. भरद्वाजः ३११

५९७. मही ३११
१. काण्वः ३११

५९८. महेन्द्रः ३११
१. प्रगाथः ३११
2. बृहद्दिवः ३११

३. मेधातिथिः ३११
५९९. मायाभेदः ३११
१. पतङ्गः प्राजापत्यः ३११
2. पतङ्गः प्राजापत्यः ३११
६००. मारुतादयः ३१२
१. प्रजापतिः ३१२
६०१. मारुतपर्जन्यौ ३१२
१. अथर्वा ३१२
६02. मासाः ३१२
१. प्रजापतिः ३१२
६०३. मित्रः ३१२
१. विश्वामित्रः ३१२
2. विश्वामित्रो गाथिनः ३१२
३. सिन्धुद्वीपः ३१३
६०४. मित्रादयः ३१३
१. गोतमः ३१३
2. प्रजापतिः ३१३
६०५. मित्रादयो मन्त्रोक्ताः ३१३
१. तापसः ३१३
६०६. मित्रादयो लिंगोक्ताः ३१३
१. आथर्वणः दध्यङ् ३१३
2. दध्यङ् आथर्वणः ३१३
३. दीर्घतमा औचथ्यः ३१३
६०७. मित्रावरुणौ ३१४
१. अथर्वा ३१४
2. अर्चनाना आत्रेयः ३१५
३. उरुचक्रिर् आत्रेयः ३१५
४. कण्वो घौरः ३१६
५. गृत्समदः ३१६
६. गृत्समदः शौनकः ३१६
७. जमदग्निः ३१६
८. जमदग्निः भार्गवः ३१६
९. त्रसदस्युः ३१६
१०. दीर्घतमा औचथ्यः ३१६
११. परुच्छेपो दैवोदासिः ३१७
१2. बाहुवृक्तः आत्रेयः ३१८
१३. ब्रह्म ३१८

१४. भरद्वाजो बार्हस्पत्यः ३१८
१५. मधुच्छन्दाः ३१६
१६. मधुच्छन्दा वैश्वामित्रः ३१६
१७. मृगारः ३१६
१८. मेधातिथिः काण्वः ३१६
१६. यजत आत्रेयः ३२०
20. रातहव्य आत्रेयः ३२०
21. वरुणः ३२०
22. वसिष्ठः ३२०
23. विश्वमना वैयश्वः ३२२
24. विश्वामित्रः ३२३
25. विश्वामित्रो गाथिनः ३२३
26. विश्वामित्रो गाथिनो जमदग्नि र्वा ३२३
27. शकपूतो नार्मेधः ३२३
28. शम्भूः ३२४
26. श्रुतिविद् आत्रेयः ३२४
६०८. मित्रावरुणौ आदित्याश्च ३२४
१. जमदग्निः भार्गवः ३२४
६०६. मित्रावरुणौ नभस्यश्च ३२४
१. गृत्समदः शौनकः ३२४
६१०. मित्रादयो विश्वेदेवाः ३२४
१. अथर्वा ३२४
६११. मृत्युः ३२५
१. अथर्वा ३२५
2. अथर्वा (स्वस्त्ययनकामः) ३२५
३. आयुर्वर्चोबलकामः ३२५
४. द्रुह्वणः (आयुर्वर्चोबलकामः) ३२५
५. भृगुः ३२५
६१2. मेखला ३२६
१. अगस्त्यः ३२६
६१३. मेघः ३२६
१. प्रजापतिः ३२६
६१४. मेधातिथिः काण्वः ३२६
१. मेधातिथिः काण्वः ३२६
2. मेधातिथिः काण्वः ३२६
६१५. मेधाविनः ३२६

१. विश्वेदेवाः ३२६
६१६. मेषः ३२६
१. शौनकः ३२६
६१७. यक्ष्मघ्नम् ३२६
१. विवृहा काश्यपः ३२७
६१८. यक्ष्मनाशनः ३२७
१. ब्रह्म ३२७
६१६. यक्ष्मनाशनम् ३२८
१. अथर्वा ३२८
2. पूरणः ३२८
३. भृग्वंगिरा ३२८
६20. यक्ष्मनाशनोऽग्निः ३२८
१. भृग्वंगिरा ३२८
६21. यक्ष्मनाशिनी दमपत्त्योः ३२८
१. सूर्या सावित्री ३२६
६22. यक्ष्मविवर्हणम् ३२६
१. ब्रह्म ३२६
६2३. यजमानः ३२६
१. जमदग्निः भार्गवः ३२६
2. देववातः ३२६
३. मधुच्छन्दाः ३२६
४. वत्सः ३२६
५. वरुणः ३२६
६. शुनः शेपः ३३०
७. हैमवर्चिः ३३०
६2४. यजमानर्त्विजः ३३०
१. स्वस्त्यात्रेयः ३३०
६2५. यज्ञः ३३०
१. अग्निः ३३०
2. अप्रतिरथः ३३०
३. आथर्वणः दध्यङ् ३३०
४. और्णवाभः ३३१
५. कश्यपः ३३१
६. गालवः ३३१
७. गोतमः ३३१
८. विधृतिः ३३१
६. विश्वकर्मा ३३१

१०. विश्वामित्रः ३३१
११. शम्युः ३३१
१2. हैमवर्चिः ३३१
१३. दध्यङ् आथर्वणः ३३२
१४. दीर्घतमा ३३२
१५. दीर्घतमा औतथ्यः ३३३
१६. देवश्रवाः ३३३
१७. देवाः ३३३
१८. परमेष्ठी प्रजापतिः ३३३
१९. प्रजापतिः ३३४
2०. मधुच्छन्दाः ३३४
2१. वत्सः ३३४
22. वत्सारः काश्यपः ३३५
2३. वसिष्ठः ३३५
2४. ऋषि–? (ऋषि ब्रह्मा) ३३५
६2६. यज्ञः अग्नि–सवितारौ ३३५
१. परमेष्ठी प्रजापतिः परमेष्ठी प्रजापतिः ३३५
६2७. यज्ञपतिः ३३५
१. देवश्रवाः ३३५
६2८. यज्ञपुरुषः ३३५
१. वामदेवः ३३५
६2९. यज्ञमानः ३३६
१. गोतमः ३३६
६३०. यमः ३३६
१. अथर्वा ३३६
2. आयुर्वर्चोबलकामः ३४७
३. कुमारो यामायनः ३४७
४. द्रुह्वणः (आयुर्वर्चोबलकामः) ३४७
५. भृग्वंगिरा ३४७
६. यमः ३४७
७. सङ्कसुकः ३४८
६३१. यमः निर्ऋतिः ३४८
१. भृगुः ३४८
६३2. यमादयो मन्त्रोक्ताः ३४८
१. शन्तातिः ३४८
६३३. यमसादनम् ब्रह्म ३४९

१. भरद्वाजः ३४६
६३४. यमिनी ३४६
१. ब्रह्म ३४६
६३५. यातूधान्यः ३४६
१. चातनः ३४६
६३६. युद्धभूमिब्रह्मणस्पतिर् अदितिश्च (लिङ्गोद्रा संग्रामाशिषः) ३४६
१. पायुर् भरद्वाजः ३४६
६३७. योगी३४६
१. गोतमः ३४६
६३८. योद्धा ३५०
१. अप्रतिरथः ३५०
६३९. योनिः ३५०
१. ब्रह्म ३५०
६४०. योनिः गर्भः पृथिव्यादयः ३५०
१. ब्रह्म ३५०
६४१. योषितो धमन्यश्च ३५०
१. ब्रह्म ३५०
६४2. रक्षोघ्नः ३५१
१. देववातः ३५१
६४३. रक्षोहाऽग्निः ३५१
१. वामदेवो गौतमः ३५१
६४४. रथः ३५१
१. गर्गः ३५१
2. पायुर् भरद्वाजः ३५२
६४५. रथगोपा ३५२
१. पायुर् भरद्वाजः ३५२
६४६. रथांगानि ३५२
१. विश्वामित्रो गाथिनः ३५२
६४७. रथवीतिर्दाल्भ्यः ३५२
१. श्यावाश्व आत्रेयः ३५२
६४८. रश्मयः ३५२
१. पायुर् भरद्वाजः ३५२
६४९. राका३५२
१. अथर्वा ३५२
2. गृत्समदः शौनकः ३५२
६५०. राजप्रजाः ३५३
१. प्रजापतिः ३५३

६५१. राजयक्ष्मघ्नम् ३५३
१. यक्ष्मनाशनः प्राजापत्यः ३५३
६५2. राजा ३५३
१. प्रजापतिः ३५३
६५३. राजादयो गृहपतयः ३५३
१. प्रस्कण्वः ३५३
2. वैखानसः ३५४
६५४. राजादयो गृहस्थाः ३५४
१. वैखानसः ३५४
६५५. राजेश्वरौ ३५४
१. नारायणः ३५४
६५६. राजधर्मराजादयः ३५४
१. बृहस्पतिः ३५४
६५७. राज्ञः स्तुतिः ३५४
१. अभीवर्तः ३५५
2. ध्रुवः ३५५
६५८. राज्यभिषेक आपः ३५५
१. अथर्वांगिरा ३५५
६५६. रात्रस्तवः ३५५
१. कुशिकः सौभरो रात्रिर् वा भारद्वाजी ३५५
६६०. रात्रिः ३५५
१. कुत्सः ३५५
2. गोपथः ३५५
३. वामदेवो गौतमः ३५७
६६१. रुद्रः ३५७
१. अथर्वा ३५७
2. कण्वो घौरः ३५८
३. कपिंजलः ३५८
४. कुत्स आंगिरसः ३५८
५. गृत्समदः शौनकः ३५८
६. चातनः ३५६
७. नारायणः ३५६
८. परमेष्ठी ३५६
६. परमेष्ठी वा कुत्सः ३५६
१०. प्रजापतिः ३६०
११. बन्धुः ३६०

१2. बृहदुक्थो वामदेवः ३६०
१३. ब्रह्म ३६०
१४. वसिष्ठः ३६०
१५. शन्तातिः ३६१
१६. सिन्धुद्वीपः ३६१
६६2. रुद्रः गणः ३६१
१. अथर्वा ३६१
६६३. रुद्राः ३६१
१. कुत्सः ३६१
2. परमेष्ठी ३६२
३. परमेष्ठी प्रजापतिर्वा देवाः ३६३
४. प्रजापतिः ३६४
५. स्वस्त्यात्रेयः ३६४
६६४. रुद्रादयः ३६४
१. दीर्घतमा ३६४
६६५. रेतः ३६४
१. प्रजापतिः ३६४
६६६. रोदसी द्युनिशौ वा ३६४
१. प्रजापतिर् वैश्वामित्रो वाच्यो वा ३६४
६६७. रोदसी ३६४
१. प्रजापतिर् वैश्वामित्रो वाच्यो वा ३६४
६६८. रोहिणी वनस्पतिः ३६५
१. ऋभुः ३६५
६६९. लिंगोक्ता ३६५
१. प्रजापतिः ३६५
2. वसिष्ठः ३६५
३. शकपूतो नार्मेधः ३६६
६७०. लिंगोक्ता (गर्भार्थ आशीः) ३६६
१. त्वष्टा गर्भकर्ता विष्णुर् वा प्राजापत्यः ३६६
६७१. लिंगोक्ता (साग्री.सास्वा.) द्यावापृथिवी इन्द्राबृहस्पतीभगश्च (सार्षेदी.) ३६६
१. वामदेवो गौतमः ३६६
६७2. लिंगोक्ताः ३६६
१. आथर्वणः दध्यङ् ३६६
2. ऋजिष्वा ३६६
३. कुमारहारितः ३६६
४. गृत्समदः शौनकः ३६६
५. दध्यङ् आथर्वणः ३६६

६. पायुर् भरद्वाजः ३६६
७. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः ३६६
८. विश्वामित्रो जमदग्नी ३६६
६. विश्वेदेवाः ३६६
१०. स्वस्त्यात्रेयः ३६७
६७३. लिंगोक्ता पितरो वा ३६७
१. यमः ३६७
६७४. लिंगोक्ता ब्रघ्न ३६७
१. ब्रह्म ३६७
६७५. लोपामुद्रा (सास्वा.) दम्पत्ती (अजमेर) ३६७
१. लोपामुद्रा–अगस्त्यौ (सास्वा.) रति (अजमेर) ३६७
६७६. वज्रः ३६७
१. शुक्रः ३६७
६७७. वधूवासः संस्पर्शनिन्दा ३६७
१. सूर्या सावित्री ३६७
६७८. वधूवास संस्पर्शमोचनम् ३६७
१. सावित्री सूर्या ३६८
६७६. वनस्पतिः ३६८
१. अथर्वा ३६८
2. अथर्वा (यक्ष्मनाशन कामः) ३६८
३. उद्दालकः ३६८
४. गरुत्मान् ३६८
५. दीर्घतमा औचथ्यः ३६६
६. भृगुः ३६६
७. भृग्वंगिरा ३६६
८. मेधातिथिः काण्वः ३६६
६. शुक्रः ३६६
६८०. वनस्पतिः (आसुरी) ३७०
१. अथर्वा ३७०
६८१. वनस्पतिः (उच्छुष्मोषधि) ३७०
१. अथर्वा ३७०
६८2. वनस्पतिः (कुष्ठ) ३७०
१. भृग्वंगिरा ३७०
६८३. वनस्पतिः फालमणिः ३७०
१. बृहस्पतिः ३७०
६८४. वनस्पतिः (दूर्वा) ३७२

१. अथर्वा ३७२
६८५. वनस्पतिः यक्ष्मनाशनम् ३७२
१. भृग्वंगिरा ३७२
६८६. वनस्पतयः (रामाकृष्णा असिवनी च) ३७२
१. अथर्वा ३७२
६८७. वनस्पतिः (वरणमणिः) ३७२
१. अथर्वा ३७३
६८८. वनस्पतिः (वाणपर्णी) ३७४
१. अथर्वा ३७४
६८९. वयः ३७४
१. कपिंजलः ३७४
६९०. वर्म ३७४
१. पायुर् भरद्वाजः ३७४
६९१. वर्म–सोम–वरुणाः ३७४
१. पायुर् भरद्वाजः ३७४
६९2. वरुण–मित्र–अर्यमणः ३७४
१. कण्वो घौरः ३७४
६९३. वरुणः ३७५
१. अग्निवरुणसोमानां निहवः ३७५
2. अत्रिर् भौमः ३७५
३. अथर्वा ३७५
४. कूर्मः गार्त्समदः गृत्समदो वा ३७६
५. गोतमः ३७७
६. दीर्घतमा ३७७
७. नाभाकः काण्वः ३७७
८. प्रजापतिः ३७७
९. प्रियमेध आंगिरसः (साग्री. ३५४३६०) प्रियमेधः (ऋसर्व.) ३७७
१०. भृगुः ३७८
११. वत्सः ३७८
१2. वरुणः ३७८
१३. वसिष्ठः ३७८
१४. वृहद्दिवोऽथर्वा ३७९
१५. शन्तातिः ३८०
१६. शुनः शेपः ३८०
१७. शुनःशेप आजीगर्तिः ३८१
१८. शुनःशेप आजीगर्ति कृत्रिमो देवरातो वैश्वामित्रो वा (साग्री.सास्वा.);
शुनःशेप आजगर्ति कृत्रिमो देवरातो वैश्वामित्रः (ऋसर्व.);

शुनःशेपः (सार्षेदी.) ३८१
१६. शङ्खः ३८२
६६४. वरुणः अग्निः इन्द्रश्च ३८२
१. चातनः ३८२
६६५. वरुणः सत्यानृतान्त्रीक्षणम् ३८२
१. ब्रह्म ३८२
६६६. वरुणादयः ३८२
१. अथर्वा ३८२
६६७. वरुणाः ३८३
१. मेधातिथिः ३८३
६६८. वरुणौ ३८३
१. वसिष्ठः ३८३
६६६. वरोः सौषामणस्य दानस्तुतिः ३८३
१. विश्वमना वैयश्वः ३८३
७००. वर्षर्तुः ३८३
१. परमेष्ठी ३८३
७०१. वशा ३८३
१. कश्यपः ३८३
७02. वसन्तर्तुः ३८७
१. परमेष्ठी ३८७
७०३. वसन्तादयः ३८७
१. प्रजापतिः ३८७
७०४. वसवः ३८७
१. परमेष्ठी ३८७
७०५. वसुरुद्रादित्य विश्वेदेवाः ३८८
१. सिन्धुद्वीपः ३८८
७०६. वस्वादयः ३८८
१. अथर्वा ३८८
2. प्रजापतिः ३८८
७०७. वस्वादयोमन्त्रोक्ताः ३८८
१. सिन्धुद्वीपः ३८८
७०८. वस्वादयो मन्त्रोक्ताः ३८८
१. तापसः ३८८
७०६. वस्वादयो लिंगोक्ता ३८८
१. विश्वामित्रः ३८८
2. विश्वेदेवाः ३८८

७१०. वसिष्ठः ३८६
१. वसिष्ठः ३८६
७११. वह्निः ३८६
१. अग्निः ३८६
७12. वाक् ३८६
१. अथर्वा ३८६
2. गोतमः ३८६
३. दीर्घतमा ३८६
४. दीर्घतमा औचथ्यः ३८६
५. नेमो भार्गवः ३८६
६. प्रस्कण्वः ३९०
७. विश्वामित्रो गाथिनः ३९०
७१३. वागादि मन्त्रोक्ताः ३९०
१. ब्रह्म ३९०
७१४. वाग् ३९०
१. जमदग्निः ३९०
७१५. वागादयो लिंगोक्ताः ३९०
१. दीर्घतमा ३९०
७१६. वागाम्भृणी ३९०
१. वागाम्भृणी ३९०
७१७. वाग्विद्युतः ३९०
१. वत्सः ३९१
७१८. वाचस्पतिः ३९१
१. अथर्वा ३९१
७१९. वाजादयः ३९१
१. प्रजापतिः ३९१
७2०. वाजिनः ३९१
१. ऋण त्रसदस्यू ३९१
2. वसिष्ठः ३९१
३. वामदेवः (सा. अजमेर) ऋण त्रसदस्य (सास्वा.) ३९१
७2१. वाजिनीवान् ऋषभः ३९१
१. बादरायणिः ३९१
७22. वाजी ३९२
१. अथर्वा ३९२
2. गोपथः ३९२
३. नाभानेदिष्टः ३९२

७2३. वाजीः ३६२
१. कुश्रिः ३६२
७2४. वाण्यः ३६२
१. सरस्वती ३६२
७2५. वातः ३६२
१. अथर्वा ३६२
2. दीर्घतमा ३६२
३. देवाः ३६२
४. मेधातिथिः ३६२
७2६. वातादयः ३६३
१. आथर्वणः दध्यङ् ३६३
2. दध्यङ् आथर्वणः ३६३
३. प्रजापतिः ३६३
७2७. वादयितारो वीराः ३६३
१. भरद्वाजः ३६३
७2८. वानस्पत्यो दुन्दुभिः ३६३
१. ब्रह्म ३६३
७2९. वायवः ३६४
१. जमदग्निः भार्गवः ३६४
७३०. वायवन्तरिक्षे ३६४
१. अंगिराः ३६४
७३१. वायुसवितारौ ३६४
१. मृगारः ३६४
७३2. वायु सवितारौ ३६५
१. आदित्या देवा वा ३६५
७३३. वायुः ३६५
१. अग्निः ३६५
2. अंगिरसः ३६५
३. अजमीढः ३६५
४. अथर्वा ३६५
५. अथर्वा (ब्रह्मवर्चस् कामः) ३६५
६. अनिलो वातायनः ३६५
७. उलो वातायनः ३६६
८. ऋजिष्वा ३६६
९. गृत्समदः ३६६
१०. गृत्समदः शौनकः ३६६

११. गोतमः ३९६
१2. जमदग्निः ३९६
१३. जमदग्निः भार्गवः ३९६
१४. दीर्घतमा ३९७
१५. परुच्छेपो दैवोदासिः ३९७
१६. पुरुमीढः ३९७
१७. प्रजापतिः ३९७
१८. मधुच्छन्दा वैश्वामित्रः ३९८
१९. मेधातिथिः काण्वः ३९८
2०. वशोऽश्व्यः ३९८
2१. वसिष्ठः ३९८
22. वामदेवो गौतमः ३९९
2३. विश्वकर्मा ३९९
2४. विश्वमना वैयश्व व्यश्वो वा आंगिरसः ३९९
2५. विश्वामित्रः ४००
2६. विश्वेदेवाः ४००
2७. शन्तातिः ४००
2८. शम्युः ४००
2९. सिन्धुद्वीपः ४००
७३४. वायुः त्वष्टा ४००
१. वसिष्ठः ४००
७३५. वायुः प्रजापतिः ४००
१. अथर्वा ४००
७३६. वाय्वादयः ४००
१. प्रजापतिः ४००
७३७. वासः ४००
१. अथर्वा ४००
७३८. वासिष्ठो मैत्रावरुणिः ४००
१. वासिष्ठो मैत्रावरुणिः ४००
७३९. वास्तुरग्निः ४०३
१. आसुरिः ४०३
2. शम्युः ४०३
७४०. वास्तुपतिः ४०३
१. शंयुर् बार्हस्पत्यः ४०३
७४१. वास्तोष्पतिः ४०३
१. ब्रह्म ४०३
2. वसिष्ठः ४०४

७४2. व्रातयः (अध्यातमम्) ४०४
 १. अथर्वा ४०४
७४३. विचृतौतारके ४१०
 १. भृग्वंगिरा ४१०
७४४. विदुषी ४१०
 १. परमेष्ठी ४१०
 2. वसिष्ठः ४१०
 ३. विश्वेदेवाः ४१०
७४५. विद्युत् ४१०
 १. गोतमः ४१०
 2. भृग्वंगिरा ४१०
७४६. विद्युतौ ४१०
 १. परमेष्ठी प्रजापतिः ४१०
७४७. विद्युदादयः ४१०
 १. प्रजापतिः ४१०
७४८. विद्वद्राजानौ ४११
 १. श्रीकामः ४११
७४९. विद्वान् ४११
 १. आथर्वणः दध्यङ् ४११
 2. गृत्समदः ४११
 ३. गोतमः ४११
 ४. जमदग्निः ४११
 ५. दक्षः ४११
 ६. दध्यङ् आथर्वणः ४११
 ७. नारायणः ४११
 ८. पावकाग्निः ४१२
 ९. प्रजापतिः ४१२
 १०. प्रस्कण्वः ४१२
 ११ भरद्वाजः ४१२
 १2. मधुच्छन्दाः ४१२
 १३. महीयवः ४१२
 १४. मेधातिथिः ४१२
 १५. वत्सः ४१२
 १६. विश्वामित्रः ४१२
 १७. स्वयम्भुर् ब्रह्म ४१२
 १८. स्वस्त्यात्रेयः ४१३

१६. हिरण्यगर्भः ४१३
2०. हैमवर्चिः ४१३
७५०. विद्वांसः ४१३
१. आथर्वणः दध्यङ् ४१३
2. कक्षीवान (दैर्धतमसः औशिजः) ४१३
३. गोतमः ४१३
४. जमदग्निः ४१४
५. दध्यङ् आथर्वणः ४१४
६. दीर्घतमा ४१४
७. नारायणः ४१४
८. परमेष्ठी ४१४
६. प्रजापतिः ४१४
१०. भरद्वाजः ४१५
११. मधुच्छन्दाः ४१५
१2. मुद्गलः ४१५
१३. मेधातिथिः ४१५
१४. यज्ञपुरुषः ४१५
१५. रोमशा ब्रह्मवादिनी ४१५
१६. वसिष्ठः ४१५
१७. विश्वामित्रः ४१५
१८. विश्वेदेवाः ४१५
१६. वैखानसः ४१५
2०. स्वस्त्यात्रेयः ४१५
2१. हैमवर्चिः ४१५
७५१. विद्वान्सः ४१६
१. भावयव्यः कक्षिवान्–(ऋ. १.१2६.१–५);
रोमशा ब्रह्मवादिनी (ऋ.१.१2६.७) ४१६
७५2. विभिन्दोर् दानस्तुतिः ४१६
१. मेधातिथिः ४१६
७५३. विराजादयः ४१६
१. प्रजापतिः ४१६
७५४. विराट् ४१६
१. अथर्वाचार्यः ४१६
७५५. विवस्वान् ४१८
१. जाटिकायनः ४१८
७५६. विवाहः ४१८
१. सावित्री सूर्या ४१८

७५७. विवाहमन्त्राः आशीः प्रायाः ४१६
 १. सूर्या सावित्री ४१६
७५८. विवाह मन्त्राशिषः ४१६
 १. सावित्री सूर्या ४१६
७५९. विश्वकर्मा ४२१
 १. अंगिराः ४२१
 2. देवाः ४२१
 ३. भुवनपुत्रो विश्वकर्मा ४२१
 ४. भृगुः ४२२
 ५. वसिष्ठः ४२२
 ६. विश्वकर्मा भौवनः ४२२
७६०. विश्वकर्मा अग्निर् वा ४२४
 १. देवश्रव–देववातौ ४२४
७६१. विश्वकर्मेन्द्रः ४२४
 १. शाषःशासः ४२४
७६2. विश्वजित् ४२४
 १. शन्तातिः ४२४
७६३. विश्वम्भरः ४२४
 १. ब्रह्म ४२४
७६४. विश्वानि भुवनानि ४२४
 १. वसिष्ठः ४२४
७६५. विश्वामित्रोपाध्यायः ४२५
 १. विश्वामित्रो गाथिनः ४२५
७६६. विश्वावसुः ४२५
 १. विश्वावसुर् देवगन्धर्वः ४२५
७६७. विश्वेदेवा ४२५
 १. ऋजिष्वा ४२५
 2. भृगुः ४२८
 ३. प्रतिप्रभ आत्रेयः ४२८
७६८. विश्वेदेवा अंगिरसो वा ४२८
 १. नाभानेदिष्ठो मानवः ४२८
७६९. विश्वेदेवा ऋत्विक् स्तुतिर् वाः ४२९
 १. बुधः ४२०
७७०. विश्वेदेवा ऋत्विजो वा ४२९
 १. मेध्यः काण्वः ४२९
 2. बुधः सौम्यः ४२९

७७१. विश्वेदेवाः ४२६
१. अगस्त्यो मैत्रावरुणिः ४२६
2. अग्निः ४३०
३. अग्निस् तापसः ४३०
४. अग्निः सौचीकः ४३०
५. अंगिराः प्रचेता यमश्च ४३१
६. अत्रिर् भौमः ४३१
७. अथर्वा ४३३
८. अथर्वा (आयुष्कामः) ४३४
६. अंहोमुग् वामदेव्यः ४३४
१०. अंहोमुग् वामदेव्यः (साग्री. सास्वा. सार्षेदी.) कुल्मल वर्हिषः शैलूषि अंहोमुग् वा वामदेव्यः (ऋसर्व.) ४३४
११. आत्रेयः (साग्री. सास्वा.); वामदेव (सार्षेदी.) ४३४
१2. आदित्या देवाः ४३४
१३. आदित्या देवा वा ४३४
१४. आप्त्यस्त्रितः अंगिरसः कुत्सो वा ४३५
१५. अवत्सारः काश्यपः अन्ये च दृष्टिलिंगाः ४३५
१६. उत्कीलः ४३६
१७. उत्तरनारायणः ४३६
१८. उशना ४३६
१६. ऋजिश्वा भारद्वाजः ४३६
2०. कक्षीवान (दैर्धतमसः औशिजः) ४३६
2१. कण्वः ४३७
22. कवष ऐलूषः ४३७
2३. कसीदी काण्वः ४३८
2४. कुत्स आंगिरसः ४३८
2५. कुत्सीदिः ४३६
2६. कूर्मः ४३६
2७. कूर्मः गार्त्समदः गृत्समदो वा ४३६
2८. गयः प्लातः ४३६
2६. गाथी कौशिकः ४४१
३०. गृत्समदः ४४१
३१. गृत्समदः शौनकः ४४१
३2. गोतमः ४४२
३३. गोतमो राहूगणः ४४२
३४. घर्मः सौर्यः ४४३

३५.	जमदग्निः	४४३
३६.	जुहुर्ब्रह्मजाया ऊर्ध्वनाभा वा ब्राह्मः	४४३
३७.	तान्वः पार्थ्यः	४४३
३८.	त्रित आप्त्यः(साग्री.सास्वा.सार्षेदी.); त्रित आप्त्यः कुत्स आंगिरसो वा (ऋसर्व.१०.१०५.५ १०.१०५.१)	४४४
३९.	त्रिशोकः	४४५
४०.	दीर्घतमाय. ६.१६	४४५
४१.	दीर्घतमा औचथ्यः	४४५
४2.	देवाः	४४७
४३.	देवस्युर्वान्दनः	४४७
४४.	नाभानेदिष्ठो मानवः	४४८
४५.	परमेष्ठी	४४९
४६.	परमेष्ठी प्रजापतिः	४४९
४७.	परुच्छेपो दैवोदासिः	४४९
४८.	प्रजापतिः	४५०
४९.	प्रजापतिर् वैश्वामित्रो वाच्यो वा	४५०
५०.	प्रतिक्षत्रः	४५१
५१.	प्रतिक्षत्र आत्रेयः	४५१
५2.	प्रतिभानुर् आत्रेयः	४५२
५३.	प्रतिरथ आत्रेयः	४५२
५४.	प्रथो वासिष्ठः	४५२
५५.	प्रियमेध आंगिरसः (साग्री. –३५४३६०) प्रियमेधः (ऋसर्व.)	४५३
५६.	बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः	४५३
५७.	बृहद्दिवोऽथर्वा	४५३
५८.	ब्रह्म	४५३
५९.	भरद्वाजः	४५३
६०.	भुवन आप्त्यः साधनो वा भौवनः	४५४
६१.	मधुच्छन्दाः	४५४
६2.	मधुच्छन्दा वैश्वामित्रः	४५४
६३.	मनुः	४५४
६४.	मनुर्वैवस्वतः	४५४
६५.	मातरिश्वा काण्वः	४५६
६६.	मेधातिथिः	४५६
६७.	मेधातिथिः काण्वः	४५६
६८.	मेध्यः काण्वः	४५६
६९.	याज्ञवल्क्यः	४५७

७०. लुशः ४५७
७१. लुशो धानाकः ४५७
७2. वसुकर्णो वासुक्रः ४५८
७३. वत्सारः ४५६
७४. वत्सारः काश्यपः ४६०
७५. वरुणः ४६०
७६. वसिष्ठः ४६०
७७. वामदेवः ४६४
७८. वामदेवो गौतमः ४६४
७६. वैखानसः ४६५
८०. विश्वमना वैयश्वः ४६५
८१. विश्वामित्रः ४६५
८2. विश्वामित्रो गाथिनः ४६५
८३. विहव्यः ४६६
८४. वृहदुक्थो वामदेव्यः ४६६
८५. शन्तातिः ४६७
८६. शार्यातो मानवः ४६७
८७. शिरिम्बिठोभारद्वाजः ४६८
८८. सदापृण आत्रेयः ४६८
८६. सध्रिर्वैरुपो धर्मोगवा तापसः ४६८
६०. सप्तर्षयः एकर्चाः ४६६
६१. सप्रथो भारद्वाजः ४६६
६2. सुहोत्रः ४६६
६३. स्वस्त्यात्रेयः ४६६
७७2. विश्वेदेवाः (साग्री. सास्वा.) इन्द्रः (सार्षेदी.) ४७१
१. कवष ऐलूषः (साग्री. सास्वा.)ए वामदेवः (सार्षेदी.) ४७१
७७३. विश्वेदेवाः इन्द्रः ४७१
१. वसिष्ठः ४७१
७७४. विश्वेदेवाः गृहपतयः ४७१
१. अत्रिः ४७१
2. भरद्वाजः ४७१
७७५. विश्वेदेवाः गृहस्थाः ४७१
१. वसिष्ठः ४७१
७७६. विश्वेदेवाः बृहस्पतिः ४७१
१. वसिष्ठः ४७१
७७६अ.विश्वेदेवाः बृहस्पतिः वर्चः ४७२

१. वसिष्ठः ४७२
७७७. विषम् ४७२
१. गरुत्मान् ४७२
७७८. विषनिवारणम् ४७२
१. गरुत्मान् ४७२
७७९. विष्णुः ४७२
१. आगस्त्यः अग्रे द्रष्टव्यम् ४७२
2. गोतमः ४७२
३. दीर्घतमा ४७३
४. दीर्घतमा औचथ्यः ४७३
५. दीर्घतमा औतथ्यः ४७४
६. परमेष्ठी प्रजापतिः ४७४
७. ब्रह्म ४७४
८. मेधातिथिः ४७४
९. मेधातिथिः काण्वः ४७५
१०. वसिष्ठः ४७५
११. वासिष्ठो मैत्रावरुणिः ४७६
१2. वामदेवः ४७६
१३. श्यावाश्वः ४७६
७८०. विष्णुर् देवा वा ४७६
१. मेधातिथिः काण्वः ४७६
७८१. वीरः ४७६
१. बृहस्पतिः ४७६
2. भरद्वाजः ४७६
७८2. वीराः ४७६
१. भरद्वाजः ४७६
७८३. वीरुधः ४७७
१. अथर्वा ४७७
७८४. वृश्चिकादयः ४७७
१. अथर्वा ४७७
७८५. वृषभः स्वापनम् ४७७
१. ब्रह्म ४७८
७८६. वृषा ४७८
१. वरुणः ४७८
७८७. वेदः ४७८
१. मेधातिथिः ४७८

७८८. वेदिः ४७८
१. अथर्वा ४७८
७८६. वैद्यः ४७८
१. भिषग् ४७८
७६०. वैद्याः ४७६
१. भिषग् ४७६
2. वरुणः ४७६
७६१. वेनः ४७६
१. वेनः ४७६
2. वेनो भार्गवः ४८०
३. सुनीतिः ४८०
७६2. वैश्वानरः ४८०
१. अथर्वा (पण्यकामः) ४८०
2. कुत्सः ४८०
३. कौशिकः ४८०
४. प्रादुराक्षिः ४८०
५. भरद्वाजः ४८०
६. भरद्वाजो बार्हस्पत्यः ४८०
७. मेधः ४८१
८. वसिष्ठः ४८१
६. वामदेवो गातमः ४८२
१०. विश्वामित्रः ४८३
११. विश्वामित्रो गाथिनः ४८३
७६३. वैश्वानरादयः ४८३
१. अथर्वा ४८३
७६४. वैश्वानरोऽग्निः ४८४
१. कुत्सः ऋ– य. 2६.७ ४८४
2. कौशिकः (अनृणकामः) ४८४
७६५. श्रद्धा ४८४
१. श्रद्धा कामायनी ४८४
७६६. शकधूमः ४८४
१. दीर्घतमा औचथ्यः ४८४
७६७. शकधूमः सोमः ४८४
१. अंगिराः ४८४
७६८. शङ्खमणिः कृशनः ४८४
१. अथर्वा ४८४

७९९. शची पौलोमी ४८५
१. शची पौलौमी ४८५
८००. शतवारः ४८५
१. ब्रह्म ४८५
८०१. शतौदनाः ४८५
१. अथर्वा ४८५
८०२. शमी ४८७
१. उपरिबभ्रवः ४८७
८०३. श्रीः ४८७
१. प्रजापतिः ४८७
८०४. शरदर्तुः ४८७
१. परमेष्ठी ४८७
८०५. शशीयसी तरन्तमहिषी ४८७
१. श्यावाश्व आत्रेयः ४८७
८०६. शाला ४८७
१. भृग्वंगिरा ४८७
८०७. शाला वास्तोष्पतिः ४८८
१. ब्रह्म ४८८
८०८. शितिपाद् अविः ४८९
१. उद्दालकः ४८९
८०९. शिशिरर्तुः ४८९
१. परमेष्ठी ४८९
८१०. शुनाशीरौ ४८९
१. वामदेवो गौतमः ४८९
८११. शूनः ४८९
१. वामदेवो गौतमः ४८९
८12. शेपोऽर्कः ४८९
१. अथर्वांगिरा ४८९
८१३. श्येनः ४९०
१. प्रस्कण्वः ४९०
८१४. श्येनादयः ४९०
१. अथर्वा ४९०
८१५. श्री ४९०
१. वैखानसः ४९०
८१६. श्रीः ४९०
१. दीर्घतमा ४९०

८१७. श्रुतवर्ण आर्क्षस्य दानस्तुतिः ४६०
  १. गोपवन आत्रेयः ४६०
८१८. श्वानौ ४६०
  १. यमः ४६०
८१६. सान्तवनाग्निः ४६१
  १. कबन्धः ४६१
८20. स्रष्टा ४६१
  १. नारायणः ४६१
८2१. सुदासः पैजवनस्य दानस्तुतिः ४६१
  १. वसिष्ठः ४६१
८22. स्रष्टेश्वरः ४६१
  १. नारायणः ४६१
८2३. हरिणः ४६१
  १. भृग्वंगिरा ४६१
८2४. हरिस्तुतिः ४६१
  १. बरुः सर्वहरिर्वा ऐन्द्रः ४६१
८2५. हविर्धाने ४६२
  १. विवस्वान् आदित्यः ४६२
८2६. हस्तः४६२
  १. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः ४६२
८2७. हस्तघ्नः ४६२
  १. पायुर् भरद्वाजः ४६२
८2८. हिरण्यम् ४६२
  १. अथर्वा (आयुष्कामः) ४६२
८2६. हिरण्यगर्भः ४६३
  १. प्रजापतिः ४६३
  2. हिरण्यगर्भः ४६३
८३०. हिरण्यगर्भः परमात्मा ४६३
  १. स्वयम्भुर् ब्रह्म ४६३
८३१. हिरण्यतेजः ४६३
  १. दक्षः ४६३
८३2. हिरण्यम् भगः ४६३
  १. प्रतिवेदनः ४६३
८३३. हेमन्तर्तुः ४६३
  १. परमेष्ठी ४६३
८३४. हेमिः ४६३

	१. अथर्वा	४६३
८३५.	संग्रामाशिषः	४६३
	१. पायुर् भरद्वाजः	४६३
८३६.	संज्ञानम्	४६३
	१. संवननः	४६३
८३७.	संवत्सरः	४६४
	१. भरद्वाजः	४६४
८३८.	संवत्सरात्मा	४६४
	१. दीर्घतमा औचथ्यः	४६४
८३६.	संस्फानम्	४६४
	१. अथर्वा	४६४
८४०.	संस्तवो वसिष्ठस्य सपुत्रस्य इन्द्रेण वा संवादः	४६४
	१. वसिष्ठपुत्राः	४६४
८४१.	स्कम्भः (अध्यात्मम्)	४६५
	१. अथर्वा	४६५
८42.	स्त्रियः	४६७
	१. जमदग्निः	४६७
	2. प्रजापतिः	४६७
८४३.	स्मरः	४६७
	१. अथर्वा	४६७
८४४.	स्वर्गः ओदनः अग्निः	४६७
	१. यमः	४६७
८४५.	स्वर्ग्याणौ	५०१
	१. गयः प्लातः	५०१
८४६.	स्वाहाकृतयः	५०१
	१. मेधातिथिः काण्वः	५०१
८४७.	स्वाहाकृतिः	५०१
	१. दीर्घतमा औचथ्यः ऋ. १.१४2.१2	५०१
८४८.	सकामा अविष्यवः	५०१
	१. अथर्वा	५०१
८४६.	सत्यगुणविशिष्टोऽग्निः शुद्धोऽग्निर् वा	५०१
	१. कुत्स आंगिरसः	५०१
८५०.	सदस्पतिः	५०१
	१. मेधातिथिः काण्वः	५०२
८५१.	सदस्पतिर् नाराशंसो वा	५०२
	१. मेधातिथिः काण्वः	५०२

८५2. सपत्नघ्नम् ५०२
१. ऋषभो वैराजः शाक्वरो वा ५०२
८५३. सभा ५०२
१. शौनकः ५०२
८५४. सभा समितिः पितरश्च ५०२
१. शौनकः ५०२
८५५. सभापतिः ५०२
१. प्रजापतिः ५०२
८५६. सभापतिर्यजमानः ५०२
१. नाभानेदिष्टः ५०२
८५७. सभापति राजा ५०२
१. मधुच्छन्दाः ५०२
८५८. सभासदः ५०३
१. प्रजापतिः ५०३
८६०. सभेशः ५०३
१. अश्विनौ ५०३
2. सभेशः ५०३
८६१. समाधाता ५०३
१. प्रजापतिः ५०३
८६2. समिधा ५०३
१. प्रजापतिः ५०३
८६३. सम्राट् ५०३
१. तापसः ५०३
८६४. सम्राड्माण्डलिकौ राजानौ ५०४
१. विवस्वान् ५०४
८६५. सरण्यूः ५०४
१. देवश्रवा यामायनः ५०४
८६६. सरमा ५०४
१. प्रणयः असुराः ५०४
८६७. सरस्वतिः ५०४
१. गृत्समदः ५०४
८६८. सरस्वती ५०४
१. अर्थवणः ५०४
2. अथर्वांगिरा ५०४
३. गृत्समदः शौनकः ५०५
४. बृहदुक्थो वामदेव्यः ५०५

५. मधुच्छन्दाः ५०५
६. मधुच्छन्दा वैश्वामित्रः ५०५
७. वसिष्ठः ५०५
८. वामदेवः ५०५
६. शन्तातिः ५०६
१०. शौनकः ५०६
११. शङ्खः ५०६
१2. दीर्घतमा औचथ्यः ५०६
१३. देवश्रवा यामायनः ऋ. १०.१७.७–६ ५०६
१४. भरद्वाजो बार्हस्पत्यः ५०६
८६६. सरस्वती लाभारत्यः ५०७
१. दीर्घतमा औचथ्यः ५०७
८७०. सरस्वतीः ५०७
१. अथर्वाः ५०७
2. गृत्समदः ५०७
८७१. सरस्वत्यादयः ५०७
१. प्रजापतिः ५०७
2. स्वस्त्यात्रेयः ५०७
८७2. सरस्वान् ५०८
१. प्रस्कण्वः ५०८
2. वसिष्ठः ५०८
३. वासिष्ठो मैत्रावरुणिः ५०८
८७३. सरस्वान् सूर्यो वा ५०८
१. दीर्घतमा औचथ्यः ५०८
८७४. सर्पविषनिवारणम् ५०८
१. गरुत्मान् ५०८
८७५. सर्पविषापाकरणम् ५०६
१. गरुत्मान् ५०६
८७६. सर्वरुपा सर्वात्मिका सर्वदेवमयी वाक्ः ५०६
१. अथर्वा ५०६
८७७. सर्व शीर्षामयापकरणम् ५१०
१. भृग्वंगिरा ५१०
८७८. सर्वात्मको रुद्रः ५१०
१. अथर्वा ५१०
८७६. सवाता प्रविध्यन्तः ५११
१. अथर्वा ५११

८८०. सविता ५११
१. अगस्त्यः ५११
2. अर्थवणः ५११
३. अथर्वा ५११
४. अथर्वा (स्वस्त्ययनकामः) ५११
५. आगस्त्यः अग्रे द्रष्टव्यम् ५११
६. आथर्वणः दध्यङ् ५११
७. आदित्या देवाः ५११
८. आदित्या देवा वा ५११
६. अर्चन्हैरण्यस्तूपः ५१२
१०. इन्द्राबृहस्पती ५१२
११. कण्वः ५१२
१2. गोतमः ५१२
१३. गृत्समदः शौनकः ५१२
१४. दध्यङ् आथर्वणः ५१३
१५. नारायणः ५१३
१६. परमेष्ठी प्रजापतिः ५१३
१७. प्रजापतिः ५१३
१८. बृहस्पतिः ५१३
१६. ब्रह्म ५१४
2०. भरद्वाजः ५१४
2१. भरद्वाजो बार्हस्पत्यः ५१४
22. भृगुः ५१४
2३. मेधातिथिः ५१४
2४. मेधातिथिः काण्वः ५१४
2५. लुशो धानाकः ५१५
2६. वसिष्ठः ५१५
2७. वामदेवो गौतमः ५१५
2८. विश्वामित्रः ५१५
2६. विश्वामित्रो गाथिनः ५१६
३०. विश्वावसुर्देवगन्धर्वः ५१६
३१. वैखानसः ५१६
३2. शाकल्य ५१६
३३. शङ्खः ५१६
३४. श्यावाश्वः ५१६
३५. श्यावाश्व आत्रेयः ५१७

३६. हिरण्यस्तूपः आंगिरसः ५१७

८८१. सवितादयः ५१८

१. दीर्घतमा ५१८

८८2. सविता अग्निः सरस्वती ब्रह्मणस्पतिः ५१८

१. अथर्वा ५१८

८८३. सविता अश्विनौ पूषा ५१८

१. दीर्घतमा ५१८

८८४. सविता गृहपतिः ५१८

१. भरद्वाजः ५१८

८८५. सविता जातवेदा ५१८

१. अथर्वांगिरा ५१८

८८६. सविता भगो ५१८

१.शुनःशेप आजीगर्ति कृत्रिमो देवरातो वैश्वामित्रो वा (साग्री.सास्वा.)
शुनःशेप आजगर्ति कृत्रिमो देवरातो वैश्वामित्रः (ऋसर्व.)
शुनःशेपः (सार्षेदी.) ५१८

८८७. सविता भगो वा ५१६

१. वसिष्ठः ५१६

८८८. सवित्रादयः ५१६

१. अथर्वा ५१६

८८६. सवित्रादयो मन्त्रोक्ताः ५१६

१. द्रविणोदाः ५१६

2. वसिष्ठः ५१६

८६०. सवित्रादिमन्त्रोक्ताः ५१६

१. शुनः शेपः ५१६

८६१. सविताः ५१६

१. नकुलः ५१६

८६2. साग्नयो हेतयः ५१६

१. अथर्वा ५१६

८६३. साध्याः ५१६

१. दीर्घतमा औचथ्यः ५२०

८६४. सामनस्यम् ५२०

१. अथर्वा ५२०

८६५. सामनस्यम् अश्विनौः ५२०

१. अथर्वा अ. ७.५2.१–2 ५२०

८६६. सामिधेन्यः ५२०

१. अग्निः ५२०

८६६. सारथिः ५२०
१. पायुर् भरद्वाजः ५२०
६००. सावर्णे दानस्तुतिः ५२०
१. नाभानेदिष्ठो मानवः ५२०
६०१. सावित्री सूर्य चन्द्रश्च ५२०
१. अथर्वा ५२०
६02. सिनीवाली ५२१
१. अथर्वा ५२१
2. गृत्समदः ५२१
३. गृत्समदः शौनकः ५२१
६०३. सिनीवालीः ५२१
१. सिन्धुद्वीपः ५२१
६०४. सिन्धुः आपः वरुणः ५२१
१. भृगुः ५२१
६०५. सिन्धुद्वीपः ५२१
१. सिन्धुद्वीपः ५२१
६०६. सिन्ध्वादयः ५२२
१. अथर्वा ५२२
६०७. सीता ५२२
१. विश्वामित्रः ५२२
2. वामदेवो गौतमः ५२२
६०८. सीसम् ५२२
१. चातनः ५२२
६०६. सुखम् ५२२
१. शन्तातिः ५२२
६१०. सुधन्वा ५२३
१. अंगिराः प्रचेता यमश्च ५२३
६११. सुपर्णः ५२३
१. गरुत्मान् ५२३
६१2. सुबन्धोर् जीविताह्वानम् ५२३
१. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः ५२३
६१३. सूर्यः ५२३
१. अग्निः ५२३
2. अत्रिर् भौमः ५२३
३. अथर्वा ५२३
४. अथर्वा (द्विषोवर्चो हर्तुकामः) ५२३

५. अभितपाः सौर्यः ५२४
६. आथर्वणः दध्यङ् ५२४
७. आदित्या देवाः ५२४
८. उत्तरनारायणः ५२४
६. कुत्सः ५२४
१०. कुत्स आंगिरसः ५२५
११. गौर् आंगिरसः ५२५
12. चक्षुः सौर्यः ५२५
१३. जमदग्निः भार्गवः ५२५
१४. दध्यङ् आथर्वणः ५२६
१५. दीर्घतमा औचथ्यः ५२६
१६. नृमेधः ५२६
१७. प्रतिवेदनः ५२६
१८. प्रजापतिः ५२६
१६. प्रस्कण्वः ५२६
२०. प्रस्कण्वः काण्वः ५२७
२१. बृहदुक्थो वामदेव्यः ५२७
22. ब्रह्म ५२७
२३. भरद्वाजः ५२८
२४. भागलिः ५२८
२५. यमः ५२८
२६. रम्याक्षी ५२८
२७. वसिष्ठः ५२८
२८. वामदेवो गौतमः ५२६
२६. विभ्राट् ५२६
३०. विभ्राट् सौर्यः ५२६
३१. विरुपः ५२६
३2. शन्तातिः ५२६
३३. श्रुतकक्ष–सुकक्षौ ५२६
३४. हिरण्यस्तूपः ५३०

६१४. सूर्यः (ऋसर्व.८.१०१.११; सार्षेदी.)इन्द्रः (साग्री.सास्वा.) ५३०
१. जमदग्निः भार्गवः ५३०

६१५. सूर्यः पर्जन्यो अग्नयो वा ५३०
१. दीर्घतमा औचथ्यः ५३०

६१६. सूर्य्यः ५३०
१. जमदग्निः ५३०

2. वत्सः ५३०
३. वामदेवः ५३०
४. हिरण्यगर्भः ५३०
६१७. सूर्य्यविद्वांसौ ५३०
१. दीर्घतमा औतथ्यः ५३०
६१८. सूर्यादयः ५३०
१. प्रजापतिः ५३०
2. भगः ५३०
६१९. सूर्य आत्मा वा ५३१
१. सार्पराज्ञी ५३१
६20. सूर्य्य विद्वांसौ ५३१
१. वत्सः ५३१
६21. सूर्यवैश्वानरौ ५३१
१. मूर्धन्वान्आंगिरसो वामदेव्यो वा ५३१
६22. सूर्यः हरिमा हृदयरोगश्च ५३२
१. ब्रह्म ५३२
६2३. सूर्या ५३२
१. सूर्या सावित्री ५३२
६2४. सूर्य्यादयो मन्त्रोक्ताः ५३३
१. वरुणः ५३३
६2५. सूर्या विवाहः ५३३
१. सूर्या सावित्री ५३३
६2६. सूर्यो जातवेदा ५३३
१. ब्रह्म ५३३
६2७. सूर्यो जातवेदा वज्रः ५३४
१. ब्रह्म ५३४
६2८. सेनापतिः ५३४
१. दीर्घतमा ५३४
2. नाभानेदिष्टः ५३४
३. बृहस्पतिः ५३४
६2९. सोम ५३४
१. विश्वामित्रो गाथिनः ५३४
६३०. सोमः ५३४
१. अग्निवरुणसोमानांइनिहवः ५३४
2. अथर्वा ५३४
३. आथर्वणः दध्यङ् ५३४
४. आभूतिः ५३४
५. कण्वो घौरः ५३५

६. कृत्नुर् भार्गवः ५३५
७. काक्षीवत् सुकीर्ति ५३५
८. गर्गः ५३५
६. गोतमः ५३५
१०. गोतमो राहूगणः ५३६
११. दध्यङ् आथर्वणः ५३७
१2. दीर्घतमा औचथ्यः ५३७
१३. देवलः ५३७
१४. प्रगाथः काण्वः ५३७
१५. बन्धुः ५३८
१६. ब्रह्म ५३८
१७. भरद्वाजः ५३८
१८. भृग्वंगिरा ५३८
१६. मधुच्छन्दाः ५३८
२०. वत्सारः काश्यपः ५३८
२१. वसिष्ठः ५३८
22. विमद ऐन्द्रः वसुकृद्वा वासुक्रः (साग्री.सास्वा) विमद ऐन्द्रः वसुकृद्वावसुक्रो वा प्राजापत्यः (ऋसर्व.) वसुकृदृषि विमदो वा (सार्षेदी.) ५३६
२३. वृहद्दिवोऽथर्वा ५३६
२४. शङ्खः ५३६
२५. सावित्री सूर्या ५३६
२६. सूर्या सावित्री ५४०
६३१. सोमः अग्निः आदित्य विष्णुः ब्रह्मा बृहस्पतिः ५४०
१. वसिष्ठः ५४०
६३2. सोमः अर्यमा धाता ५४०
१. प्रतिवेदनः ५४०
६३३. सोमः पर्णमणिः ५४०
१. अथर्वा ५४०
६३४. सोमः पवमानः ५४०
१. ययातिः ५४०
६३५. सोमः मरुतश्च ५४१
१. अथर्वा ५४१
६३६. सोमः वरुणः देवश्च ५४१
१. अथर्वांगिरा ५४१
६३७. सोमवरुणदेवाः ५४१
१. अप्रतिरथः ५४१
६३८. सोमसवितारौ ५४१
१. आगस्त्यः अग्रे द्रष्टव्यम् ५४१

६३६. सोमाः ५४१
१. विमद ऐन्द्रः (साग्री. सास्वा.) प्राजापत्यो वा वसुकृद्वा वासुक्र (सर्व. १०–२१–१ १०–२५–१) गोतमः (सार्षेदी.) ५४१
६४०. सोमाग्नयादित्यविष्णुसूर्य्य बृहस्पतयः ५४१
१. तापसः ५४१
६४१. सोमादयः ५४१
१. प्रजापतिः ५४१
६४2. सोमानः सोमः ५४१
१. व्याघ्रपाद् वासिष्ठः ५४१
६४३. सोमापूषणौ ५४२
१. गृत्समदः शौनकः ५४२
६४४. सोमापूषणौ अदितिश्च ५४२
१. गृत्समदः शौनकः ५४२
६४५. सोमार्कौ ५४२
१. सावित्री सूर्या ५४२
2. सूर्या सावित्री ५४२
६४६. सोमारुद्रौ ५४२
१. अथर्वा ५४२
2. भरद्वाजो बार्हस्पत्यः ५४२
६४७. सोमारुद्रौः ५४३
१. प्रस्कण्वः ५४३
६४८. सोमोवनस्पतिः ५४३
१. अथर्वा ५४३
६४६. सोषधिका निलिम्पाः ५४३
१. अथर्वा ५४३
६५०. होता ५४३
१. देवश्रवो देववातः ५४३
६५१. होत्रादयः ५४३
१. स्वस्त्यात्रेयः ५४३

VEDIC CONCORDANCE OF MANTRAS
AS PER DEVATĀ AND ṚṢI
(वैदिक-देवता-ऋष्यनुसारी मन्त्रानुक्रमकोषः)

२६७. ऋक् सामनी

१. ब्रह्म – अ. ७.५४.१

ऋचं साम यजामहे याभ्यां कर्माणि कुर्वते। एते सदसि राजतो यज्ञं देवेषु यच्छतः ।।१।।

२६८. ऋक्षाश्वमेध्योर् दानस्तुतिः

१. प्रियमेध आंगिरसः (साग्री. ३५४; ३६०) प्रियमेधः (ऋसर्व.) –ऋ. ८.६८.१४–१६

उप मा षड् द्वाद्वा नरः सोमस्य हर्ष्या। तिष्ठन्ति स्वादुरातयः ।।१४।।
ऋज्राविन्द्रोत आ ददे हरी ऋक्षस्य सूनवि। आश्वमेधस्य रोहिता ।।१५।।
सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे। आश्वमेधे सुपेशसः ।।१६।।
षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः। सचा पूतक्रतौ सनम् ।।१७।।
ऐषु चेतद्वृषण्वत्यन्तर्ऋज्रेष्वरुषी। स्वभीशुः कशावती ।।१८।।
न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः। अवद्यमधि दीधरत् ।।१६।।

२६६. ऋतवः

१. इन्द्राग्नी – य. १३.२५

मधुश्च माध्वश्च वासन्तिकावृतूऽअग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामापऽओषध्यः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः। येऽअग्नयः समनसोऽनतरा द्यावापृथिवीऽइमे वासन्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसंविशन्तु तया देवतयांगिरस्वद् ध्रुवे सीदतम्।।२५।।

2. विश्वेदेवाः – य. १४.१५–१७

नभश्च नभस्यश्च वार्षिकावृतूऽअग्नेरन्तः– श्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामापऽओषधयः
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
येऽअग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे वार्षिकावृतूऽअभिकल्पमानाऽइन्द्रमिव
देवाऽअभिसंविशन्तु तया देवतयांगिरस्वद् ध्रुवे सीदतम् ।।१५।।
इषश्चोर्जश्च शारदावृतूऽअग्नेरन्तः श्लेषाऽ सि कल्पेतां द्यावापृथिवी कल्पन्तामापऽओषधयः
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
येऽअग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे शारदावृतूऽअभिकल्पमानाऽइन्द्रमिव
देवाऽअभिसंविशन्तु तया देवतयांगिरस्वद् ध्रुवे सीदतम् ।।१६।।
आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रेत्रं मे पाहि वाच्मे
पिन्व मनो मे जिन्वात्मानमप्रे पाहि ज्योतिर्मे यच्छ ।।१७।।

३. मेधातिथिः काण्वः – ऋ. १.१५.१

इन्द्र सोमं पिब ऋतुनाऽऽत्वा विशन्त्विदन्दवः। मत्सरासस्तदोकसः ।।१।।

२७०. ऋतवोऽग्निर्वा

१. विश्वामित्रः – ऋ. ३.2७.१

प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या। देवांजिगाति सुम्नयुः ।।१।।

2७१. ऋत्विज अग्निर् वा

१. विश्वामित्रो गाथिनः – ऋ. ३.2६.५

मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम् ।
यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवम् ।।५।।

2७2. ऋभवः

१. कुत्स आंगिरसः – ऋ. १.११०.१–६; १.१११.१–५

ऋ. १.११०.१–६

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृण्णुत ऋभवः ।।१।।
आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्रांचो मम के चिदापयः ।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ।।2।।
तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन ।
त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ।।३।।
विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः ।
सौघन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः ।।४।।
क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम् ।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ।।५।।
आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ।
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ।।६।।
ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजोभिर्वसुभिर्वसुर्ददिः ।
युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम मृतसुतीरसुन्वताम् ।।७।।
निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ।।८।।
वाजेभिर्नो वाजसातावविड्ढ्यृमुमाँ इन्द्र चित्रमा दर्षि राधः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।६।।

ऋ. १.१११.१–५

तक्षन्नथं सुवृतं विद्मनाासस्तक्षन्हरी इन्द्रवाहा वृषण्वसू ।
तक्षिन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम् ।।१।।
आ नो यज्ञाय तक्षत ऋभुमद्वयः क्रत्वे दक्षाय सुप्रजावतीमिषम् ।
यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विन्द्रियम् ।।2।।
आ तक्षत सातिमस्मभ्यमृभवः साति रथाय सातिमर्वते नरः ।
सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम्।।३।।
ऋभुक्षणमिन्द्रमा हुव ऊतय ऋभून्वाजान्मरुतः सोमपीतये ।
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये जिषे ।।४।।
ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।५।।

2. दीर्घतमा औचथ्यः – ऋ. १.१६१.१–१४

किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं१ कद्यदूचिम् ।
न निनदिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम ।।१।।
एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवन्तद्व आगमम् ।
सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ।।2।।
अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ।
धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्वयेमसि ।।३।।
चकृवांस ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन् ।
यदावाख्यच्चमसांचतुरः कृतानादित्त्वष्टा ग्नास्वन्तनर्यानजे ।।४।।
हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिन्दिषुः ।
अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३ नामभिः स्परत् ।।५।।
इन्द्रो हरी ययुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत ।
ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भगमैतन ।।६।।
निर्श्चमणो गामरिणीत धीतिभिर्या जरन्ता युवशा ताकृणोतन ।
सौधन्वा अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ।।७।।
इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुंजनेजनम् ।
सौधन्वना यदि तन्नेव हर्यथ तृतीय घा सवने मादयाध्वै ।।८।।
आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ।
वधर्यन्तीं बहुभ्यः प्रैको अब्रवीदृता वदन्तश्चमसाँ अपिंशत ।।९।।
श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम् ।
आ निम्रुचः शकृदेको अपाभरत्कि स्वित्पुत्रेभ्यः पितरा उपावतुः ।।१०।।
उद्वत्स्वस्मा अकृणोतना गृहे तदद्येदमृभवो नानु गच्छथ ।।११।।
सम्मील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः ।
अशपतः यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ।।12।।
सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत् ।
श्वानं बस्तो बोधायितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ।।१३।।
दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति ।
अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः ।।१४।।

३. मेधातिथिः काण्वः – ऋ. १.20.१–८

अयं देवाय जन्मने स्तोमो विप्रेभिरासया। अकारि रत्नधातमः ।।१।।
य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी। शमीभिर्यज्ञमाशत ।।2।।
तक्षन्नासत्याभ्यां परिज्मानं सुखं रथम्। तक्षन्धेनुं सबर्दुघाम् ।।३।।
युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः। ऋभ्वो विष्ट्यक्रत ।।४।।
सं वो मदासो अग्मतेन्द्रेण च मरुत्वता। आदित्येभिश्च राजभिः ।।५।।
उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम्। अकर्त चतुरः पुनः ।।६।।
ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते। एकमेकं सुशस्तिभिः ।।७।।
अधारयन्त वह्नयोऽभजन्त सुकृत्यया। भागं देवेषु यज्ञियम् ।।८।।

४. वसिष्ठः – ऋ. ७.४८.१–३

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य ।
आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयन्तु ।।१।।
ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।
वाजो अस्माँ अवतु वाजसाताविन्द्रेण युजा तरुषेम वृत्रम् ।।2।।
ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरताति वन्वन् ।
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन्वि नृम्णम् ।।३।।

५. वामदेवो गौतमः – ऋ. ४.३३.१–११; ४.३४.१–११; ४.३५.१–९; ४.३६.१–९; ४.३७.१–८

ऋ. ४.३३.१—११

प्र ऋभुभ्यो दूतमिव वाचमिष्य उपस्तिरे श्वैतरीं धेनुमीळे ।
ये वातजूतास्तरणिभिरेवैः परि द्यां सद्यो अपसो बभूवुः ।।१।।
यदारमक्रन्नृभवः पितृभ्यां परिविष्टी वेषणा दंसनाभिः ।
अदिद्देवानामुप सख्यमायन्धीरासः पुष्टिमवहन्मनायै ।।2।।
पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा शयाना ।
ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तो मधुप्सरसो नोऽवन्तु यज्ञम् ।।३।।
यत्संवत्समृभवो गामरक्षन्यत्संवत्समृभवो मा अपिंशन् ।
यत्संवत्समभरन्भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः ।।४।।
ज्येष्ठ आह चमसा द्वा करेति कनीयान्त्रीन्कृणवामेत्याह ।
कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत्पनयद्वचो वः ।।५।।
सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेताम् ।
विभ्राजमानांश्चमसाँ अहेवावेनत्त्वष्टा चतुरो ददृश्वान् ।।६।।
द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः ।
सुक्षेत्राकृण्वन्ननयन्त सिन्धून्धन्वातिष्ठन्नोषधीर्निम्नमापः ।।७।।
रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम् ।
त आ तक्षन्त्वृभवो रयिं नः स्ववसः स्वपसः सुहस्ताः ।।८।।
अपो ह्येषामजुषन्त देवा अभि क्रत्वा मनसा दीध्यानाः ।
वाजो देवानामभवत्सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा ।।९।।
ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा ।
ते रायस्पोषं द्रविणान्यस्मे धत्त ऋभवः क्षेमयन्तो न मित्रम् ।।१०।।
इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रान्तस्य सख्याय देवाः ।
ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन्त्सवने दधात ।।११।।

ऋ. ४.३४.१—११

ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेमं यज्ञं रत्नधेयोप यात ।
इदा हि वो धिषणा देव्यह्नामधात्पीतिं सं मदा अग्मता वः ।।१।।
विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋभवो मादयध्वम् ।
सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वम् ।।2।।
अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत्प्रदिवो दधिध्वे ।
प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः ।।३।।
अभूद् वो विधते रत्नधेयमिदा नरा दाशुषे मर्त्याय ।
पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय ।।४।।
आ वाजा यातोप न ऋभुक्षा महो नरो द्रविणसो गृणानाः ।
आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्व इव ग्मन् ।।५।।
आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः ।
सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इन्द्रवन्तः ।।६।।
सजोषा इन्द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ।
अग्रपाभिर्ऋतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ।।७।।
सजोषस आदित्यैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः ।
सजोषसो दैव्येना सवित्रा सजोषसः सिन्धुभी रत्नधेभिः ।।८।।
ये अश्विना ये पितरा य ऊती धेनुं ततक्षुर्ऋभवो ये अश्वा ।
ये अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ।।९।।
ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तं पुरुक्षम् ।

ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति ।।१०।।
नापाभूत न वोऽतीतृषामानिः शस्ता ऋभवो यज्ञे अस्मिन् ।
समिन्द्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ।।११।।

ऋ. ४.३५.१–६

इहोप यात शवसो नपातः सौधन्वना ऋभवो माप भूत ।
अस्मिन्हि वः सवने रत्नधेयं गमन्त्विन्द्रमनु वो मदासः ।।१।।
आगन्नृभूणामिह रत्नधेयमभूत्सोमस्य सुषुतस्य पीतिः ।
सुकृत्यया यत्स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा ।।2।।
व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत ।
अथैतं वाजा अमृतस्य पन्थां गणं देवानामृभवः सुहस्ताः ।।३।।
किंमयः स्विच्चमस एष आस यं कव्येन चतुरो चिचक्र ।
अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य ।।४।।
शच्याकर्त पितरा युवाना याच्याकर्त्त चमसं देवपानम् ।
शच्या हरी धनुतरावतष्टेन्द्रवाहावृभवो वाजरत्नाः ।।५।।
यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय ।
तस्मै रयिमृभवः सर्ववीरमा तक्षत वृषणो मन्दसानाः ।।६।।
प्रातः सुतमपिबो हर्यश्व माध्यन्दिनं सवनं केवलं ते ।
समृभुभिः पिबस्व रत्नधेभिः सखीँयाँ इन्द्र चकृषे सुकृत्या ।।७।।
ये देवासो अभवता सुकृत्या श्येना इवेदधि दिवि निषेद ।
ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः ।।८।।
यत्तृतीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः ।
तदृभवः परिषिक्तं व एतत्सं मदेभिरिन्द्रियेभिः पिबध्वम् ।।६।।

ऋ. ४.३६.१–६

अनश्वो जातो अनभीशुरुक्थ्यो३ रथस्त्रिचक्रः परि वर्तते रजः ।
पहत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ ।।१।।
रथं य चक्रुः सुवृतं सुचेतसोऽविह्वरन्तं मनस्परि ध्यया ।
ताँ ऊ न्व१स्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि ।।2।।
तद्वो वाजा ऋभवः सुप्रवाचनं देवेषु विभ्वो अभवन्वमहित्वनम् ।
जिव्री यत्सन्ता पितरा सनाजुरा पुनर्युवाना चरथाय धीतिभिः ।
अथा देवेष्वमृतत्वमानश श्रुष्टी वाजा ऋभवस्तद्व उक्थ्यम् ।।४।।
ऋभुतो रयिः प्रथमश्रवस्तमो वाजश्रुतासो यमजीजनन्नरः ।
विभ्वतष्टो विदथेषु प्रवाच्यो यं देवासोऽवथा स विचर्षणिः ।।५।।
स वाज्यर्वा स ऋषिर्वचस्यया स शूरो अस्ता पृतनासु दुष्टरः ।
स रायस्पोषं स सुवीर्यं दधे यं वाजो विभ्वाँ ऋभवो यमाविषुः ।।६।।
श्रेष्ठं वः पेशो अधि धायि दर्शतं स्तोमो वाजा ऋभवस्तं जुजुष्टन ।
धीरासो हि ष्ठा कवयो विपिश्चतस्तान्व एना ब्रह्मणा वेदयामसि ।।७।।
यूयमस्मभ्यं धिष्णाभ्यस्परि विद्वांसो विश्वा नर्याणि भोजना ।
द्युमन्तं वाजं वृषशुष्ममुत्तममा नो रयिमृभवस्तक्षता वयः ।।८।।
इह प्रजामिह रयिं रराणा इह श्रवो वीरवत्तक्षता नः ।
येन वयं चितयेमात्यन्यान्तं वाजं चित्रमृभवो ददा नः ।।६।।

ऋ. ४.३७.१–८

उप नो वाजा अध्वरमृभुक्षा देवा यात पथिभिर्देवयानैः ।
यथा यज्ञं मनुषो विक्ष्वा३ सु दधिध्वे रण्वाः सुदिनेष्वह्नाम् ।।१।।
ते वो हृदे मनसे सन्तु यज्ञा जुष्टासो अद्य घृतनिर्णिजो गुः ।

प्र वः सुतासो हरयन्त पूर्णाः क्रत्वे दक्षाय हर्षयन्त पीताः ।।2।।
त्र्युदायंदेवहितं यथा वः स्तोमो वाजा ऋभुक्षणो ददे वः ।
जुह्वे मनुष्वदुपरासु विक्षु युष्मे सचा वृहद्दिवेषु सोमम् ।।३।।
पीबोअश्वाः शुचद्रथा हि भूतायः शिप्रा वाजिनः सुनिष्काः ।
इन्द्रस्य सूनो शवसो नपातोऽनु वश्चत्यग्रियं मदाय ।।४।।
ऋभुमृभुक्षणो रयिं वाजे वाजिन्तमं युजम् ।
इन्द्रस्वन्तं हवामहे सदासातममश्विनम् ।।५।।
सेदृभवो यमवथ यूयमिन्द्रश्च मर्त्यम् ।
धीभिरस्तु सनिता मेधसाता सो अर्वता ।।६।।
वि नो वाजा ऋ□भुक्षणः पथश्चितन यष्टवे ।
अस्मभ्यं सूरयः स्तुता विश्वा आशस्तरीषणि ।।७।।
तं नो वाजा ऋभुक्षण इन्द्र नासत्या रयिम् ।
समश्वं चर्षणिभ्य आ पुरु शस्त मघत्तये ।।८।।

६. विश्वामित्रो गाथिनः – ऋ. ३.६०.१–७

इहेह वो मनसा बन्धुता नर उशिजो जग्मुरभि तानि वेदसा ।
याभिर्मायाभिः प्रतिजूतिवर्पसः सौधन्वना यज्ञियं भागमानश ।।१।।
याभिः शचीभिश्चमसाँ अपिशत यया धिया गामरिणीत चर्मणः ।
येन हरी मनसा निरतक्षत तेन देवत्वमृभवः समानश ।।2।।
इन्द्रस्य सख्यमृभवः समानशुर्मनोर्नपातो अपसो दधन्विरे ।
सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः सुकृतः सुकृत्यया ।।३।।
इन्द्रेण याथ सरथं सुते सचाँ अथो वशानां भवथा सह श्रिया ।
न वः प्रतिमै सुकृतानि वाघतः सौधन्वना ऋभवो वीर्याणि च ।।४।।
इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ।
धियेषितो मघवन्दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ।।५।।
इन्द्र ऋभुमान्वाजवान्मत्स्वेह नोऽस्मिन्त्सवने शच्या पुरुष्टुत ।
इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषश्च धर्मभिः ।।६।।
इन्द्र ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियम् ।
शतं केतेभिरिषिरेभिरायवे सहस्रणीथो अध्वरस्य होमनि ।।७।।

७. विश्वेदेवाः – य. १४.2६

यवानां भागोऽस्ययवानामाधिपत्यं प्रजा स्पृताश्चतुश्चत्वारिंश स्तोमः ।
ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं स्पृतं त्रयस्त्रिंश स्तोमः ।।2६।।

८. सुनुर् भार्गवः – ऋ. १०.१७६.१

प्र सूनव ऋभूणां बृहन्नवन्त वृजना। क्षामा ये विश्वधायसोऽश्नन्धेनुं न मातरम् ।।१।।

2७३. ऋभवो विश्वेदेवा वा

१. वसिष्ठः – ऋ. ७.४८.४

नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः ।
समस्मे इषं वसवो ददीरन् यूयं पात स्वस्तिभिः सदा नः ।।४।।

2७४. ऋषभः

१. ब्रह्म – अ. ६.४.१–2४

साहस्रस्त्वेष ऋषभः पयस्वान् विश्वा रूपाणि वक्षणासु बिभ्रत् ।
भद्रं दात्रे यजमानाय शिक्षन् बार्हस्पत्य उस्रियस्तन्तुमातान् ।।१।।
अपां यो अग्रे प्रतिमा बभूव प्रभूः सर्वस्मै पृथिवीव देवी ।

पिता वत्सानां पतिरध्न्यानां साहस्रे पोषे अपि नः कृणोतु ।।2।।
पुमानन्तर्वान्त्स्थविरः पयस्वान् वसोः कबन्धमृषभो बिभर्ति ।
तमिन्द्राय पथिभिर्देवयानैर्हुतमग्निर्वहतु जातवेदाः ।।३।।
पिता वत्सानां पतिरघ्न्यानामथो पिता महतां गर्गराणाम् ।
वतसो जरायुः प्रतिधुक् पीयूष आमिक्षा घृतं तद् वस्य रेतः ।।४।।
देवानां भाग उपनाह एषाऽपां रस ओषधीनां घृतस्य ।
सोमस्य भक्षमवृणीत शक्रो बृहन्नद्रिरभवद् यच्छरीरम् ।
सोमेन पूर्णं कलशं बिभर्षि त्वष्टा रूपाणां जनिता पशूनाम् ।
शिवास्ते सन्तु प्रजन्व इह या इमा न्य१ स्मभ्यं स्वधिते यच्छ या अमूः ।।६।।
आज्यं बिभर्ति घृतमस्य रेतः साहस्रः पोषस्तमु यज्ञमाहुः ।
इन्द्रस्य रूपमृषभो वसानः सो अस्मान् देवाः शिव ऐतु दत्तः ।।७।।
इन्द्रस्यौजो वरुणस्य बाहू अश्विनोरंसौ मरुतामियं कुकुत् ।
बृहस्पतिं संभृतमेतमाहुर्ये धीरासः कवयो ये मनीषिणः ।।८।।
दैवीर्विशः पयस्वाना तनोषि त्वामिन्द्रं त्वां सरस्वन्तमाहुः ।
सहस्रं स एकमुखा ददाति यो ब्राह्मण ऋषभमाजुहोति ।।६।।
बृहस्पतिः सविता ते वयो दधौ त्वष्टुर्वायोः पर्यात्मा त आभृतः ।
अन्तरिक्षे मनसा त्वा जुहोमि बर्हिष्टे द्यावापृथिवी उभे स्ताम् ।।१०।।
य इन्द्रइव देवेषु गोष्वेति विवावदत् ।
तस्य ऋषभस्यांगानि ब्रह्मा सं स्तौतु भद्रया ।।११।।
पार्श्वे आस्तामनुमत्या भगस्यास्तामनूवृजौ ।
अष्ठीवन्तावब्रवीन्मित्रो ममैतौ केवलाविति ।।12।।
भसदासीदादित्यानां श्रोणी आस्तां बृहस्पतेः ।
पुच्छं वातस्य देवस्य तेन धूनोत्योषधीः ।।१३।।
गुदा आसन्त्सिनीवाल्याः सूर्यायास्त्वचमब्रुवन् ।
उत्थातुरब्रुवन् पद ऋषभं यदकल्पयन् ।।१४।।
क्रोड आसींजामिशंसस्य सोमस्य कलशो धृतः ।
देवाः संगत्य यत् सर्व ऋषभं व्यकल्पयन् ।।१५।।
ते कुष्ठिकाः सरमायै कूर्मेभ्यो अदधुः शफान् ।
ऊबध्यमस्य कीटेभ्यः श्ववर्तेभ्यो अधारयन् ।।१६।।
शृंगभ्यां रक्ष ऋषत्यवर्तिं हन्ति चक्षुषा ।
शृणोति भद्रं कर्णाभ्यां गवां यः पतिरघ्न्यः ।।१७।।
शतयाजं स यजते नैनं दुन्वन्त्यग्नयः ।
जिन्वन्ति विश्वे तं देवा यो ब्राह्मण ऋषभमाजुहोति ।।१८।।
ब्राह्मणेभ्य ऋषभं दत्त्वा वरायः कृणुते मनः ।
पुष्टिं सो अघ्न्यानां स्वे गोष्ठेऽव पश्यते ।।१६।।
गावः सन्तु प्रजाः सन्त्वथो अस्तु तनूबलम् ।
तत् सर्वमनु मन्यन्तां देवा ऋषभदायिने ।।2०।।
अयं पिपान इन्द्र इद् राय दधातु चेतनीम् ।
अयं धेनुं सुदुघां नित्यवत्सां वशं दुहां विपश्चितं परो दिवः ।।2१।।
पिशंगरूपो नभसो वयोधा ऐन्द्रः शुष्मो विश्वरूपो न आगन् ।
आयुरस्मभ्यं दधत् प्रजां च रायश्च पोषैरभि नः सचताम् ।।22।।
उपेहोपपर्चनास्मिन् गोष्ठ उप पृंच नः ।
उप ऋषभस्य यद् रेत उपेन्द्र तव वीर्यम् ।।2३।।
एतं वो युवानं प्रति दध्मो अत्र तेन क्रीडन्तीश्चरत वशाँ अनु ।

मा नो हासिष्ट जनुषा सुभागा रायश्च पाषैरभि नः सचध्वम् ।।2४।।

२७५. ऋषयः

१. **प्रजापत्यो यज्ञः – य. ३४.४६**

सहस्तोमाः सहच्छन्दसऽआवृतः सहप्रमाऽ अषयः सप्त दैव्याः ।
पूर्वेषां पन्थामनुदृश्य धीराऽअन्वालेभिरे रथ्यो न रश्मीन् ।।४६।।

२७६. एक रुद्रः

१. **बृहस्पतिः – य. १६.५**

अध्यवोचदाधिवक्ता प्रथमो दैव्यो भिषक् अहीँश्च सर्वांजम्भयन्त्सर्वाश्च
यातुधान्योऽधराचीः परा सुव।।५।।

२७७. एक वृषः

१. **अथर्वा (वृषकामः) – अ. ६.८६.१–३**

वृषेन्द्रस्य वृषा दिवो वृषा पृथिव्या अयम्। वृषा विश्वस्य भूतस्य त्वमेकवृषो भव।।१।।
समुद्र ईशे स्रवतामग्निः पृथिव्या वशी। चन्द्रमा नक्षत्राणामीशे त्वमेकवृषो भव।।2।।
सम्राडस्यसुराणां कुकुन्मनुष्याणाम्। देवानामर्धभागसि त्वमेकवृषो भव ।।३।।

2. **विश्वामित्रः – अ. ५.१६.१–११**

यद्येकवृषोऽसि सृजारसोसि ।।१।।
यदि द्विवृषोऽसि सृजारसोसि ।।2।।
यदि त्रिवृषोऽसि सृजारसोसि ।।३।।
यदि चतुर्वृषेऽसि सृजारसोसि ।।४।।
यदि पंचवृषोऽसि सृजारसोसि ।।५।।
यदि षड्वृषोऽसि सृजारसोसि ।।६।।
यदि सप्तवृषोऽसि सृजारसोसि ।।७।।
यद्यष्टवृषोऽसि सृजारसोसि ।।८।।
यदि नववृषोऽसि सृजारसोसि ।।६।।
यदि दशवृषोऽसि सृजारसोऽसि ।।१०।।
यद्येकादशोऽसि सोऽपोदकोसि ।।११।।

२७८. ओजः प्रभृतीनिः

१. **ब्रह्म – अ. 2.१७.१–७**

ओजोऽस्योजो मे दाः स्वाहा ।।१।।
सहोऽसि सहो मे दाः स्वाहा ।।2।।
बलमसि बलं मे दाः स्वाहा ।।३।।
आयुरस्यायुर्मे मे दाः स्वाहा ।।४।।
श्रोत्रमसि श्रोत्रं मे दाः स्वाहा ।।५।।
चक्षुरसि चक्षुर्मे दाः स्वाहा ।।६।।
परिपाणमसि परिपाणं मे दाः स्वाहा ।।७।।

२७६. ओषधिः

१. **कपिंजलः – अ. 2.2७.१–५**

नेच्छत्रुः प्राशं जयाति सहमानाभिभूरसि। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।१।।
सुपर्णस्तवान्वविन्दत् सूकरस्त्वाखनन्नसा। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।2।।
इन्द्रो ह चक्रे त्वा बाहावसुरेभ्य स्तरीतवे। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।३।।
पाटामिन्द्रो व्याश्नादसुरेभ्य स्तरीतवे। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।४।।

तयाहं शत्रून्त्साक्ष इन्द्रः सालावृकाँइव। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।५।।

2. **प्रतिवेदनः – अ. 2.३६.८**

आ ते नयतु सविता नयतु पतिर्यः प्रतिकाम्यः। त्वमस्यै धेह्योषधे ।।८।।

३. **प्रजापतिः – अ. 2.३०.३–४**

यत् सुपर्णा विवक्षवो अनमीवा विवक्षवः। तत्र मे गच्छताद्धवं शल्यइव कुल्मलं यथा ।।३।।
यदन्तरं तद् बाह्यं यद् बाह्यं तदन्तरम्। कन्यानां विश्वरूपाणां मनो गृभायौषधे ।।४।।

४. **मातृनामा – अ. ४.2०.१–६**

आ पश्यति प्रति पश्यति परा पश्यति पश्यति ।
दिवमन्तरिक्षमाद् भूमिं सर्वं तद् देवि पश्यति ।।१।।
तिस्रो दिवस्तिस्रः पृथिवीः षट् चेमाः प्रदिशः पृथक् ।
त्वयाहं सर्वा भूतानि पश्यानि देव्योषधे ।।2।।
दिव्यस्य सुपर्णस्य तस्य हासि कनीनिका ।
सा भूमिमा रुरोहिथ वह्यं श्रान्ता वधूरिव ।।३।।
तां मे सहस्राक्षो देवो दक्षिणे हस्त आ दधत् ।
तयाहं सर्वं पश्यामि यश्च शूद्र उतार्यः ।।४।।
आविष्कृणुष्व रूपाणि मात्मानमप गूहथाः ।
अथो सहस्रचक्षो त्वं प्रति पश्याः किमीदिनः ।।५।।
दर्शय मा यातुधानान् दर्शय यातुधान्यः ।
पिशाचान्त्सर्वान् दर्शयेति त्वा रभ ओषधे ।।६।।
कश्यपस्य चक्षुरसि शुन्याश्च चतुरक्ष्याः ।
वीध्रे सूर्यमिव सर्पन्तं मा पिशाचं तिरस्करः ।।७।।
उदग्रभं परिपाणाद् यातुधानं किमीदिनम् ।
तेनाहं सर्वं पश्याम्युत शूद्रमुतार्यम् ।।८।।
यो अन्तरिक्षेण पतति दिवं यश्चातिसर्पति ।
भूमिं यो मन्यते नाथं तं पिशाचं प्र दर्शय ।।९।।

2८०. ओषधि (अजशृंगी)

१. **बादरायणिः – अ. ४.३७.१–2; ६; १०**

अ. ४.३७.१–2

त्वया पूर्वमथर्वाणो जघ्नू रक्षांस्योषधे। त्वया जघान कश्यपस्त्वया कण्वो अगस्त्यः ।।१।।
त्वया वयमप्सरसो गन्धर्वांश्चातयामहे। अजशृंग्यज रक्षः सर्वान् गन्धेन नाशयः ।।2।।

अ. ४.३७.६

एयमगन्नोषधीनां वीरुधां वीर्यावती। अजशृंग्यराटकी तीक्ष्णशृंगी व्यृ षतु ।।६।।

अ. ४.३७.१०

अवकादानभिशोचानप्सु ज्योतय मामकान्। पिशाचान् सर्वानोषधे प्र मृणीहि सहस्व च ।।१०।।

2८१. ओषधयः

१. **अगस्त्यो मैत्रावरुणिः – ऋ. १.१८७.१–११**

पितुं नु स्तोषं महो धर्माणं तविषीम्। यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्।।१।।
स्वादो पितो मधो पितो वयं त्वा ववृमहे। अस्माकमविता भव।।2।।
उप नः पितवा चर शिवः शिवाभिरूतिभिः। मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः।।३।।
तव त्ये पितो रसा रजांस्यनु विष्ठिताः। दिवि वाता इव श्रिताः।।४।।
तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो। प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते।।५।।

त्वे पितो महानां देवानां मनो हितम्। अकारि चारु केतुना तवाहिमवसावधीत्।।६।।
यददो पितो अजगन्विवस्व पर्वतानाम्। अत्रो चिन्नो मधो पितोऽरं भक्षाय गम्याः।।७।।
यदपामोषधीनां परिंशमारिशामहे। वातापे पीव इद्भव।।८।।
यत्ते सोम गवाशिरो यवांशिरो भजामहे। वातापे पीव इद्भवः।।९।।
करम्भ ओषधो भव पीवो वृक्क उदारथिः। वातापे पीव इद्भव।।१०।।
तं त्वा वयं पितो वचो भिर्गावो न हव्या सुषूदिम। देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ।।११।।

2. भिषग् – य. १2.८०; ८2

य. १2.८०

यत्रौषधीः समग्मत राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ।।८०।।

य. १2.८2

उच्छुष्मा ओषधीनां गावो गोष्ठदिवेरते। धनं सनिष्यन्तीनामात्मानं तव पूरुष ।।८2।।

2८2. औदुम्बरमणिः

१. सविताः (पुष्टिकामः) – अ. १९.३१.१–१४

औदुम्बरेण मणिना पुष्टिकामाय वेधसा ।
पशूनां सर्वेषं स्फातिं गोष्ठे मे सविता करत् ।।१।।
यो नो अग्निर्गार्हपत्यः पशूनामधिपा असत् ।
औदुम्बरो वृषा मणिः स मा सृजतु पृष्ट्या ।।2।।
करीषिणीं फलवतीं स्वधामिरां च नो गृहे ।
औदुम्बरस्य तेजसा धाता पुष्टिं दधातु मे ।।३।।
यद् द्विपाच्च चतुष्पाच्च यान्यन्नानि ये रसाः ।
गृह्णे३ हं त्वेषां भूमानं बिभ्रदौदुम्बरं मणिम् ।।४।।
पुष्टिं पशूना परि जग्रभाहं चतुष्पदां द्विपदां यच्च धान्यम् ।
पयः पशूनां रसमोषधीनां बृहस्पतिः सविता मे नि यच्छात् ।।५।।
अहं पशूनामधिपा असानि मयि पुष्टं पुष्टपतिर्दधातु ।
मह्यमौदुम्बरो मणिर्द्रविणानि नि यच्छतु ।।६।।
उप मौदुम्बरो मणिः प्रजया च धनेन च ।
इन्द्रेण जिन्वितो मणिरा मागन्त्सह वर्चसा ।।७।।
देवो मणिः सपत्नहा धनसा धनसातये ।
पशोरन्नस्य भूमानं गवां स्फातिं नि यच्छतु ।।८।।
यथाग्रे त्वं वनस्पते पुष्ट्या सह जज्ञिषे ।
एवा धनस्य मे स्फातिमा दधातु सरस्वती ।।९।।
सिनीवाल्युपा वहादयं चौदुम्बरो मणिः ।।१०।।
त्वं मणीनामधिपा वृषासि त्वयि पुष्टं पुष्टपतिर्जजान ।
त्ययीमे वाजा द्रविणानि सर्वौदुम्बरः स त्वमस्मत् सहस्वारादरातिममतिं क्षुधं च ।।११।।
ग्रामणीरसि ग्रामणीरुत्थायाभिषिक्तोऽभि मा सिंच वर्चसा ।
तेजोऽसि तेजो मयि धारयाधि रयिरसि रयिं मे धेहि ।।१2।।
पृष्टिरसि पुष्ट्या मा समङ्ग्धि गृहमेधी गृहपतिं मा कृणु ।
औदुम्बरः स त्वमस्मासु धेहि रयिं च नः सर्ववीरं नि यच्छा रायस्पोषाय प्रति मुंचे अहं त्वाम्।।१३।।
अयमौदुम्बरो मणिर्वीरो वीराय बध्यते ।
स नः सनिं मधुमतीं कृणोतु रयिं च नः सर्ववीरं नि यच्छात् ।।१४।।

२८३. ओषधीस्तुतिः

१. भिषग् आथर्वणः – ऋ. १०.९७.१–२३

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु ब्रभूणामहं शतं धामानि सप्त च ।।१।।
शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अधा शतक्रत्वो यूयमिमं मे अगदं कृत ।।2।।
ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः। अश्वाइव सजित्वरीर्वीरुधः पारयिष्ण्वः ।।३।।
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे। सनेयमश्वं गां वास आत्मानं तव पूरुष ।।४।।
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम् ।।५।।
यत्रौषधीः समग्मत राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ।।६।।
अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्। आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ।।७।।
अच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते। धनं सनिष्यन्तीनामात्मानं तव पूरुष ।।८।।
इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः। सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ।।९।।
अति विश्वाः परिष्ठाः स्तेनइव व्रजमक्रमुः। ओषधीः प्राचुच्युवर्यत्कि च तन्वो३ रपः ।।१०।।
यदिमा वाजयन्नहमोषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ।।११।।
यस्यौषधीः प्रसर्पथांगमङ्गं परुष्परुः। ततो यक्ष्मं वि वाधध्व उग्रो मध्यमशीरिव ।।१2।।
साकं यक्ष्म प्र पत चाषेण किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया ।।१३।।
अन्या वो अन्यामवत्वन्यान्यस्या अपावत। ताः सर्वाः संविदाना इदं म प्रावता वचः ।।१४।।
या फलिनीर्या अफला अपुष्पा याश्व पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः ।।१५।।
मुंचन्तु मा शपथ्या३ दथो वरुण्यादुत। अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्विषात् ।।१६।।
अवपत्न्तीरवदन्दिव ओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः ।।१७।।
या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः। तासां त्वमस्युत्तमारं कामाय शं हृदे ।।१८।।
या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु। बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यम् ।।१९।।
मा वो रिषत्खनिता यस्मै चाहं खनामि वः। द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् ।।20।।
याश्वेदमुपशृण्वन्ति याश्च दूरं परागताः। सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यम् ।।2१।।
ओषधयः सं वदन्ते सोमंन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि ।।22।।
त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः। उपस्तिरस्तु सो३ स्माकं यो अस्माँ अभिदासति ।।2३।।

२८४. औषधिः

१. कपिंजलः – अ. 2.2७.१–५

नेच्छत्रुः प्राशं जयाति सहमानाभिभूरसि। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।१।।
सुपर्णस्तवान्वविन्दत् सूकरस्त्वाखनन्नसा। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।2।।
इन्द्रो ह चक्रे त्वा बाहावसुरेभ्य स्तरीतवे। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।३।।
पाटामिन्द्रो व्याश्नादसुरेभ्य स्तरीतवे। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।४।।
तयाहं शत्रून्त्साक्ष इन्द्रः सालावृकाँइव। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।५।।

2. प्रजापतिः – अ. 2.३०.३–४

यत् सुपर्णा विवक्षवो अनमीवा विवक्षवः। तत्र मे गच्छताद्धवं शल्यइव कुल्मलं यथा।।३।।
यदन्तरं तद् बाह्यं यद् बाह्यं तदन्तरम्। कन्यानां विश्वरूपाणां मनो गृभायौषधे ।।४।।

२८५. कः

१. हिरण्यगर्भः – य. १2.१०2

मा मा हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा व्यानट्।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ।।१०2।।

2. हिरण्यगर्भः प्राजापत्य – ऋ. १०.१2१.१–१०.

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।१।।

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ।।2।।
यः प्राणतो निमिषतो महित्वेक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ।।३।।
यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ।।४।।
येन द्यौरुग्रा पृथिवी च दृळहा येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।५।।
यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ।।६।।
आपो ह यद् बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ।।७।।
यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ।।८।।
मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ।।९।।
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ।।१०।।

2८६. कपिंजल इव इन्द्रः

१. गृत्समदः शौनकः – ऋ. 2.४2.१–३; 2.४३.१–३

ऋ. 2.४2.१–३

कनिक्रदज्जनुषं प्रबुवाण इयर्ति वाचमरितेव नावम् ।
सुमंगलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत् ।।१।।
मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता ।
पित्र्यामनु प्रदिशं कनिक्रदत्सुमंगलो भद्रवादी वदेह ।।2।।
अव क्रन्द दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकुन्ते ।
मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ।।३।।

ऋ. 2.४३.१–३

प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः ।
उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति ।।१।।
उदगातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ।
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद ।
विश्वतो नः शकुने पुण्यमा वद ।।2।।
आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ।
यदुत्पतन्वदसि कर्करिर्यथ बृहद्वदेम विदथे सुवीराः ।।३।।

2८७. कपोतापहतौ प्रायश्चित् वैश्वदेवम्

१. कपोतो नैर्ऋतः – ऋ. १०.१६५.१–५

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम् ।
तस्मा अर्चाम् कृणवाम् निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ।।१।।
शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु ।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ।।2।।
हेतिः पक्षिणी न दभात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने ।
शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः ।।३।।

यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ।।४।।
ऋचा कपोतं नुदत प्राणेदमिषं मदन्तः परि गां नयध्वम् ।
संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्र प्रतात्पतिष्ठः ।।५।।

२८८. कर्माणि

१. अथर्वा – अ. ५.६.2

अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे।
वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे।।2।।

२८९. कवचसोम वरुण

१. पायुर् भरद्वाजः – ऋ. ६.७५.१८

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ।।१८।।

२९०. कामः

१. अथर्वा – अ. ९.2.१–2५

सपत्नहनमृषभं घृतेन कामं शिक्षामि हविषाज्येन ।
नीचैः सपत्नान् मम पादय त्वमभिष्टुतो महता वीर्येण।।१।।
यन्मे मनसो न प्रियं न चक्षुषो यन्मे बभस्ति नाभिनन्दति ।
तद् दुःष्वप्न्यं प्रति मुंचामि सपत्ने कामं स्तुत्वोदहं भिदेयम् ।।2।।
दुःष्वप्न्यं काम दुरितं च कामप्रजस्तामस्वगतामवर्तिम् ।
उग्र ईशानः प्रति मुंच तस्मिन् यो अस्मभ्यमंहूरणा चिकित्सात्।।३।।
नुदस्व काम प्र णुदस्व कामावर्तिं यन्तु मम ये सपत्नाः ।
तेषां नुत्तानामधमा तमांस्यग्ने वास्तूनि निर्दह त्वम्।।४।।
सा ते काम दुहिता धेनुरुच्यते यामाहुर्वाचं कवयो विराजम् ।
तया सपत्नान् परि वृङ्ग्धि ये मम पर्येनान् प्राणः पशवो जीवनं वृणक्तु।।५।।
कामस्येन्द्रस्य वरुणस्य राज्ञो विष्णोर्बलेन सवितुः सवेन ।
अग्नेर्होत्रेण प्र णुदे सपत्नांछम्बीव नावमुदकेषु धीरः।।६।।
अध्यक्षो वाजी मम काम उग्रः कृणोतु मह्यमसपत्नमेव ।
विश्वे देवा मम नाथं भवन्तु सर्वे देवा हवमा यन्तु म इमम्।।७।।
इदमाज्यं घृतवज्जुषाणाः कामज्येष्ठा इह मादयध्वम् । कृण्वन्तो मह्यमसपत्नमेव ।।८।।
इन्द्राग्नी काम सरथं हि भूत्वा नीचैः सपत्नान् मम पादयाथः ।
तेषां पन्नानामधमा तमांस्यग्ने वास्तून्यनुनिर्दह त्वम्।।९।।
जहि त्वं काम मम ये सपत्ना अन्धा अमांस्यव पादयैनान ।
निरिन्द्रिया अरसाः सन्तु सर्वे मा ते जीविषुः कतमच्चनाहः।।१०।।
अवधीत् कामो मम ये सपत्ना उरुं लोकमकरन्मह्यमेधतुम् ।
मह्यं नमन्तां प्रदिशश्चतस्रो मह्यं षड्डुर्वीर्घृतमा वहन्तु।।११।।
तेऽधरांचः प्र प्लवन्तां छिन्ना नौरिव बन्धनात् ।
न सायकप्रणुत्तानां पुनरस्ति निवर्तनम्।।१2।।
अग्निर्यव इन्द्रो यवः सोमो यवः । यवयावानो देवा यावयन्त्वेनम्।।१३।।
असर्ववीरश्चरतु प्रणुत्तो द्वेष्यो मित्राणां परिवर्ग्य१ः स्वानाम् ।
उत पृथिव्यामव स्यन्ति विद्युत उग्रो वो देवः प्र मृणत् सपत्नान् ।।१४।।
च्युता चेयं बृहत्यच्युता च विद्युत् बिभर्ति स्तनयित्नूश्चं सर्वान् ।
उद्यन्नादित्यो द्रविणेन तेजसा नीचैः सपत्नान् नुदतां मे सहस्वान्।।१५।।

यत् ते काम शर्म त्रिवरूथमुद्‌भु ब्रह्म वर्म विततमनतिव्याध्यंकृतम् ।
तेन सपत्नान् परि वृङ्ग्धि ये मम पर्येनान् प्राणः पशवो जीवनं वृणक्तु।।१६।।
येन देवा असुरान् प्राणुदन्त येनेन्द्रो दस्यूनधमं तमो निनाय ।
तेन त्वं काम मम ये सपत्नास्तानस्माल्लोकात् प्र णुदस्व दूरम्।।१७।।
यथा देवा असुरान् प्राणुदन्त यथेन्द्रो दस्यूनधमं तमो बबाधे ।
तथा त्वं काम मम ये सपत्नास्तानस्माल्लोकात् प्र णुदस्व दूरम्।।१८।।
कामो जज्ञे प्रथमो नैनं देवा आपुः पितरो न मर्त्याः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि।।१९।।
यावती द्यावापृथिवी वरिम्णा यावदापः सिष्यदुर्यावदग्निः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि।।२०।।
यावतीर्दिशः प्रदिशो विषूचीर्यावतीराशा अभिचक्षणा दिवः ।
ततस्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि।।२१।।
यावतीर्भृङ्गा जत्वः कुरूरवो यावतीर्वघा वृक्षसर्प्यो बभूवुः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि।।22।।
ज्यायान् निमिषतोऽसि तिष्ठतो ज्यायान्त्समुद्रादसि काम मन्योर
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि।।2३।।
न वै वातश्चन काममाप्नोति नाग्निः सूर्यो नोत चन्द्रमाः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि।।2४।।
यास्ते शिवास्तन्वः काम भद्रा याभिः सत्यं भवति यद् वृणीषे ।
ताभिष्ट्वमस्माँ अभिसंविशस्वान्यत्र पापीरप वेशया धियः ।।2५।।

2. **उद्दालकः – अ. ३.2९.७**

क इदं कस्मा अदात् कामः कामायादात्। कामो दाता कामः प्रतिग्रहीता कामः समुद्रमा विवेश।
कामेन त्वा प्रति गृह्णामि कामैतत् ते ।।७।।

३. **ब्रह्म – अ. १९.५2.१–५**

कामस्तदग्रे समवर्तत मनसो रेतः प्रथमं यदासीत् ।
स काम कामेन बृहता सयोनी रायस्पोषं यजमानाय धेहि ।।१।।
त्वं काम सहसासि प्रतिष्ठितो विभुर्विभावा सख आ सखीयते ।
त्वमुग्रः पृत्नासु सासहिः सह ओजो यजमानाय धेहि ।।2।।
दूराच्चकमानाय प्रतिपाणयाक्षये । आस्मा अशृण्वन्नाशाः कामेनाजनयन्त्स्वः ।।३।।
कामेन मा काम आगन् हृदयाद्धृदयं परि। यदमीषामदो मनस्तदैतूप मामिह ।।४।।
यत्काम कामयमाना इदं कृण्मसि ते हविः।
तन्नः सर्वं समृध्यतामथेतस्य हविषो वीहि स्वाहा।।५।।

2९१. कामात्मा

१. **जमदग्निः – अ. ६.८.१–३; ६.९.१–३**

अ. ६.८.१–३

यथा वृक्षं लिबुजा समन्तं परिषस्वजे ।
एवा परि ष्वजस्व मां यथा मां कामिन्यसो यथा मन्नापगा असः।।१।।
यथा सुपर्णः प्रपतन् पक्षौ निहन्ति भूम्याम् ।
एवा नि हन्मि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ।।2।।
यथेमे द्यावापृीिवी सद्यः पर्येति सूर्यः ।
एवा पर्येमि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः।।३।।

अ. ६.९.१–३

वांछ मे तन्वं१ पादौ वांछाक्ष्यौ३ वांछ सक्थ्यौ।

अक्ष्यौवृषण्यन्त्याः केशा मां ते कामेन शुष्यन्तु ।।१।।
मम त्वा दोषणिश्रिषं कृणोमि हृदयश्रिषम्। यथा मम क्रतावसो मम चित्तमुपायसि ।।2।।
यासां नाभिशरेहणं हृदि संवननं कृतम्। गावो घृतस्य मातरोऽमूं सं वानयन्तु मे।।३।।

2६2. कामेषु मित्रावरुणौ

१. भृगुः – अ. ३.2५.१–६

उत्तुदस्त्वोत् तुदतु मा धृथाः शयने स्वे। इषुः कामस्य या भीमा तया विध्यामि त्वा हृदि ।।१।।
आधीपर्णां कामशल्यामिषुं सङ्कल्पकुल्मलाम्। तां सुसन्नतां कृत्वा कामो विध्यतु त्वा हृदि।।2।।
या प्लीहानं शोषयति कामस्येषुः सुसंनता। प्राचीनपक्षा व्योषा त्पा विध्यामि त्वा हृदि ।।३।।
शुचा विद्धा व्योषा शुष्कास्याभि सर्प मा। मृदुर्निमन्युः केवली प्रियवादिन्यनुव्रता ।।४।।
आजामि त्वाजन्या परि मातुरथो पितुः। यथा मम क्रतावसो मम चित्तमुपायसि ।।५।।
व्यस्यै मित्रावरुणौ हृदश्चित्तान्यस्यतम्। अथैनामक्रतुं कृत्वा ममैव कृणुतं वशे ।।६।।

2६३. कालः

१. भृगुः – अ. १६.५३.१–१०; १६.५४.१–५

अ. १६.५३.१–१०

कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः ।
तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा ।।१।।
सप्त चक्रान् वहति काल एष सप्तास्य नाभीरमृतं न्वक्षः ।
स इमा विश्वा भुवनान्यंजत् कालः स ईयते प्रथमो नु देवः ।।2।।
पूर्णः कुम्भोऽधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः ।
स इमा विश्वा भुवनानि प्रत्यङ् कालं तमाहुः परमे व्योमन् ।।३।।
स एव सं भुवनान्याभरत् स एव सं भुवनानि पर्यैत् ।
पिता सन्नभवत् पुत्र एषां तस्माद् वै नान्यत् परमस्ति तेजः ।।४।।
कालोऽमूं दिवमजनयत् काल इमाः पृथिवीरुत ।
काले ह भूतं भव्यं चेषितं ह वि तिष्ठते ।।५।।
कालो भूतिमसृजत काले तपति सूर्यः।
काले ह विश्वा भूतानि काले चक्षुर्वि पश्यति ।।६।।
काले मनः काले प्राणः काले नाम समाहितम् ।
कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः ।।७।।
काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम् ।
कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः ।।८।।
तेनेषितं तेन जातं तदु तस्मिन् प्रतिष्ठितम् ।
कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम् ।।६।।
कालः प्रजा असृजत कालो अग्रे प्रजापतिम् ।
स्वयम्भूः कश्यपः कालात् तपः कालादजायत ।।१०।।

अ. १६.५४.१–५

कालादापः समभवन् कालाद् ब्रह्म तपो दिशः ।
कालेनोदेति सूर्यः काले नि विशते पुनः ।।१।।
कालेन वातः पवते कालेन पृथिवी मही ।
द्यौर्मही काल आहिता ।।2।।
कालो ह भूतं भव्यं च पुत्रो अजनयत् पुरा ।
कालादृचः समभवन् यजुः कालादजायत ।।३।।
कालो यज्ञं समैरयद्देवेभ्यो भागमक्षितम् ।
काले गन्धर्वाप्सरसः काले लोकाः प्रतिष्ठिताः ।।४।।

कालेऽयमंगिरा देवेऽथर्वा चाधि तिष्ठतः ।
इमं च लोकं परमं च लोकं पुण्यांश्च लोकान् विधृतीश्च पुण्याः ।
सर्वांल्लोकानभिजित्य ब्रह्मणा कालः स ईयते परमो नु देवः ।।५।।

२६४. कासाः

१. उन्मोचनः – अ. ६.१०५.१–३

यथा मनो मनस्केतैः परापतत्याशुमत्। एवा त्वं कासे प्र पत मनसोऽनु प्रवाय्यम् ।।१।।
यथा बाणः सुसंशितः परापतत्याशुमत्। एवा त्वं कासे प्र पत पृथिव्या अनु संवतम् ।।2।।
यथा सूर्यस्य रश्मयः परापतन्त्याशुमत्। एवा त्वं कासे प्र पत समुद्रस्यानु विक्षरम् ।।३।।

२६५. कुरुंगस्य दानस्तुतिः

१. देवातिथिः काण्वः – ऋ. ८.४.१९–21

स्थूरं राधः शताश्वं कुरुंगस्य दिविष्टिषु ।
राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ।।१९।।
धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः ।
षष्टि सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ।।20।।
वृक्षाश्चिन्मे अभिपित्वे अरारणुः ।
गां भजन्त मेहनाश्वं भजन्त मेहना ।।21।।

२६६. कुरुश्रवणस्य त्रासदस्यवस्य दानस्तुतिः

१. कवष ऐलूषः – ऋ. १०.३३.४–५

कुरुश्रवणमावृणि राजानं त्रासदस्यवम्। मंहिष्ठं वाघतामृषिः ।।४।।
यस्य मा हरितो रथे तिस्रो वहन्ति साधुया। स्तवै सहस्रदक्षिणे ।।५।।

२६७. कुष्ठः

१. भृग्वंगिरा – अ. १९.३९.१–१०

ऐतु देवस्त्रायमाणः कुष्ठो हिमवतस्परि। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ।।१।।
त्रीणि ते कुष्ठ नामानि नद्यमारो नद्यारिषः ।
नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ।।2।।
जीवला नाम ते माता जीवन्तो नाम ते पिता ।
नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ।।३।।
उत्तमो अस्योषधीनामनड्वान् जगतामिव व्याघ्रः श्वपदामिव ।
नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ।।४।।
त्रिः शाम्बुभ्यो अंगिरेभ्यस्त्रिरादित्येभ्यस्परि। त्रिर्जातो विश्वदेवभ्यः। स कुष्ठो विश्वभेषजः ।
साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ।।५।।
अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि। तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ।।६।।
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि। तात्रमृतस्य वक्षणं ततः कृष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ।।७।।
यत्र नावप्रभ्रंशनं यत्र हिमवतः शिरः। तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ।।८।।
यं त्वा वेद पूर्व इक्ष्वाको यं वा त्वा कुष्ठ काम्यः। यं वा वसो यमात्स्यस्तेनासि विश्वभेषजः ।।९।।
शीर्षलोकं तृतीयकं सदन्दिर्यश्च हायनः। तक्मानं विश्वधावीर्याधरांचं परा सुव ।।१०।।

२६८. कुष्ठः तक्मनाशनम्

१. भृग्वंगिरा – अ. ५.४.१–१०

योगिरिष्वजायथा वीरुधां बलवत्तमः। कुष्ठेहि तक्मनाशन तक्मानं नाशयन्नितः ।।१।।
सुपर्णसुवने गिरौ जातं हिमवतस्परि। धनैरभि श्रुत्वा यन्ति विदुर्हि तक्मनाशनम् ।।2।।
अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि। तत्रामृतस्य चक्षणं देवाः कुष्ठमवन्वत ।।३।।
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि। तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ।।४।।
हिरण्ययाः पन्थान आसन्नरित्राणि हिरण्यया। नावो हिरण्ययीरासन् याभिः कुष्ठं निरावहन् ।।५।।
इमं मे कुष्ठ पुरुषं तमा वह तं निष्कुरु। तमु मे अगदं कृधि ।।६।।
देवेभ्यो अधि जातोऽसि सोमस्यासि सखा हितः। स प्राणाय व्यानाय चक्षुषे मे अस्मै मृड ।।७।।
उदङ् जातो हिमवतः स प्राच्यां नीयसे जनम्। तत्र कुष्ठस्य नामान्युत्तमानि वि भेजिरे ।।८।।
उत्तमो नाम कुष्ठास्युत्तमो नाम ते पिता। यक्ष्मं च सर्वं नाशय तक्मानं चारसं कृधि ।।६।।
शीर्षामयमुपहत्यामक्ष्योस्तन्वो३रपः। कुष्ठस्तत् सर्वं निष्करद् दैवं समह वृष्ण्यम् ।।१०।।

2९९. कुहुः

१. अथर्वा – अ. ७.४७.१–2

कुहूं देवीं सुकृतं विद्मनापसस्मिन् यज्ञे सुहवा जोहवीमि ।
सा नो रयिं विश्वारं नि यच्छाद् ददातु वीरं शतदायमुक्थ्यम् ।।१।।
कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषो जुषेत ।
शृणोतु यज्ञमुशती नो अद्य रायस्पोषं चिकितुषी दधातु ।।2।।

३००. कृत्याप्रतिहरणम्

१. शुक्रः – अ. ५.३१.१–१2

यां ते चक्रुरामे पात्रे यां चक्रुर्मिश्रधान्ये ।
आमे मांसे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।१।।
यां ते चक्रुः कृकवाकावजे वा यां कुरीरिणि ।
अव्यां ते कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।2।।
यां ते चक्रुरेकशफो पशूनामुभयादति ।
गर्दभे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।३।।
यां ते चक्रुरमूलायां वलगं वा नराच्याम् ।
क्षेत्रे ते कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।४।।
यां ते चक्रुर्गार्हपत्ये पूर्वाग्नावुत दुश्चितः ।
शालायां कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।५।।
यां ते चक्रुः सभायां यां चक्रुरधिदेवने ।
अक्षेषु कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।६।।
या ते चक्रुः सेनायां यां चक्रुरिष्वायुधे ।
दुन्दुभौ कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।७।।
यां ते कृत्यां कूपेऽवदधुः श्मशाने वा निचख्नुः ।
सद्मनि कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।८।।
यां ाते चक्रुः पुरुषास्थे अग्नौ संकसुके च याम् ।
म्रोकं निर्दाहं क्रव्यादं पुनः प्रति हरामित ताम् ।।६।।
अपथेना जभारैणां तां पथेतः प्र हिण्मसि ।
अधीरो मर्याधीरेभ्यः सं जभाराचित्त्या ।।१०।।
यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् ।
चकार भद्रमस्मभ्यमभगो भगवद्भ्यः ।।११।।
कृत्याकृतं वलगिनं मूलिनं शपथेय्यम् ।
इन्द्रस्तं हन्तु महता वधेनाग्निर्विध्यत्वस्तया ।।१2।।

३०१. कृषिबलाः

१. **आदित्या देवाः – य. ३५.१३**

अनड्वाहमन्वारभमहे सौरभेयं स्वस्तये। स नऽ इन्द्रऽ इव देवेभ्यो वह्निः सन्तरणो भव ।।१३।।

३०2. कृषीवलाः

१. **कुमारहारितः – य. 12.६६–७१**

शुनं सु फाला वि कृषन्तु भूमिं शुनं कीनाशाऽअभि यन्तु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पलाऽओषधीः कर्त्तनास्मे ।।६६।।
घृतेन सीता मधुना समज्यता विश्वेर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानास्मान्त्सीते पयसाभ्या ववृत्स्व ।।७०।।
लांगलं पवीरवत्सुशेवं सोमपित्सरु ।
तदद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहनम् ।।७१।।

३०३. कृषीवलाः कवयो वा

१. **विश्वावसुः – य. 12.६७–६८**

सीरा युंजन्ति कवयो युगा वितन्वते पृथक्। धीरा देवेषु सुम्नया ।।६७।।
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीयऽइत्सृण्यः पक्वमेयात् ।।६८।।

३०४. केशिनः

१. **ऋष्यश्रृंगः – ऋ. १०.१३६.७**

वायुरस्मा उपामन्थतिपनष्टि स्मा कुनन्नमा। केशी विषस्य पात्रेण यद्रुद्रेणपिबत्सह ।।७।।

2. **एतशः – ऋ. १०.१३६.६**

अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन्। केशी केतस्य विद्वान्तसखा स्वादुर्मदिन्तमः ।।६।।

३. **करिक्रतः – ऋ. १०.१३६.५**

वातस्याश्वो वायोः सखाथो देवेषितो मुनिः। उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः ।।५।।

४. **जूतिः – ऋ. १०.१३६.१**

केश्य१ग्नि केशी विषं केशी बिभर्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ।।१।।

५. **मुनयो वातरशनाः – ऋ. १०.१३६.१–७**

केश्य2ग्निं केशी विषं केशी बिभर्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ।।१।।
मुनयो वातरशनाः पिशंगा वसते मला। वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ।।2।।
उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम्। शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ।।३।।
अन्तरिक्षेण पतति विश्वा रूपावचाकशत्। मुनिर्देवस्येदेवस्य सौकृत्याय सखा हितः ।।४।।
वातस्याश्वो वायोः सखाथो देवेषितो मुनिः। उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः ।।५।।
अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन्। केशी केतस्य विद्वान्त्सखा स्वादुर्मदिन्तमः ।।६।।
वायुरस्मा उपामन्थत्पिनष्टि स्मा कुनन्नमा। केशी विषस्य पात्रेण यदुद्रेणापिबत्सह ।।७।।

६. **वातजूतिः – ऋ. १०.१३६.2**

मुनयो वातरशनाः पिशंगा वसते मला। वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ।।2।।

७. **वृषाणकः – ऋ. १०.१३६.४**

अन्तरिक्षेण पतति विश्वा रूपावचाकशत्। मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः ।।४।।

८. **विप्रजूतिः – ऋ. १०.१३६.३**

उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम्। शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ।।३।।

३०५. क्रिमिजम्भनम्

१. **काण्वः – अ. 2.३१.2–५**

दृष्टमदृष्टमतृहमथो कुरूरुमतृहम् ।
अलगण्डून्त्सर्वांछलुनान् क्रिमीन् वचसा जम्भयामसि ।।2।।
अल्गण्डून् हन्मि महता वधेन दूना अदूना अरसा अभूवन् ।
शिष्टानशिष्टान् नि तिरामि वाचा यथा क्रिमीणां नकिरुच्छिषातै ।।३।।
अन्वान्त्रयं शीर्षण्य१मथो पार्ष्टेयं क्रिमीन् ।
अवस्कवं व्यध्वरं क्रिमीन् वचसा जम्भयामसि ।।४।।
ये क्रिमयः पर्वतेषु वनेष्वोषधीषु पशुष्वप्स्व१न्तः ।
ये अस्माकं तन्वमाविविशुः सर्वं तद्धन्मि जनिम क्रिमीणाम् ।।५।।

३०६. क्षत्रपतिः

१. मयोभूः – य. ११.2०

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षं समुद्रो योनिः ।
विख्याय चक्षुषा त्वमभि तिष्ठ पृतन्यतः ।।2०।।

2. शुनः शेपः – य. १०.३१–३2; ११.१४

य. १०.३१–३2

अश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ।
वायुः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिस्रुतः ।
इन्द्रस्य युज्यः सखा ।।३१।।
कुविदंग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिं यजन्ति ।
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ।।३2।।

य. ११.१४

योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखायऽइन्द्रमूतये ।।१४।।

३०७. क्षेत्रपतिः

१. देववातः – य. १०.2६

स्योनसि सुषदासि क्षत्रस्य योनिरसि ।
स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ।।2६।।

2. वरुणः – य. १2.१७

शिवो भूत्वा मह्यमग्नेऽअथो सीद शिवस्त्वम् ।
शिवाः कृतवा दिशः सर्वा स्वं योनिमिहासदः ।।१७।।

३. वामदेवो गौतमः – ऋ. ४.५७.१–३

क्षेत्रस्य पतिना वयं हितेनेव जयामसि ।
गामश्वं पोषयित्न्वा स नो मृळातीदृशे ।।१।।
क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु ।।2।।
मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् ।
क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम ।।३।।

४. सविता – य. १३.2६

अषाढासि सहमाना सहस्वारातीः सहस्व पृतनायतः। सहस्रवीर्य्यासि सा मा जिन्व ।।2६।।

३०८. क्षेत्रिय (यक्ष्मकुष्ठादि) नाशनम्

१. भृग्वंगिरा – अ. 2.८.१–५

उदगातां भगवती विचृतौ नाम तारके ।

वि क्षेत्रियस्य मुंचतामधमं पाशमुत्तमम् ।।१।।
अपेयं रात्र्युच्छत्वपोच्छन्त्वभिकृत्वरीः ।
वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ।।2।।
बभ्रोरर्जुनकाण्डस्य यवस्य ते पलाल्या तिलस्य तिलपिंज्या ।
वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ।।३।।
नमस्ते लांगलेभ्यो नम ईषायुगेभ्यः ।
वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ।।४।।
नमः सनिस्रसाक्षेभ्यो नमः संदेश्येभ्यो नमः क्षेत्रस्य पतये ।
वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ।।५।।

३०९. गणपतिः

१. प्रजापतिः – य. 2३.१९

गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधीनां त्वा निधि पतिं हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम् ।।१९।।

2. शुनः शेपः – य. ११.१५

प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यं मयोभूरेहि ।
उर्वन्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन् पूष्ण सयुजा सह ।।१५।।

३१०. गन्धर्वाप्सरसः

१. बादरायणिः – अ. ४.३७.७–९; ११; १2

अ. ४.३७.७–९

आनृत्यतः शिखण्डिनो गन्धर्वस्याप्सरापतेः। भिनद्मि मुष्कावपि यामि शेपः ।।७।।
भीमा इन्द्रस्य हेतयः शतमृष्टीरयस्मयीः। ताभिर्हविरदान् गन्धर्वानवकादान् व्यृषतु ।।८।।
भीमा इन्द्रस्य हेतयः शतमृष्टीर्हिरण्ययीः। ताभिर्हविरदान् गन्धर्वानवकादान् व्यृषतु ।।९।।

अ. ४.३७.११–१2

श्वेवैकः कपिरिवैकः कुमारः सर्वकेशकः ।
प्रियो दृशइव भूत्वा गन्धर्वः सचते स्त्रियस्तमितो नाशयामसि ब्रह्मणा वीर्यावता ।।११।।
जाया इद् वो अप्सरससो गन्धर्वाः पतयो यूयम्। अप धावतामर्त्या मर्त्यान् मा सचध्वम् ।।१2।।

2. मातृनामा – अ. 2.2.१–५

दिव्यो गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यो विक्ष्वीड्यः ।
तं त्वा यौमि ब्रह्मणा दिव्य देव नमस्ते अस्तु दिवि ते सधस्थम् ।।१।।
दिवि स्पृष्टो यजतः सूर्यत्वगवयाता हरसो दैव्यस्य ।
मृडाद् गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यः सुशेवाः ।।2।।
अनवद्याभिः समु जग्म आभिरप्सरास्वपि गन्धर्व आसीत् ।
समुद्र आसां सदनं म आहुर्यतः सद्य आ च परा च यन्ति ।।३।।
अभ्रिये दिद्युन्नक्षत्रिये या विश्वावसुं गन्धर्वं सचध्वे ।
ताभ्यो वो देवीर्नम इत् कृणोमि ।।४।।
या क्लन्दास्तमिषीचयोऽक्षकामा मनोमुहः ।
ताभ्यो गन्धर्वपत्नीभ्योऽप्सराभ्योऽकरं नमः ।।५।।

३११. गर्भदृंहणम्

१. अथर्वा – अ. ६.१७.१–४

यथेयं पृथिवी मही भूतानां गर्भमादधे। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ।।१।।
यथेयं पृथिवी मही दाधारेमान् वनस्पतीन्। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ।।2।।
यथेयं पृथिवी मही दाधार पर्वतान् गिरीन्। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ।।३।।

यथेयं पृथिवी मही दाधार विष्ठितं जगत्। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ।।४।।

३१2. गर्भदोषनाशनम्

१. रक्षोहाः – अ. 2०.९६.११–१६

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः। अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ।।११।।
यस्ते गर्भममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ।।१2।।
यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम्। जातं यस्ते जिघांसति तमितो नाशयामसि ।।१३।।
यस्त ऊरू विहरत्यन्तरा दम्पती शये। योनिं यो अन्तरारेळिह तमितो नाशयामसि ।।१४।।
यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते। प्रजां यस्ते निघांसति तमितो नाशयामसि ।।१५।।
यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते।प्रजां यस्ते जिघांसति तमितो नाशयामसि ।।१६।।

३१३. गर्भसंस्रावे प्रायश्चित्तम्

१. रक्षोहा ब्राह्मः – ऋ. १०.१६2.१–६

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः। अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ।।१।।
यस्ते गर्भममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ।।2।।
यस्ते हन्ति पतयन्तं निषत्सनुं यः सरीसृपम्। जातं यस्ते जिघांसति तमितो नाशयामसि ।।३।।
यस्त ऊरू विहरत्यन्तरा दम्पती शये। योनिं यो अन्तरारेळिह तमितो नाशयामसि ।।४।।
यस्त्वा भ्राता पतिर्भूतवा जारो भूत्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि।।५।।
यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते। प्रजां यस्ते निघांसति तमितो नाशयामसि ।।६।।

३१४. गायत्रीः

१. ब्रह्म : – अ. १९.७१.१

स्तुता मया वरदा वेदमाता प्र चोदयन्तां पावमानी द्विजानाम् ।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसम्। मह्यं दत्त्वा व्रजत ब्रह्मलोकम् ।।१।।

३१५. गावः

१. ब्रह्म – अ. ४.2१.१–७

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ।।१।।
इन्द्रो यज्वने गृणनते च शिक्षत उपेद् ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्न खिल्ये नि दधाति देवयुम् ।।2।।
न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवांश्च याभिर्यजते ददाति च ज्योगित् ताभिः सचते गोपतिः सह ।।३।।
न ता अर्वा रेणुककाटोऽश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभ्यं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ।।४।।
गावो भगो गाव इन्द्रो म इच्छाद् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छमि हृदा मनसा चिदिन्द्रम् ।।५।।
यूयं गावो मेदयथा कृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु ।।६।।
प्रजावतीः सूयवसे रुशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
मा व स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ।।७।।

2. भरद्वाजो बार्हस्पत्यः – ऋ. ६.2८.१; ३–७

ऋ. ६.2८.१

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ।।१।।

ऋ. ६.2८.३–७

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ।।३।।
न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ।।४।।
गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् ।।५।।
यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ।।६।।
प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सप्रपाणे पिबन्तीः ।
मा बः स्तेन ईशत माघशंसः परि वो हेति रुद्रस्य वृजयाः ।।७।।

३. **भागलिः – अ. ६.५2.2**

नि गावो गोष्ठे असदन् नि मृगासो अविक्षत। न्यूइर्मयो नदीनां न्य१दृष्टा अलिप्सत ।।2।।

४. **वामदेवो गौतमः – सा. ६2६**

सहर्षभाः सहवत्सा उदेत विश्वा रूपाणि बिभ्रतीर्द्व्यूध्नीः ।
उरुः पृथुरयं वो अस्तु लोक इमा आपः सुप्रपाणा इह स्त ।।१2।।

५. **शबरः काक्षीवतः – ऋ. १०.१६६.१–४**

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् ।
पीवस्वतीर्जीवधन्या पिबन्त्ववसाय पद्वते रुद्र मृळ ।।१।।
याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद ।
या अंगिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ।।2।।
या देवेषु तन्व१मैरयन्त यासां सोमो विश्वा रूपाणि वेद ।
ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र गोष्ठे रिरीहि ।।३।।
प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः ।
शिवाः सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सं सदेम ।।४।।

३१६. गावः इन्द्रो वा

१. **भरद्वाजो बार्हस्पत्यः – ऋ. ६.2८.2; ८**

ऋ. ६.2८.2

इन्द्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ।।2।।

ऋ. ६.2८.८

उपेदमुपपर्चनमासु गोषूप पृच्यताम्। उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ।।८।।

३१७. गुल्गलः

१. **अथर्वा – अ. १६.३८.१–३**

न तं यक्ष्मा अरुन्धते नैनं शपथो अश्नुते ।
यं भेषजस्य गुल्गुलोः सुरभिर्गन्धो अश्नुते ।।१।।
विष्वंचस्तस्माद्यक्ष्मा मृगा अश्वा इवेरते ।
यद् गुल्गुलु सैन्धवं यद्वाप्यासि समुद्रियम् ।।2।।
उभयोरग्रभं नामास्मा अरिष्टतातये ।।३।।

३१८. गुरुत्मान्

१. **श्यावाश्वः – य. १2.४**

सुपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ ।
स्तोमऽआत्मा छन्दांस्यंगानि यजूंषि नाम। साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः।
सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पत ।।४।।

३१९. गृध्रौ

१. कपिंजलः – अ. ७.९५.१–३

उदस्य श्यावौ विथुरौ गृध्रौ द्यामिव पेततुः। उच्छोचनप्रशेचनावस्योच्छोचनौ हृदः ।।१।।
अहमेनावुदतिष्ठिपं गावौ श्रान्तसदाविव। कुर्कुराविव कुजन्तावुदवन्तौ वृकाविव ।।2।।
आतोदिनौ नितोदिनावथो संतोदिनावुत। अपि नह्याम्यस्य मेढ्रं य इतः स्त्री पुमांजभार।।३।।

३२०. गृहपतयः

१. अत्रिः – य. ८.१५–१६; १८; 20–22; 2३–2६

य. ८.१५–१६

समिन्द्र णो मनसा नेषि गोभिः स ँ सूरिभिर्मघवन्त्स ँ स्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानांसुमतौ यज्ञियानां स्वाहा।।१५।।
सं वर्च्चसा पयसा सं तनूभिरगन्महि मनसा स ँ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ।।१६।।

य. ८.१८

सुगा वो देवाः सदनाऽअकर्म्म यऽआजग्मेद ँ सवनं जुषाणाः।
भरमाणा वहमाना हवींष्यस्मे धत्त वसवो वसूनि स्वाहा।।१८।।

य. ८.2०–22

वय ँ हि त्वा प्रयति यज्ञेऽअस्मिन्नग्ने होतारामवृणीमहीह ।
अृधगयाऽअृधगुताशमिष्ठाः प्रजानन् यज्ञमुपयाहि विद्वान्त्स्वाहा ।।2०।।
देवा गातुविदो गातुं वित्त्वा गातुमित ।
मनसस्पतऽइमं देव यज्ञ ँ स्वाहा वाते धाः ।।2१।।
यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा ।।22।।

य. ८.2३–2६

महिर्भूर्म्मा पृदाकुः। उरुं हि राजा वरुणश्चकार सूर्य्याय
मन्थामन्वेतवाऽउ। अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ।
नमो वरुणायाभिष्ठितो वरुणस्य पाशः ।।2३।।
अग्नेग्नीकमपऽआविवेशापान्नपात् प्रतिरक्षन्नसुर्य्यम् ।
दमेदमे समिधं यज्ञयग्ने प्रतिं ते जिह्वा घृतमुच्चरएयत् स्वाहा ।।2४।।
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत् स्वाह ।।2५।।
देवीरापऽएष वो गर्भस्तं सुप्रीतं सुभृतं बिभृत ।
देव सोमैष ते लोकस्तस्मिंछंच वक्ष्व परि च वक्ष्व ।।2६।।

2. कुत्सः – य. ८.५

विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन् मत्स्व। श्रदस्मै नरो वचसे दधातन यदाशीर्दा
दम्पती वाममश्नुतः। पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारपऽएधते गृहे ।।५।।

३. गोतमः – य. ८.३३; ३५

य. ८.३३

आतिष्ठ वृहन्नथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने ।।३३।।

य. ८.३५

इन्द्रमिद्धरी वहतोऽप्रति धृष्टशवसम्। ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते यानिरिन्द्राय त्वा षोडशिने ।।३।।

४. देवाः – य. ८.५३

युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तन्तमिद्धतं वज्रेण तन्तमिद्धतम् ।
दूरे चत्ताय छन्त्सद् गहनं यदिनक्षत्। अस्माकं शत्रून् परि शूर विश्वतो दर्म्मा दर्षीष्ट विश्वतः।
भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः पोषैः ।।५३।।

५. भरद्वाजः – य. ८.६; १०–१२; १४

य. ८.६

वाममद्य सवितर्वाममु श्वो दिवे दिवे वाममस्मभ्यं सावीः ।
सामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ।।६।।

य. ८.१०–१२

अग्नाइह पत्नीवन्त्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा ।
प्रजापतिर्वृषामि रेतोधा रेतो मयि धेहि प्रजापतेस्ते वृष्णो रेतोधसो रेतोधामशीय ।।१०।।
उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वा। हर्य्योर्द्धाना स्थ सहसोमाऽइन्द्राय ।।११।।
यस्तेऽअश्वसनिर्भक्षो यो गोसनिस्तस्य तऽइष्टयजुष स्तुतस्तोमस्य
शस्तोक्थस्योपहूतस्योपहूतो भक्षयामि।।१२।।

य. ८.१४

सं वर्चसा पयसा सं तनूभिरगन्महि मनसास सं शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ।।१४।।

६. मधुच्छन्दाः – य. ८.३४

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा नऽइन्द्र सोमपा गिरामुपश्रुतिं चर।
उपयामगृहीतोऽसीन्द्राप त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने ।।३४।।

३२१. गृहपतिः

१. हैमवर्चिः – य. १६.१८

हविर्धानं यदश्विनाग्नीध्रं यत्सरस्वती। इन्द्रायैन्द्रं सदस्कृतं पत्नीशालं गार्हपत्यः ।।१८।।

३२२. गृहपतयो विश्वेदेवाः

१. भरद्वाजः – य. ८.६; १३

य. ८.६

उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम तऽइन्दोरिन्द्रियावतः पत्नीवतो ग्रँहा २ऽऋध्यासम्।
अहं परस्तादहम वस्ताद्यदन्तरिक्षं तदु मे पिताभूत् । अहंसूर्य्यमुभयतो ददर्शाहं देवानां परमं गुहा यत् ।।६।।

य. ८.१३

देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमस्यात्मकृतस्यैनसोऽवयजनमस्येनसऽएनसोऽवयजनमसि । यच्चाहमेनो विद्वाँश्चकार यच्चाविद्वाँस्तस्य सर्वस्यैनसोऽवयजनमसि ।।१३।।

३२३. गृहाः वास्तोष्पतिः

१. ब्रह्म – अ. ७.६०.१–७

ऊर्जं बिभ्रद् वसुवनिः सुमेधा अघोरेण चक्षुषा मित्रियेण ।
गृहानैमि सुमना वन्दमानो रमध्वं मा बिभीत मत् ।।१।।
इमे गृहा मयोभुव ऊर्जस्वन्तः पयस्वन्तः ।
पूर्णा वामेन तिष्ठन्तस्ते नो जानन्त्वायतः ।।२।।
येषामध्येति प्रवसन् येषु सौमनसो बहुः ।
गृहानुप ह्वयामहे ते नो जानन्त्वयतः ।।३।।
उपहूता भूरिधनाः सखायः स्वादुसंमुदः ।
अक्षुध्या अतृष्या स्त गृहा मास्मद् बिभीतन ।।४।।

उपहूता इह गाव उपहूता अजाव्यः ।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ।।५।।
सूनृतावन्तः सुभगा इरावन्तो हसामुदाः ।
अतृष्या अक्षुध्या स्त गृहा मास्मद् बिभीतन ।।६।।
इहैव स्त मानु गात विश्वा रूपाणि पुष्यत ।
ऐष्यामि भद्रेण सह भूयांसो भवता मया ।।७।।

३२४. गौ विराट् अध्यातमम्

१. ब्रह्म – अ. ६.१०.१–22; 2४–2८

अ. ६.१०.१–22

यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभे वा त्रैष्टुभान्निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्वमानशुः ।।१।।
गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ।।2।।
जगता सिन्धुं दिव्यस्कभायद् रथन्तरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ।।३।।
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचत् ।।४।।
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ।।५।।
गौरमीमेदभि वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ।।६।।
अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यान् विद्युद्भवन्ती प्रति वव्रिमौहत ।।७।।
अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ।।८।।
विधुं दद्राणं सलिलस्य पृष्ठे युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ।।६।।
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिरा विवेश ।।१०।।
अपश्यं गोपानिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भूवनेष्वन्तः ।।११।।
द्यौर्नः पिता जनिता नाभिरत्र बन्धूर्नो माता पृथिवी महीयम् ।
उत्तानयोश्चम्बो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ।।१2।।
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि वृष्णो अश्वस्य रेतः ।
पृच्छामि विश्वस्य भुवनस्य नाभिं पृच्छामि वाचः परमं व्योम ।।१३।।
इयं वेदिः परो अन्तः पृीिव्या अयं सोमो वृष्णो अश्वस्य रेतः ।
अयं यज्ञो विश्वस्य भुवनस्य नाभिर्ब्रह्मायं वाचः परमं वयोम ।।१४।।
न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ।
यदा मागन् प्रथमजा ऋतस्यादिद् वाचो अश्नुवे भागमस्याः ।।१५।।
अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न नि चिक्युरन्यम् ।।१६।।
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ।।१७।।
ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।

यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्ते अमी समासते ।।१८।।
ऋचः पदं मात्रया कल्पयन्तोऽर्धर्चेन चाक्लृपुर्विश्वमेजत् ।
त्रिपाद् ब्रह्म पुरुरूपं वि तष्ठे तेन जीवन्ति प्रदिशश्चतस्रः ।।१९।।
सूयवसाद् भगवती हि भूया अधा वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ।।20।।
गौरिन्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहसांक्षरा भुवनस्य पङ्क्तिस्तस्याः समुद्रा अधि वि क्षरन्ति ।।21।।
कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
तं आववृत्रन्सदनादृतस्यादिद् घृतेन पृथिवीं व्यूदुः ।।22।।

अ. ६.१०.२४–२८

विराड् वाग् विराट् पृथिवी विराडन्तरिक्षं विराट् प्रजापतिः ।
विराण्मृत्युः साध्यानामधिराजो बभूव तस्य भूतं भव्यं वशे स मे भूतं भव्यं वशे कृणोतु ।।२४।।
शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ।।२५।।
त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वमन्यो अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ।।२६।।
चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयन्ति तुरीयं वाचो मनुष्यावदन्ति ।।२७।।
इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।।२८।।

३२५. गौः

१. उपरिबभ्रवः: – अ. ६.३१.१–३

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः। ।।१।।
अन्तश्चरति रोचना अस्य प्राणादपानतः। व्यख्यन्महिषः स्वः ।।2।।
त्रिंशद् धामा वि राजति वाक् पतंगो अशिश्रियत्। प्रति वस्तोरहर्द्युभिः ।।३।।

2. उपरिबभ्रवः सार्पराज्ञी वा : – अ. २०.४८.४–६

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयनतसद ।।४।।
अन्तश्चरति रोचना अस्य प्राणादपानतः। व्यख्यन्महिषः स्वः ।।५।।
त्रिंशद्धामा वि राजति वाक्पतंगो अशिश्रियत्। प्रति वस्तोरहर्द्युभिः ।।६।।

३. जमदग्निः भार्गवः – ऋ. ८.१३.१५–१६

यछक्रासि परावति यदर्वावति वृत्रहन्। यद्वा समुद्रे अन्धसोऽवितेदसि ।।१५।।
इन्द्रं वर्धन्तु नो गिर इन्द्रं सुतास इन्दवः। इन्द्रे हविष्मतीर्विशो अराणिषुः ।।१६।।

४. ब्रह्मः – अ. ६.७.१–२६

प्रजापतिश्च परमेष्ठी च शृंगे इन्द्रः शिरो अग्निर्ललाटं यमः कृकाटम् ।।१।।
सोमो राजा मस्तिष्को द्यौरुत्तरहनुः पृथिव्यधरहनुः ।।2।।
विद्युज्जिह्वा मरुतो दन्ता रेवतीर्ग्रीवाः कृत्तिका स्कन्धा घर्मो वहः ।।३।।
विश्वं वायुः स्वर्गो लोकः कृष्णद्रं विधरणी निवेष्यः ।।४।।
श्येनः क्रोडो३न्तरिक्षं पाजस्यं१ बृहस्पतिः ककुद् बृहतीः कीकसाः ।।५।।
देवानां पत्नीः पृष्टय उपसदः पर्शवः ।।६।।
मित्रश्च वरुणश्चांसौ त्वष्टा चार्यमा च दोषणी महादेवो बाहू ।।७।।
इन्द्राणी भसद् वायुः पुच्छं पवमानो वालाः ।।८।।
ब्रह्म च क्षत्रं च श्रोणी बलमूरू ।।९।।
धाता च सविता चाष्ठीवन्तौ जंघा गन्धर्वा अप्सरसः कुष्ठिका अदितिः शफाः ।।१०।।

चेतो हृदयं यकृन्मेधा व्रतं पुरीतत् ।।११।।
क्षुत् कुक्षिरिरा वनिष्ठुः पर्वताः प्लाशयः ।।१2।।
क्रोधो वृक्कौ मन्युराण्डौ प्रजा शेपः ।।१३।।
नदी सूत्री वर्षस्य पतय स्तना स्तनयित्नुरूधः ।।१४।।
विश्वव्यचाश्चर्मौषधयो लोमानि नक्षत्राणि रूपम् ।।१५।।
देवजना गुदा मनुष्याआन्त्राण्यत्रा उदरम् ।।१६।।
रक्षांसि लोहितमितरजना ऊवध्यम् ।।१७।।
अभ्रं पीबो मज्जा निधनम् ।।१८।।
अग्निरासीन उत्थितोऽश्विना ।।१६।।
इन्द्रः प्राङ् तिष्ठन् दक्षिणा तिष्ठन् यमः ।।20।।
प्रत्यङ् तिष्ठन् धातोदङ् तिष्ठन्त्सविता ।।2१।।
तृणानि प्राप्तः सोमो राजा ।।22।।
मित्र ईक्षमाण आवृत्त आनन्दः ।।2३।।
युज्यमानो वैश्वदेवो युक्तः प्रजापतिर्विमुक्तः सर्वम् ।।2४।।
एतद् वै विश्वरूपं सर्वरूपं गोरूपम् ।।2५।।
उपैनं विश्वरूपाः सर्वरूपाः पशवस्तिष्ठन्ति य एवं वेद ।।2६।।

३2६. गौष्ठः अर्यमादयो मन्त्रोक्ताः

१. ब्रह्म – अ. ३.१४.१–६

सं वो गोष्ठेन सुषदा सं रय्या सं सुभूत्या। अहर्जातस्य यन्नाम तेना वः सं सृजामसि ।।१।।
सं वः सृजत्वर्यमा सं पूषा सं बृहस्पतिः। समिन्द्रो यो धनंजयो मयि पुष्यत यद् वसु ।।2।।
संजग्माना अविभ्युषिरस्मिन् गोष्ठे करीषिणीः। बिभ्रतीः सोम्यं मध्वनमीवा उपेतन ।।३।।
इहैव गाव एतनेहो शकेव पुष्यत। इहैवोत प्र जायध्वं मयि संज्ञानमस्तु वः ।।४।।
शिवो वो गोष्ठो भवतु शारिशाकेव पुष्यत। इहैवोत प्र जायध्वं मया वः सं सृजामसि ।।५।।
माया गावो गोपतिना सचध्वमयं वो गोष्ठ इह पोषयिष्णुः ।
रायस्पोषेण बहुला भवन्तीर्जीवाजीवन्तीरुप वः सदेम ।।६।।

३2७. ग्रावाणः

१. अर्बुदः काद्रवेयः सर्पः – ऋ. १०.६४.१–१४

प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः ।
यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः ।।१।।
एते वदन्ति शतवत्सहस्रवदभि क्रन्दन्ति हरितेभिरासभिः ।
विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत ।।2।।
एते वदन्त्यविदन्नना मधु न्यूङ्खयन्ते अधि पक्व अमिषि ।
वृक्षस्य शाखामरुणस्य बप्सतस्ते सूभर्वा वृषभाः प्रेमराविषुः ।।३।।
बृहद्वदन्ति मदिरेण मन्दिनेन्द्र क्रोशन्तोऽविदन्नना मधु ।
संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः ।।४।।
सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
न्य१ङनि यन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः ।।५।।
उग्राइव प्रवहन्तः समायमुः साकं युक्ता वृष्णो बिभ्रतो धुरः ।
यच्छ्वसन्तो जग्रसाना अराविषुः शृण्व एषां प्रोथथो अर्वतामिव ।।६।।
दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः ।
दशाभीषुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः ।।७।।
ते अद्रयो दशयन्त्रास आशवस्तेषामाधानं पर्येति हर्यतम् ।
त ऊसुतस्य सोम्यस्यान्धसोंऽशोः पीयूषं प्रथमस्य भेजिरे ।।८।।

ते सोमादो हरी इन्द्रस्य निंसतेंऽशुं दुहन्तो अध्यासते गवि ।
तेभिर्दुग्धं पपिवान्त्सोम्यं मध्विन्द्रो वर्धते प्रथते वृषायते ।।६।।
वृषा वो अंशुर्न किला रिषाथनेळावन्तः सदमित्स्थनाशिताः ।
रैवत्येव महसा चारवः स्थन यस्य ग्रावाणो अजुषध्वमध्वरम् ।।१०।।
तृदिला अतृदिलासो अद्रयोऽश्रमणा अशृथिता अमृत्यवः ।
अनातुरा अजराः स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः ।।११।।
ध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युंजते ।
अजुर्यासो हरिषाचौ हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः ।।12।।
तद्विदन्त्यद्रयो विमोचने यामन्नंजस्पा इव घेदुपब्दिभिः ।
वपन्तो बीजमिव धान्याकृतः पृंचन्ति सोमं न मिनन्ति बप्सतः ।।१३।।
सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं तुदन्तः ।
वि षु मुंचा सुषुवुषो मनीषां वि वर्तन्तामद्रयश्चायमानाः ।।१४।।

2. **उर्ध्वग्रावार्बुदः – ऋ. १०.१७५.१–४**

प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा। धूर्षु युज्यध्वं सुनुत ।।१।।
ग्रावाणो अप दुच्छुनामप सेधत दुर्मतिम्। उस्राः कर्तन भेषजम् ।।2।।
ग्रावाण उपरेष्वा महीयन्ते सजोषसः। वृष्णे दधतो वृष्ण्यम् ।।३।।
ग्रावाणः सविता नु वो देवः सुवतु धर्मणा। यजमानाय सुन्वते ।।४।।

३. **वसिष्ठः – ऋ. ७.१०४.१७**

प्र या जिगाति खर्गलेव नक्तमप द्रुहा तन्वं१ गूहमाना ।
वव्राँ अनन्ताँ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ।।१७।।

३2८. ग्रीष्मर्तुः

१. **उशना – य. १४.६**

शुक्रश्च शुचिश्च ग्रैष्मावृतू ऽअग्नेरन्तः–श्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
येऽअग्नयः समनसो ऽन्तरा द्यावापृथिवीऽइमे ग्रैष्मावृतूऽअभि कल्पमानाऽइन्द्रमिव देवाऽअभिसंविशन्तु तया देवतयांगिरस्वद् ध्रुवे सीदतम् ।।६।।

2. **परमेष्ठी – य. १५.१६**

अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ। मेनका च सहजन्या चाप्सरसौ यातुधाना हेति रक्षांसि प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयनतु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।१६।।

३2९. चन्द्रः

१. **अथर्वा – अ. 2.22.१–५**

चन्द्र यत् ते तपस्तेन तं प्रति तप यो३स्मान् द्वेष्टि यं वयं द्विष्मः।।१।।
चन्द्र यत् ते हरस्तेन तं प्रति हर यो३स्मान द्वेष्टि यं वयं द्विष्मः।।2।।
चन्द्र यत् तेऽर्चिस्तेन तं प्रत्यर्च यो३स्मान् द्वेष्टि यं वयं द्विष्मः।।३।।
चन्द्र यत् ते शोचिस्तेन तं प्रति शोच यो३स्मान् द्वेष्टि यं वयं द्विष्मः।।४।।
चन्द्र यत् ते तेजस्तेन तमतेजसं कृणु यो३स्मान द्वेष्टि यं वयं द्विष्मः ।।५।।

३३०. चन्द्रमा

१. **अथर्वा – अ. ५.2४.१०; ६.८०.१–३; ६.७८.१; 2; ७.६१.१; ७.६2.१**

अ. ५.2४.१०

चन्द्रमा नक्षत्राणामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां

चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।१०।।

अ. ६.८०.१–३

अन्तरिक्षेण पतति विश्वा भूतावचाकशत् ।
शुनो दिव्यस्य यन्महस्तेना ते हविषा विधेम ।।१।।
ये त्रयः कालकांजा दिवि देवा इव श्रिताः ।
तान्त्सर्वानह्व ऊतयेऽस्मा अरिष्टतातये ।।2।।
अप्सु ते जन्म दिवि ते सधस्थं समुद्रे अन्तर्महिमा ते पृथिव्याम्।
शुनो दिव्यस्य यन्महस्तेना ते हविषा विधेम ।।३।।

अ. ६.७८.१–2

तेन भूतेन हविषायमा प्यायतां पुनः। जायां यामस्मा आवाक्षुस्तां रसेनाभि वर्धताम् ।।१।।
अभि वर्धतां पयसाभि राष्ट्रेण वर्धताम्। रय्या सहस्रवर्चसेमौ स्तामनुपक्षितौ ।।2।।

अ. ७.६१.१

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं नः कृणोतु सुवीर्यस्य पतयः स्याम ।।१।।

अ. ७.६2.१

स सुत्रामा स्ववाँ इन्द्रो अस्मदाराच्चिद् द्वेषः सनुतर्युयोतु ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।।१।।

2. अथर्वा (स्वस्त्ययनकामः) – अ. ६.३७.१–३

उप प्रागात् सहस्राक्षो युक्त्वा शपथो रथम। शप्तारमन्विच्छन् मम वृकइवाविमतो गहम् ।।१।।
परि णो वृङ्ग्धि शपथ ह्रदमग्निरिवा दहन्। सप्तारमत्र नो जहि दिवो वृक्षमिवाशनिः ।।2।।
यो नः शपादशपतः शपतो यश्च नः शपात्। शुने पेष्ट्रमिवावक्षामं तं प्रत्यस्यामि मृत्यवे ।।३।।

३. अथर्वांगिरा – अ. ७.११६.१

नमो रूराय च्यवनाय चोदनाय धृष्णवे। नमः शीताय पूर्वकामकृत्वने ।।१।।

४. शन्तातिः – अ. ६.21.१–३

इमा यास्तिस्रः पृथिवीस्तासां ह भूमिरुत्तमा ।
तासामधि त्वचो अहं भेषजं समु जग्रभम् ।।१।।
श्रेष्ठमसि भेषजाना वसिष्ठं वीरुधानाम् ।
सोमो भगइव यामेषु देवेषु वरुणो यथा ।।2।।
रेवतीरनाधृषः सिषासवः सिषासथ ।
उत स्थ केशदृंहणीरथो ह केशवर्धनीः ।।३।।

५. सावित्री सूर्या – अ. १४.१.2४

नवोनवो भवसि जायमानोऽह्नां केतुरुषसामेष्यग्रम् ।
भागं देवेभ्यो वि दधास्यायन् प्र चन्द्रमस्तिरसे दीर्घमायुः ।।2४।।

६. सूर्या सावित्री – ऋ. १०.८५.१६

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।
भागं देवेभ्यो वि दधात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः ।।१६।।

३३१. चातुर्मास्यामरुतः

१. सप्तर्षयः – य. १७.८५

स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च। क्रीडी च शाकी चोज्जेषी ।।८५।।

३३2. चिकित्सुः

१. भिषग् – य. १2.७८

ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे। सनेयमश्वं गां वासऽआत्मानं तव पूरुष ।।७८।।

३३३. चित्रस्य दानस्तुतिः

१. सोभरिः काण्वः – ऋ. ८.2१.१७–१८

इन्द्रो वा घेदियन्मघं सरस्वती वा सुभगा ददिर्वसु। त्वं वा चित्र दाशुषे ।।१७।।
चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु।
पर्जन्यइव ततनद्धि वृष्ट्या सहस्रमयुता ददत्।।१८।।

३३४. चैद्यस्य कसोर् दानस्तुतिः

१. ब्रह्मातिथिः काण्वः – ऋ. ८.५.३७[2]–३९

ता मे अश्विना सनीनां विद्यातं नवानाम् ।
यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनाम् ।।३७।।
यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ।
अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः ।।३८।।
माकिरेना पथा गोद्येनेमे यन्ति चेदयः ।
अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ।।३९।।

३३५. छन्दांसि

१. ब्रह्म – अ. १९.2१.१

गायत्र्युश्णिगनुष्टुब् बृहती पङ्क्तिस्त्रिष्टुब् जगत्यै ।।१।।

2. विश्वेदेवाः – य. १४.१८

मा च्छन्दः प्रमा च्छन्दः प्रतिमा च्छन्दो अस्रीवयश्छन्दः पङ्क्तिश्छन्दऽउष्णिक् छन्दो बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दः ।।१८।।

३३६. जरिमा आयुः

१. शम्भूः – अ. 2.2८.१; ३

अ. 2.2८.१

तुभ्यमेव जरिमन् वर्धतामयं मेममन्ये मृत्यवो हिंसिषुः शतं ये ।
मातेव पुत्रं प्रमना उपस्थे मित्र एनं मित्रियात् पात्वंहसः ।।१।।

अ. 2.2८.३

त्वमीशिषे पशूनां पार्थिवानां ये जाता उत वा ये जनित्राः ।
मेमं प्राणो हासीन्मो अपानो मेमं मित्रा वधिषुर्मो अमित्राः ।।३।।

३३७. ज्ञानम्

१. वृहस्पतिः – ऋ. १०.७१.१–११

बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ।।१।।
सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ।।2।।
यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम् ।
तामाभृतया व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ।।३।।
उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं१वि सस्रे जायेव पत्य उशती सुवासाः ।।४।।
उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ।।५।।
यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।

यदीं शृणोत्यलकं शुणोति नहि प्रवेद सुकृतस्य पन्थाम् ।।६।।
अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे ह्रदाइव स्नात्वा उ त्वे ददृश्रे ।।७।।
हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे ।।८।।
इमे ये नार्वाङ् न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः ।
त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः ।।६।।
सर्वे नन्दन्ति यशसागतेन सभासाहेनसख्या सखायः ।
किल्विषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ।।१०।।
ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ।।११।।

३३८. जगदीश्वरः

१. विश्वेदेवाः – य. १४.३०

नवदशभिरस्तुवत शूद्रार्य्यावसृज्येतामहोरात्रेऽअधिपत्नीऽआस्ताम्। एकविंशत्यास्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्। त्रयोविंशत्यास्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाधिपतिरासीत्। पंचविंशत्यास्तुवताऽऽरणयाः पशवोऽसृजयन्त वायुरधिपतिरासीत्। सप्तविंशत्यास्तुवत द्यावापृथिवी व्यैतां वसवो रुद्राऽआदित्याऽअनुव्यायँस्तऽएवाधिपतयऽआसन् ।।३०।।

३३६. जंगिडमणिः

१. अथर्वा – अ. 2.४.१–६

दीर्घायुत्वाय बृहते रणायारिष्यन्तो दक्षमाणाः सदैव ।
मणिं विष्कन्धदूषणं जङ्गिडं बिभृमो वयम् ।।१।।
जङ्गिडो जम्भाद् विशराद् विष्कन्धादभिशोचनात् ।
मणिः सहस्रवीर्यः परि णः पातु विश्वतः ।।2।।
अयं विष्कन्धं सहतेऽयं बाधते अत्रिणः ।
अयं नो विश्वभेषजो जङ्गिडः पात्वंहसः ।।३।।
देवैर्दत्तेन मणिना जङ्गिडेन मयोभुवा ।
विष्कन्धं सर्वा रक्षांसि व्यायामे सहामहे ।।४।।
शणश्च मा जङ्गिडश्च विष्कन्धादभि रक्षताम् ।
अरण्यादन्य आभृतः कृष्या अन्यो रसेभ्यः ।।५।।
कृत्यादूषिरयं मणिरथो अरातिदूषिः ।
अथा सहस्वांजङ्गिडः प्र ण आयूंषि तारिषत् ।।६।।

३४०. जंगिडो वनस्पतिः

१. अंगिराः – अ. १६.३४.१–१०; १६.३५.१–६

अ. १६.३४.१–१०

जङ्गिडोसि जङगिडो रक्षितासि जङ्गिडः। द्विपाच्चतुष्पादस्माकं सर्वं रक्षतु जङ्गिडः ।।१।।
या गृत्स्यस्त्रिापंचाशीः शतं कृत्याकृतश्च ये। सर्वान् विनक्तु तेजसोऽरसांजङ्गिडस्करत् ।।2।।
अरसं कृत्रिामं नादमरसाः सप्त विस्रसः। अपेतो जङ्गिडामतिमिषुमस्तेव शातय ।।३।।
कृत्यादूषण एवायमथो अरातिदूषणः। अथो सहस्वांजङ्गिडः प्र ण आयूंषि तारिषत् ।।४।।
स जङ्गिडस्य महिमा परि णः पातु विश्वतः। विष्कन्धं येन सासह संस्कन्धमोज ओजसा ।।५।।
त्रिष्ट्वा देवा अजनयन् निष्ठितं भूम्यामधि। तमु त्वांगिरा इति ब्राह्मणाः पूर्व्या विदुः ।।६।।

न त्वा पूर्वा ओषधयो न त्वा तरन्ति या नवाः। विबाध उग्रो जङ्गिडः परिपाणः सुमङ्गलः।।७।।
अथोपदान भगवो जङ्गिडामितवीर्य। पुरा ते उग्रा ग्रसत उपेन्द्रो वीर्यंददौ ।।८।।
उग्र इत् ते वनस्पत इन्द्र ओजमानमा दधौ। अमीवाः सर्वाश्चातयंजहि रक्षांस्योषधे ।।९।।
आशरीकं विशरीकं बलासं पृष्ट्यामयम्। तक्मानं विश्वशारदमरसां जङ्गिडस्करत् ।।१०।।

अ. १९.३५.१–५

इन्द्रस्य नाम गृह्णन्त ऋषयो जङ्गिडं ददुः ।
देवा यं चक्रुर्भेषजमग्रे विष्कन्धदूषणम् ।।१।।
स नो रक्षतु जङ्गिडो धनपालो धनेव ।
देवा यं चक्रुब्राह्मणाः परिपाणमरातिहम् ।।2।।
दुहार्दः संघोरं चक्षुः पापकृत्वानमागमम् ।
तांस्त्वं सहस्रचक्षो प्रतीबोधेन नाशय परिपाणोऽसि जङ्गिडः ।।३।।
परि मा दिवः परि मा पृथिव्याः पर्यन्तरिक्षात् परि मा वीरुद्भ्यः ।
परि मा भूतात् परि मोत भव्याद् दिशोदिशो जङ्गिडः पात्वस्मान् ।।४।।
य ऋष्णवो देवकृता य उतो ववृतेऽन्यः ।
सर्वांस्तान् विश्वभेषजोऽरसां जङ्गिडस्करत् ।।५।।

३४१. जलादयः

१. प्रजापतिः – य. 22.2५

अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ।।2५।।

३४2. ज्या

१. पायुर् भरद्वाजः– ऋ. ६.७५.३

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वंज्या इयं समने पारयन्ती ।।३।।

३४३. ज्वरः

१. अथर्वांगिरा – अ. ७.११६.2

यो अन्येद्युरुभयद्युरभ्येतीमं मण्डूकमभ्येत्वव्रतः ।।2।।

३४४. जातवेदः (अग्नि)

१. शुक्रः – अ. ४.४०.१

ये पुरस्ताज्जुह्वति जातवेदः प्राच्या दिशोऽभिदासन्त्यस्मान् ।
अग्निमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ।।१।।

३४५. जातवेदः (ब्रह्म)

१. शुक्रः – अ. ४.४०.८

ये दिशामन्तर्देशेभ्यो जुह्वति जातवेदः सर्वाभ्यो दिग्भ्योऽभिदासन्त्यस्मान् ।
बह्मत्र्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ।।८।।

३४६. जातवेदः (भूमिः)

१. शुक्रः – अ. ४.४०.५

ये३ऽधस्ताज्जुह्वति जातवेदो ध्रुवाया दिशोऽभिदासन्त्यस्मान् ।
भूमिमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ।।५।।

३४७. जातवेदः (यमः)

१. शुक्रः – अ. ४.४०.2

ये दक्षिणतो जुह्वति जातवेदो दक्षिणाया दिशोऽभिदासन्त्यस्मान् ।

यममृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ।।2।।

३४८. जातवेदः (वरुणः)

१. **शुक्रः – अ. ४.४०.३**

ये पश्चाज्जुह्वति जातवेदः प्रतीच्या दिशोऽभिदासन्त्यस्मान् ।
वरुणमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ।।३।।

३४९. जातवेदः (वायुः)

१. **शुक्रः – अ. ४.४०.६**

ये३ऽन्तरिक्षाज्जुह्वति जातवेदो व्यध्वाया दिशोऽभिदासन्त्यस्मान् ।
वायुमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ।।६।।

३५०. जातवेदः (सूर्यः)

१. **शुक्रः – अ. ४.४०.७**

य उपरिष्टाज्जुह्वति जातवेद ऊर्ध्वाया दिशोऽभिदासन्त्यस्मान् ।
सूर्यमृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ।।७।।

३५१. जातवेदः (सोमः)

१. **शुक्रः – अ. ४.४०.४**

ये उत्तरतो जुह्वति जातवेद उदीच्या दिशोऽभिदासन्त्यस्मान् ।
सोममृत्वा ते परांचो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ।।४।।

३५2. जातवेदा

१. **अथर्वा (पण्यकामः) – अ. ३.१५.८**

विश्वाहा ते सदमिद्भरेमाश्वायेव तिष्ठते जातवेदः ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषम ।।८।।

2. **अथर्वांगिरा – अ. ७.७४.४**

व्रतेन त्वं व्रतपते समक्तो विश्वाहा सुमना दीदिहीह ।
तं त्वा वयं जातवेदः समिद्धं प्रजावन्त उप सदेम सर्वे ।।४।।

३. **आदित्या देवाः – य. ३५.20**

वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान् पराके ।
मेदसः कुल्याऽउप तान्त्स्रवन्तु सत्याऽ एषामाशिषः स नमन्तां स्वाहा ।।20।।

४. **कबन्धः – अ. ६.७७.१–३**

अस्थाद् द्यौरस्थात् पृथिव्यस्थाद् विश्वमिदं जगत् ।
अस्थाने पर्वता अस्थुः स्थाम्न्यश्वाँ अतिष्ठिपम् ।।१।।
य उदानट् परायणं य उदानण्न्यायनम् ।
आवर्तनं नवर्तनं यो गोपा अपि तं हुवे ।।2।।
जातवेदो नि वर्तय शतं ते सन्त्वावृतः ।
सहस्रं त उपावृतस्ताभिर्नः पुनरा कृधि ।।३।।

५. **गोतमः – य. १३.३४–३५**

ध्रुवासि धरुणेतो जज्ञे प्रथममेभ्यो यो निभ्योऽअधि जातवेदाः ।
स गायत्र्या त्रिष्टुभानुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन् ।।३४।।
इषे रोय रमस्व सहसे द्युम्नऽऊर्जेऽअपत्याय ।
सम्राडसि स्वराडसि सारस्वतौ त्वोत्सौ प्रावताम् ।।३५।।

६. **मरीचिः काश्यपः – अ. ७.६३.१**

पृतनाजितं सहमानमग्निमुक्थैर्हवामहे परमात् सधस्थात् ।

स नः पर्षदति दुर्गाणि विश्वा क्षामद् देवोऽति दुरितान्यग्निः ।।१।।

३५३. जातवेदाः

१. अथर्वा – अ. ७.३४.१; ७.३५.१–३; ७.१०६.१

अ. ७.३४.१

अग्ने जातान् प्र णुदा मे सपत्नान् प्रत्यजातांजातवेदो नुदस्व ।
अधस्पदं कृणुष्व ये पृतन्यवोऽनागसस्ते वयमदितये स्याम।।१।।

अ. ७.३५.१–३

प्राज्यान्त्सपत्नान्त्सहसा सहस्व प्रत्यजातांजातवेदो नुदस्व ।
इदं राष्ट्रं पिपृहि सौभगाय विश्व एनमनु मदन्तु देवाः ।।१।।
इमा यास्ते शतं हिराः सहस्र धमनीरुत ।
तासां ते सर्वासामहमश्मना बिलमप्यधाम् ।।2।।
परं योनेरवरं ते कृणोमि मा त्वा प्रजाभि भून्मोत सूनुः ।
अस्वं१ त्वाप्रजसं कृणोम्पश्मानं ते अपिधानं कृणोमि ।।३।।

अ. ७.१०६.१

यदस्मृति चकृम किं चिदग्न उपाररिम चरणे जातवेदः ।
ततः पाहि त्वं नः प्रचेतः शुभे सखिभ्यो अमृतत्वमस्तु नः।।१।।

३५४. जातवेदाः मन्त्रोक्ता

१. चातनः – अ. ५.2६.१–१५

पुरस्ताद् युक्त वह जातवेदोऽग्ने विद्धि क्रियमाणं यथेदम् ।
त्वं भिषग् भेषजस्यासि कर्ता त्वया गामश्वं पुरुषं सनेम ।।१।।
तथा तदग्ने कृणु जातवेदो विश्वेभिर्देवैः सह संविदानः ।
यो नो दिदेव यतमो जघास यथा सो अस्य परिधिष्पताति ।।2।।
यथा सो अस्य परिधिष्पताति तथा तदग्ने कृणु जातवेदः ।
विश्वेभिर्देवैः सह संविदानः ।।३।।
अक्ष्यौ३ नि विध्य हृदय नि विध्य जिह्वां नि तृन्द्धि प्र दतो मृणीहि ।
पिशाचो अस्य यतमो जघासाग्ने यविष्ठ प्रति तं शृणीहि ।।४।।
यदस्य हृतं विहृतं यत् पराभृतमात्मनो जग्धं यतमत् पिशाचैः ।
तदग्ने विद्वान् पुनरा भर त्वं शरीरे मांसमसुमेरयामः ।।५।।
आमे सुपक्वे शबले विपक्वे यो मा पिशाचो अशने ददम्भ ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ।।६।।
क्षीरे मा मन्थे यतमो ददम्भाकृष्टपच्ये अशने धान्ये३ यः ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ।।७।।
अपां मा पाने यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम् ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३ यमस्तु ।।८।।
दिवो मा नक्तं यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम् ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ।।६।।
क्रव्यादमग्ने रुधिरं पिशाचं मनोहनं जहि जातवेदः ।
तमिन्द्रो वाजी वज्रेण हन्तु च्छिनत्तु सोमः शिरो अस्य धृष्णुः ।।१०।।
सनादग्ने मृणसि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः ।
सहमूराननु दह क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ।।११।।
समाहर जातवेदो यद्धृतं यत् पराभृतम् ।।१2।।
सोमस्येव जातवेदो अंशुरा प्यायतामयम् ।

अग्ने विरप्शिनं मेध्यमयक्ष्मं कृणु जीवतु ।।१३।।
एतास्ते अग्ने समिधः पिशाचजम्भनीः ।
तास्त्वं जुषस्व प्रति चैना गृहाण जातवेदः ।।१४।।
तार्ष्टाघीरग्ने समिधः प्रति गृह्णाह्यर्चिषा ।
जहातु क्रव्याद्रूपं यो अस्य मांसं जिहीर्षति ।।१५।।

३५५. जातवेदाः त्वष्टा सविता

१. अथर्वा – अ. 2.2६.2

आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधिनिधेह्यस्मै ।
रायस्पोषं सवितरा सुवास्मै शतं जीवाति शरदस्तवायम्।।2।।

३५६. जातवेदसोऽग्निः

१. ब्रह्म – अ. ४.३६.६–१०

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम् ।।६।।
हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान् ।
सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् ।।१०।।

३५७. जायान्याः

१. अथर्वा – अ. ७.७६.३–५

यः कीकसाः प्रशृणाति तलीद्यमवतिष्ठति। निरास्तं सर्वं जायान्यं यः कश्च ककुदि श्रितः ।।३।।
पक्षी जायान्यः पतति स आ विशति पूरुषम्। तदक्षितस्य भेषजमुभयोः सुक्षतस्य च ।।४।।
विद्यवै ते जायान्य जानं यतो जायान्य जायसे। कथं ह तत्र त्वं हनो यस्य कृण्मो हविर्गृहे।।५।।

३५८. जायापतिः

१. गृत्समदः – य. ११.३१

संवसाथां स्वर्विदा समीचीऽउरसा त्मना। अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् ।।३१।।

३५६. जिज्ञासुः

१. प्रजापतिः – य. 2३.६; ११; ४५; ४७

य. 2३.६

कः स्विदेकाकी चरति क ऽ उ स्विज्जायते पुनः ।
किं स्विद्धिमस्य भेषजं किम्वावपनं महत् ।।६।।

य. 2३.११

का स्विदासीत्पूर्वाचित्तिः किं स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशंगिला ।।११।।

य. 2३.४५

कः स्विदेकाकी चरति क ऽ उ स्विज्जायते पुनः ।
किं स्विद्धिमस्य भेषजं किम्वावपनं महत् ।।४५।।

य. 2३.४७

किं स्वित्सूर्य्यसमं ज्योतिः किं समुद्रसमं सरः ।
किं स्वित्पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ।।४७।।

३६०. जीवेश्वरौ

१. त्रितः – य. १2.१४

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद् व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतं बृहत् ।।१४।।

३६१. तक्मनाशनः

१. भृग्वंगिरा – अ. ५.22.१–१४

अग्निस्तक्मानमप बाधतामितः सोमो ग्रावा वरुणः पूतदक्षाः ।
वेदिर्बर्हिः समिधः शोशुचाना अप द्वेषंस्यमुया भवन्तु ।।१।।
अयं यो विश्वान् हरितान् कृणोष्युच्छोचयन्नग्निरिवाभिदुन्वन् ।
अधा हि तक्मन्नरसो हि भूया अधा न्यङङधराङ् वा परेहि ।।2।
यः पुरुषः पारुषेयोऽवध्वंसइवारुणः ।
तक्मानं विश्वधावीर्याधरांचं परा सुव ।।३।।
अधरांचं प्र हिणोमि नमः कृत्वा तक्मने ।
शकम्भरस्य मुष्टिहा पुनरेतु महावृषान् ।।४।।
ओको अस्य मजवन्त ओको अस्य महावृषाः ।
यावज्जातस्तक्मंस्तावानसि बल्हिकेषु न्योचरः ।।५।।
तक्मन् व्याल वि गद व्यंग भूरि यावय ।
दासीं निष्टक्वरीमिच्छ तां वज्रेण समर्पय ।।६।।
तक्मन् मूजवतो गच्छ बल्हिकान् वा परस्तराम् ।
शूद्रामिच्छ प्रफर्व्यं१ तां तक्मन् वीव धूनुहि ।।७।।
महावृषान् मूजवतो बन्ध्वद्धि परेत्य ।
प्रैतानि तक्मने ब्रूमो अन्यक्षेत्राणि वा इमा ।।८।।
अन्यक्षेत्रे न रमसे वशी सन् मृडयासि नः ।
अभृदु प्रार्थस्तक्मा स गमिष्यति बल्हि कान् ।
भीमास्ते तक्मन् हेतयस्ताभिः स्म परि वृङ्ग्धि नः ।।१०।।
मा स्मैतान्त्सखीन् कुरुथा बलासं कासमुद्युगम् ।
मा स्मातोऽर्वाङैः पुनस्तत् त्वा तक्मन्नुप ब्रुवे ।।११।।
तक्मन् भ्रात्रा बलासेन स्वस्रा कासिकया सह ।
पाप्मा भ्रातृव्येण सह गच्छामुमरणं जनम् ।।१2।।
तृतीयकं वितृतीयं सदन्दिमुत शारदम् ।
तक्मानं शीतं रूरं ग्रैष्मं नाशय वार्षिकम् ।।१३।।
गन्धारिभ्यो मजवद्भ्योऽङगेभ्यो मगधेभ्यः ।
प्रैष्यन् जनमिव शेवधिं तक्मानं परि दद्मसि ।।१४।।

३६2. तताः

१. अथर्वा – अ. ५.2४.१६

तता अवरे ते मावन्तु। अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा।।१६।।

३६३. ततामहाः

१. अथर्वा – अ. ५.2४.१७

ततस्ततामहास्ते मावन्तु। अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां
प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।१७।।

३६४. तनूनपात्

१. मेधातिथिः काण्वः – ऋ. १.१३.2; सा. १३४८

ऋ. १.१३.2

मधुमन्तं तनूनपाद् यज्ञं देवेषु नः कवे। अद्या कृणुहि वीतये ।।2।।

सा. १३४८

मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे। अद्या कृणुह्यूतये ।।2।।

३६५. तपः

१. ब्रह्म – अ. १६.४१.१

भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे ।
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु ।।१।।

३६६. तरन्तो वैददश्विः

१. श्यावाश्व आत्रेयः – ऋ. ५.६१.१०

यो मे धेनूनां शतं वैददश्विर्यथा ददत्। तरन्तइव मंहना ।।१०।।

३६७. ताक्ष्र्यः

१. अथर्वा (स्वस्त्ययनकामः) – अ. ७.८५.१

त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजिमाशुं स्वस्तये ताक्ष्र्यमिहा हुवेम ।।१।।

३६८. ताक्ष्र्यः (अरिष्टनेमिः)

१. अरिष्टनेमिस् ताक्ष्र्यः – ऋ. १०.१७८.१–३

त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम् ।
अरिष्टनोमिं पृतनाजमाशुं स्वस्तये ताक्ष्र्यमिहा हुवेम ।।१।।
इन्द्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवा रुहेम ।
उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम ।।2।।
सद्यश्चिद्यः शवसा पंच कृष्टीः सूर्यइव ज्योतिषापस्ततान ।
सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्याम्।।३।।

३६९. तिरिन्दिरस्य पारशव्यस्य दानस्तुतिः

१. वत्सः काण्वः – ऋ. ८.६.४६–४८

शतमहं तिरिन्दरे सहस्रं पर्शावा ददे। राधांसि याद्वानाम् ।।४६।।
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम्। ददुष्पज्राय साम्ने ।।४७।।
उदानट् ककुहो दिवमुष्टांचतुर्युजो ददत्। श्रवसा याद्वं जनम् ।।४८।।

३७०. तिस्रो देव्यः (सरस्वती–इळा–भारत्यः)

१. मेधातिथिः काण्वः – ऋ. १.१३.६

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः। बर्हिः सीदन्त्वस्रिधः ।।६।।

३७१. तृषिृकाः

१. भार्गवः – अ. ७.११३.१–2

तृष्टिके तृष्टवन्दन उदमूं छिन्धि तृष्टिके। यथा कृतद्विष्टासोऽमूष्मै शेप्यावते ।।१।।
तृष्टासि तृष्टिका विषा विषातक्यसि। परिवृक्ता यथासस्यृषभस्य वशेव ।।2।।

३७2. त्रसदस्योर् दानस्तुतिः

१. सोभरिः काण्वः – ऋ. ८.१६.३६–३७

अदान्मे पौरुकुत्स्यः पंचाशतं त्रसदस्युर्वधूनाम् ।
मंहिष्ठो अर्यः सत्पतिः ।।३६।।
उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि ।
तिसृणां सप्ततीनां श्यावः प्रणेता भुवद्वसुर्दियानां पतिः ।।३७।।

३७३. त्रिवृत्

१. भृग्वंगिरा – अ. १६.२७.१–१५

गोभिष्ट्वा पात्वृषभो वृषा त्वा पातु वाजिभिः ।
वायुष्ट्वा ब्रह्मणा पात्विन्द्रस्त्वा पात्विन्द्रियैः ।।१।।
सोमस्त्वा पात्वोषधीभिर्निक्षत्रैः पातु सूर्यः ।
माद्भ्यस्त्वा चन्द्रो वृत्रहा वातः प्राणेन रक्षतु ।।2।।
तिस्रो दिवस्तिस्रः पृथिवीस्त्रीण्यन्तरिक्षाणि चतुरः समुद्रान् ।
त्रिवृतं स्तोमं त्रिवृत आप आहुस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः ।।३।।
त्रीन्नाकांस्त्रीन् समुद्रांस्त्रीन् ब्रध्नांस्त्रीन् वैष्टपान् ।
त्रीन् मातरिश्वनस्त्रीन्त्सूर्यान् गोप्तॄन् कल्पयामि ते ।।४।।
घृतेन त्वा समुक्षाम्यग्न आज्येन वर्धयन् ।
अग्नेश्चन्द्रस्य सूर्यस्य मा प्राणं मायिनो दभन् ।।५।।
मा वः प्राणं मा वोऽपानं मा हरो मायिनो दभन् ।
भ्राजन्तो विश्ववेदसो देवा दैव्येन धावत ।।६।।
प्राणेनाग्निं सं सृजति वातः प्राणेन संहितः ।
प्राणेन विश्वतोमुखं सूर्यं देवा अजनयन् ।।७।।
आयुषायुष्कृतां जीवायुष्मान् जीव मा मृथाः ।
प्राणेनात्मन्वतां जीव मा मृत्योरुदगा वशम् ।।८।।
देवानां निहितं निधिं यमिन्द्रोऽन्विन्दत् पथिभिर्देवयानैः ।
आपो हिरण्यं जुगुपुस्त्रिवृद्भिस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः ।।९।।
त्रयस्त्रिंशद् देवतास्त्रीणि च वीर्याणि प्रियायमाणा जुगुपुरप्स्व१न्तः ।
अस्मिंश्चन्द्रे अधि यद्धिरण्यं तेनायं कृणवद् वीर्याणि ।।१०।।
ये देवा दिव्येकादश स्थ ते देवासो हविरिदं जुषध्वम् ।।११।।
ये देवा अन्तरिक्ष एकादश स्थ ते देवासो हविरिदं जुषध्वम् ।
ये देवा : पृथिव्यामेकादश स्थ ते देवासो हविरिदं जुषध्वम् ।।१३।।
असपत्नं पुरस्तात् पश्चान्नो अभयं कृतम् ।
सविता मा दक्षिणत उत्तरान्मा शचीपतिः ।।१४।।
दिवो मादित्या रक्षन्तु भूम्या रक्षन्त्वग्नयः ।
इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितः शर्म यच्छताम् ।
तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतः सन्तु वर्म ।।१५।।

३७४. त्रिवृत् (अग्न्यादयः)

१. अथर्वा – अ. ५.2८.१–१४

नव प्राणान्नभिः सं मिमीते दीर्घायुतवाय शतशारदाय ।
हरिते त्रीणि रजते त्रीण्ययसि त्रीणि तपसाविष्ठितानि ।।१।।
अग्निः सूर्यश्चन्द्रमा भूमिरापो द्यौरन्तरिक्षं प्रदिशो दिशश्च ।
आर्तवा ऋतुभिः संविदाना अनेन मा त्रिवृता पारयन्तु ।।2।।
त्रयः पोषास्त्रिवृति श्रयन्तामनक्तु पूषा पयसा घृतेन ।
अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह श्रयन्ताम् ।।३।।
इममादित्या वसुना समुक्षतेममग्ने वर्धय वावृधानः ।
इममिन्द्र सं सृज वीर्येणास्मिन् त्रिवृच्छ्रयतां पोषयिष्णुः ।।४।।
भूमिष्ट्वा पातु हरितेन विश्वभृदग्निः पिपर्त्वयसा सजोषाः ।
वीरुद्भिष्टे अर्जुनं संविदानं दक्षं दधातु सुमनस्यमानम् ।।५।।
त्रेधा जातं जन्मनेदं हिरण्यमग्नेरेकं प्रियतमं बभूव सोमस्यैक हिंसितस्य परापतत् ।
अपामेकं वेधसां रेत आहुस्तत् ते हिरण्यं त्रिवृदस्त्वायुषे ।।६।।
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।

त्रेधामृतस्य चक्षणं त्रीण्यायूंषि तेऽकरम् ।।७।।
त्रयः सुपर्णास्त्रिवृता यदायन्नेकाक्षरमभिसंभूय शक्राः ।
प्रत्यौहन्मृत्युममृतेन साकमन्तर्दधाना दुरितानि विश्वा ।।८।।
दिवस्त्वा पातु हरितं मध्यात् त्वा पात्वर्जुन्म् ।
भूम्या अयस्मयं पातु प्रागाद् देवपुरा अयम् ।।६।।
इमास्तिस्रो देवपुरास्तास्त्वा रक्षन्तु सर्वतः ।
तास्त्वं बिभ्रद् वर्चस्वयुत्तरो द्विषतां भव ।।१०।।
पुरं देवानाममृतं हिरण्यं य आबेधे प्रथमो देवो अग्रे ।
तस्मै नमो दश प्राचीः कृणोम्यनु मन्यतां त्रिवृदाबधे मे ।।११।।
आ त्व चृतत्वर्यमा पूषा बृहस्पतिः। अहर्जातस्य यन्नाम तेन त्वाति चृतामसि ।।१2।।
ऋतुभिष्टवार्तवैरायुषे वर्चसे त्वा। संवत्सरस्य तेजसा तेन संहनु कृण्मसि ।।१३।।
घृतादुल्लुप्तं मधुना समं भूमिदृंहमच्युतं पारयिष्णु ।
भिन्दत् सपत्नानधरांश्च कृण्वदा मा रोह महते सौभागाय ।।१४।।

३७५. त्रिषन्धिः

१. भृग्वंगिरा – अ. ११.१०.१–27

उत्तिष्ठत सं नह्यध्वमुदाराः केतुभिः सह ।
सर्पा इतरजना रक्षांस्यमित्राननु धावत ।।१।।
ईशां वो वेदराज्यं त्रिषन्धे अरुणैः केतुभिः सह ।
ये अन्तरिक्षे ये दिवि पृथिव्यां ये च मानवाः ।
त्रिषन्धेस्ते चेतसि दुर्णामान उपासताम् ।।2।।
अयोमुखाः सूचीमुखा अथो विकङ्कतीमुखाः ।
क्रव्यादो वातरंहस आ सजन्त्वमित्रान् वज्रेण त्रिषन्धिना ।।३।।
अन्तर्धेहि जातवेद आदित्य कुणपं बहु ।
त्रिषन्धेरियं सेना सुहितास्तु मे वशे ।।४।।
उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह ।
अयं बलिर्व आहुतस्त्रिषन्धेराहुतिः प्रिया ।।५।।
शितिपदी सं द्यतु शरव्ये३यं चतुष्पदी ।
कृत्येऽमित्रेभ्यो भव त्रिषन्धेः सह सेनया ।।६।।
धूमाक्षी सं पततु कृधुकर्णी च क्रोशतु ।
त्रिषन्धेः सेनया जिते अरुणाः सन्तु केतवः ।।७।।
अवायन्तां पक्षिणो ये वयांस्यन्तरिक्षे दिवि ये चरन्ति ।
श्वापदो मक्षिकाः सं रभन्तामामादो गृध्राः कुणपे रदन्ताम् ।।८।।
यामिन्द्रेणसंधां समधत्था ब्रह्मणा च बृहस्पते ।
तयाहमिन्द्रसंधया सर्वान् देवानिह हुव इतो जयत मामुतः ।।६।।
बृहस्पतिरांगिरस ऋषयो ब्रह्मसंशिताः ।
असुरक्षयणं वधं त्रिषन्धि दिव्याश्रयन् ।।१०।।
येनासौ गुप्त आदितय उभाविन्द्रश्च तिष्ठतः ।
त्रिषन्धि देवा अभजन्तौजसे च बलाय च ।।११।।
सर्वाल्लोँकान्त्समजयन् देवा आहुत्यानया ।
बृहस्पतिरांगिरसो वज्रं यमसिंचतासुरक्षयणं वधम् ।।१2।।
बृहस्पतिरांगिरसो वज्रं यमस्ंिचतासुरक्षयणं वधम् ।
तेनाहममूं सेनां नि लिम्पामि बृहस्पतेऽमित्रान् हन्म्योजसा ।।१३।।
सर्वे देवा अत्यायन्ति ये अश्नन्ति वषट्कृतम् ।

इमां जुषध्वमाहुतिमितो जयत मामुतः ।।१४।।
सर्वे देवा अत्यायन्तु त्रिषन्धेराहुतिः प्रिया ।
संधां महतीं रक्षत ययाग्रे असुरा जिता ।।१५।।
वायुरमित्राणामिष्वग्राण्यांचतु ।
इन्द्र एषां बाहून् प्रति भनक्तु मा शकन् प्रतिधामिषुम् ।
आदित्य एषामस्त्रं वि नाशयतु चन्द्रमा युतामगतस्य पन्थाम् ।।१६।।
यदि प्रेयुर्देवपुरा ब्रह्म वर्माणि चक्रिरे ।
तनूपानं परिपाणं कृण्वाना यदुपोचिरे सर्वं तदरसं कृधि ।।१७।।
क्रव्यादानुवर्तयन् मृत्युना च पुरोहितम् ।
त्रिषन्धे प्रेहि सेनया जयामित्रान् प्र पद्यस्व ।।१८।।
त्रिषन्धे तमसा त्वममित्रान् परि वारय ।
पृषदाज्यप्रणुत्तानां मामीषां मोचि कश्चन ।।१९।।
शितिपदी सं पतत्वमित्राणाममूः सिचः ।
मुह्यन्त्वद्यामूः सेना अमित्राणां न्यर्बुदे ।।20।।
मूढा अमित्रा न्यर्बुदे जह्येषां वरंवरम् ।
अनया जहि सेनया ।।21।।
यश्च कवची यश्चाकवचो३मित्रो यश्चज्मनि ।
ज्यापाशैः कवचपाशैरज्मनाभिहतः शयाम् ।।22।।
ये वर्मिणो ये वर्माणो अमित्रा ये च वर्मिणः ।
सर्वास्ताँ अर्बुदे हतांछ्वानोऽदन्तु भूम्याम् ।।2३।।
ये रथिनो ये अरथा असादा ये च सादिनः ।
सर्वानदन्तु तान् हतान् गृध्राः श्येनाः पतत्रिणः ।।2४।।
सहस्रकुणपा शेतामामित्री सेना समरे वधानाम् ।
विविद्धा ककजाकृता ।।2५।।
मर्माविधं रोरुवतं सुपर्णैरदन्तु दुश्चितं मृदितं शयानम् ।।2६।।
यां देवा अनुतिष्ठन्ति यस्या नास्ति विराधनम् ।
तयेन्द्रो हन्तु वृत्रहा वज्रेण त्रिषन्धिना ।।2७।।

३७६. त्रैककुदांजनम्

१. भृगुः – अ. ४.९.१–१०

एहि जीवं त्रायमाणं पर्वतस्यास्यक्ष्यम्। विश्वेभिर्देवैर्दत्तं परिधिर्जीवनाय कम् ।।१।।
परिपाणं पुरुषाणां परिपाणं गवामसि। अश्वानामर्वतां परिपाणाय तस्थिषे ।।2।।
उतासि परिपाणं यातुजम्भनमांजन ।
उतामृतस्य त्वं वेत्थाथो असि जीवभेजनमथो हरितभेषजम् ।।३।।
यस्यांजन प्रसर्पस्यंगमंगं परुष्परुः। ततो यक्ष्मं वि बाधस उग्रो मध्यमशीरिव ।।४।।
नैनं प्राप्नोति शपथो न कृत्या नाभिशोचनम्। नैनं विष्कन्धमश्नुते यस्त्वा बिभर्त्यांजन ।।५।।
असन्मन्त्राद् दुःष्वप्न्याद् दुष्कृताच्छमलादुत। दुर्हार्दश्चक्षुषो घोरात् तस्मान्नः पाह्यांजन ।।६।।
इदं विद्वानांजन सत्यं वक्ष्यामि नानृतम्। सनेयमश्वं गामहमात्मानं तव पुरुष ।।७।।
त्रयो दासा आंजनस्य तक्मा बलास आदहिः। वर्षिष्ठः पर्वतानां त्रिककुन्नाम ते पिता ।।८।।
यदाज्जनं त्रैककुदं जातं हिमवतस्परि। यातूंश्च सर्वाजम्भयत् सर्वाश्च यातुधान्यः ।।९।।
यदि वासि त्रैककुदं यदि यामुनमुच्यसे। उभे ते भद्रे नाम्नी ताभ्यां नः पाह्यांजन ।।१०।।

३७७. त्वष्टा

१. अथर्वा – अ. ६.७८.३

त्वष्टा जायामजनयत् त्वष्टास्यै त्वां पतिम्। त्वष्टा सहस्रमायूंषि दीर्घमायुष्कृणोतु वाम्।।३।।

2. **दीर्घतमा – य. ६.2०**

ऐन्द्रः प्राणोऽअंगेऽअंगे निदीध्यदैन्द्रऽउदानोऽअंगेऽअङ्गे निधीतः ।
देव त्वष्टर्भूरि ते संसमेतु सलक्ष्मा यद्विषुरूपं भवाति ।
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ।।2०।।

३. **दीर्घतमा औचथ्यः – ऋ. १.१४2.१०**

तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना। त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ।।१०।।

४. **ब्रह्म – अ. ५.2६.८**

त्वष्टा युनक्तु बहुधा नु रूपा अस्मिन् यज्ञे सुयुजः स्वाहा ।।८।।

५. **मेधातिथिः – य. ६.७**

उपावीरस्युप देवान्दैवीर्विशः प्रागुरुशिजो वह्नितमान्। देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ।।७।।

६. **मेधातिथिः काण्वः – ऋ. १.१३.१०; १.१५.३.४**

ऋ. १.१३.१०

इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये। अस्माकमस्तु केवलः ।।१०।।

ऋ. १.१५.३–४

अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि ।।३।।
अग्ने देवाँ इहा वह सादया योनिषु त्रिषु। परि भूष पिब ऋतुना ।।४।।

७. **वामदेवः – य. 2.2४**

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ।।2४।।

८. **सङ्कुसुकोभ्यामायनः – ऋ. १०.१८.६**

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ ।
इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः ।।६।।

६. **बृहदुक्थो वामदेव्यः – य. 2६.६**

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायतऽआशुरश्वः ।
त्वष्टेदं विश्वं भुवन जजान बहोः कर्त्तारमिह यक्षि होतः ।।६।।

३७८. त्वष्टा पर्जन्य ब्रह्मणस्पति अदितिः (साग्री. सास्वा.)बहुदेवते इत्येके (सार्षेदी.)

१. वामदेवो गौतमः – सा. 2६६

त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः। पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः ।।७।।

३७६. त्वष्टा शुक्रश्च

१. **गृत्समदः शौनकः – ऋ. 2.३६.३**

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ।।३।।

३८०. त्वष्ट्रादयः

१. **अथर्वा (स्वस्त्ययनकामः) – अ. ६.४.१–३**

त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रायमाणं सहः ।।१।।
अंशो भगो वरुणो मित्रो अर्यमादितिः पुनातु मरुतः ।
अप तस्य द्वेषो गमेदभिह्रुतो यावयच्छन्नुमन्तितम् ।।2।।
धिये समश्विना प्रावतं न उरुष्या ण उरुज्मन्नप्रयुच्छन् ।

द्यौ३ष्पितर्यावय दुच्छुना या ।।३।।

३८१. त्विषिः बृहस्पतिः

१. अथर्वा (वर्चस्कामः) – अ. ६.३८.१–४

सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या ।
इन्द्र या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ।।१।।
या हस्तिनि द्वीपिनि या हिरण्ये त्विषिरप्सु गोषु या पुरुषेषु ।
इन्द्र या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ।।2।।
रथे अक्षेण्वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे ।
इन्द्र या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ।।३।।
राजन्ये दुन्दुभावायतायामश्वस्य वाजे पुरुषस्य मायौ ।
इन्द्रं या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ।।४।।

३८2. दक्षिण, इन्द्रः तिरश्चिराजिः पितरः

१. अथर्वा – अ. ३.2७.2

दक्षिणा दिगिन्द्रोऽधिपतिस्तिरश्चिराजी रक्षिता पितर इषवः ।
तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ।।2।।

३८३. दक्षिणा तद्दातारो वा

१. दिव्यो दक्षिणा वा प्राजापत्याः – ऋ. १०.१०७.१–११

आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि ।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि ।।१।।
उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण ।
हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्र तिरन्त आयुः ।।2।।
दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति ।
अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणन्ति ।।३।।
शतधरं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः ।
ये पृणन्ति प्र च यच्छन्ति संगमे ते दक्षिणां दुहते सप्तमातरम् ।।४।।
दक्षिणावान्प्रथमो हूत एति दक्षिणावान्ग्रामणीरग्रमेति ।
तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय ।।५।।
तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम् ।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ।।६।।
दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम् ।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ।।७।।
न भोजा मम्रुर्न न्यर्थमीयुर्न रिष्यन्ति न व्यथन्ते ह भोजाः ।
इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणैभ्यो ददाति ।।८।।
भोजा जिग्युः सुरभिं योनिमग्रे भेजा जिग्युर्वध्वं१ या सुवासाः ।
भेजा जिग्युरन्तः पेयं सुराया भेजा जिग्युर्ये अहूताः प्रयन्ति ।।९।।
भेजायाश्वं सं मृजन्त्याशुं भेजापयास्ते कन्या३ शुम्भमाना ।
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम् ।।१०।।
भोजमश्वाः सुष्ठुवाहो वहन्ति सुवृद्रथो वर्तते दक्षिणायाः ।
भेजं देवासोऽवता भरेषु भोजः शत्रून्त्समनीकेषु जेता ।।११।।

३८४. दधिक्रा

१. वामदेवः – अ. 20.१३७.३

दधिक्रावणो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत प्र ण आयूंषि तारिषत्।।३।।

2. वामदेवो गौतमः – ऋ. ४.३८.2–१०; ४.३६.१–६; सा. ३५८

ऋ. ४.३८.2–१०

उत वाजिनं पुरुनिष्षिध्वानं दधिक्रामु ददथुर्विश्वकृष्टिम् ।
ऋजिप्यं श्येनं प्रुषितत्सुमाशुं चर्कृत्यमर्यो नृपतिं न शूरम् ।।2।।
यं सीमनु प्रवतेव द्रवन्तं विश्वः पूरुर्मदति हर्षमाणः ।
पड्भिर्गृध्यन्तं मेधयुं न शूरं रथतुरं वातमिव ध्रजन्तम् ।।३।।
यः स्मारुन्धानो गध्या समत्सु सनुतरश्चरति गोषु गच्छन् ।
आविर्ऋजीको विदथा निचिक्यत्तिरो अरतिं पर्याय आयोः ।।४।।
उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशन्ति क्षितयो भरेषु ।
नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथम् ।।५।।
उत स्मासु प्रथमः सरिष्यन्नि वेवेति श्रेणिभी रथानाम् ।
स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत्किरणं ददश्वान् ।।६।।
उत स्य वाजी सहुरिर्ऋतावा शुश्रुषमाणस्तन्वा समर्ये ।
तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमृंजन् ।।७।।
उत स्मास्य तन्यतोरिव द्योर्ऋघायतो अभियुजो भयन्ते ।
यदा सहस्रमभि षीमयोधीद्दुर्वर्तुः स्मा भवति भीम ऋंजन् ।।८।।
उत स्मास्य पनयन्ति जना जूतिं कृष्टिप्रो अभिभूतिमाशोः ।
उतैनमाहुः समिथे वियन्तः परा दधिक्रा असरत्सहस्रैः ।।६।।
आ दधिक्राः शवसा पंच कृष्टीः सूर्यइव ज्योतिषापस्ततान ।
सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ।।१०।।

ऋ. ४.३६.१–६

आशुं दधिक्रां तमु नु ष्टवाम दिवस्पृथिव्या उत चर्किराम ।
उच्छन्तीर्मामुषसः सूदयन्त्वति विश्वानि दुरितानि पर्षन् ।।१।।
महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ।
यं पुरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिम् ।।2।।
यो अश्वस्य दधिक्रावणो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ ।
अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ।।३।।
दधिक्राव्ण इष ऊर्जो महो यदमन्महि मरुतां नाम भद्रम् ।
स्वस्तये वरुणं मित्रमग्निं हवामह इन्द्रं वज्रबाहुम् ।।४।।
इन्द्रमिवेदुभये वि ह्वयन्त उदीराणा यज्ञमुपप्रयन्तः ।
दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वम् ।।५।।
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ।।६।।

सा. ३५८

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ।।७।।

३८५. दधिक्रावा

१. वामदेवो गौतमः – ऋ. ४.४०.१–४

दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः सूदयन्तु ।
अपामग्नेरुषसः सूर्यस्यबृहस्पतेरांगिरसस्य जिष्णोः ।।१।।
सत्वा भरिषो गविषो दुवन्यसच्छ्वस्यादिषु उषसस्तुरण्यसत् ।
सत्यो द्रवो द्रवरः पतङ्गरो दधिक्रावेषमूर्जं स्वर्जनत् ।।2।।

उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः ।।३।।
उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिका अनु संतवीत्वत् पथामङ्कांस्यन्वापनीफणत् ।।४।।

३८६. दम्पतिः

१. परमेष्ठी – य. १५.३

षोडशी स्तोम ओजो द्रविणं चतुश्चत्वारिंश स्तोमो वर्चो द्रविणम्। अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः। स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्व ।।३।।

३८७. दम्पती

१. अत्रिः – य. ८.2७–३०

अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणाः। अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि। देवानां समिदसि।।2७।।
एजतु दशमास्यो गर्भो जरायुणा सह। यथायं वायुरेजति यथा समुद्रऽएजति।
एवायं दशमास्यो ऽअस्रज्जरायुणा सह।।2८।।
यस्यै ते यज्ञियो गर्भो यस्यै योनिर्हिर एययी।
अङ्गान्यह्रुता यस्य तं मात्रा समजीगमं स्वाहा ।।2९।।
पुरुदस्मो विषुरूपऽइन्दुरन्तर्महिमानमानंच धीरः ।
एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टपादीं भुवनानु प्रथन्तां स्वाहा।।३०।।

2. कक्षीवान् दैर्धतमसः औशिजः – ऋ. १.१2५.१–७

प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते ।
ते प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः ।।१।।
सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।
यस्त्ववायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ।।2।।
आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन ।
अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ।।३।।
उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।
पृणान्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ।।४।।
नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ।।५।।
दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ।।६।।
मा पृणन्तो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रातसः ।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः ।।७।।

३. गृत्समदः – य. ११.३०

शर्म च स्थो वर्म च स्थोऽछिद्रे बहुलेऽउभे। व्यचस्वती संवसाथां भृतमग्निं पुरीष्यम् ।।३०।।

४. गोतमः – य. ८.३१

मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः ।।३१।।

५. प्रजापतिः – अ. 2.३०.५

एयमगन् पतिकामा जनिकामोऽहमागमम्। अश्वः कनिक्रदद् यथा भगेनाहं सहागमम् ।।५।।

६. मेधातिथिः – य. ८.३2

मही द्यौः पृथिवी च नऽइमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ।।३2।।

७. विश्वेदेवाः – य. १४.८

प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे पाहि चक्षुर्मऽउर्व्या विभाहि श्रोत्रम्मे श्लोकय ।
अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि दिवो वृष्टिमेरय ।।८।।

३८८. दम्पत्ती

१. मधुच्छन्दाः – य. १2.६०

भवतं नः समनसौ सचेतसावरेपसौ ।
मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ।।६०।।

2. मनुर्वैवस्वतः – ऋ. ८.३१.५–६

या दंपती समनसा सुनुत आ च धावतः। देवासो नित्ययाशिरा ।।५।।
प्रति प्राशव्याँ इतः सम्यंचा बर्हिराशाते। न ता वाजेषु वायतः ।।६।।
न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः। श्रवो बृहद्विवासतः ।।७।।
पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः। उभा हिरण्यपेशसा ।।८।।
वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम्। समूधो रोमशं हतो देवेषु कृणुतो दुवः।।६।।

३८६. दम्पत्त्योराशिषः

१. मनुर् वैवस्वतः – ऋ. ८.३१.१०–१८

आ शर्म पर्वतानां वृणीमहे नदीनाम्। आ विष्णोः सचाभुवः ।।१०।।
ऐतु पूषा रयिर्भगः स्वस्ति सर्वधतमः। उरुरध्वा स्वस्तये ।।११।।
अरमतिरनर्वणो विश्वो देवस्य मनसा। आदित्यानामनेह इत् ।।१2।।
यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः। सुगा ऋतस्य पन्थाः ।।१३।।
अग्निं वः पूर्व्यं गिरा देवमीळे वसूनाम् ।
सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ।।१४।।
मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ।।१५।।
न यजमान रिष्यसि न सुन्वान न देवयो ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ।।१६।।
नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ।।१७।।
असदत्र सुवीर्यमुत त्यदाश्वश्वयम् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ।।१८।।

३६०. दम्पत्योः परिपथिनाशनौ

१. सावित्री सूर्या – अ. १४.2.११

मा विदनृ परिपन्थिनो य आसीदन्ति दम्पती। सुगेन दुर्गमतीतामप द्रान्त्वरातयः ।।११।।

३६१. दर्भः

१. भृगुः (आयुष्कामः) – अ. १६.३2.१–१०; १६.३३.१–५

अ. १६.३2.१–१०

शतकाण्डो दुश्च्यवनः सहस्रपर्ण उत्तिरः। दर्भो य उग्र आषिधिस्तं ते बध्नाम्यायुषे ।।१।।
नास्य केशान् प्र वपन्ति नोरसि ताडमा घ्नते। यस्मा अच्छिन्नपर्णेन दर्भेण शर्म यच्छति ।।2।।
दिवि ते तूलमोषधे पृथिव्यामसि निष्ठितः। त्वया सहस्रकाण्डेनायुः प्र वर्धयामहे ।।३।।
तिस्रो दिवो अत्यतृणत् तिस्र इमाः पृथिवीरुत। त्वयाहं दुर्हार्दो जिह्वां नि तृणद्मि वचांसि ।।४।।
त्वमसि सहमानोऽहमस्मि सहस्वान्। उभौ सहस्वन्तौ भूत्वा सपत्नान् सहिषीमहि ।।५।।
सहस्व नो अभिमातिं सहस्व पृतनायतः। सहस्व सर्वान् दुर्हार्दः सुर्हार्दो मे बहून् कृधि ।।६।।
दर्भेण देवजातेन दिवि ष्टम्भेन शश्वदित्। तेनाहं शश्वतो जनाँ असनं सनवानि च ।।७।।

प्रियं मा दर्भ कृणु ब्र□राजन्याभ्यां शुद्राय चार्याय च।
यस्मै च कामयामहे सर्वस्मै च विपश्यते।।८।।
यो जायमानः पृथिवीमदृंहद् यो अस्तभ्नादन्तरिक्षं दिवं च ।
यं बिभ्रतं ननु पाप्मा विवेद स नोऽयं दर्भो वरुणो दिवा कः ।।९।।
सपत्नहा शतकाण्डः सहस्वानोषधीनां प्रथमः सं बभूव ।
स नोऽयं दर्भः परि पातु विश्वतस्तेन साक्षीय पृतनाः पृतन्यतः ।।१०।।

अ. १९.३३.१—५

सहस्रार्घः शतकाण्डः पयस्वानपामग्निर्वीरुधां राजसूयम् ।
स नोऽयं दर्भः परि पातु विश्वतो देवो मणिरायुषा सं सृजाति नः ।।१।।
घृतादुल्लुप्तो मधुमान् पयस्वान् भूमिदृंहोऽच्युतश्च्यावयिष्णुः ।
नुदन्त्सपत्नानधरांश्च कृण्वन् दर्भा रोह महतामिन्द्रियेण ।।2।।
त्वं भूमिमत्येष्योजसा त्वं वेद्यां सीदसि चारुरध्वरे ।
त्वां पवित्रमृषयोऽभरन्त त्वं पुनीहि दुरितान्यस्मत् ।।३।।
तीक्ष्णो राजा विषासही रक्षोहा विश्वचर्षणिः ।
ओजो देवानां बलमुग्रमेतत् तं ते बध्नामि जरसे स्वस्तये ।।४।।
दर्भेण त्वं कृणवद् वीर्याणि दर्भं बिभ्रदात्मना मा व्यथिष्ठाः ।
अतिष्ठाया वर्चसाधान्यान्सूर्यइवा भाहि प्रदिशश्चतस्रः ।।५।।

३९2. दर्भमणिः

१. ब्रह्म — अ. १९.2८.१—१०; १९.2९.१—९; १९.३०.१—५

अ. १९.2८.१—१०

इमं बध्नामि ते मणिं दीर्घायुत्वाय तेजसे। अदर्भं सपत्नदम्भनं द्विषतस्तपनं हृदः ।।१।।
द्विषतस्तापयन् हृदः शत्रूणां तापयन् मनः। दुर्हार्दः सर्वांस्त्वं दर्भ घर्मइवाभीन्त्संतापयन् ।।2।।
घर्मइवाभितपन् दर्भ द्विषतो नितपन् मणे। हृदः सपत्नानां भिन्द्धीन्द्रइव विरुजं बलम् ।।३।।
भिन्द्धि दर्भ सपत्नानां ह्रदयं द्विषतां मणे। उद्यन् त्वचमिव भूम्याः शिर एषा वि पातय ।।४।।
भिन्द्धि दर्भ सपत्नान् मे भिन्द्धि मे पृतनायतः।
भिन्द्धि मे सर्वान्दुर्हार्दो भिन्द्धि मे द्विषतो मणे।।५।।
छिन्द्धि दर्भ सपत्नान् मे छिन्द्धि मे पृतनायतः ।
छिान्द्धि मे सुर्वान्दुर्हार्दान् छिन्द्धि मे द्विषतो मणे ।।६।।
वृश्च दर्भ सपत्नान् मे वृश्च मे पृतनायतः। वृश्च मे सर्वान्दुर्हार्दो वृश्च मे द्विषतो मणे ।।७।।
कृन्त दर्भ सपत्नान्मे कृन्त मे पृतनायतः। कृन्त मे सर्वान्दुर्हार्दां कृन्त मे द्विषतो मणे ।।८।।
पिंश दर्भ सपत्नान् मे पिंश मे पृतनायतः। पिंश मे सर्वान् दुर्हार्दः पिंश मे द्विषतो मणे ।।९।।
विध्य दर्भ सपत्नान् मे विध्य मे पृतनायतः। विध्य मे सर्वान् दुर्हार्दो विध्य मे द्विषतो मणे ।।१०।।

अ. १९.2९.१—९

निक्ष दर्भ सपत्नान् मे निक्ष मे पृतनायतः। निक्ष मे सर्वान् दुर्हार्दो निक्ष मे द्विषतो मणे ।।१।।
तृन्द्धि दर्भ सपत्नान् मे तृन्द्धि मे पृतनायतः। तृन्द्धि मे सर्वान् दुर्हार्दस्तृन्द्धि मे द्विषतो मणे।।2।।
रुन्द्धि दर्भ सपत्नान् मे रुन्द्धि मे पृतनायतः।
रुन्द्धि मे सर्वान् दुर्हार्दो रुन्द्धि मे द्विषतो मणे।।३।।
मृण दर्भ सपत्नान् मे मृण मे पृतनायतः। मृण मे सर्वान् दुर्हार्दो मृण मे द्विषतो मणे ।।४।।
मन्थ दर्भ सपत्नान् मे मन्थ मे पृतनायतः। मन्थ मे सर्वान् दुर्हार्दो मन्थ मे द्विषतो मणे ।।५।।
पिण्ड्ढि दर्भ सपत्नान् मे पिण्ड्ढि मे पृतनायतः ।
पिण्ड्ढि मे सर्वान् दुर्हार्दः पिण्ड्ढि मे द्विषतो मणे ।।६।।
ओष दर्भ सपत्नान् मे ओष मे पृतनायतः। ओष मे सर्वान् दुर्हार्द ओष मे द्विषतो मणे ।।७।।

दह दर्भ सपत्नान् मे दह मे पृतनायतः। दह मे सर्वान् दुर्हार्दो दह मे द्विषतो मणे ।।८।।
जहि दर्भ सपत्नान् मे जहि मे पृतनायतः। जहि मे सर्वान् दुर्हार्दो जहि मे द्विषतो मणे।।६।।

अ. १६.३०.१–५

यत् ते दर्भ जरामृत्युः शतं वर्ममु वर्म ते। तेनेमं वर्मिणं कृत्वा सपत्नांजहि वीर्यैः ।।१।।
शतं ते दर्भ वर्माणि सहस्रं वीर्याणि ते। तमस्मै विश्वे त्वां देवा जरसे भर्तवा अदुः ।।2।।
त्वामाहुर्देववर्म त्वां दर्भ ब्रह्मणस्पतिम्। त्वामिन्द्रस्याहुर्वर्म त्वं राष्ट्राणि रक्षसि ।।३।।
सपत्नक्षयणं दर्भ द्विषतस्तपनं हृदः। मणिं क्षत्रस्य वर्धनं तनूपानं कृणोमि ते ।।४।।
यत् समुद्रो अभ्यक्रन्दत् पर्जन्यो विद्युता सह। ततो हिरण्ययो बिन्दुस्ततो दर्भो अजायत।।५।।

३६३. दिग्

१. अप्रतिरथः – य. १७.५४

पंच दिशो दैवीर्यज्ञमवन्तु देवीरपामति दर्मतिं बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे ऽअधि यज्ञोऽअस्थात् ।।५४।।

३६४. दिगादयो लिंगोक्ता

१. दीर्घतमा – य. ३६.2

दिग्भ्यः स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहा ऽद्भयः
स्वाहा वरुणाय स्वाहा। नाभ्यै स्वाहा पूताय स्वाहा ।।2।।

३६५. दिव चन्द्रमसः

१. अंगिराः – अ. ४.३६.७–८

दिक्षु चन्द्राय समनमन्त्स आर्ध्नोत् ।
यथा दिक्षु चन्द्राय समनमन्नेवा मह्यं संनमः संनमन्तु।।७।।
दिशो धेनवस्तासां चन्द्रो वत्सः ।
ता मे चन्द्रेण वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ।।८।।

३६६. दिवादित्यौ

१. अंगिराः – अ. ४.३६.५–६

दिव्यादित्याय समनमन्त्स आर्ध्नोत् ।
यथा दिव्यादित्याय समनमन्नेवा मह्यं संनमः सं नमन्तु ।।५।।
द्यौर्धेनुस्तस्या आदित्यो वत्सः ।
सा म आदित्येन वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ।।६।।

३६७. दिव्या आपः

१. अथर्वा – अ. ६.124.१–३

दिवो नु मां बृहतो अन्तरिक्षादपां स्तोको अभ्यपप्तद् रसेन ।
समिन्द्रियेण पयसाहमग्ने छन्दोभिर्यज्ञैः सुकृतां कृतेन।।१।।
यदि वृक्षादभ्यपप्तत् फलं तद् यद्यन्तरिक्षात् स उ वायुरेव ।
यत्रास्पृक्षत् तन्वो३ यच्च वासस आपो नुदन्तु निर्ऋतिं पराचैः।।2।।
अभ्यंजनं सुरभि सा समृदधिर्हिरण्यं वर्चस्तदु पूत्रिममेव।
सर्वा पवित्रा वितताध्यस्मत् तन्मा तारीन्निर्ऋतिर्मो अरातिः ।।३।।

३६८. दिशः

१. अथर्वा – अ. ४.१५.१

समुत्पतन्तु प्रदिशो नभस्वतीः समभ्राणि वातजूतानि यन्तु ।

महत्रऋषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवीं तर्पयन्तु।।१।।

2. प्रजापतिः – य. 22.2४

प्राच्यै दिशे स्वहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ।।2४।।

३. प्रजापतिर् वैश्वामित्रो वाच्यो वा – ऋ. ३.५५.१६

आ धेनवो धुनयन्तामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः ।
नव्यानव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम् ।।१६।।

४. वसिष्ठः – य. ६.22

अस्मे वोऽअस्त्विन्द्रियमस्मे नृम्णमुत क्रतुरस्मे वर्चांसि सन्तु वः। नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्याऽइयं ते राड्यन्तासि यमनो ध्रुवोऽसि धरुणः।
कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा।।22।।

५. विश्वेदेवाः – य. १४.१३

राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक् सम्राडसि प्रतीची दिक् स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिक् ।।१३।।

३९६. दुःष्वप्ननाशनम्

१. अंगिराः प्रचेता यमश्च – अ. ६.४५.१–३; ६.४६.१–३

अ. ६.४५.१–३

परोऽपेहि मनस्पाप किमशस्तानि शंससि ।
परेहि न त्वा कामये वृक्षां वनानि सं चर गृहेषु गोषु मे मनः ।।१।।
अवशसा निःशसा यत् पराशसोपारिस जाग्रतो यत् सवपन्तः ।
अग्निर्विश्वान्यप दुष्कतान्यजुष्टान्यारे अस्मद् दधातु ।।2।।
यदिन्द्र ब्रह्मणस्पतेऽपि मृषा चरामसि ।
प्रचेता न आंरिसो दुरितात् पात्वंहसः ।।३।।

अ. ६.४६.१–३

यो न जीवोऽसि न मृतो देवानाममृतगर्भोऽसि स्वप्न ।
वरुण ानी ते माता यमः पिताररुर्नामासि ।।१।।
विद्यते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृतयुरसि ।
तं त्वा स्वप्न तथा सं विद्य स नः स्वप्न दुःष्वप्न्यात् पाहि ।।2।।
यथा कलां यथा शफं यथर्णं संनयन्ति ।
एवा दुःष्वप्न्यं सर्वं द्विषते सं नयामसि ।।३।।

2. यमः – अ. ७.2३.१; ७.१००.१; ७.१०१.१; १९.५.१–१०; १९.६.१–११; १९.७.१–१३; १९.८.१–३३; १९.५६.१–६; १९.५७.१–५

अ. ७.2३.१

दौःष्वप्न्यं दौर्जीवित्यं रक्षो अभ्वमराय्यः। दुर्णाम्नीः सर्वा दुर्वाचस्ता अस्मन्नाशयामसि ।।१।।

अ. ७.१००.१

पर्यावर्ते दुःष्वप्न्यात् पापात् स्वप्न्यादभृत्याः। ब्रह्माहमन्तरं कृण्वे परा स्वप्नमुखाः शुचः ।।१।।

अ. ७.१०१.१

यत् स्वप्ने अन्नमश्नामि न प्रातरधिगम्यते। सर्वं तदस्तु मे शिवं नहि तद् दृश्यते दिवा ।।१।।

अ. १९.५.१–१०

विद्म ते स्वप्न जनित्रं ग्राह्याः पुत्रोऽसि यमस्य करणः ।।१।।

अन्तोऽसि मृत्युरसि ।।2।।
तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्नयात् पाहि ।।३।।
विद्म ते स्वप्न जनित्रं निर्ऋत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि। तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ।।४।।
विद्म तं स्वप्न जनित्रमभूत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि। तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ।।५।।
विद्म ते स्वप्न जनित्रं निर्भूतयाः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि। तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ।।६।।
विद्म ते स्वप्न जनित्रं पराभूत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि। तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ।।७।।
विद्म ते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः ।।८।।
अन्तकोऽसि मृत्युरसि ।।६।।
तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ।।१०।।

अ. १६.६.१–११

अजैष्माद्यासनामाद्या भूमानागसो वयम् ।।१।।
उषो यस्माद् दुःष्वप्न्यादभैष्माप तदुच्छतु ।।2।।
द्विषते तत् परा वह शपते तत् परा वह ।।३।।
यं द्विष्मो यश्च नो द्वेष्टि तस्मा एनद् गमयामः ।।४।।
उषा देवी वाचा संविदाना वाग् देव्यु१षसा संविदाना ।।५।।
उषस्पतिर्वाचस्पतिना संविदानो वाचस्पतिरुषस्पतिना संविदानः ।।६।।
तेऽमुष्मै परा वहन्त्वरायान् दुर्णाम्नः सदान्वाः ।।७।।
कुम्भीका दूषीकाः पीयकान् ।।८।।
जाग्रद्दुः ष्वप्न्यं स्वप्नेदुः ष्वप्न्यम् ।।६।।
अनागमिष्यतो वरानवित्तेः संकल्पानमुच्या द्रुहः पाशान् ।।१०।।
तदमुष्मा अग्ने देवाः परा वहन्तु वध्रिर्यथासद् विथुरो न साधुः ।।११।।

अ. १६.७.१–१३

तेनैनं विध्याम्यभूतयैनं विध्यामि निर्भूतयैनं विध्यामि पराभूत्यैनं विध्यामि ग्राह्यैनं विध्यामि तमसैनं विध्यामि ।।१।।
देवानामेनं घोरैः क्रूरैः प्रैषेरभिप्रेष्यामि ।।2।।
वैश्वानरस्यैनं दंष्ट्रयोरपि दधामि ।।३।।
एवानेवाव सा गरत् ।।४।।
यो३स्मान् द्वेष्टि तमात्मा द्वेष्टु यं वयं द्विष्मः स आत्मानं द्वेष्टु ।।५।।
निर्द्विषन्तं दिवो निः पृथिव्या निरन्तरिक्षाद् भजाम ।।६।।
सुयामंश्चाक्षुष ।।७।।
इदमहमामुष्यायणे३मुष्याः पुत्रे दुःष्वप्न्यं मृजे ।।८।।
यददोअदो अभ्यगच्छन् यद् दोषा यत् पूर्वां रात्रिम् ।।६।।
यज्जाग्रद् यत् सुप्तो यद् दिवा यन्नक्तम् ।।१०।।
यदहरहरभिगच्छामि तस्मादेनमव दये ।।११।।
तं जहि तेन मन्दस्व तस्य पृष्टीरपि शृणीहि ।।१2।।
स मा जीवीत् तं प्राणो जहातु ।।१३।।

अ. १६.८.१–३३

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।।१।।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।।2।।

स ग्राह्याः पाशान्मा मोचि ।।३।।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।४।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स निर्ऋत्याः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।५।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽसमाकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
सोऽभूत्याः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।६।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्राह्मास्माकं स्वरस्माकं यज्ञोऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स निर्भूत्याः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।७।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्र□ह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स पराभूत्याः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।८।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स देवजामीनां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।९।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स बृहस्पतेः पाशान्मा मोचि।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१०।।
तिजमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स प्रजापतेः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।११।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञो३ऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स ऋषीणां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१२।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।

तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स आर्षेयाणां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१३।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
सोऽगिरसां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१४।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स अंगिरसानां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१५।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
सोऽथर्वणां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१६।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स आर्थर्वणानां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१७।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स वनस्पतीनां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१८।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स वानस्पत्यानां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।१९।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स ऋतूनां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।20।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स आर्तवानां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।21।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं

पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स मासानां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।22।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं
पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
सोऽर्धमासानां पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।2३।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं
पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
सोहोरात्रयोः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।2४।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं
पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
सोऽह्नोः संयतोः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।2५।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं
पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स द्यावापृथिव्योः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।2६।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं
पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स इन्द्राग्न्योः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।2७।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं
पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स मित्रावरुणयोः पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।2८।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं
पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।
स राज्ञो वरुणस्य पाशान्मा मोचि ।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।2६।।
जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽ३स्माकं
पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।।३०।।
तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः ।।३१।।
स मृत्योः पड्वीशात् पाशान्मा मोचि ।।३2।।
तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।।३३।।

अ. १९.५६.१–६

यमस्य लोकादध्या बभूविथ प्रमदा मर्त्यान् प्र युनक्षि धीरः ।
एकाकिना सरथं यासि विद्वान्त्स्वप्नं मिमानो असुरस्य योनौ ।।१।।
बन्धस्त्वाग्रे विश्वचया अपश्यत् पुरा रात्र्या जनितोरेके अह्नि ।
ततः स्वप्नेदमध्या बभूविथ भिषग्भ्यो रूपमपगूहमानः ।।2।।
बृहद्गावासुरेभ्योऽधिं देवानुपावर्तत महिमानमिच्छन् ।
तस्मै स्वप्नाय दधुराधिपतयं त्रयस्त्रिंशासः स्वरानशानाः ।।३।।
नैतां विदुः पितरो नोत देवा येषां जल्पिश्चरत्यन्तरेदम् ।
त्रिते स्वप्नमदधुराप्त्ये नर आदित्यासो वरुणेनानुशिष्टाः ।।४।।
यस्य क्रूरमभजन्त दुष्कृतोऽस्वप्नेन सुकृतः पुण्यमायुः ।
स्वर्मदसि परमेण बन्धुना तप्यमानस्य मनसोऽधि जज्ञिषे ।।५।।
विद्म ते सर्वाः परिजाः पुरस्ताद् विद्म स्वप्न यो अधिपा इहा ते ।
यशस्विनो नो यशसेह पाह्यराद् द्विषेभिरप याहि दूरम् ।।६।।

अ. १९.५७.१–५

यथा कलां यथा शफं यथर्णं संनयन्ति ।
एवा दुःष्वप्न्यं सर्वमाप्रिये सं नयामसि ।।१।।
सं राजानो अगुः समृणान्यगुः सं कुष्ठा अगुः सं कला अगुः ।
समस्मासु यद् दुःष्वप्न्यं निर्द्विषते दुःष्वप्न्यं सुवाम ।।2।।
देवानां पत्नीनां गर्भ यमस्य कर यो भद्रः स्वप्न ।
स मम यः पापस्तद् द्विषते प्र हिण्मः। मा तृष्टानामसि कृष्णशकुनेर्मुखम् ।।३।।
तं त्वा स्वप्न तथा सं विद्म स त्वं स्वप्नाश्वइव कायमश्वइव नीनाहम् ।
अनास्माकं देवपीयुं पियारुं वप यदस्मासु दुष्वप्न्यं यद् गोषु यच्च नो गृहे ।।४।।
अनास्माकस्तद् देवपीयुः पियारुर्निष्कमिव प्रति मुंचताम् ।
नवारत्नीनपमया अस्माकं ततः परि। दुःष्वप्न्यं सर्वं द्विषते निर्दयामसि ।।५।।

४००. दुःस्वप्नघ्नम्

१. प्रचेताः – ऋ. १०.१६४.१–५; अ. 20.९६.२४

ऋ. १०.१६४.१–५

अपेहि मनसस्पतेऽप क्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ।।१।।
भद्रं वै वरं वृणते भद्रं युंजन्ति दक्षिणम्। भद्रं वैवस्वते चक्षुर्बहुत्रा जीवतो मनः ।।2।।
यदाशसा निः शसाभिशमोपारिम जाग्रतो यत्स्वपन्तः ।
अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु ।।३।।
यदिन्द्र ब्रह्मणस्पतेऽभिद्रोहं चरामसि। प्रचेता न आंगिरसो द्विषतां पात्वंहसः ।।४।।
अजैष्माद्यासनाम चाभूनागसो वयम् ।
जाग्रत्स्वप्नः सङ्कल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु ।।५।।

अ. 20.९६.२४

अपेहि मनसस्पते पक्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ।।२४।।

४०१. दुन्दुभिः

१. अथर्वा – अ. ६.१२६.१–३

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते वन्वतां विषिठतं जगत्।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद् दवीयो अप सेध शत्रून् ।।१।।
आ क्रन्दय बलभोजो न आ धा अभि ष्टन दुरिता बाधमानः ।
अप सेध दुन्दुभे दुच्छुनामित इन्द्रस्य मुष्टिरसि वीडयस्व ।।2।।

प्रामूं जयाभी३मे जयन्तु केतुमद् दुन्दुभिर्वावदीतु ।
समश्वपर्णाः पतन्तु नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ।।३।।

2. **गर्गः – ऋ. ६.४७.2६–३०**

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ।।2६।।
आ क्रन्दय बलमोजो न आ धा निः ष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीळयस्व ।।३०।।

४०2. दुन्दुभिः इन्द्रश्च

१. **गर्गः – ऋ. ६.४७.३१**

आमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर्वावदीति ।
सम□पर्णश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ।।३१।।

४०३. दूर्वा, शालाः

१. **प्रमोचनः – अ. ६.१०६.१–३**

आयने ते परायणे दूर्वा रोहतु पुष्पिणी। उत्सो वा तत्र जायंता ह्रदो वा पुण्डरीकवान् ।।१।।
अपामिदं न्ययनं समुद्रस्य निवेशनम्। मध्ये ह्रदस्य नो गृहाः पराचीना मुखा कृधि ।।2।।
हिमस्य त्वा जरायुणा शाले परिव्ययामसि। शतीह्रदाहिनो भुवोग्निष्कृणोतु भेषजम् ।।३।।

४०४. देवता?

१. **ऋषि ? – सा. १७०८–१७१०**

सा. १७०८–१७१०

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे ।।१।।
य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिरन्। ऋतूनुत्सृजते वशी ।।2।।
अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य। सम्राडेको विराजति ।।३।।

2. **ऋषि ? – अ. 20.४८.१–३; 20.१2७.१–१४; 20.१2८.१–१६; 20.१2९.१–20; 20.१३०.१–20; 20.१३१.१–20; 20.१३2.१–१६; 20.१३४.१–६; 20.१३५.१–१३; 20.१३६.१–१६**

अ. 20.४८.१–३

अभि त्वा वर्चसा गिरः सिंचन्तीराचरण्यवः। अभि वत्सं न धेनवः।।१।।
ता अर्षन्ति शुभ्रियः पृंचन्तीर्वर्चसा प्रियः। जातं जात्रीर्यथा हृदा ।।2।।
वज्रापवसाध्यः कीर्तिर्म्रियमाणमावहन्। मह्यमायुर्घृतं पयः ।।३।।

अ. 20.१2७.१–१४

इदं जना उप श्रुत नराशंस स्तविष्यते ।
षष्टिं सहस्रा नवतिं च कौरम आ रुशमेषु दद्महे ।।१।।
उष्ट्रा यस्य प्रवाहणो वधूमन्तो द्विर्दश ।
वर्ष्मा रथस्य नि जिहीडते दिव ईषमाणा उपस्पृशः ।।2।।
एष इषाय मामहे शतं निष्कान् दश स्रजः ।
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् ।।३।।
वच्यस्व रेभ वच्यस्व वृक्षे न पक्वे शकुनः ।
नष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव ।।४।।
प्र रेभासो मनीषा वृषा गावइवेरते ।
अमोतपुत्रका एषाममोत गाइवासते ।।५।।
प्र रेभ धीं भरस्व गोविदं वसुविदम् ।
देवत्रेमां वाचं श्रीणीहीषुर्नावीरस्तारम् ।।६।।
राज्ञो विश्वजनीनस्य यो देवोऽमर्त्यां अति ।

वैश्वानरस्य सुष्टुतिमा सुनोता परिक्षितः ।।७।।
परिच्छिन्नः क्षेममकरोत् तम आसनमाचरन् ।
कुलायन् कृण्वन् कौरव्यः पतिर्वदति जायया ।।८।।
कतरत् त आ हराणि दधि मन्थां परि श्रुतम् ।
जायाः पतिं वि पृच्छति राष्ट्रे राज्ञः परिक्षितः ।।६।।
अभीवस्वः प्र जिहीते यवः पक्वःपरो बिलम् ।
जनः स भद्रमेधते राष्ट्रे राज्ञः परिक्षितः ।।१०।।
इन्द्रः कारुमबूबुधदुत्तिष्ठ वि चरा जनम् ।
ममेदुग्रस्य चर्कृधि सर्व इत् ते पृणादरिः ।।११।।
इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणेऽपि पूषा नि षीदति ।।१2।।
नेमा इन्द्र गावो रिषन् मो आसां गोपती रिषत्
मासाममित्रयुर्जन इन्द्र मा स्तेन ईशत ।।१३।।
उप नो रमसि सूक्तेन वचसा वयं भद्रेण वचसा वयम् ।
वनादधिध्वनो गिरो न रिष्येम कदा चन ।।१४।।

अ. 2०.१2८.१–१६

यः सभेयो विदथ्यः सुत्वा यज्वाथ पूरुषः ।
सूर्यं चामू रिशादसस्तद् देवाः प्रागकल्पयन् ।।१।।
यो जाम्या अप्रथयस्तद् यत् सखायं दुधूर्षति ।
ज्येष्ठो यदप्रचेतास्तदाहुरधरागिति ।।2।।
यद् भद्रस्य पुरुषस्य पुत्रो भवति दाधृषिः ।
तद् विप्रो अब्रवीदु तद् गन्धर्वः काम्यं वचः ।।३।।
यश्च पणि रघुजिष्ठ्यो यश्च देवाँ अदाशुरिः ।
धीराणां शश्वतामहं तदपागिति शुश्रुम ।।४।।
ये च देवा अयजन्ताथो ये च परादिदः ।
सूर्यो दिवमिव गत्वाय मघवा नो वि रप्शते ।।५।।
योऽनाक्ताक्षो अनभ्यक्तो अमणिवो अहिरण्यवः ।
अब्रह्मा ब्रह्मणः पुत्रस्तोता कल्पेषु संमिता ।।६।।
य आक्ताक्षः सुभ्यक्तः सुमणिः सुहिरण्यवः ।
सुब्रह्मा ब्रह्मणः पुत्रस्तोता कल्पेषु संमिता ।।७।।
अप्रपाणा च वेशन्ता रेवाँ अप्रतिदिश्ययः ।
अयभ्या कन्या कल्याणी तोता कल्पेषु संमिता ।।८।।
सुप्रपाणा च वेशन्ता रेवान्सुप्रतिदिश्ययः ।
सुयभ्या कन्या कल्याणी तोता कल्पेषु संमिता ।।६।।
परिवृक्ता च महिषी स्वस्त्या च युधिंगमः ।
अनाशुरश्चायामी तोता कल्पेषु संमिताः ।।१०।।
वावाता च महिषी स्वस्त्या च युधिंगमः ।
श्वाशुरश्चायामी तोता कल्पेषु संमिता ।।११।।
यदिन्द्रादो दाशराज्ञे मानुषं वि गाहथाः ।
विरूपः सर्वस्मा आसीत् सह यक्षाय कल्पते ।।१2।।
त्वं वृषाक्षुं मघवन्नम्रं मर्याकरो रविः
त्वं रौहिणं व्यास्यो वि वृत्रस्याभिनच्छिरः ।।१३।।
यः पर्वतान् व्यदधाद् यो अपो व्यगाहथाः ।
इन्द्रो यो वृत्रहान्महं तस्मादिन्द्र नमोऽस्तु ते ।।१४।।

पृष्ठं धावन्तं हर्योरौच्चैःश्रवसमब्रुवन् ।
स्वस्त्यश्व जैत्रायेन्द्रमा वह सुस्रजम् ।।१५।।
ये त्वा श्ववेता अजैश्रवसो हार्यो युंजन्ति दक्षिणम् ।
पूर्वा नमस्य देवानां बिभ्रदिन्द्र महीयते ।।१६।।

अ. 20.१२९.१–20

एता अश्वा आ प्लवन्ते ।।१।।
प्रतीपं प्राति सुत्वनम् ।।2।।
तासामेका हरिक्निका ।।३।।
हरिक्निके किमिच्छसि ।।४।।
साधुं पुत्रं हिरण्ययम् ।।५।।
क्वाहतं परास्यः ।।६।।
यत्रामूस्तिस्रः शिंशपाः ।।७।।
परि त्रयः ।।८।।
पृदाकवः ।।९।।
शृंग धमन्त आसते ।।१०।।
अयन्महा ते अर्वाहः ।।११।।
स इच्छकं सघाघते ।।१2।।
सघाघते गोमीद्या गोगतीरिति ।।१३।।
पुमां कुस्ते निमिच्छसि ।।१४।।
पल्प बद्ध वयो इति ।।१५।।
बद्ध वो अघा इति ।।१६।।
अजागार केविका ।।१७।।
अश्वस्य वारो गोशपद्यके ।।१८।।
श्येनीपती सा ।।१९।।
अनामयोपजिह्विका ।।20।।

अ. 20.१३०.१–20

को अर्य बहुलिमा इषूनि ।।१।।
को असिद्याः पयः ।।2।।
को अर्जुन्याः पयः ।।३।।
कः कार्ष्ण्याः पयः ।।४।।
एतं पृच्छ कुहं पृच्छ ।।५।।
कुहाकं पक्वकं पृच्छ ।।६।।
यवानो यतिस्वभिः कुभिः ।।७।।
अकुप्यन्तः कुपायकुः ।।८।।
आमणको मणत्सकः ।।९।।
देव त्वप्रतिसूर्य ।।१०।।
एनश्चिपङ्क्तिका हविः ।।११।।
प्रदुद्रुदो मघाप्रति ।।१2।।
शृंग उत्पन्नः ।।१३।।
मा त्वाभि सखा नो विदन् ।।१४।।
वशायाः पुत्रमा यन्ति ।।१५।।
इरावेदुमयं दत ।।१६।।
अथो इयन्नियन्निति ।।१७।।
अथो इयन्निति ।।१८।।

अथो श्वा अस्थिरो भवन् ।।१९।।
उयं यकांशलोकका ।।20।।
अ. 20.१३१.१–20
आमिनोनिति भद्यते ।।१।।
तस्य अनु निभंजनम् ।।2।।
वरुणो याति वस्वभिः ।।३।।
शतं वा भारती शवः ।।४।।
शतमाश्वा हिरण्ययाः ।
शतं रथ्या हिरण्ययाः ।
शतं कुथा हिरण्ययाः ।
शतं निष्का हिरण्ययाः ।।५।।
अहल कुश वर्त्तक ।।६।।
शफेनइव ओहते ।।७।।
आय वनेनती जनी ।।८।।
वनिष्ठा नाव गृह्यन्ति ।।९।।
इदं मह्यं मदूरिति ।।१०।।
ते वृक्षाः सह तिष्ठति ।।११।।
पाक बलिः ।।१2।।
शक बलिः ।।१३।।
अश्वत्थ खदिरो धवः ।।१४।।
अरदुपरम ।।१५।।
शयो हतइव ।।१६।।
व्याप पूरुषः ।।१७।।
अदूहमित्यां पूषकम् ।।१८।।
अत्यर्धर्च परस्वतः ।।१९।।
दौव हस्तिनो दृती ।।20।।
अ. 20.१३2.१–१६
आदलाबुकमेककम् ।।१।।
अलाबुकं निखातकम् ।।2।।
कर्करिको निखातकः ।।३।।
तद् वात उन्मथायति ।।४।।
कुलायं कृणवादिति ।।५।।
उग्रं वनिषदाततम् ।।६।।
न वनिषदनाततम् ।।७।।
क एषां कर्करी लिखत् ।।८।।
क एषां दुन्दुभि हनत् ।।९।।
यदीयं हनत् कथं हनत् ।।१०।।
देवी हनत् कुहनत् ।।११।।
पर्यागारं पुनःपुनः ।।१2।।
त्रीण्युष्ट्रस्य नामानि ।।१३।।
हिरण्य इत्येके अब्रवीत् ।।१४।।
द्वौ वा ये शिशवः ।।१५।।
नीलशिखण्डवाहनः ।।१६।।
अ. 20.१३४.१–६

इहेत्थ प्रागपागुदगधराग्–अरालागुदभर्त्सथ ।।१।।
इहेत्थ प्रागपागुदगधराग्–वत्साः पुरुषन्त आसते ।।2।।
इहेत्थ प्रागपागुदगधराग्–स्थालीपको वि लीयते ।।३।।
इहेत्थ प्रागपागुदगधराग्–स वै पृथु लीयते ।।४।।
इहेत्थ प्रागपागुदगधराग्–आष्टे लाहणि लीशाथी ।।५।।
इहेत्थ प्रागपागुदगधराग्–अक्ष्लिली पुच्छिलीयते ।।६।।

अ. 20.१३५.१–१३

भुगित्यभिगतः शलित्यपक्रान्तः फलित्यभिष्ठितः। दुन्दुभिमाहननाभ्यां जरितरोऽथामो दैव ।।१।।
कोशबिले रजनि ग्रन्थेर्धानमुपानहि पादम्। उत्तमां जरिमां जन्यानुत्तमां जनीन् वर्त्मन्यात् ।।2।।
अलाबूनि पृषातकान्यश्वत्थपलाशम्। पिपीलिकावटश्वसो विद्युत्स्वापर्णशफो गोशफो
जरितरोऽथामो दैव।।३।।
वी मे देवा अक्रंसताध्वर्यो क्षिप्रं प्रचर। सुसत्यमिद् गवामस्यसि प्रखुदसि ।।४।।
पत्नी यदृश्यते पत्नी यक्ष्यमाणा जरितारोऽथामो दैव। होता विष्टीमेन जरितरोऽथामो दैव ।।५।।
आदित्या ह जरितरंगिरोभ्यो दक्षिणामनयन्।
तां ह जरितः प्रत्यायंस्तामु ह जरितः प्रतयायन्।।६।।
तां ह जरितर्नः प्रतयगृभ्णांस्तामु ह जरितर्नः प्रत्यगृभ्णः ।
अहानेतरसं न वि चेतनानि यज्ञानेतरसं न पुरोगवामः ।।७।।
उत श्वेत आशुपत्वा उतो पद्याभिर्यविष्ठः। उतेमाशु मानं पिपर्ति ।।८।।
आदित्या रुद्रा वसवस्त्वेनु त इदं राधः प्रति गृभ्णीह्यंगिरः ।
इदं राधो विभु प्रभु इदं राधो बृहत् पृथु ।।६।।
देवा ददत्वासुरं तद् वो अस्तु सुचेतनम्। युष्माँ अस्तु दिवेदिवे प्रतयेव गृभायत ।।१०।।
त्वमिन्द्र शर्मरिणा हव्यं पारावतेभ्यः। विप्राय स्तुवते वसुवनि दुरश्रवसे वह ।।११।।
त्वमिन्द्र कपोताय च्छिन्नपक्षाय वंचते। श्यामाकं पक्वं पीलु च वारस्मा अकृणोर्बहुः ।।१2।।
अरंगरो वावदीति त्रेधा वरत्रया। इरामह प्रशंसत्यनिरामप सेधति ।।१३।।

अ. 20.१३६.१–१६

यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत्। मुष्काविदस्य एजतो गोशफे शकुलाविव ।।१।।
यदा स्थूलेन पससाणौ मुष्का उपावधीत्। विष्वंचा वस्या वर्धतः सिकतास्वेव गर्दभौ ।।2।।
यदल्पिकास्वल्पिका कर्कन्धूकेव पद्यते। वासन्तिकमिव तेजनं यन्त्यवाताय वित्पति ।।३।।
यद् देवासो ललामगुं प्रविष्टीमिनमाविषुः। सकुला देदिश्यते नारी सत्यस्याक्षिभुवो यथा ।।४।।
महानग्न्यतृप्नद्वि मोक्रददस्थानासरन्। शक्तिकानना स्वचमशकं सक्तु पद्यम ।।५।।
महानग्न्युलखूलमातिक्रामन्त्यब्रवीत्। यथा तव वनस्पते निरघ्नन्ति तथैवेति ।।६।।
महानग्न्युप ब्रूते भ्रष्टोऽथाप्यभूभुवः। यथैव ते वनस्पते पिप्पति तथैवेति ।।७।।
महानग्न्युप ब्रूते भ्रष्टोऽथाप्यभूभुवः। यथा वयो विदाह्य स्वर्गे नमवदह्यते ।।८।।
महानग्न्युप ब्रूते स्वसावेशितं पसः। इत्थं फलस्य वृक्षस्य शूर्पे शूर्पं भजेमहि ।।६।।
महानग्नी कृकवाकं शम्यया परि धावति। अयं न विद्म यो मृगः शीर्ष्णा हरति धणिकाम् ।।१०।।
महानग्नी महानग्नं धावन्तमनु धावति। इमास्तदस्य गा रक्ष यभ मामद्ध्यौदनम् ।।११।।
सुदेवस्त्वा महानग्नीर्बबाधते महतः साधु खोदनम्। कुसं पीबरो नवत् ।।१2।।
वशा दग्धामिमाङ्गुरिं प्रसृजतोऽग्रतं परे। महान् वै भद्रो यभ मामद्ध्यौदनम् ।।१३।।
विदेवस्त्वा महानग्नीर्विबाधते महतः साधु खोदनम् ।
कुमारिका पिंगलिका कार्द भस्मा कु धावति ।।१४।।
महान् वै भद्रो बिल्वो महान् भद्र अदुम्बरः। महाँ अभिक्त बाधते महतः साधु खोदनम् ।।१५।।
यः कुमारी पिंगलिका वसन्तं पीबरी लभेत्। तैलकुण्डमिमाङ्गुष्ठं रोदन्तं शुदमुद्धरेत्।।१६।।

३. गृत्समदः आंगिरसः शौनहोत्रो भार्गवः – ऋ. 2.१.१–१६

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।

त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ।।१।।
त्वाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ।।2।।
त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः ।
त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरन्ध्या ।।३।।
त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः ।
त्वमर्यमा सत्पतिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुः ।।४।।
त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यम् ।
त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः ।।५।।
त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे ।
त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ।।६।।
त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत् ।।७।।
त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृंजते ।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ।।८।।
त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम् ।
त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ।।६।।
त्वमग्ने ऋभुराके नमस्य१स्त्वं वाजस्य क्षुमतो राय ईशिषे ।
त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञामातानिः ।।१०।।
त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ।।११।।
त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ सन्दृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ।।१2।।
त्वामग्न आदित्यास आस्यं१ त्वां जिह्वां शुचयश्चक्रिरे कवे ।
त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् ।।१३।।
त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम् ।
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः ।।१४।।
त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ।।१५।।
ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्मांच तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ।।१६।।

४०५. देवपत्न्यः

१. अथर्वा – अ. ७.४६.१–2

देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छन्तु।।१।।
उत ग्ना वयन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ।।2।।

2. प्रतिक्षत्र आत्रेयः – ऋ. ५.४६.७–८

देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ।।७।।
उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनीराट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ।।८।।

४०६. देवभूमिः बृहस्पति–इन्द्र सोम

१. **गर्गः — ऋ. ६.४७.20**

अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत् ।
बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इन्द्र पन्थाम् ।।20।।

४०७. देवलः

१. **अग्निः — य. 2.१७**

यं परिधिं पर्यधत्थाऽअग्ने देवपणिभिर्गुह्यमानः ।
तं तऽएतमनु जोषं भराम्येष मेत्त्वदप चेतयाताऽअग्नेः प्रियं पाथोऽपीतम् ।।१७।।

2. **सोमः — य. ३३.६2**

उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ2ऽ इयक्षते ।।६2।।

४०८. देववातः

१. **अग्निः — य. ६.३७**

अग्ने सहस्व पृतनाऽअभिमातीरपास्य। दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसि ।।३७।।

2. **अग्न्यादयो मन्त्रोक्ताः — य. १०.2३**

अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा मरुतामोजसे
स्वाहेन्द्रस्येन्द्रियाय स्वाहा। पृथिवि मातर्मा मा हिंसीर्मोऽअहं त्वाम् ।।2३।।

३. **इन्द्रः — य. १०.22**

मा तऽइन्द्र ते वयं तुराषाडयुक्तासोऽअब्रह्मता विदसाम ।
तिष्ठा रथमधि यं वज्रहस्ता रश्मीन्देव यमसे स्वश्वान् ।।22।।

४. **क्षेत्रपतिः — य. १०.2६**

स्योनसि सुषदासि क्षत्रस्य योनिरसि ।
स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ।।2६।।

५. **प्रजापतिः — य. १०.2०**

प्रजापते न त्वेदतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्य पिताऽसावस्य पिता वयं स्याम पतयो रयीणां स्वाहा।
रुद्र यत्ते क्रिवि परं नाम तस्मिन् हुतमस्मेष्टमसि स्वाहा ।।2०।।

६. **रक्षोघ्नः — य. ६.३८–३६**

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
उपांशोर्वीर्य्येण जुहोमि हतं रक्षः स्वाहा रक्षसां त्वा वधायावधिष्म रक्षोऽवधिष्मामुमसौ हतः ।।३८।।
सविता त्वा सवानां सुवतामग्निर्गृहपतीनां सोमो वनस्पतीनाम् ।
बृहस्पतिर्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम्।।३६।।

७. **यजमानः — य. ६.४०; १०.१८; १६**

य. ६.४०

इमं देवाऽअसपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय।
इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा ।।४०।।

य. १०.१८–१६

इमं देवाऽअसपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय।
इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा ।।१८।।
प्र पर्वतस्य वृषभस्य पृष्ठान्नवश्चरन्ति स्वसिचऽइयानाः। ताऽआववृत्रन्नधरागुदक्ताऽअहिं
बुध्न्यमनु रीयमाणाः। विष्णो र्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ।।१६।।

४०६. देववात भरतौ

१. **अग्निः — य. ३.१४**

अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः। तं जानन्नग्नऽआरोहाथा नो वर्द्धया रयिम् ।।१४।।

४१०. देवाः

१. अग्निः सौचीकः – ऋ. १०.५१.2; १०.५१.४; ६; ८; १०.५३.४; ५

ऋ. १०.५१.2

को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत् ।
क्वाह मित्रावरुणा क्षियन्त्यग्नेर्विश्वाः समिधो देवयानीः ।।2।।

ऋ. १०.५१.४

होत्रादहं वरुण बिभ्यदायं नेदेव मा युनजन्नत्र देवाः ।
तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ।।४।।

ऋ. १०.५१.६

अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः ।
तस्माद्भिया वरुण दूरमायं गौरो न क्षेप्नोराविजे ज्यायाः ।।६।।

ऋ. १०.५१.८

प्रयाजान्मे अनुयाँजाश्च केवलानूर्जस्वन्तं हविषो दत्त भागम् ।
घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ।।८।।

ऋ. १०.५३.४–५

तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम ।
ऊर्जाद उत यज्ञियासः पंच जना मम होत्रं जुषध्वम् ।।४।।
पंच जना मम होत्रं जुषन्तां गोजाता उत ये यज्ञियासः ।
पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ।।५।।

2. अथर्वा – अ. 2.३४.2; ६.६७.१; ३

अ. 2.३४.2

प्रमुंचन्तो भुवनस्य रेतो गातुं धत्त यजमानाय देवाः ।
उपाकृतं शशमानं यदस्थात् प्रियं देवानामप्येतु पाथः।।2।।

अ. ६.६७.१

अभिभूर्यज्ञो अभिभूरग्निरभिभूः सोमो अभिभूरिन्द्रः ।
अभय१हं विश्वाः पृतना यथासान्येवा विधेमाग्निहोत्रा इदं हविः ।।१।।

अ. ६.६७.३

इमं वीरमनु हर्षध्वमुग्रमिन्द्रं सखायो अनु सं रभध्वम् ।
ग्रामजितं गोजितं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।।३।।

३. एवद्यूर् नौधसः – ऋ. ८.८०.१०

अवीवृधद्वो अमृता अमन्दीदेकद्यूर्देवा उत याश्च देवीः ।
तस्मा उ राधः कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात् ।।१०।।

४. देवापिर् आर्ष्टिषेणः – ऋ. १०.९८.१–१2

बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा ।
आदित्यैर्वा यद्वसुभिर्मरुत्वान्त्स पर्जन्यं शन्तनवे वृषाय ।।१।।
आ देवो दूतो अजिरश्चिकित्वान्त्वद्देवापे अभि मामगच्छत् ।
प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन् ।।2।।
अस्मे धेहि द्युमतीं वाचमासन् बृहस्पते अनमीवामिषिराम् ।
यया वृष्टिं शन्तनवे वनाव दिवो द्रप्सो मधुमाँ आ विवेश ।।३।।
आ नो द्रप्सा मधुमन्तो विशन्त्विन्द्र देह्यधिरथं सहस्रम् ।
नि षीद होत्रमृतुथा यजस्व देवान्देवापे हविषा सपर्य ।।४।।
आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान् ।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि ।।५।।

अस्मिन्त्समुद्रे अध्युत्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन् ।
ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु ।।६।।
यद्देवापिः शन्तनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् ।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ।।७।।
यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे ।
विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम् ।।८।।
त्वां पूर्व ऋषयो गीर्भिरायन्त्वामध्वरेषु पुरुहूत विश्वे ।
सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि ।।९।।
एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा ।
तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि ।।१०।।
एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इन्द्राय भागम् ।
विद्वान्पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि ।।११।।
अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध ।
अस्मात्समुद्राद् बृहतो दिवो नोऽपां भूमानमुप नः सृजेह ।।12।।

५. **प्रगाथः काण्वः – ऋ. ८.६३.12**

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ।।12।।

६. **बृहस्पतिर् वा लौक्य अदितिर् वा दाक्षायणी – ऋ. १०.७2.१–९**

देवानां नु वयं जाना प्र वोचाम विपन्यया। उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ।।१।।
ब्रह्मणस्पतिरेता सं कर्मारइवाधमत्। देवानां पूर्व्ये युगेऽसतः सदजायत ।।2।।
देवानां युगे प्रथमेऽसतः सदजायत। तदाशा अन्वजायन्त तदुत्तानपदस्परि ।।३।।
भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त। अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ।।४।।
अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव। तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ।।५।।
यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत। अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ।।६।।
यद्देवा यतयो यथा भुवनान्यपिन्वत। अत्रा समुद्र आ गूळहमा सूर्यमजभर्तन ।।७।।
अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि। देवाँ उप प्रैत्सप्ताभिः परा मार्ताण्डमास्यत् ।।८।।
सप्तभिः पुत्रैरदितिरुप प्रैत्पूर्व्यं युगम्। प्रजायै मृत्यवे त्वत्पुनर्माताण्डमाभरत् ।।९।।

७. **ब्रह्म – अ. १.१९.४**

यः सपत्नो योऽसपत्नो यश्च द्विषंछपाति नः। देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ।।४।।

८. **भरद्वाजः – अ. 2.१2.2**

इदं देवाः शृणुत ये यज्ञिया स्थ भरद्वाजो मह्यमुक्थानि शंसति ।
पाशे स बद्धो दुरिते नि युज्यतां यो अस्माकं मन इदं हिनस्ति ।।2।।

९. **वसिष्ठः – ऋ. ७.१०४.११**

परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीरधो अस्तु विश्वः ।
प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तम् ।।११।।

१०. **वृहद्दिवोऽथर्वा – अ. ५.३.३–४**

मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामायास्मै ।।३।।
मह्यं यजन्तां मम यानीष्टाकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवा अभि रक्षन्तु मेह ।।४।।

११. **सावित्री सूर्या – अ. १४.2.३६**

राया वयं सुमनसः स्यामोदितो गन्धर्वमावीवृताम ।
अगन्त्स देवः परमं सधस्थमगन्म यत्र प्रतिरन्त आयुः ।।३६।।

१2. सूर्या सावित्री – ऋ. १०.८५.१७

सूर्यायै देवेभ्यो मित्राय वरुणाय च। ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ।।१७।।

४११. देवाः (अग्निः)

१. अथर्वा (पण्यकामः) – अ. ३.१५.५

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तन्मे भूयो भवतु मा कनीयोऽग्ने सातघ्नो देवान् हविषा नि षेध ।।५।।

४१2. देवाः (इन्द्रः प्रजापतिः सविता सोमः अग्निः)

१. अथर्वा (पण्यकामः) – अ. ३.१५.६

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तस्मिन् म इन्द्रो रुचिमा दधातु प्रजापतिः सविता सोमो अग्निः ।।६।।

४१३. देवा ब्रह्म च

१. पायुर् भरद्वाजः – ऋ. ६.७५.१६

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति। देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ।।१६।।

४१४. देवीर् द्वारः

१. मेधातिथिः काण्वः – ऋ. १.१३.६

वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः। अद्या नूनं च यष्टवे ।।६।।

४१५. देव्यः

१. अग्निः – य. 2७.१६

द्वारो देवीरन्वस्य विश्वे व्रता ददन्तेऽअग्नेः। उरुव्यचसो धाम्ना पत्यमानाः।।१६।।

2. मेधातिथिः काण्वः – ऋ. १.22.११

अभि नो देवीरवसा महः शर्मणा नृपत्नीः। अच्छिन्नपत्राः सचन्ताम् ।।११।।

४१६. देव्यो द्वारः

१. दीर्घतमा औचथ्यः – ऋ. १.१४2.६

वि श्रयन्तामृतावृधः प्रयै देवेभ्यो महीः। पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ।।६।।

४१७. देव्यौ होतारौ

१. दीर्घतमा औचथ्यः – ऋ.१.१४2.४

ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम्। इयं हि त्वा मातिर्ममाच्छा सुजिह्व वच्यते ।।४।।

४१८. देव्यौ होतारौ प्रचेतसौ

१. मेधातिथिः काण्वः– ऋ. १.१३.८

ता सुजिह्वा उप ह्वये होतारा दैव्या कवी। यज्ञं नो यक्षतामिमम् ।।८।।

४१९. द्यावापृथिवी

१. अथर्वा – अ. ५.2४.३

द्यावापृथिवी दातॄणामधिपत्नीते मावताम् ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।३।।

2. आथर्वणः दध्यङ् – य. ३७.३

देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ।।३।।

३. गोतमः – य. १३.३2

मही द्यौः पृथिवी च नऽइमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ।।३2।।

४. **दध्यङ् आथर्वणः – य. ३७.३**

देवी द्यावापृथिवी मखस्व वामद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ।।३।।

५. **दीर्घतमा – य. ३८.१४**

इषे पिन्वस्वोर्जे पिन्वस्त्र ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ।
धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशं धारय ।।१४।।

६. **परमेष्ठी प्रजापतिः – य. 2.११**

उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात् स्वाहा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि ।।११।।

७. **ब्रह्म – अ. १.३2.१–४; 2.१६.2**

अ. १.३2.१–४

इदं जनासो विदथ महद् ब्रह्म वदिष्यति। न तत् पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः ।।१।।
अन्तरिक्षं आसां स्थाम श्रान्तसदामिव। आस्थानमस्य भूतस्य विदुष्टद् वेधसो न वा ।।2।।
यद् रोदसी रेजमाने भूमिश्च निरतक्षतम्। आर्द्रं तदद्य सर्वदा समुद्रस्येव स्रोत्याः ।।३।।
विश्वमन्यामभीवार तदन्यस्यामधि श्रितम्। दिवे च विश्ववेदसे पृथिव्यै चाकरं नमः ।।४।।

अ. 2.१६.2

द्यावापृथिवी उपश्रुत्या मा पातं स्वाहा ।।2।।

८. **भरद्वाजो बार्हस्पत्यः – सा. ३७८**

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ।।६।।

९. **मृगारः – अ. ४.2६.१–७**

मन्वे वां द्यावापृथिवी सुभोजसौ सजेतसौ ये अप्रथेथाममिता योजनानि ।
प्रतिष्ठे ह्यभवतं वसूनां ते नो मुंचतमंहसः ।।१।।
प्रतिष्ठे ह्यभवतं वसूनां प्रवृद्धे देवी सुभगे उरूची ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ।।2।।
असन्तापे सुतपसौ हुवेऽहमुर्वी गम्भीरे कविभिर्नमस्ये ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ।।३।।
ये अमृतं बिभृथो ये हवींषि ये स्रोत्या बिभृथो ये मनुष्यान् ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ।।४।।
ये उस्रिया बिभृथो ये वनस्पतीन् ययोर्वां विश्वा भुवनान्यन्तः ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ।।५।।
ये कीलालेन तर्पयथो ये घृतेन याभ्यामृते न किं चन शक्नुवन्ति ।
द्यावापृथिवी भवतं मे स्योने ते नो मुंचतमंहसः ।।६।।
यन्मेदमभिशोचति येनयेन वा कृतं पौरुषेयान्न दैवात् ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुंचतमंहसः ।।७।।

१०. **मेधातिथिः – य. ६.१६**

रक्षसां भागोऽसि निरस्तं रक्षऽ इदमहं रक्षोऽभितिष्ठामीदमहं रक्षोऽववबाधऽइदमहं रक्षोऽधमं तमो नयामि। घृतेन द्यावापृथिवी प्रार्णुवाथां वायो वे स्तोकानामग्निराज्यस्य वेतु स्वाहा स्वाहाकृतेऽऊर्ध्वनभसं मारुतं गच्छतम् ।।१६।।

११. **वामदेवो गौतमः – सा. ६22; १५६६–१५६८**

सा. ६22
मन्ये वां द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितमभि योजनम्।
द्यावापृथिवी भवतं स्योने ते नो मुंचतमं हसः ।।८।।
सा. १५६६–१५६८
प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये ।।१।।
पुनाने तन्वा मिथः स्वेन दक्षेण राजथः। ऊह्याथे सनादृतम् ।।2।।
मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। परि यज्ञं निषेदथुः ।।३।।

४2०. द्यावापृथिवी, मित्रः, बृह्मणस्पतिः, सविता च

१. भृग्वंगिरा – अ. ७.३०.१

स्वाक्तं मे द्यावापृथिवी स्वाक्त मित्रो अकरयम्। स्वाक्तं मे ब्रह्मणस्पतिः स्वाक्तं सविता करत् ।।१।।

४2१. द्यावापृथिवी मित्रावरुणौ च अग्निः

१. परमेष्ठी प्रजापतिः – य. 2.१६

वसुभ्यस्तवा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम्। व्यन्तु वयोक्तं रिहाणा मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह। चक्षुष्पा ऽ अग्नेऽसि चक्षुर्मे पाहि ।।१६।।

४22. द्यावापृथिवी सप्तसिन्धवः

१. गरुत्मान् – अ. ४.६.2

यावती द्यावापृथिवी वरिम्णा यावत् सप्त सिन्धवो वितिष्ठरे ।
वाचं विषस्य दूषणीं तामितो निरवादिषम् ।।2।।

४2३. द्यावापृथिव्यादयः

१. शम्भूः – अ. 2.2८.४–५

द्यौष्ट्वा पिता पृथिवी माता जरामृत्युं कृणुतां संविदाने ।
यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः ।।४।।
इममग्न आयुषे वर्चसे नय प्रियं रेतो वरुण मित्र राजन् ।
मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ।।५।।

४2४. द्यावापृथिव्यादयो मन्त्रोक्ता

१. प्रजापतिः – अ. ७.१०2.१

नमस्कृतय द्यावापृथिवीभ्यामन्तरिक्षाय मृत्यवे। मेक्षाम्यूर्ध्वस्तिष्ठन् मा मा हिंसिषुरीश्वराः ।।१।।

४2५. द्यावापृथिव्याविन्द्रश्च

१. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः – ऋ. १०.५६.१०[१]

समिन्द्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः ।
भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ।।१०।।

४2६. द्यावापृथिव्यौ

१. अगस्त्यो मैत्रावरुणिः – ऋ. १.१८५.१–११

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव।।१।।
भूरिं द्वे अचरन्ती चरन्तं पद्वन्तं गभमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ।।2।।
अनेहो दात्रामदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ।
तद्रोदसी जनयतं जरित्रो द्यावा रक्षतं पृथिवी नो अभ्वात् ।।३।।

अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे ।
उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ।।४।।
सङ्गच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे ।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ।।५।।
उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री ।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ।।६।।
उर्वी पृथ्वी बहुले दूरे अन्ते उप ब्रुवे नमसा यज्ञे अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ।।७।।
देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा ।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ।।८।।
उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम् ।
भूरिं चिदर्यः सुदास्तरायेषा मदन्त इष्येम देवाः ।।६।।
ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथमं सुमेधाः ।
पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिः।।१०।।
इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।
भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ।।११।।

2. **गृत्समदः शौनकः – ऋ. 2.३2.१**

अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः ।
ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वां महो दधे ।।१।।

३. **दीर्घतमा औचथ्यः – ऋ.१.१५६.१–५; १.१६०.१–५**

ऋ. १.१५६.१–५

प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ।
देवेभिर्ये देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ।।१।।
उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्धवीमभिः ।
सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः ।।2।।
ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये ।
स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ।।३।।
ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ।
नव्यंनव्यं तन्तुमा तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः ।।४।।
तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम् ।।५।।

ऋ. १.१६०.१–५

ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी ।
सुजन्मनी धिषणे अन्तरीयते देवी देवी धर्मणा सूर्यः शुचिः ।।१।।
उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः ।
सुधृष्टमे वपुष्ये३ न रोदसी पिता यत्सीमभि रूपैरवासयत् ।।2।।
स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया ।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ।।३।।
अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशंभुवा ।
वि यो ममे रजसी सुक्रतूययाजरेभिः स्कम्भनेभि समानृचे ।।४।।
ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ।
येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम् ।।५।।

४. **बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः – ऋ. १०.५६.६; १०2**

अव द्वके अव त्रिका दिवश्चरन्ति भेष्जा ।
क्षमा चरिष्ण्वेककं भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ।।९।।
समिन्द्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः ।
भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ।।१०।।

५. भरद्वाजः – य. ३४.४५

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभितेऽअजरे भूरिरेतसा ।।४५।।

६. भरद्वाजो बार्हस्पत्यः – ऋ. ६.७०.१–६

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुधे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरि रेतसा ।।१।।
असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते ।
राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिंचतं यन्मनुर्हितम् ।।2।।
यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति ।
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता ।।३।।
घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा ।
उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद्विप्रा ईळते सुम्नमिष्टये ।।४।।
मधु नो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ।
दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यम् ।।५।।
ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ।
संरराणे रोदसी विश्वशम्भुवा सनिं वाजं रयिमस्मे समिन्वताम् ।।६।।

७. मधुच्छन्दाः – य. ६.३५

मा भेर्मा संविक्थाऽऊर्जं धत्स्व धिष्णे वीड्वी सती वीडयेथामूर्जं दधाथाम्। पाप्मा हतो न सोमः ।।३५।।

८. मेधातिथिः काण्वः – ऋ. १.22.१३–१४

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ।।१३।।
तयोरिद् घृतवत्पयो विप्रा रिहन्ति धीतिभिः। गन्धर्वस्य ध्रुवे पदे ।।१४।।

९. वसिष्ठः – ऋ. ७.५३.१–३

प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईळे बृहती यजत्रे ।
ते चिद्धि पूर्वे कवयो गृणन्तः पुरो मही दधिरे देवपुत्रे ।।१।।
प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कुणुध्वं सदने ऋतस्य ।
आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथम् ।।2।।
उतो हि वां रत्नधेयानि सन्ति पुरूणि द्यावापृथिवी सुदासे ।
अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः ।।३।।

१०. वामदेवो गौतमः – ऋ. ४.३८.१; ४.५६.१–७

ऋ. ४.३८.१

उतो हि वां दात्रा सन्ति पूर्वा या पुरुभ्यस्त्रसदस्युर्नितोशे ।
क्षेत्रासां ददथुरुर्वरासां घनं दस्युभ्यो अभिभूतिमुग्रम् ।।१।।

ऋ. ४.५६.१–७

मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिरर्कैः ।
यत्सीं वरिष्ठे बृहती विमिन्वन् रुवद्धोक्षा पप्रथानेभिरेवैः ।।१।।
देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे ।
ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः ।।2।।
स इत्स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान ।

उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या समैरत् ।।३।।
नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरिषयन्ती सजोषाः ।
उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः ।।४।।
प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये ।।५।।
पुनाने तन्वा मिथः स्वेन दक्षेण राजथः। ऊह्याथे सनादृतम् ।।६।।
मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। परि यज्ञं नि षेदथुः ।।७।।

४२७. द्यावापृथिव्यौ (प्रथमपादस्य) अग्निः (द्वितीयस्य)

१. कुत्स आंगिरसः – ऋ. १.११2.१

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं धर्मं सुरुचं यामन्निष्टये ।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिराश्विना गतम् ।।१।।

४२८. द्यावापृथिव्यौ, विश्वेदेवाः

१. वामदेवः – अ. ३.६.१–६

कर्शफस्य विशफस्य द्यौः पिता पृथिवी माता ।
यथाभिचक्र देवास्तथाप कृणुता पुनः ।।१।।
अश्रेष्माणो अधारयन् तथा तन्मनुना कृतम् ।
कृणोमि वध्रि विष्कन्धं मुष्काबर्हो गवामिव ।।2।।
पिशंगे सूत्रे खृगलं तदा बध्नन्ति वेधसः ।
श्रवस्युं शुष्मं काबवं वध्रिं कृण्वन्तु बन्धुरः ।।३।।
येना श्रवस्यवश्चरथ देवा इवासुरमायया ।
शुनां कपिरिव दूषणो बन्धुरा काबवस्य च ।।४।।
दुष्ट्यै हि त्वा भतस्यामि दूषयिष्यामि काबवम् ।
उदाशवो रथा इव शपथेभिः सरिष्यथ ।।५।।
एकशतं विष्कन्धानि विष्ठिता पृथिवीमनु ।
तेषां त्वामग्र उज्जहरुर्मणिं विष्कन्धदूषणम् ।।६।।

४२९. द्यावापृथिव्यौ विश्वेदेवाः मरुतः आपः

१. अथर्वा – अ. 2.2९.४–५

इन्द्रेण दत्तो वरुणेन शिष्टो मरुद्भिरुग्रः प्रहितो न आगन् ।
एष वां द्यावापृथिवी उपस्थे मा क्षुधन्मा तृषत् ।।४।।
ऊर्जमस्मा ऊर्जस्वती धत्तं पयो अस्मै पयस्वती धत्तम् ।
ऊर्जस्मै द्यावापृथिवी अधातां विश्वे देवा मरुत ऊर्जमापः ।।५।।

४३०. द्यावापृथिव्यौ हविर्धाने वा

१. गृत्समदः शौनकः – ऋ. 2.४१.१९–2१

प्रेतां यज्ञस्य शंभुवा युवामिदा वृणीमहे। अग्निं च हव्यवाहनम् ।।१९।।
द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम्। यज्ञं देवेषु यच्छताम् ।।2०।।
आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः। इहाद्य सोमपीतये ।।2१।।

४३१. द्यौ

१. अथर्वा – अ. ३.2.५

अमीषां चित्तानि प्रतिमोहयन्ती ग्रहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैर्ग्राह्यामित्रांस्तमसा विध्य शत्रून् ।।५।।

४३२. द्यौरित्यादयः

१. **प्रजापतिः – य. 2५.2३**

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा ऽ अदितिः पंच जना ऽ अदितिर्जातमदितिर्जनित्वम् ।।2३।।

४३३. द्रविणोदा

१. **गृत्समदः – अ. 2०.६७.७**

यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात् सोमं द्रविणोदः पिब ऋतुभिः ।।७।।

2. **गृत्समदः शौनकः – ऋ. 2.३७.१–४**

मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् ।
तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ।।१।।
यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ।।2।।
मेद्यनतु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ।।३।।
अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम् ।
तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ।।४।।

३. **मयोभूः – य. ११.2१; 22**

उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् ।
वयं स्याम सुमतौ पृथिव्याऽअग्निं खनन्तऽउपस्थेऽअस्याः ।।2१।।
उदक्रमीद् द्रविणोदा वाज्यर्वाकः सुलोकं सुकृतं पृथिव्याम् ।
ततः खनेम सुप्रतीकमग्निं स्वो रुहाणाऽअधि नाकमुत्तमम् ।।22।।

४. **मेधातिथिः काण्वः – ऋ. १.१५.७–१०**

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते ।।७।।
द्रविणोदा ददातु नो वसूनि यानि शृण्विरे। देवेषु ता वनामहे ।।८।।
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत ।।६।।
यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे। अध ष्मा नो ददिर्भव ।।१०।।

५. **ऋषि–? अ. 2०.2.४**

देवोद्रविणोदाः पोत्रात् सुष्टुभः स्वर्कादृतुना सोमं पिबतु ।।४।।

४३४. द्रविणोदा अगिनः शुद्धोग्निर् वा

१. **कुत्स आंगिरसः – ऋ. १.६६.१–६**

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।
आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदाम् ।।१।।
स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम् ।
विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम् ।।2।।
तमीळत प्रथमं यज्ञसाधं विश आरीराहुतमृंजसानम् ।
ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन्द्रविणोदाम् ।।३।।
स मातरिश्वा पुरुवारपुष्टिर्विदद्गातुं तनयाय स्वर्वित् ।
विशां गोपा जनिता रोदस्योर्देवा अग्निं धारयन्द्रविणोदाम् ।।४।।
नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची ।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाम् ।।५।।
रायो बुध्नः संगमनो वसूनां यज्ञस्यकेतुर्मन्मसाधनो वेः ।
अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदाम् ।।६।।

नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षाम् ।
सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणोदाम् ।।७।।
द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यंसत् ।
द्रविणोदा वीवतीमिषं नो द्रविणोदा रासते दीर्घमायुः ।।८।।
एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रे वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।६।।

४३५. द्रविणोदादयः

१. वृहद्दिवोऽथर्वा – अ. ५.३.५

मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः ।
दैवा होतारः सनिषन् न एतदरिष्टाः स्याम तन्वा सुवीराः ।।५।।

४३६. द्रुघण इन्द्रो वा

१. मुद्गलो भार्म्यश्वः – ऋ. १०.१०2.१–१2

प्र ते रथं मिथूकृतमिन्द्रोऽवतु धृष्णुया ।
अस्मिन्नाजौ पुरुहूत श्रवाय्ये धनुभक्षेषु नोऽव ।।१।।
उत्स्म वातो वहति वासो अस्या अधिरथं यदजयत्सहस्रम् ।
रथीरभून्मुद्गलानी गविष्टौ भरे कृतं व्यचेदिन्द्रसेना ।।2।।
अन्तर्यच्छ जिघांसतो वज्रमिन्द्राभिदासतः ।
दासस्य वा मघवन्नार्यस्य वा सनुतर्यवया वधम् ।।३।।
उद्नो ह्रदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति ।
प्र मुष्कभारः श्रव इच्छमानोऽजिरं बाहू अभरत्सिषासन् ।।४।।
न्यक्रन्दयन्नुपयन्त एनममेहयन्वृषभं मध्य आजेः ।
तेनं सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ।।५।।
कर्कदवे वृषभो युक्त आसीदवावचीत्सारथिरस्य केशी ।
दुधेर्युक्तस्य द्रवतः सहानस ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् ।।६।।
उत प्रधिमदुहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन् ।
इन्द्र उदावत्पतिमघ्न्यानामरंहत पद्याभिः ककुद्मान् ।।७।।
शुनमष्ट्राव्यचरत्कपर्दी वरत्रायां दार्वानह्यमानः ।
नृम्णानि कृण्वन्बहवे जनाय गाः पस्पशानस्तविषीरधत्त ।।८।।
इमं तं पश्य वृषभस्य युंजं काष्ठाया मध्ये द्रुघणं शयानम् ।
येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु ।।६।।
आरे अघा को न्वि१ त्था ददर्श यं युज्जन्ति तम्वा स्थापयन्ति ।
नास्मै तृणं नोदकमा भरन्त्युत्तरो धुरो वहति प्रदेदिशत् ।।१०।।
परिवृक्तेव पतिविद्यमानट् पीप्याना कूचक्रेणेव सिंचन् ।
एषैष्या चिद्रथ्या जयेम सुमंगलं सिनवदस्तु सातम् ।।११।।
त्वं विश्वस्य जगतश्चक्षुरिन्द्रासि चक्षुषः ।
वृषा यदाजिं वृषणा सिषाससि चोदयन्वध्रिणा युजा ।।१2।।

४३७. धन अन्न दान प्रशंसा

१. भिक्षुः – ऋ. १०.११७.१–६

न वा उ देवाः क्षुधमिद्वधं दुदुरुताशितमुप गच्छन्ति मृतयवः ।
उतो रयिः पृणतो नोप दस्यत्युतापृणन्मर्डितांर न विन्दते ।।१।।
य आध्राय चकमानाय पित्वोऽन्नवान्त्सन्नफितायोपजग्मुषे ।
स्थिरं मनः कृणते सेवते पुरोतो चित्स मर्डितारं न विन्दते।।2।।
स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।

अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ।।३।।
न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः ।
अपास्मात्प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत् ।।४।।
पृणीयादिन्नाधमानाय तव्यान्द्राघीयांसमनु पश्येत पन्थाम् ।
ओ हि वर्तन्ते रथ्येव चक्रान्यमन्यमुप तिष्ठन्त रायः ।।५।।
मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ।।६।।
कृषन्नित्फाल आशितं कृणोति यन्नध्वानमप वृङ्क्ते चरित्रैः ।
वदन्ब्रह्मावदतो वनीयान्पृन्नापिरपृणन्तमभि ष्यात् ।।७।।
एकपाद्भयो द्विपदो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात् ।
चतुष्पादेति द्विपदामभिस्वरे संपश्यन्पङ्क्तीरुपतिष्ठमानः ।।८।।
समौ चद्धिस्तौ न समं विविष्टः सम्मातरा चिन्न समं दुहाते ।
यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्सन्तो न समं पृणीतः ।।९।।

४३८. धनपतिः

१. प्रतिवेदनः – अ. 2.३६.६

आ क्रन्दय धनपते वरमामनसं कृणु। सर्वं प्रदक्षिणं कृणु यो वरः प्रतिकाम्यः ।।६।।

४३९. धनुः

१. पायुर् भरद्वाजः – ऋ. ६.७५.2

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ।।2।।

४४०. धनुर्वेदाध्यापकाः

१. भरद्वाजः – य. 2९.४७

ब्रह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवीऽअनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नोऽअघशंसऽईशत ।।४७।।

४४१. धर्मः अश्विनौ पृत्यृचं मन्त्रोक्ता वा

१. अथर्वा – अ. ७.७३.१–११

समिद्धो अग्निर्वृषणा रथी दिवस्तप्तो घर्मो दुह्यते वामिषे मधुः ।
वयं हि वां पुरुदमासो अश्विना हवामहे सधमादेषु कारवः ।।१।।
समिद्धो अग्निराश्विना तप्तो वां घर्म आ गतम् ।
दुह्यन्ते नूनं वृषणेह धेनवो दस्रा मदन्ति वेधसः ।।2।।
स्वाहाकृतः शुचिर्देवेषु यज्ञो यो अश्विनोश्चमसो देवपानः ।
तमु विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना रिहन्ति ।।३।।
यदुस्रियास्वाहुतं घृतं पयोऽयं स वामश्विना भाग आ गतम् ।
माध्वी धर्तारा विदथस्य सत्पती तप्तं घर्मं पिबतं रोचने दिवः ।।४।।
तप्तो वां घर्मो नक्षतु स्वहोता प्र वामध्वर्युश्चरतु पयस्वान् ।
मधोर्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रियायाः ।।५।।
उप द्रव पयसा गोधुगोषमा घर्मे सिंच मय उस्रियायाः ।
वि नाकमख्यत् सविता वरेण्योऽनुप्रयाणमुषसो वि राजति ।।६।।
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीदधो घर्मस्तदु षु प्र वोचत् ।।७।।
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसा न्यागन् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ।।८।।

जुष्टो दमृना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्य शूत्रयतामा भरा भोजनानि ।।६।।
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ।।१०।।
सूयवसाद् भगवति हि भूया अध वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ।।११।।

४४2. धाता

१. सङ्कुसुको यामायनः – ऋ. १०.१८.५

यथाहान्यनुपूर्वं भवन्ति यथ ऋतव ऋतुभिर्यन्ति साधु ।
यथा न पूर्वमपरो जहात्येवा धारायूंषि कल्पयैषाम् ।।५।।

४४३. धात्रादयो मन्त्रोक्ता

१. भृगुः – अ. ७.१७.१–४

धाता दधातु नो रयिमीशानो जगतस्पतिः ।
स नः पूर्णेन यच्छतु ।।१।।
धाता दधातु दाशुषे प्राचीं जीवातुमक्षिताम् ।
वयं देवस्य धमीहि सुमतिं विश्वराधसः ।।2।।
धाता विश्वा वार्या दधातु प्रजाकामाय दाशुषे दुरोणे ।
तस्मै देवा अमृतं सं व्ययन्तु विश्वे देवा अदितिः सजोषाः ।।३।।
धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः ।
त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु ।।४।।

४४४. ध्रुवः

१. अथर्वा – अ. ६.८८.१–३; ६.८९.१–३

अ. ६.८८.१–३

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवासः पर्वता इमे ध्रुवा राजा विशामयम् ।।१।।
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।।2।।
ध्रुवोऽच्युतः प्र मृणीहि शत्रूंछत्रूयतोऽधरान् पादयस्व ।
सर्वा दिशः संमनसः सध्रीचीर्ध्रुवाय ते समितिः कल्पतामिह ।।३।।

अ. ६.८९.१–३

इदं यत् प्रेण्यः शिरो दत्तं सोमेन वृष्ण्यम्। ततः परि प्रजातेन हार्दि ते शोचयामसि।।१।।
शोचयामसि ते हार्दि शोचयामसि ते मनः। वातं धूम इव सध्र्य१ङ् मामेवान्वेतु ते मनः।।2।।
मह्यं त्वा मित्रावरुणौ मह्यं देवी सरस्वती। मह्यं त्व मध्यं भूम्या उभावन्तौ समस्यताम् ।।३।।

४४५. ध्रुवा, विष्णु कल्माषग्रीवः वीरुधः

१. अथर्वा – अ. ३.2७.५

तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ।।५।।

४४६. नक्षत्राणि

१. गार्ग्यः – अ. १९.७.१–५; १९.८.१–७

अ. १९.७.१–५

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि ।

तुर्मिशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम् ।।१।।
सुहवमग्ने कृत्तिका रोहिणी चास्तु भद्रं मृगशिरः शमार्द्रा ।
पुनर्वसू सूनृता चारु पृष्यो भानुराश्लेषा अयनं मघा मे ।।2।।
पुण्यं पूर्वा फल्गुन्यौ चात्र हस्तश्चित्रा शिवाा स्वाति सुखो मे अस्तु ।
राधे विशाखे सुहवानुराधा ज्येष्ठा सुनक्षत्रमिरिष्ट मूलम् ।।३।।
अन्नं पूर्वा रासतां मे अषाढा ऊर्जं देवयुत्तरा आ वहन्तु ।
अभिजिन्मे रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिम् ।।४।।
आ मे महच्छतभिषग् वरीय आ मे द्वया प्रोष्ठपदा सुशर्म ।
आ रेवती चाश्वयुजौ भगं म आ मे रयिं भरण्य आ वहन्तु ।।५।।

अ. १६.८.१–७

यानि नक्षत्राणि दिव्य१न्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु ।
प्रकल्पयंश्चन्द्रमा यान्येति सर्वाणि ममैतानि शिवानि सन्तु ।।१।।
अष्टाविंशानि शिवानि शग्मानि सह योगं भजन्तु मे ।
योगं प्र पद्ये क्षेमं च क्षेमं प्र पद्ये योगं च नमोऽहोरात्राभ्यामस्तु ।।2।।
स्वस्तितं मे सुप्रातः सुसायं सुदिवं सुमृगं सुशकुनं मे अस्तु ।
सुहवमग्ने स्वस्त्य१मर्त्यं गतवा पुनरायाभिन्दन् ।।३।।
अनुहवं परिहवं परिवादं परिक्षवम् ।
सर्वैर्मे रिक्तकुम्भान् परा तान्त्सवितः सुव ।।४।।
अपपापं परिक्षवं पुण्यं भक्षीमहि क्षवम् ।
शिवा ते पाप नासिकां पुण्यगश्चाभि मेहताम् ।।५।।
इमा या ब्रह्मणस्पते विषूचीर्वात ईरते ।
सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि ।।६।।
स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु ।।७।।

४४७. नक्षत्रादयः

१. प्रजापतिः – य. 22.2८

नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः स्वाह ऽ ऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्यां स्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ।।2८।।

४४८. नद्यः

१ . विश्वामित्रो गाथिनः – ऋ. ३.३३.१–१३

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ।।१।।
इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः ।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ।।2।।
अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म ।
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती ।।३।।
एना वयं पयसा पिन्वमाना अनु येनिं देवकृतं चरन्तीः ।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ।।४।।
रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ।।५।।

इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।
देवेऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ।६।।
प्रवाच्यं शश्वधा वीर्यं१ तदिन्द्रस्य कर्म यदहिं विवृश्चत् ।
वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः ।।७।।
एतद्वचो जरितार्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ।।८।।
ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ।।९।।
आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन ।
नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ।।१०।।
यदंग त्वा भरताः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम् ।।११।।
अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम् ।
प्र पिन्वध्बमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम् ।।१2।।
उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुंचत। मादुष्कृतौ व्येनसाऽघ्न्यौ शूनमारताम् ।।१३।।

2. **वसिष्ठः – ऋ. ७.५०.४**

याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः।
ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु सर्वा नद्यो अशिमिदा भवन्तु ।।४।।

३. **सिन्धुक्षित् प्रैयमेधः – ऋ. १०.७५.१–९**

प्र सु व आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः ।
प्र सप्तसप्त त्रेधा हि चक्रमुः प्र सुत्वरीणामति सिन्धुरोजसा ।।१।।
प्र तेऽरदद्वरुणो यातवे पथः सिन्धो यद्वाजाँ अभ्यद्रवस्त्वम् ।
भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगतामिरज्यसि ।।2।।
दिवि स्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्ति भानुना ।
अभ्रादिव प्र स्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो न रोरुवत् ।।३।।
अभि त्वा सिन्धो शिशुमिन्न मातरो वाश्रा अर्षन्ति पयसेव धेनवः ।
राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ।।४।।
इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता पुरुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ।।५।।
तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या ।
त्वं सिन्धो कुभ्या गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे ।।६।।
ऋजीत्येनी रुशती महित्वा परि ज्रयांसि भरते रजांसि ।
अदब्धा सिन्धुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता ।।७।।
स्वश्वा सिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती ।
ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधम् ।।८।।
सुखं रथं ययुजे सिन्धुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ ।
महान्ह्यस्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरप्शिनः ।।९।।

४४९. नराशंसः

१. **मेधातिथिः काण्वः – ऋ. १.१३.३; सा. १३४९**

ऋ. १.१३.३

नराशंसमिह प्रियमस्मिन् यज्ञ उप ह्वये। मधुजिह्वं हविष्कृतम् ।।३।।

सा. १३४९

नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये। मधुजिह्वं हविष्कृतम् ।।३।।

४५०. नितत्नी वनस्पतिः

१. वीतहव्यः (केशवर्धन कामः) – अ. ६.१३६.१–३; ६.१३७.१–३

अ. ६.१३६.१–३

देवी देव्यामधि जाता पृथिव्यामस्योषधे ।
तां त्वा नितत्नि केशेभ्यो दृंहणाय खनामसि ।।१।।
दृंह प्रत्नांजनयाजातांजातानु वर्षीयसस्कृधि ।।2।।
यस्ते केशोऽवपद्यते समूलो यश्च वृश्चते ।
इदं तं विश्वभेषज्याभि षिंचामि वीरुधा ।।३।।

अ. ६.१३७.१–३

यां जमदग्निरखनद् दुहित्रे केशवर्धनीम्। तां वीतहव्य आभरदसितस्य गृहेभ्यः ।।१।।
अभीशुना मेया आसन् व्यामेनानुमेयाः। केशा नडाइव वर्धन्तां शीर्ष्णस्ते असिताः परि ।।2।।
दृंह मूलमाग्रं यच्छ वि मध्यं यामयौषधे। केशा नडाइव वर्धन्तां शीर्ष्णस्ते असिताः परि ।।३।।

४५१. निर्ऋति

१. आयुर्वर्चोबलकामः – अ. ६.६३.१

यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविमोक्यं यत् ।
तत् ते वि ष्याम्यायुषे वर्चसे वलायादोमदमन्नमद्धि प्रसूतः ।।१।।

४५2. निर्ऋतिः

१. द्रुह्वणः (आयुर्वर्चोबलकामः): – अ. ६.६३.१

यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविमोक्यं यत् ।
तत् ते वि ष्याम्यायुषे वर्चसे वलायादोमदमन्नमद्धि प्रसूतः ।।१।।

2. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः – ऋ. १०.५९.१–३

प्र तार्यायुः प्रतरं नवीयः स्थातारेव क्रतुमता रथस्य ।
अध च्यवान् उत्तवीत्यर्थं परातरं सु निर्ऋतिर्जिहीताम् ।।१।।
सामन्नु राये निधिमन्वन्नं करामहे सु पुरुध श्रवांसि ।
ता नां विश्वानि जरिता ममत्तु परातरं सु निर्ऋतिर्जिहीताम् ।।2।।
अभी ष्व१र्यः पौंस्यैर्भवेम द्यौर्न भूमिं गिरयो नाज्रान् ।
ता नो विश्वानि जरिता चिकेत परातरं सु निर्ऋतिर्जिहीताम् ।।३।।

३. भगः – अ. ६.८४.१–४

यस्यास्त आसनि घोरे जुहोम्येषां बद्धानामवसर्जानाय कम् ।
भूमिरिति त्वाभिप्रमन्वते जना निर्ऋतिरिति त्वाहं परि वेद सर्वतः ।।१।।
भूते हविष्मती भवैष ते भागो यो अस्मासु ।
मुंचेमानमूनेनसः स्वाहा ।।2।।
एवो ष्व१स्मन्निर्ऋते नेहा त्वमयस्मयान् वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यव ।।३।।
अयस्मये द्रुपदे बेधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ।।४।।

४. मधुच्छन्दाः – य. १2.६2–६४

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ।।६2।।
नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयं विचृता बन्धमेतम् ।
यमेन त्वं यम्या संविदानोत्तमे नाकेऽअधि रोहयैनम् ।।६३।।
यस्यास्ते घोरऽआसन् जुहोम्येषां बन्धानामवसर्जनाय।

यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहं परि वेद विश्वतः ।।६४।।

४५३. निर्ऋति द्यावापृथिव्यादयो मन्त्रोक्ता

१. भृग्वंगिरा – अ. 2.१०.१–८

क्षेत्रियात् त्वा निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ।।१।।
शं ते अग्निः सहाद्भिरस्तु शं सोमः सहौषधीभिः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ।।2।।
शं ते वातो अन्तरिक्षे वयो धाच्छं ते भवन्तु प्रदिशश्चतस्रः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ।।३।।
इमा या देवीः प्रदिशश्चतस्रो वातपत्नीरभि सूर्यो विचष्टे ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ।।४।।
तासु त्वान्तर्जरस्या दधामि प्र यक्ष्म एतु निर्ऋतिः पराचैः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ।।५।।
अमुक्था यक्ष्माद् दुरितादवद्याद् द्रुहः पाशाद् ग्राह्याश्चोदमुक्थाः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ।।६।।
अहा अरातिमविदः स्योनमप्यभूर्भद्रे सुकृतस्य लोके ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ।।७।।
सुर्यमृतं तमसो ग्राह्या अधिदेवा मुंचन्तो असृजन्निरेणसः ।
एवाहं त्वा क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंचामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ।।८।।

४५४. निर्ऋतिः सोमश्च

१. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः – ऋ. १०.५९.४

मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरन्तम् ।
द्युभिर्हितो जरिमा सू नो अस्तु परातरं सु निर्ऋतिर्जिहीताम् ।।४।।

४५५. निविदः

१. ब्रह्म – अ. ५.2६.४

प्रैषा यज्ञे निविदः स्वाहा शिष्टाः पत्नीभिर्वहतेह युक्ताः ।।४।।

४५६. न्यायधीशः

१. प्रजापतिः – य. 2३.2१

उत्सक्थ्या ऽ अव गुदं धेहि समंजि चारया वृषन्। य स्त्रीणां जीवभोजनः ।।2१।।

४५७. पंच प्रदिशः

१. वसिष्ठः – अ. ३.2०.६

दुह्रां मे पंच प्रदिशो दुह्रामुर्वीर्यथाबलम्। प्रापेयं सर्वा आकूतीर्मनसा हृदयेन च ।।६।।

४५८. पणयः

१. सरमा देवशुनी – ऋ. १०.१०८.2; ४; ६; ८; १०; ११

ऋ. १०.१०८.2

इन्द्रस्य दूतिरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः ।
अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ।।2।।

ऋ. १०.१०८.४

नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात् ।
न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे ।।४।।

ऋ. १०.१०८.६

असेन्या वः पणवो वचांस्यनिषव्यास्तन्वः सन्तु पापीः ।
अधृष्टो व एतवा अस्तु पनथा बृहस्पतिर्व उभया न मृळात् ।।६।।

ऋ. १०.१०८.८

एह गमन्नृषयः सोमशिता अयास्यो अंगिरसो नवग्वाः ।
त एतमूर्वं वि भजन्त गोनामथैतद्वचः पणयो वमन्नित् ।।८।।

ऋ. १०.१०८.१०–११

नाहं वेद भ्रातृत्वं नो स्वसृत्वमिन्द्रो विदुरंगिरसश्च घोराः ।
गोकामा मे अच्छदयन्यदायमपात इत पण्यो वरीयः ।।१०।।
दूरमित पणयो वरीय उद्गावो यन्तु मिनतीर्ऋतेन ।
बृहस्पतिर्या अविन्दन्निगूळहाः सोमो ग्रावाण ऋषयश्च विप्राः ।।११।।

४५९. पत्नी

१. अग्निः – य. १३.20–21

काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ।।20।।
या शतेन प्रतनोषि सहस्रेण विरोहासि। तस्यास्ते देवीष्टके विधेम हविषा वयम् ।।21।।

2. कुसुरुबिन्दुः – य. ८.42–४३

आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः।
पुनरूर्जा निवर्त्तस्व सा नः सहस्रं धुक्षवोरुधारा पयस्वती पुनर्माविशताद्रयिः ।।४2।।
इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति ।
एता तेऽअघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात् ।।४३।।

३. मधुच्छन्दाः – य. 12.६1

मातेव पुत्रं पृथिवी पृरीष्यमग्निं स्वे योनावभारुखा ।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुंचतु ।।६1।।

४६०. पथ्या स्वस्तिः

१. गयः प्लातः – ऋ. १०.६३.१५–१६

स्वस्ति नः पथ्यासु धन्वसु स्वस्त्य१प्सु वृजने स्वर्वति ।
स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ।।१५।।
स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति ।
सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ।।१६।।

४६१. पन्थानः

१. अथर्वा (पण्यकामः) – अ. ३.१५.2

ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी संचरन्ति ।
ते मा जुषन्तां पयसा घृतेन यथा क्रीत्वा धनमाहराणि ।।2।।

४६2. पक्ष्मनाशनी

१. सावित्री सूर्या – अ. १४.2.१०

ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाँ अनु। पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः ।।१०।।

४६३. परमात्मा

१. कौण्डिन्यः – य. 2०.३2

यो भूतानामधिपतिर्यस्मिँल्लोकाऽअधि श्रिताः।
यऽईशे महतो महाँस्तेन गृह्णामि त्वामहं मयि गृह्णामि त्वामहम्।।३2।।

2. प्रजापतिः – य. ४.४; 2५.१३

य. ४.४

चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ।।४।।

य. 2५.१३

य ऽ आत्मदा बलदा यस्य विश्व ऽ उपासते प्रशिषं यस्य देवाः ।
यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ।।१३।।

३. मेधाकामः – य. ३2.१४

यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ।।१४।।

४. वरुणः – य. १०.१५

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्। मृत्योः पाह्योजोऽसि सहोऽस्यमृतमसि ।।१५।।

५. वसिष्ठः – य. १५.६४

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीं दिवं यच्छ दिवं दृंह दिवं महिंसीः।
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाऽंगिरस्वद् ध्रुवे सीदतम् ।।६४।।

६. स्वयम्भुर् ब्रह्म – य. ३2.१; 2; ६–८; १०–१2

य. ३2.१–2

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद् ब्रह्म ताऽआपः स प्रजापतिः ।।१।।
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि। नैनमूर्ध्वं न तिर्य्यंचं न मध्ये परि जग्रभत् ।।2।।

य. ३2.६–८

येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः ।
यो ऽअन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।६।।
यं क्रन्दसीऽअवसा तस्तभानेऽअभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूरऽउदितो विभाति कस्मै देवाय हविषा विधेम। आपो ह यद्बृहतीर्यश्चिदापः ।।७।।
वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निदं सं च वि चैति सर्वं सऽओतः प्रोतश्च विभूः प्रजासु ।।८।।

य. ३2.१०–१2

स नो बन्धुर्जनिता स विधाता धामानि वेदभुवनानि विश्वा ।
यत्र देवाऽअमृतमानशानास्तृतीये धामन्नध्यैरयन्त ।।१०।।
परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजा मृतस्यात्मनात्मानमभि सं विवेश ।।११।।
परि द्यावापृथिवी सद्यऽइत्वा परि लोकान् परि दिशः परि स्वः।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदा सीत् ।।१2।।

४६४. परमात्मा देवाश्च

१. भृग्वंगिरा – अ. १६.७2.१

यस्मात् कोशादुदभराम वेद तस्मिन्नन्तरव दध्म एनम् ।
कृतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेह ।।१।।

४६५. परमेश्वरः

१. नारायणः – य. ३०.५–६

ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय वीरहणं पाप्मने क्लीबमाक्रयायाऽअयोगूं कामाय पुँश्चलूमतिक्रुष्टाय मागधम् ।।५।।
नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्ठायै भीमलं नर्माय रेभं हसाय कारि मानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्य्याय तक्षाणम् ।।६।।

2. प्रजापतिः – य. 2३.१–५; ५2

य. 2३.१–५

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक ऽ आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।१।।
उपयामग्रहीतोऽसि प्रजापतेय त्वा जुष्टं गृह्णाम्येष ते योनिः सूर्य्यस्ते महिमा ।
यस्तेऽहन्त्सवंत्सरे महिमा सम्बभूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव यस्ते दिवि सूर्य्ये महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ।।2।।
यः प्राणतो निमिषतो महित्वैक ऽ इद्राजा जगतो बभूव ।
य ऽ ईशे ऽ अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ।।३।।
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा ।
यस्ते रात्रो संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभूव यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ।।४।।
युंजन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि ।।५।।

य. 2३.५2

पंचस्वन्तः पुरुष ऽ आ विवेश तान्यन्तः पुरुषे ऽ अर्पितानि ।
एतत्त्वात्र प्रतिमन्वानोऽ अस्मि न मायया भवस्युत्तरो मत् ।।५2।।

३. विवस्वान् – य. ८.३६

यस्मान्न जातः परोऽअन्योऽअस्ति यऽआविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया सं रराणस्त्रीणि ज्योतींषि सचते स षोडशी ।।३६।।

४. शंयुर् बार्हस्पत्यः – य. 2७.३६

न त्वावाँ2ऽ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गवयन्तस्त्वा हवामहे ।।३६।।

५. स्वयम्भुर् ब्रह्म – य. ३2.५

यस्माज्जातं न पुरा किं चनैव य आबभूव भुवनानि विश्वा ।
प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी ।।५।।

४६६. परमेश्वरविद्वांसौ

१. मेधाकामः – य. ३2.१५

मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ।।१५।।

४६७. परमेष्ठी प्रजापतिः

१. वसिष्ठः – य. ८.५४

परमेष्ठ्यभिधीतः प्रजापतिर्वाचि व्याहृतायामन्धोऽअच्छेतः ।

सविता सन्यां विश्व कर्म्मा दीक्षायां पूषा सोमक्रयण्याम् ।।५४।।

४६८. पराशरः इन्द्रः

१. अथर्वा – अ. ६.६५.१–३

अव वमन्युरवायताव बाहू मनोयुजा। पराशर त्वं तेषां परांचं शुष्ममर्दयाधा नो रयिमा कृधि।।१।।
निर्हस्तेभ्यो नैर्हस्तं यं देवाः शरुमस्यथ। वृश्चामि शत्रूणां बाहूननेन हविषाहम् ।।2।।
इन्द्रश्चकार प्रथमं नैर्हस्तमसुरेभ्यः। जयन्तु सत्वानो मम स्थिरेणेन्द्रेण मेदिना ।।३।।

४६९. पर्जन्यः

१. अत्रिर् भौमः – ऋ. ५.८३.१–१०

अच्छावद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु गर्भम् ।।१।।
वि वृक्षान् हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः।।2।।
रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्याँ३ अह ।
दूरात्सिहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं१ नभः।।३।।
प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।
इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति।।४।।
यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफवज्जर्भुरिति ।
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ।।५।।
दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिंचन्नसुरः पिता नः।।६।।
अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यंचं समा भवन्तूद्वतो निषादाः।।७।।
महान्तं कोषमुदचा नि षिंच स्यन्दन्ता कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः।।८।।
यत्पर्जन्य कनिक्रदत्स्तनयन् हंसि दुष्कृतः ।
प्रतीदं विश्वं मोदते यत्कि च पृथिव्यामधि।।९।।
अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ ।
अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम् ।।१०।।

2. अथर्वा – अ. १.2.१–४

विद्या शरस्य पितरं पर्जन्यं भूरिधायस्म्। विद्मो ष्वस्य मातरं पृथिवीं भूरिवर्पसम् ।।१।।
ज्याके परि णो नमाश्मानं तन्वं कृधि। वीडुर्वरीयोऽरातीरप द्वेषांस्या कृधि ।।2।।
वृक्षं यद्गावः परिषस्वजाना अनुस्फुरं शरमर्चन्त्यृभुम्। शरुमस्मद् यावय दिद्युमिन्द्र ।।३।।
यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम्। एवा रोगं चास्रावं चान्तस्तिष्ठतु मुंज इत् ।।४।।

३. वसिष्ठः कुमारो वा आग्नेयः – ऋ. ७.१०१.१–६; ७.१०2.१–३

ऋ. ७.१०१.१–६

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुह्रे मधुदोघमूधः ।
स वत्सं कृण्वन् गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति ।।१।।
यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।
स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः स्वभिष्ट्य१स्मे ।।2।।
स्तरीरु त्वद्भवति सूत उ त्वद्यथावशं तन्वं चक्र एषः ।
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ।।३।।
यस्मिन् विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः ।
त्रयः कोशास उपसेचनासो मध्वः श्चेतन्त्यभितो विरप्शम् ।।४।।

इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत् ।
मयोभुवो वृष्टयः सन्त्वस्मे सपिप्पला ओषधीर्देवगोपाः ।।५।।
स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च ।
तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः ।।६।।

ऋ. ७.१०2.१–३

पर्जन्याय प्र गायत दिवस्पुत्राय मीळहुषे। स नो यवसमिच्छतु ।।१।।
यो गर्भमोषधीनां गवां कृणोत्यर्वताम्। पर्जन्यः पुरुषीणाम् ।।2।।
तस्मा इदास्ये हविर्जुहोता मधुमत्तमम्। इळां नः संयतं करत् ।।३।।

४७०. पर्जन्यादयो मन्त्रोक्ताः

१. अथर्वा – अ. १.३.१–६

विद्या शरस्य पितरं पर्जन्यं शतवृष्णयम् ।
तेना ते तन्वे३शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ।।१।।
विद्या शरस्य पितरं मित्रं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ।।2।।
विद्या शरस्य पितरं वरुणं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ।।३।।
विद्या शरस्य पितरं चन्द्र शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ।।४।।
विद्या शरस्य पितरं सूर्यं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।।।५।।
यदान्त्रेषु गवीन्योर्यद् वस्तावधि संश्रितम् ।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ।।६।।
प्र ते भिनद्मि मेहनं वर्त्रं वेशन्त्याइव ।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ।।७।।
विषितं ते वस्तिबिलं समुद्रस्योदधेरिव ।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ।।८।।
यथेषुका परापतदवसृष्टाधि धन्वनः ।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ।।६।।

४७१. पवमानः

१. अरुण त्रसदस्यू – य. 22.१८

अजीजनो हि पवमान सूर्य्य विधारे शक्मना पयः। गोजीरया रंहमाणः पुरन्ध्या ।।१८।।

2. जमदग्निः भार्गवः – ऋ. ८.१३.१४

आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः। तन्तुं तनुष्व पूर्व्यं यथा विदे ।।१४।।

४७2. पवमानः सोमः

१. अकृष्टा माषा – ऋ. ६.८६.१–१०; सा. ८८६–८८७; ६५५–६५७; १०३१–१०३३.

ऋ. ६.८६.१–१०

प्र त आषावः पवमान धीजवो मदा अर्षन्ति रघुजाइव त्मना ।
दिव्याः सुपर्णा मधुमन्तः इन्दवो मदिन्तमासः परि कोषमासते।।१।।
प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक् ।
धेनुर्न वत्सं पयसामि वज्रिणमिन्द्रमिन्दवो मधुमन्त ऊर्मयः।।2।।
अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरम् ।
वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इन्द्रियाय धायसे ।।३।।
प्र त आश्विनीः पवमान धीजुवो दिव्या असृग्रन्पयसा धरीमणि ।

प्रान्तर्ऋषयः स्थाविरीरसृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः।।४।।
विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः ।
व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि।।५।।
उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परिं यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति।।६।।
यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।
सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत्।।७।।
राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिन्धुषु श्रितः ।
अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः।।८।।
दिवो न सानु स्तनयून्नचिक्रदद् द्यौश्च यस्य पृथिवी च धर्मभिः ।
इन्द्रस्य सख्यं पवते विवेविदत्सोमः पुनानः कलशेषु सीदति।।९।।
ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ।।१०।।

सा. ८८६–८८७

प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन्पयसा धरीमणि ।
प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः।।१।।
उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ।।2।।

सा. ६५५–६५७

गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।
त्वं सुवीरो असि सोम विश्ववित्तं त्वा नर उप गिरेम आसते ।।१।।
त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ।।2।।
ईशान इमा भुवनानि ईयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ।।३।।

सा. १०३१–१०३३

ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोंरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ।।१।।
अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषाः ।।2।।
अग्ने सिन्धूनां पवमानो अर्षस्यग्रे वाचो अग्रियो गोषु गच्छसि ।
अग्रे वाजस्य भजसे महद्धनं स्वायुधः सोतृभिः सोम सूयसे ।।३।।

2. अग्नयो (धिष्ण्या) ऐश्वराः – ऋ. ९.१०९.१–22

परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ।।१।।
इन्द्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ।।2।।
एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ।।३।।
पसव्स सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ।।४।।
शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ।।५।।
दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ।।६।।
पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ।।७।।
नृभिर्येमानो जज्ञानः पूतः क्षरद्विश्वानि मन्द्रः स्वर्वित् ।।८।।
इन्दुः पुनानः प्रजामुरणः करद्विश्वानि द्रविणानि नः ।।९।।
पवस्व सोम क्रत्वे दक्षायोश्वो न निक्तो वाजी धनाय ।।१०।।
तं ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ।।११।।

शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ।।१2।।
इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ।।१३।।
बिभर्ति चार्विन्द्रस्य नाम येन विश्वानि वृत्रा जघान ।।१४।।
पिबन्त्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य ।।१५।।
प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम् ।।१६।।
स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ।।१७।।
प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ।।१८।।
असर्जि वाजी तिरः पवित्रमिन्द्राय सोमः सहस्रधारः ।।१९।।
अंजन्त्येनं मध्वो रसेनेन्द्राय वृष्ण इन्दुं मदाय ।।2०।।
देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजन्ति ।।2१।।
इन्दुरिन्द्राय तोशते नि तोशते श्रीणन्नुग्रो रिणन्नपः ।।22।।

३. अग्नयो धिष्ण्या ऐश्वराः – सा. ४2८–३१; ११६०–६2; १2४१–४३; १३३2–३४; १३६७–६९

सा. ४2८–३१

परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ।।१।।
पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईरसे ।।2।।
पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ।।३।।
पवस्व सोम महे दक्षायाश्वो नि निक्तो वाजी धनाय ।।४।।
इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ।।५।।

सा. ११६०–६2

प्र वाज्यक्षाः सहस्रधारस्तिरः पवित्रां वि वारमव्यम् ।।१।।
स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ।।2।।
प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ।।३।।

सा. १2४१–४३

पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ।।१।।
शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः ।।2।।
दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व।।३।।

सा. १३३2–३४

पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ।।१।।
प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ।।2।।
शिशुं जज्ञानं हरिं मृजन्ति पवित्रो सोमं देवेभ्य इन्दुम् ।।३।।

सा. १३६७–६९

परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ।।१।।
एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्य पीयूषः ।।2।।
इन्द्रस्ते सोम सुतस्य पेयात्क्रत्वे दक्षाय विश्वे च देवाः ।।३।।

४. अग्नयो धिष्ण्या ऐश्वराः (ऋसर्व. साग्री.सास्वा.); वाजिनः (सार्षेदी.) ऋण त्रसदस्यू (सास्वा.) – सा. ४३५

अविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम्। सवर्गां अर्वन्तो जयत ।।९।।

५. अग्नयो धिष्ण्या ऐश्वराः ;ऋसर्व. साग्री.सास्वा.द्ध वामदेवः ;सार्षेदी.द्ध ऋण त्रसदस्यू (सास्वा.) – सा. ४३६

पवस्व सोम द्युम्नी सुधारो महाँ अवीनामनुपूर्व्यः ।।१०।।

६. अग्निश् चाक्षुषः – ऋ. ९.१०६.१–३; ९.१०६.१०–१४; सा. ५६६; ५७2; ५७६; ६९४;

६६५; ६६६; ७७2; ७७३; ६४०–६४2

ऋ. ९.१०६.१–३

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः। श्रुष्टी जातास इन्द्रवः स्वर्विदः ।।१।।
अयं भराय सानसिरिन्द्राय पवते सुतः। सोमो जैत्रास्य चेतति यथा विदे ।।2।।
अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णीत सानसिम्। वज्रं च वृषणं भरत्समप्सुजित्।।३।।

ऋ. ९.१०६.१०–१४

सोमः पुनान ऊर्मिणाव्यो वारं वि धावति। अग्रे वाचः पवमानः कनिक्रदत् ।।१०।।
धीभिर्हिन्वन्ति वाजिनं वने क्रीळन्तमत्यविम्। अभि त्रिपृष्ठं मतयः समस्वरन्।।११।।
असर्जि कलशाँ अभि मीळहे सप्तिर्न वाज्युः। पुनानो वाचं जनयन्नसिष्यदत् ।।१2।।
पवते हर्यतो हरिरति ह्वरांसि रंह्या। अभ्यर्षन्त्सतोतृभ्यो वीरवद्यशः ।।१३।।
अया पवस्व देवयुर्मधोर्धारा असृक्षत। रेभन्पवित्रां पर्येषि विश्वतः ।।१४।।

सा. ५६६

इन्द्रमुच्छ सुता इमे वृष्णं यन्तु हरयः। श्रुष्टे जातास इन्दवः स्वर्विदः ।।१।।

सा. ५७2

सोम पुनान ऊर्मिणाव्यं वारं वि धावति। अग्रे वाचः पवमानः कनिक्रदत् ।।७।।

सा. ५७६

पवते हर्यतो हरिरति ह्वरांसि रंह्या। अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ।।११।।

सा. ६६४–६६६

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः। श्रुष्टे जातास इन्दवः स्वर्विदः ।।१।।
अयं भराय सानसिरिन्द्राय पवते सुतः। सोमो जैत्रास्य चेतति यथा विदे ।।2।।
अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिम् ।
वज्रं च वृषणं भरत्समप्सुजित् ।।३।।

सा. ७७2–७७३

अया पवस्व देवयू रेभन्पवित्रां पर्येषि विश्वतः। मधोर्धारा असृक्षत ।।१।।
पवते हर्यतो हरिरति ह्वरांसि रंह्या। अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ।।2।।

सा. ६४०–६४2

सोम पुनान ऊर्मिणाव्यं वारं वि धावति।अग्रे वाचः पवमानः कनिक्रदत् ।।१।।
धीभिर्मृजन्ति वाजिनं वने क्रीडन्तमत्यविम्। अभि त्रिपृष्ठं मतयः समस्वरन् ।।2।।
असर्जि कलशाँ अभि मीढ्वांत्सप्तिर्न वाजयुः। पुनानो वाचं जनयन्नसिष्यदत् ।।३।।

७. अत्रिर् भौमः – ऋ. ९.८६.४१–४५; सा. ५६४; १६१४; १६१६

ऋ. ९.८६.४१–४५

स भन्दना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि ।
ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याजतात् ।।४१।।
सो अग्रे अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः ।
द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ।।४2।।
अंजते व्यंजते समंजते ऋतुं रिहन्ति मधुनाभ्यंजते ।
सिन्धोरुच्छवासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ।।४३।।
विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।
अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः ।।४४।।
अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
हरिर्घृतस्नुः सुद्दशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ।।४५।।

सा. ५६४

अंजते व्यंजुते समंजते क्रतुं रिहन्ति मध्वाभ्यंजुते ।

सिन्धोरुछ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ।।११।।

सा. १६१४

अंजते वयंजते समंजते क्रतुं रिहन्ति मध्वाभ्यंजते ।

सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभणते ।।१।।

सा. १६१६

अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।

हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ।।३।।

८. अनानतः पारुच्छेपिः – ऋ. ६.१११.१–३; सा. ४६३; १५६०–६2

ऋ. ६.१११.१–३

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः ।

धारा सुतस्य रोचते पुनानो अरुषो हरिः ।

विश्व यद्रूपा परियात्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ।।११।।

त्वं त्यपणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।

परावतो न साम तद्यत्रा रणन्ति धीतयः ।

त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ।।2।।

पूर्वमनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।

अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन्। वज्रश्चयद्भवथो अनपुच्युता समत्स्वनपच्युता ।।३।।

सा. ४६३

अया रुचा हरिण्या पुरानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।

धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः।

विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिऋक्वभिः।।७।।

सा. १५६०–६2

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।

धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।

विश्व यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ।।१।।

प्राचीमनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।

अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन् ।

वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ।।2।।

त्वं ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे।

परावतो न साम नद्यत्रा रणन्ति धीतयः ।

त्रिधातु भिररुषीभिर्वयो दधे रोचमानो वयो दधे ।।३।।

९. अन्धीगुः श्यावाश्विः – सा. ५४५; ६६७–६६

सा. ५४५

पुरोजिती वो अन्धसः सुताय मादयित्नवे। अपश्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ।।१।।

सा. ६६७–६६

पुरोजिती वो अन्धसः सुताय मादयित्नवे ।

अपश्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ।।१।।

यो धारया पावकया परिप्रस्यन्दते सुतः इन्दुरश्वो न कृत्व्यः ।।2।।

तं दुरोषमभी नरः सोमं विश्वाच्या धिया। यज्ञाय सन्त्वद्रयः ।।३।।

१०. अमहीयुः – ऋ. ६.६१.१–३०.

अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव ।१।।

पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम्। अध त्यं तुर्वशं यदुम् ।।2।।

परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्। क्षरा सहस्रिणीरिषः ।।३।।
पवमानस्य ते वयं पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे ।।४।।
ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया। तेभिर्नः सोम मृळय ।।५।।
स नः पुनान आ भर रयिं वीरवतीमिषम्। ईशानः सोम विश्वतः ।।६।।
एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम्। समादित्येभिरख्यत ।।७।।
समिन्द्रेणोत वायुना सुत एति पवित्र आ। सं सूर्यस्य रश्मिभि ।।८।।
स नो भगाय वायवे पूष्णे पवस्व मधुमान। चारुर्मित्रे वरुणे च ।।९।।
उच्चा ते जातमन्धसो दिवि षदूभूम्या ददे। उग्रं शर्म महि श्रवः ।।१०।।
एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे ।।११।।
स न इन्द्राय यज्यवे विरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव ।।12।।
उपो षु जातमप्तुरं गोभिर्भंगं परिष्कृतम्। इन्दुं देवा अयासिषुः ।।१३।।
तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव। य इन्द्रस्य हृदंसनिः ।।१४।
अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्यम् ।।१५।।
पवमानो अजीजनद्दिवशिचत्रं न तन्यतुम्। ज्योतिर्वैश्वनरं बृहत् ।।१६।।
पवमानस्य ते रसो मदो राजन्नदुच्छुनः। वि वारमव्यमर्षति ।।१७।।
पवमान रसस्तव दक्षो वि राजति द्युमान। ज्योतिर्विश्वं स्वर्दृशे ।।१८।।
यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघशंसहा ।।१९।।
जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे। गोषा उ अश्वसा असि ।।20।।
संमिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः। सीदंछ्येनो न योनिमा ।।21।।
स पवस्व य आविथेन्द्रं वृत्राय हन्तवे। वव्रिवासं महीरपः ।।22।।
सुवीरासो वयं धना जयेम सोम मीढ्वः। पुनानो वर्ध नो गिरः ।।2३।।
त्वोतासस्तवावसा स्याम वन्वन्त आमुरः। सोम व्रतेषु जागृहि ।।2४।।
अपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम् ।।2५।।
महो नो राय आ भर पवमान जही मृधः। रास्वेन्दो वीरवद्यशः ।।2६।।
न त्वा शतं चन ह्रुतो राधो दित्सन्तमा मिनन्। यत्पुनानो मखस्यसे ।।2७।।
पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि ।।2८।।
अस्य ते सख्ये वयं तवेन्दो द्युम्न उत्तमे। सासह्याम पृतन्यतः ।।2९।।
या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः ।।३०।।

११. अमहीयुर् आंगिरसः – सा. ४६७; ४७०; ४७९; ४८४; ४८७; ४९४; ४९५; ५१०; ५९2; ५९३; ६७2–७४; ७९2; ७७८–८० ७८७–८९; ८१५–१७; ८८९–९1; १०८१–८३; 1210–१५; १३३५–३७

सा. ४६७
उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे। उग्रं शर्म महि श्रवः ।।१।।

सा. ४७०
यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघशंसहा ।।४।।

सा. ४७९
पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि ।।३।।

सा. ४८४
पवमानो अजीजनद्दिविश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत् ।।८।।

सा. ४८७
उपो षु जातमप्तुरं गोभिर्भंगं परिष्कृतम्। इन्दुं देवा अयासिषुः ।।१।।

सा. ४९४–९५
स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।

वव्रिवांसं महीरपः ।।८।।
अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव ।।६।।

सा. ५१०

उपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम् ।।१४।।

सा. ५६२–६३

स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः वरिवोवित्परिस्रव ।।७।।
एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्। सिषान्सतो वनामहे ।।८।।

सा. ६७२–७४

उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे। उग्रं शर्म महि श्रवः ।।१।।
स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव ।।2।।
एना विश्वन्यर्य आ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे ।।३।।

सा. ७६2

उपो षु जातमप्तुरं गोभिर्भंग परिष्कृतम्। इन्दुं देवा अयासिषुः ।।2।।

सा. ७७८–८०

पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि।।१।।
यस्य ते सख्ये वयं सासह्याम पृतन्यतः। तवेन्दो द्युम्न उत्तमे ।।2।।
या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः ।।३।।

सा. ७८७–८६

पवमानस्य ते वयं पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे ।।१।।
ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया। तेभिर्नः सोम मृडय ।।2।।
स नः पुनान आ भर रयिं वीरवतीमिषम्। ईशानः सोम विश्वतः ।।३।।

सा. ८१५–१७

यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघशंसहा ।।१।।
जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे। गोषातिरश्वसा असि ।।2।।
सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभिः। सीदंच्छ्येनो न योनिमा ।।३।।

सा. ८८६–६१

पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत् ।।१।।
पवमान रसस्तव मदो राजन्नदुच्छुनः। वि वारमव्यमर्षति ।।2।।
पवमानस्य ते रसो दक्षो वि राजति द्युमान्। ज्योतिर्विश्वं – स्वर्दृशे ।।३।।

सा. १०८१–८३

एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम्। समादित्येभिरख्यत ।।१।।
समिन्द्रेणोत वायुना सुत एति पवित्र आ। सं सूर्यस्य रश्मिभिः ।।2।।
स नो भगाय वायवे पूष्णे पवस्व मधुमान्। चारुर्मित्रे वरुणे च ।।३।।

सा. १२१०–१५

अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव ।।१।।
पुरः सद्य इत्थाधिये दिवोदासाय शंबरम्। अध त्यं तुर्वशं यदुम् ।।2।।
परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्। क्षरा सहस्रिणीरिषः ।।३।।
अपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम् ।।१।।
महो नो राय आ भर पवमान जही मृधः। रास्वेन्दो वीरवद्यशः ।।2।।
न त्वा शतं च न ह्रुतो राधो दित्सन्तमा मिन्न्। यत्पुनानो मखस्यसे ।।३।।

सा. १३३५–३७

उपो षु जातमप्तुरं गोभिर्भंगं परिष्कृतम्। इन्दुं देवा अयासिषुः ।।१।।
तमिद्वर्धन्तु नो गिरो वत्सं सं शिश्वरीरिव। य इन्द्रस्य हृदं सनिः ।।2।।

अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्य ।।३।।

१2. अम्बरीष ऋजिष्वा च – ऋ. ६.६८.१–१2

अभि नो वाजसातमं रयिमर्ष मुरुस्पृहम्। इन्दो सहस्रमर्णसं तुविद्युम्नं विभवासहम् ।।१।।
परि ष्य सुवानो अव्ययं रथे न वर्माव्यत। इन्दुरभि द्रुणा हितो हियानो धाराभिरक्षाः ।।2।।
परि ष्य सुवानो अक्षा इन्दुरव्ये मदच्युतः। धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः ।।३।।
स हि त्वं देव शश्वते वसु मर्ताय दाशुषे। इन्दो सहस्रिणं रयिं शतात्मानं विवासिस ।।४।।
वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः। नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ।।५।।
द्विर्यं पंच स्वयशसं स्वसारो अद्रिसंहतम्। प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त्यूर्मिणम् ।।६।।
परि त्यं हर्यतं हरि बभ्रुं पुनन्ति वारेण। यो देवान्विश्वाँ इत्परि मदेन सह गछति।।७।।
अस्य वो ह्यवसा पान्तो दक्षसाधनम्। यः सूरिषु श्रवो बृहद्दधे स्व१र्ण हर्यतः।।८।।
स वां यज्ञेषु मानवी इन्दुर्जनिष्ट रोदसी। देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि ।।६।।
इन्द्राय सोम पातवे वृत्रघ्ने परि पिच्यसे। नरे च दक्षिणावते देवाय सदनासदे ।।१०।।
ते प्रत्नासो व्युष्टिपु सोमाः पवित्रे अक्षरन्। अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः।।११।।
तं सखायः पुरोरुचं यूयं वयं च सूरयः। अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ।।१2।।

१३. अम्बरीषो वार्षागिरः ऋजिष्वा भारद्वाजश्च – सा. ५४६; ५५2; १2३८–४०; १३2६–३१; १६७६–८१

सा. ५४६

अभी नो वाजसातमं रयिमर्ष शतस्पृहम्। इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ।।५।।

सा. ५५2

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण। यो देवान्विश्वा इत्परि मदेन सह गच्छति ।।८।।

सा. १2३८–४०

अभी नो वाजसातमं रयिमर्ष शतस्पृहम्। इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ।।१।।
वयं ते अस्य राधसो वसोर्वसो पुरुस्पृहः। नि नेदिष्ठतमा इषः स्याम सुम्ने ते अध्रिगो ।2।।
परि स्य स्वानो अक्षरदिन्दुरव्ये मदच्यतुः। धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः ।।३।।

सा. १३2६–३१

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण। यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ।।१।।
द्विर्यं पंच स्वयशसं सखायो अद्रिसं हतम्। प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः ।।2।।
इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणावते वीराय सदनासदे ।।३।।

सा. १६७६–८१

इन्द्राय सोम पात्वे वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणावते वीराय सदनासदे ।।१।।
तं सखायः पुरूरुचं वयं यूयं च सूरयः। अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ।।2।।
परि त्यं हर्यतं हरि बभ्रुं पुनन्ति वारेण। यो देवान् विश्वाँ इत् परि मदेन सह गच्छति ।।३।।

१४. अयास्यः – ऋ. ६.४४.१–६; ६.४५.१–६; ६.४६.१–६

ऋ. ६.४४.१–६

प्र ण इन्दो महे तन ऊर्मिं न बिभ्रदर्षसि। अभि देवाँ अयास्यः ।।१।।
मती जुष्टो धिया हितः सोमो हिन्वे परावति। विप्रस्य धारया कविः ।।2।।
अयं देवेषु जागृविः सुत एति पवित्र आ। सोमो याति विचर्षणिः ।।३।।
स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम्। बर्हिष्माँ आ विवासति ।।४।।
स नो भगाय वायवे विप्रवीरः सदावृधः। सोमो देवेष्वा यमत् ।।५।।
स नो अद्य वसुत्तये क्रतुविद् गातुवित्तमः। वाजं जेषि श्रवो बृहत् ।।६।।

ऋ. ६.४५.१–६

स पवस्व मदाय कं नृचक्षा देववीतये। इन्दविन्द्राय पीतये ।।१।।
स नो अर्षाभि दूत्यं१त्वमिन्द्राय तोशसे। देवान्त्सखिभ्य आ वरम् ।।2।।

उत त्वामरुणं वयं गोभिरंजमो मदाय कम्। वि नो राये दुरो वृधि ।।३।।
अत्यू पवित्रक्रमीद्वाजी धुरं न यामनि। इन्दुर्देवेषु पत्यते ।।४।।
समी सखायो अस्वरन्वने क्रीळन्तमत्यविम्। इन्दुं नावा अनूषत ।।५।।
तया पवस्व धारया यया पीतो विचक्षसे। इन्दो स्तोत्रे सुवीर्यम् ।।६।।

ऋ. ६.४६.१–६
असृग्रन्देववीतयेऽत्यासः कृत्व्याइव। क्षरन्तः पर्वतावृधः ।।१।।
परिष्कृतास इन्दवो योषेव पित्र्यावती। वायुं सोमा असृक्षत ।।2।।
एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः। इन्द्रं वर्धन्ति कर्मभिः ।।३।।
आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना। गोभिः श्रीणीत मत्सरम् ।।४।।
स पवस्व धनंजय प्रयन्ता राधसो महः। अस्मभ्यं सोम गातुवित् ।।५।।
एतं मृजन्ति मर्ज्यं पवमानं दश क्षिपः। इन्द्राय मत्सरं मदम् ।।६।।

१५. अयास्य आंगिरसः – सा. ५०६

प्र न इन्दो महे तु न ऊर्मिं न बिभ्रद सि। अभि देवौ आयास्यः ।।१३।।

१६. अवत्सारः – ऋ. ६.५३.१–४; ६.५४.१–४; ६.५५.१–४; ६.५६.१–४; ६.५७.१–४; ६.५८.१–४; ६.५६.१–४; ६.६०.१–४

ऋ. ६.५३.१–४
उत्ते शुष्मासो रक्षोभिन्दन्तो अद्रिवः। नुदस्व या परिस्पृधः ।।१।।
अया निजघ्निरोजसा रथसंगे धने हिते। स्तवा अबिभ्युषा हृदा ।।2।।
अस्य व्रतानि नाधृषे पवमानस्य दूढ्या। रुज यस्त्वा पृतन्यति ।।३।।
तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम् ।।४।।

ऋ. ६.५४.१–४
अस्य प्रतनामनु द्युतं शुक्रं दुदुह्ने अह्रयः। पयः सहस्रामृषिम् ।।१।।
अयं सूर्य इवोपदृगयं सरांसि धावति। सप्त प्रवत आ दिवम् ।।2।।
अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः ।।३।।
परि णो देववीतये वाजाँ अर्षसि गोमतः। पुनान इन्दविन्द्रयुः ।।४।।

ऋ. ६.५५.१–४
यवयवं नो अन्धसा पुष्टंपुष्टं परि स्रव। सोम विश्वा च सौभगा ।।१।।
इन्दो यथा तव स्तवो यथा ते जातमन्धसः। नि बर्हिषि प्रिये सदः।।2।।
उत नो गोविदश्ववित्पवस्व सोमान्धसा। मक्षूतमेभिरहभिः ।।३।।
यो जिनाति न जीयते हन्ति शत्रुमभीत्य। स पवस्व सहस्रजित् ।।४।।

ऋ. ६.५६.१–४
परि सोम ऋतं बृहदाशुः पवित्रे अर्षति। विघ्नन् रक्षांसि देवयुः ।।१।।
यत्सोमो वाजमर्षति शतं धारा अपस्युवः। इन्द्रस्य सख्यमाविशन् ।।2।।
अभि त्वा योषणो दश जारं न कन्यानूषत। मृज्यसे सोम सातये ।।३।।
त्वमिन्द्राय विष्णवे स्वादुरिन्दो परि स्रव। नृऽन्त्सतोतृन्पाह्यंहसः ।।४।।

ऋ. ६.५७.१–४
प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः। अच्छा वाजं सहस्रिणम् ।।१।।
अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति हरिस्तुंजान आयुधा ।।2।।
स मर्मृजान आयुभिरिभो राजेव सुव्रतः। श्येनो न वंसु षीदति ।।३।।
स नो विश्वा दिवो वसूतो पृथिव्या अधि। पुनान इन्दवा भर ।।४।।

ऋ. ६.५८.१–४
तरत्स मन्दी धावति धारा सुतस्यान्धसः। तरत्स मन्दी धावति ।।१।।
उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्स मन्दी धावति ।।2।।
ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे। तरत्स मन्दी धावति ।।३।।

आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे। तरत्स मन्दी धावति ।।४।।

ऋ. ९.५९.१–४

पवस्व गोजिद जिद्विश्वजित्सोम रण्यजित्। प्रजावद्रत्नमा भर ।।१।।

पवस्वाद्भ्यो अदाभ्यः पवस्वौषधीभ्यः। पवस्व धिषणाभ्यः ।।2।।

त्वं सोम पवमानो विश्वानि दुरिता तर। कविः सीद नि बर्हिषि ।।३।।

पवमान स्वर्विदो जायमानोऽभवो महान्। इन्दो विश्वाँ अभीदसि ।।४।।

ऋ. ९.६०.१–४

प्र गायत्रेण गायत पवमानं विचर्षणिम्। इन्दुं सहस्रचक्षसम् ।।१।।

तं त्वा सहस्रचक्षसमथो सहस्रभर्णसम्। अति वारमपाविषुः ।।2।।

अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति। इन्द्रस्य हार्द्याविशन् ।।३।।

इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे। प्रजावद्रेत आ भर ।।४।।

१७. अवत्सारः काश्यपः – सा. ५००; ७५५–५७; ९७५–७८; १०५७–६०; १७१४–१७; १७६१–६४

सा. ५००

तरत्स मन्दी धवति धारा सुतस्यान्धसः। तरत्स मन्दी धावति ।।४।।

सा. ७५५–५७

अस्य प्रत्नामनु द्युतं शुक्रं दुदुहे अह्रयः। पयः सहस्रसामृषिम् ।।१।।

अयं सूर्य इवोपदृगयं सरांसि धावति। सप्त प्रवत आ दिवम् ।।2।।

अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः ।।३।।

सा. ९७५–७८

यवयवं नो अन्धसा पुष्टंपुष्टं परि स्रव। विश्वा च सोम सौभगा ।।१।।

इन्दो यथा तव स्तवो यथा ते जातमन्धसः। नि बर्हिषि प्रिये सदः ।।2।।

उत नो गोविदश्ववित्पवस्व सोमान्धसा। मक्षूतमेभिरहभिः ।।३।।

यो जिनाति न जीयते हन्ति शत्रुमभीत्य। स पवस्व सहस्रजित् ।।४।।

सा. १०५७–६०

तरत्स मन्दी धवति धारा सुतस्यान्धसः। तरत्स मन्दी धावति ।।१।।

उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्स मन्दी धावति ।।2।।

ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे। तरत्स मन्दी धावति ।।३।।

आ ययोस्त्रिं शतं तना सहस्राणि च दद्महे। तरत्स मन्दी धावति ।।४।।

सा. १७१४–१७

उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः। नुदस्व याः परिस्पृधः ।।१।।

अया निजघ्निरोजसा रथसंगेः धने हिते। स्तवा अबिभ्युषा हृदा ।।2।।

अस्य व्रतानि नाधृषे पवमानस्य दूढ्या। रुज यस्त्वा पृतन्यति ।।३।।

तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम्। इन्दु मिन्द्राय मत्सरम् ।।४।।

सा. १७६१–६४

प्र ते धारा असश्चते दिवो न यन्ति वृष्टयः। अच्छा बाजं सहस्रिणम् ।।१।।

अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति। हिरस्तुंजन आयुधा ।।2।।

स ममृजान् आयुभिरिभो राजेव सुव्रतः। श्येनो न वं सु षीदति ।।३।।

स नो विश्व दिवो वसूतो पृथिव्या अधि। पुनान इन्दवा भर ।।४।।

१८. असितः काश्यपो देवलो वा ;ऋसर्व.साग्री.द्ध असितः काश्यपः ;सार्षेदी. – ४७५; ७६; ८५; ८६) – ऋ. ९.६.१–९; ९.७.१–९; ९.८.१–९; ९.९.१–९; ९.१०.१–९; ९.११.१–९; ९.12.१–९; ९.१३.१–९; ९.१४.१–८; ९.१५.१–८; ९.१६.१–८; ९.१७.१–८; ९.१८.

१–७; ६.१६.१–७; ६20.१–७; ६.2१.१–७; ६.22.१–७; ६.2३.१–७; ६.2४.१–७; सा ४७५; ४७६; ४८५–८६; ५०2; ५०६; ६५१; ६५2; ६५३; ७६१; ७६३; ६३५–६३७; ६६१–७४; ६६६; १०००–१००१; १०६३–६५; ११९६–३६; ११७८–१2०४; १2६६–७३

ऋ. ६.६.१–६

मन्द्रया सोम धारया वृषा पवस्व देवयुः। अव्यो वारेष्वस्मयुः ।।१।।
अभित्यं मद्यं मदमिन्दविन्द्र इति क्षर। अभि वाजिनो अर्वतः ।।2।।
अभि त्यं पूवर्यं मदं सुवानो अर्ष पवित्र आ। अभि वाजमुत श्रवः ।।३।।
अनु द्रप्सास इन्दव आपो न प्रवतासरन्। पुनाना इन्द्रमाशत ।।४।।
यमत्यमिव वाजिनं मृजन्ति योषणो दश। वने क्रीळन्तमत्यविम् ।।५।।
तं गोभिर्वृषणं रसं मदाय देववीतये। सुतं भराय सं सृज ।।६।।
देवो देवाय धारयेन्द्राय पवते सुतः। पयो यदस्य पीपयत् ।।७।।
आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः। प्रत्नं नि पाति काव्यम् ।।८।।
एवा पुनान इन्द्रयुर्मदं मदिष्ठ वीतये। गुहा चिद्दधिषे गिरः ।।६।।

ऋ. ६.७.१–६

असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः। विदाना अस्य योजनम् ।।१।।
प्र धारा मध्वो अग्रियो महीरपो वि गाहते। हविर्हविष्षु वन्द्यः ।।2।।
प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने। सदमाभि सत्यो अध्वरः ।।३।।
परि यत्काव्या कविर्नृम्णा वसानो अर्षति। स्वर्वाजी सिषसति ।।४।।
पवमानो अभि स्पृधो विशो राजेव सीदति। यदीमृण्वन्ति वेधसः ।।५।।
अव्यो वारे परि प्रियो हरिर्वनेषु सीदति। रेभो वनुष्यते मती ।।६।।
स वायुमिन्द्रमश्विना साकं मदेन गच्छति। रणा यो धर्मभिः ।।७।।
आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः। विदाना अस्य शक्मभिः ।।८।।
अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये। श्रवो वसूनि सं जितम् ।।६।।

ऋ. ६.८.१–६

एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन्। वर्धन्तो अस्य वीर्यम् ।।१।।
पुनानासश्चमूषदो गच्छन्तो वायमश्विना। ते नो धान्तु सुवीर्यम् ।।2।।
इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय। ऋतस्य योनिमासदम् ।।३।।
मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः। अनु विप्रा अमादिषुः ।।४।।
देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः। सं गोभिर्वासयामसि ।।५।।
पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यत ।।६।।
मघोन आ पवस्व नो जहि विश्वा अप द्विषः। इन्दो सखायमा विश ।।७।।
वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि। सहो नः सोम पृत्सु धाः ।।८।।
नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम्। भक्षीमहि प्रजामिषम् ।।६।।

ऋ. ६.६.१–६

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। सुवानो याति कविक्रतुः ।।१।।
प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे। वीत्यर्ष चनिष्ठया ।।2।।
स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा ।।३।।
स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः। या एकमक्षि वावृधुः ।।४।।
ता अभि सन्तमस्तृतं महे युवानमा दधुः। इन्दुमिन्द्र तव व्रते ।।५।।
अभि वह्निरमर्त्यः सप्त पश्यति वावहिः। क्रिविर्देवीरतर्पयत् ।।६।।
अवा कल्पेषु नः पुमस्तमांसि सोम योध्या। तानि पुनान जङ्घनः ।।७।।
नू नव्यसे नवीयसे सूक्ताय साधया पथः। प्रत्नवद्रोचया रुचः ।।८।।
पवमान महि श्रवो गामश्वं रसि वीरवत्। सना मेधां सना स्वः ।।६।।

ऋ. ९.१०.१–९

प्र स्वानासो रथ इवार्वन्तो न श्रवस्यवः। सोमासो राये अक्रमुः ।।१।।
हिन्वानासो रथा इव दधन्विरे गभस्त्योः। भरासः कारिणामिव ।।2।।
राजानो न प्रशस्तिभिः सोमासो गोभिरंजते। यज्ञो न सप्त धातृभिः ।।३।।
परि सुवानासस इन्दवो मदाय बर्हणा गिरा। सुता अर्षन्ति धारया ।।४।।
आपानासो विवस्वतो जनन्त उषसो भगम्। सूरा अण्वं वि तन्वते ।।५।।
अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः। वृष्णो हरस आयवः ।।६।।
समीचीनास आसते होतारः सप्तजामयः। पदमेकस्य पिप्रतः ।।७।।
नाभ नाभि न आ ददे चक्षुश्चित्सूर्ये सचा। कवेरपत्यमा दुहे ।।८।।
अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितम्। सूरः पश्यति चक्षसा ।।९।।

ऋ. ९.११.१–९

उपास्मै गायता नरः पवमानाये दवे। अभि देवाँ इयक्षते ।।१।।
अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः। देवं देवाय देवयु ।।2।।
स नः पवस्व शं गवे शं जनाय शर्मवते। शं राजन्नोषधीभ्यः ।।३।।
बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे। सोमाय गाथमर्चत ।।४।।
हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन। मधावा धावता मधु ।।५।।
नमसेदुप सीदत दध्नेदभि श्रीणीतन। इन्दुमिन्द्रे दधातन ।।६।।
अमित्रहा विचर्षणिः पवस्व सोम शं गवे। देवेभ्यो अनुकामकृत् ।।७।।
इन्द्राय सोम पातवे मदाय परि षिच्यसे। मनश्चिन्मनसस्पतिः ।।८।।
पवमान सुवीर्यं रयि सोम रिरीहि नः। इन्दविन्द्रेण नो युजा ।।९।।

ऋ. ९.१2.१–९

सोमा असृग्रमिन्दवः सुता ऋतस्य सादने। इन्द्राय मधुमत्तमाः ।।१।।
अभि विप्रा अनूषत गावो वत्सं न मातरः। इन्द्रं सोमस्य पीतये ।।2।।
मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित्। सोमो गौरी अधि श्रितः ।।३।।
दिवो नाभा विचक्षणोऽव्यो वारे महीयते। सोमो यः सुक्रतुः कविः ।।४।।
यः सोमः कलशेष्वाँ अन्तः पवित्र आहितः। तमिन्दुः परि षस्वजे ।।५।।
प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि। जिन्वन् कोशं मधुश्चुतम् ।।६।।
नित्यस्तोत्रो वनस्पतिर्धीनामन्तः सबर्दुघः। हिन्वानो मानुषा युगा ।।७।।
अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति। विप्रस्य धारया कविः।।८।।
आ पवमान धारय रयिं सहस्रवर्चसम्। अस्मे इन्दो स्वाभुवम् ।।९।।

ऋ. ९.१३.१–९

सोमः पुनानो अर्षति सहस्रधारो अत्यविः। वायोरिन्द्रस्य निष्कृतम् ।।१।।
पवमानमवस्यवो विप्रमभि प्र गायत। सुष्वाणं देववीतये ।।2।।
पवन्ते वाजसातये सोमाः सहस्रपाजसः। गृणाना देववीतये ।।३।।
उत नो वाजसातये पवस्व बृहतीरिषः। द्युमदिन्दो सुवीर्यम् ।।४।।
ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम्। सुवाना देवास इन्दवः ।।५।।
अत्या हियाना न हेतृभिरसृग्रं वाजसातये। वि वारमव्यमाशवः ।।६।।
वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः। दधन्विरे गभस्त्योः ।।७।।
जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत्। विश्वा अप द्विषो जहि ।।८।।
अपघ्नन्तो अरावणः पवमानाः स्वर्दृशः। योनावृतस्य सीदत ।।९।।

ऋ. ९.१४.१–८

परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः। कारं बिभ्रत् पुरुस्पृहम् ।।१।।
गिरा यदी सबन्धवः पंच व्राता अपस्यवः। परिष्कृण्वन्ति धर्णसिम् ।।2।।
आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत। यदी गोभिर्वसायते ।।३।।

निरिणानो वि धावति जहच्छर्याणि तान्वा। अत्रा सं जिघ्रते युजा ।।४।।
नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा। गाः कृण्वानो न निर्णिजम्।।५।।
अति श्रिती तिरश्चता गव्या जिगात्यण्व्या। वग्नुमियर्ति यं विदे ।।६।।
अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम्। पृष्ठा गृभ्णत वाजिनः ।।७।।
परि दिव्यानि मर्मृशद्विश्वनि सोम पार्थिवा। वसूनि याह्यस्मयुः ।।८।।

ऋ. ९.१५.१–८

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः। गच्छन्निन्द्रस्य निष्कृतम् ।।१।।
एष पुरू धियायते बृहते देवतातये। यत्रामृतास आसते ।।2।।
एष हितो वि नीयतेऽन्तः शुभ्रावता पथा। यदी तुंजन्ति भूर्णयः ।।३।।
एष शृंगाणि दोधुवच्छिशीते यूथ्यो३ वृषा। नुम्णा दधान ओजसा ।।४।।
एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पतिः सिन्धूनां भवन् ।।५।।
एष वसूनि पिब्दना परुषा ययिवाँ अति। अव शादेषु गच्छति ।।६।।
एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः ।।७।।
एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः। स्वायुधं मदिन्तमम् ।।८।।

ऋ. ९.१६.१–८

प्र ते सोतार ओण्यो३ रसं मदाय घृष्वये। सर्गो न तक्त्येतशः ।।१।।
क्रत्वा दक्षस्य रथ्यमपो वसानमन्धसा। गोषमण्वेषु सश्चिम ।।2।।
अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज। पुनीहीन्द्राय पातवे ।।३।।
प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति। क्रत्वा सधस्थमासदत् ।।४।।
प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत। महे भराय कारिणः ।।५।।
पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति ।।६।।
दिवो न सानु पिप्युषी धारा सुतस्य वेधसः। वृथा पवित्रे अर्षति ।।७।।
त्वं सोम विपश्चितं तना पुनान आयुषु। अव्यो वारं वि धावसि ।।८।।

ऋ. ९.१७.१–८

प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः। सोमा असृग्रमाशवः ।।१।।
अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव। इन्द्रं सोमासो अक्षरन् ।।2।।
अत्यूर्मिर्मतसरो मदः सोमः पवित्रे अर्षति। विघ्नन् रक्षांसि देवयुः ।।३।।
आ कलशेषु धावति पवित्रे परि षिच्यते। उक्थैर्यज्ञेषु वर्धते ।।४।।
अति त्री सोम रोचना रोहन्न भ्राजसे दिवम्। इष्णन्त्सूर्यं न चोदयः ।।५।।
अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः। दधानाश्चक्षसि प्रियम् ।।६।।
तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः। मृजन्ति देवतातये ।।७।।
मधोधारामनु क्षर तीव्रः सधस्थमामदः। चारुर्ऋताय पीतये ।।८।।

ऋ. ९.१८.१–७

परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः। मदेषु सर्वधा असि ।।१।।
त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः। मदेषु सर्वधा असि ।।2।।
तव विश्वे सजोषसो देवासः पीतिमाशत। मदेषु सर्वधा असि ।।३।।
आ यो विश्वनि वार्या वसूनि हस्तयोर्दधे। मदेषु सर्वधा असि ।।४।।
य इमे रोदसी मही सं मातरेव दोहते। मदेषु सर्वधा असि ।।५।।
परि यो रोदसी उभे सद्यो वाजेभिर्षति। मदेषु सर्वधा असि ।।६।।
स शुष्मी कलशेष्वा पुनानो अचिक्रदत्। मदेषु सर्वधा असि ।।७।।

ऋ. ९.१९.१–७

यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु। तन्नः पुनान आ भर ।।१।।
युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती। ईशाना पिप्यतं धियः ।।2।।
वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि। हरिः सन्योनिमासदत् ।।३।।

अवावशन्त धीतयो वृषभस्याधि रेतसि। सूनोर्वत्सस्य मातरः ।।४।।
कुविद्वृषण्यन्तीभ्यः पुनानो गर्भमादधत्। याः शुक्रं दुहते पयः ।।५।।
उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु। पवमान विदाा रयिम् ।।६।।
नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर। दूरे वा सतो अन्ति वा ।।७।।

ऋ. ६२०.१–७

प्र कविर्देववीतये ऽव्यो वारेभिरर्षति। साह्वान्विश्वा अभि स्पृधः ।।१।।
स हि ष्मा जारितृभ्य आ वाजं गोमन्तमिन्वति। पवमानः सहस्रिणम्।।2।।
परि विश्वनि चेतसा मृशसे पवसे मती। स नः सोम श्रवो विदः ।।३।।
अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम्। इषं स्तोतृभ्य आ भर ।।४।।
त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ। पुनानो वह्ने अद्भुत ।।५।।
स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति ।।६।।
क्रीळर्मखो न मंहयुः पवित्रं सोम गच्छसि। दधत्सतोत्रे सुवीर्यम् ।।७।।

ऋ. ६.२१.१–७

एते धावन्तीन्दवः सोमा इन्द्राय घृष्ण्यः। मत्सरासः स्वर्विदः ।।१।।
प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः। स्वयं स्तोत्रे वयस्कृतः ।।2।।
वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित्। सिन्धोरूर्मा व्यक्षरन् ।।३।।
एते विश्वानि वार्या पवमानास आशत। हिता न सप्तयो रथे ।।४।।
आस्मिन्पिशंगमिन्दवो दधाता वेनमादिशे। यो अस्मभ्यमरावा ।।५।।
ऋभुर्न रथ्यं नवं दधाता केतमादिशे। शुक्राः पवध्वमर्णसा ।।६।।
एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत। सतः प्रसाविषुर्मतिम् ।।७।।

ऋ. ६.22.१–७

एते सोमास आशवो रथाइव प्र वाजिनः। सर्गाः सृष्टा अहेषत ।।१।।
एते वाताइवारेवः पर्जन्यस्येव वृष्टयः। अग्नेरिव भ्रमा वृथा ।।2।।
एते पूता विपश्चितः सोमासो दध्याशिरः। विपा व्यानशुर्धियः ।।३।।
एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः। इयक्षन्तः पथो रजः ।।४।।
एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः। उतेदमुत्तमं रजः ।।५।।
तन्तुं तन्वानमुत्तममनु प्रवत आशत। उतेदमुत्तमाय्यम् ।।६।।
त्वं सोम पणिभ्य आ वसु गव्यानि धारयः। ततं तन्तुमचिक्रदः ।।७।।

ऋ. ६.२३.१–७

सोमा असृग्रमाशवो मधोर्मदस्य धारया। अभि विश्वानि काव्या ।।१।।
अनु प्रत्नास आयवः पदं नवीयो अक्रमुः। रुचे जनन्त सूर्यम् ।।2।।
आ पवमान नो भरार्यो अदाशुषो गयम्। कृधि प्रजावतीरिषः ।।३।।
अभि सोमास आयवः पवन्ते मद्यं मदम्। अभि कोशं मधुश्चुतम् ।।४।।
सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम्। सुवीरो अभिशस्तिपाः ।।५।।
इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः। इन्द्रो वाजं सिषाससि ।।६।।
अस्य पीत्वा मदानामिन्द्रो वृत्राण्यप्रति। जघान जघनच्च नु ।।७।।

ऋ. ६.२४.१–७

प्र सोमासो अधन्विषुः पवमानास इन्दवः। श्रीणाना अप्सु मृंजत ।।१।।
अभि गावो अधन्विषुरापो न प्रवता यतीः। पुनाना इन्द्रमाशत ।।2।।
प्र पवमान धन्वसि सोमेन्द्राय पातवे। नृभिर्यतो वि नीययसे ।।३।।
त्वं सोम नृमादनः पवस्व चर्षणीसहे। सस्निर्यो अनुमाद्यः ।।४।।
इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि। अरमिन्द्रस्य धाम्ने ।।५।।
पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः। शुचिः पावको अदभुतः ।।६।।
शुचिः पावक उच्यते सोमः सुतस्य मध्वः। देवावीरघशंसहा ।।७।।

सा. ४७५
परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत्। मदेषु सर्वधा असि ।।६।।
सा. ४७६
परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। स्वानैर्याति कविक्रतु ।।१०।।
सो. ४८५–८६
परि स्वानास इन्दवो मदाय बर्हणा गिरा। मधो अर्षन्ति धारया ।।६।।
परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः। कारुं विभ्रत्पुरुस्पृहम्।।१०।।
सो. ५०2
अनु प्रत्नास आयवः पदं नवीयो अक्रमुः। रुचे जनन्त सूर्यम् ।।६।।
सो. ५०६
मन्द्रया सोम धारया वृषा पवस्व देवयुः। अवया वारेभिरस्मयुः ।।१०।।
सो. ६५१–५३
उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ इयक्षते ।।१।।
अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः। देवं देवाय देवयु ।।2।।
स नः पवस्व शं गवे शं जनाय शमर्वते। शं राजन्नोषधीभ्यः ।।३।।
सो. ७६१
उप शिक्षापतस्थुषो भियसमा धेहि शत्रवे। पवमान विदा रयिम् ।।१।।
सो. ७६३
उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ इयक्षते ।।३।।
सो. ६३५–६३७
परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। स्वानैर्याति कविक्रतुः ।।१।।
स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा ।।2।।
प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः। वीत्यर्ष पनिष्टये ।।३।।
सा. ६६१–६७४
प्र सोमासो अधन्विषुः पवमानास इन्दवः। श्रीणाना अप्सु वृंजते ।।१।।
अभि गावो अधन्विषुरापो न प्रवता यतीः। पुनाना इन्द्रमाशत ।।2।।
प्र पवमान धन्वसि सोमेन्द्राय मादनः। नृभिर्यतो वि नीयसे ।।३।।
इन्दो यदद्रिभिः सुतः पवित्रं परिदीयसे। अरमिन्द्रस्य धाम्ने ।।४।।
त्वं सोम नृमादनः पवस्व चर्षणीधृतिः। सस्निर्यो अनुमाद्यः ।।५।।
पवस्व वृत्रहन्तम् उक्थेभिरनुमाद्यः। शुचिः पावको अद्भुतः ।।६।
शुचिः पावक उच्यते सोमः सुतः स मधुमान्। देवावीरघशंसहा ।।७।।
प्र कविर्देववीतयेऽव्या वारेभिरव्यत। साह्वान्विश्वा अभि स्पृधः ।।१।।
स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति। पवमानः सहस्रिणम्।।2।।
परि विश्वानि चेतसा मृज्यसे पवसे मती। स नः सोम श्रवो विदः ।।३।।
अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम्। इषं स्तोतृभ्य आ भर ।।४।।
त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ। पुनानो वह्ने अद्भुत ।।५।।
स वह्निश्रप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति ।।६।।
क्रीडुर्मखो न मंहयुः पवित्रं सोम गच्छसि। दध्त्स्तोत्रे सुवीर्यम् ।।७।।
सा. ६६६
यत्सोम चित्रमुक्थ्य दिव्यं पार्थिवं वसु। तन्नः पुनान आ भर ।।१।।
सा. १०००–१००१
वृषा पुनान आयुंषि स्तनयन्नधि बर्हिषि। हरिः सन्योनिमासदः ।।2।।
युवं हि स्थः स्वः पती इन्द्रश्च सोम गोपती। ईशाना पिप्यतं धियः ।।३।।
सा. १०६३–१०६५

परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत्। मदेषु सर्वधा असि ।।१।।
त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः। मदेषु सर्वधा असि ।।2।।
त्वे विश्वे सजोषसो देवासः पीतिमाशत। मदेषु सर्वधा असि ।।३।।

सा. ११९६–११३६

प्र स्वानासो रथा इवार्वन्तो न अवस्यवः। सोमासो राये अक्रमुः ।।४।।
हिन्वानासो रथा इव दधन्विरे गभस्त्योः। भरासः कारिणामिव ।।५।।
राजानो न प्रशस्तिभिः सोमासो गोभिरंजते। यज्ञो न सप्त धातृभिः ।।६।।
परि स्वानास इन्दवो मदाय बर्हणा गिरा। मधो अर्षन्ति धारया ।।७।।
आपानासो विवस्वतो जिन्वन्त उषसो भगम्। सूरा अण्वं वि तन्वते।।८।।
अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः। वृष्णा हरस आयवः ।।६।।
समीचीनास आशत होतारः सप्तजानयः। पदमेकस्य पिप्रतः ।।१०।।
नाभा नाभिं न आ दधे चक्षुषा सूर्यं दृशे। कवेरपत्यमा दुहे ।।११।।
अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितम्। सूरः पश्यति चक्षसा ।।१2।।
असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः। विदाना अस्य योजना ।।१।।
प्र धारा मधो अग्रियो महीरपो वि गाहते। हविर्हविःषु वन्द्य ।।2।।
प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने। सद्माभि सत्यो अध्वरः ।।३।।
परि यत्काव्या कविर्नृम्णा पुनानो अर्षति। स्वर्वाजी सिषासति ।।४।।
पवमानो अभि स्पृधो विशो राजेव सीदति। यदीमृण्वन्ति वेधसः ।।५।।
अव्या वारे परि प्रियो हरिर्वनेषु सीदति। रेभो वनुष्यते मती ।।६।।
स वायुमिन्द्रमश्विना साकं मदेन गच्छति। रणा यो अस्य धर्मणा ।।७।।
आ मित्रे वरुणे भगे मधो पवन्त ऊर्मयः। विदाना अस्य शक्मभिः ।।८।।
अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये। श्रवो वसूनि सजितम्।।६।।

सा. ११७८–१२०४

एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन्। वर्धन्तो अस्य वीर्यम् ।।१।।
पुनानासश्चमूषदो गच्छन्तो वायु मश्विना। ते नो धत्त सुवीर्यम् ।।2।।
इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय। देवानां योनिमासदम् ।।३।।
मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः ।
अनु विप्रा अमादिषुः ।।४।।
देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः। सं गोभिर्वासयामसि ।।५।।
पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यत ।।६।।
मघोन आ पवस्व नो जाहि विश्वा अप द्विषः। इन्दो सखायमा विश ।।७।।
नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम्। भक्षीमहि प्रजामिषम् ।।८।।
वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि। सहो नः सोम पृत्सु धाः ।।६।।
सोमः पुनानो अर्षति सहस्रधारो अत्यविः। वायोरिन्द्रस्य निष्कृतम् ।।१।।
पवमानभवस्यवो विप्रमभि प्र गायत। सुष्वाणं देववीतये ।।2।।
पवन्ते वाजसातये सोमाः सहस्रपाजसः। गृणाना देववीतये ।।३।।
उत नो वाजसातये पवस्व बृहतीरिषः। द्युमदिन्दो सुवीर्यम् ।।४।।
अत्या हियाना न हेतृभिरसृग्रं वाजसातये। वि वारमव्यमाशवः ।।५।।
ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम्। स्वाना देवास इन्दवः ।।६।।
वाश्राा अर्षन्तीन्दवोऽभि वत्सं न मातरः। दधन्विरे गभस्त्योः ।।७।।
जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत्। विश्वा अप द्विषो जहि ।।८।।
अपघ्नन्तो अरावणः पवमानाः स्वर्दृशः। योनावृतस्य सीदत ।।६।।
सोमा असृग्रमिन्दवः सुता ऋतस्य धारया। इन्द्राय मधुमत्तमाः ।।१।।
अभि विप्रा अनूषत गावो वत्सं न धेनवः। इन्द्रं सोमस्य पीतये ।।2।।

मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित्। सोमो गौरी अधि श्रितः ।।३।।
दिवो नाभा विचक्षणोऽव्या वारे महीयते। सोमो यः सुक्रतुः कविः ।।४।।
यः सोमः कलशेष्वा अन्तः पवित्र आहितः। तमिन्दुः परि षस्वजे ।।५।।
प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि। जिन्वन्कोशं मधुश्चुतम् ।।६।।
नित्यस्तोत्रो वनस्पतिर्धेनामन्तः सबर्दुघाम्। हिन्वानो मानुषा युजा ।।७।।
अ पवमान धारया रयिं सहस्रवर्चसम्। अस्मे इन्दो स्वाभुवम् ।।८।।
अभि प्रिया दिवः कविर्विप्रः स धारया सुतः। सोमो हिन्वे परावति ।।६।।

सा. १२६६–१२७३

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः। गच्छन्निन्द्रस्य निष्कृतम् ।।१।।
एष पुरू धियायते बृहते देवतातये। यत्रामृतास आशत ।।2।।
एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः ।।३।।
एष हितो वि नीयतेऽनतः शुन्ध्यावता पथा। यदी तुंजन्ति भूर्णयः ।।४।।
एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पति सिन्धूनां भवन् ।।५।।
एष शृंगाणि दोधवच्छिशीते यूथ्यो३ वृषा। नृम्णा दधान ओजसा ।।६।।
एष वसूनि पिब्दनः परुषाययिवाँ अति। अव शादेषु गच्छति ।।७।।
एतमुत्यं दश क्षिपो हरिं हिन्वन्ति यातवे। स्वायुधं मदिन्तमम् ।।८।।

१६. इध्मवाहो दार्ढच्युतः – ऋ. ६.2६.१–६

तममृक्षन्त वाजिनमुपस्थे अदितेरधि। विप्रासो अण्व्या धिया ।।१।।
तं गावो अभ्यनूषत सहस्रधारमक्षितम्। इन्दुं धर्तारमा दिवः ।।2।।
तं वेधां मेधयाह्यन्पवमानमधि द्यवि। धर्णासिं भूरिधायसम् ।।३।।
तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः। पतिं वाचो अदाभ्यम् ।।४।।
तं सानावधि जामयो हरिं हिन्वन्त्याद्रिभिः। हर्यतं भूरिचक्षसम् ।।५।।
तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम्। इन्दविन्द्राय मत्सरम् ।।६।।

२०. इन्द्र प्रमतिर् वासिष्ठः – ऋ. ६.६७.४–६; सा. ५३५

ऋ. ६.६७.४–६

प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय ।
स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः ।।४।।
इन्दुर्देवानामुप सख्यमायन्त्सहस्रधारः पवते मदाय ।
नृभिः स्तवानो अनु धाम पूर्वमगन्निन्द्रं महते सौभगाय ।।५।।
स्तोत्रे राये हरिरर्षा पुनान इन्द्रं मदो गच्छतु ते भराय ।
देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः।।६।।

सा. ५३५

प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय ।
स्वादुः पवतामति वारमव्यमा सीदतु कलशं देव इन्दुः ।।३।।

२१. उचथ्यः – ऋ. ६.५०.१–५; ६.५१.१–५; ६.५2.१–५

ऋ. ६.५०.१–५

उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः। वाणस्य चोदया पविम् ।।१।।
प्रसवे त उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि ।।2।।
अव्यो वारे परि प्रियं हरिं हिन्वन्त्यद्रिभिः। पवमानं मधुश्चुतम् ।।३।।
आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम् ।।४।।
स पवस्व मदिन्तम गोभिरंजानो अत्तु□भिः। इन्दविन्द्राय पीतये ।।५।।

ऋ. ६.५१.१–५

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज। पुनीहीन्द्राय पातवे ।।१।।

दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम् ।।2।।
तव त्य इन्दो अन्धसो देवा मधोर्व्यश्नते। पवमानस्य मरुतः ।।३।।
त्वं हि सोम वर्धयन्त्सुतो मदाय भूर्णये। वृषन्त्स्तोतारमूतये ।।४।।
अभ्यर्ष विचक्षण पवित्रं धारया सुतः। अभि वाजमुत श्रवः ।।५।।

ऋ. ९.५2.१–५

परि द्युक्षः सन्द्रयिर्भरद्वाजं नो अन्धसा। सुवानो अर्ष पवित्र आ ।।१।।
तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः। सहस्रधारो यात्तना ।।2।।
चरुर्न यस्तमीङ्खयेन्दो न दानमीङ्खय। वधैर्वधस्नवीङ्खय ।।३।।
नि शुष्मिन्दवेषां पुरुहूत जनानाम्। यो अस्माँ आदिदेशति ।।४।।
शतं न इन्द ऊतिभिः सहस्रं वा शुचीनाम्। पवस्व मंहयद्रयिः ।।५।।

22. १. उचथ्य आंगिरस – सा. ४९६; ४९९; १२०५–१२०९; १२25–१227

सा. ४९६

परि द्युक्षं सनद्रयिं भरद्वाजं नो अन्धसा। स्वानो अर्ष पवित्र आ ।।१०।।

सा. ४९९

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय। पुनाहीन्द्राय पातवे ।।३।।

सा. १२०५–१२०९

उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः। वाणस्य चोदया पविम् ।।१।।
प्रसवे त उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि ।।2।।
अव्या वारैः परिप्रियं हरिं हिन्वन्त्यद्रिभिः। पवमानं मधुश्चुतम् ।।३।।
आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम् ।।४।।
स पवस्व मदिन्तम गोभिरंजानो अक्तुभिः। एन्द्रस्य जठरं विश ।।५।।

सा. १225–१227

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय। पुनाहीन्द्राय पातवे ।।१।।
तव त्यइन्दो अन्धसो देवा मधोर्व्याशत। पवमानस्य मरुतः ।।2।।
दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम् ।।३।।

2३. उपमन्युः वासिष्ठः – सा. ८०६–८०८

वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेमाम् ।।१।।
रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।
पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ।।2।।
एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् ।
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ।।३।।

2४. प्रमन्युर् वासिष्ठः – ऋ. ९.९७.१३–१५

वृषा शोणो अभिकनिक्रदद्रा नदयन्नेति पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेमाम् ।।१३।।
रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।
पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ।।१४।।
एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नैः ।
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः।।१५।।

2५. उरु – ऋ. ९.१०८.४–५

येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।
देवानां सम्ने अमृतस्य चारुणो येन श्रवांस्यानशुः ।।४।।

एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः। क्रीळन्नूर्मिरपामिव ।।५।।

२६. उरुर् आंगिरसः – सा. ५८४; ६३६

सा. ५८४

एष स्य धारया सुतोऽव्या वारेभिः पवते मदिन्तमः। क्रीळन्नूर्मिरपामिव ।।७।।

सा. ६३६

येना नवग्वा दध्यङ्ङयोर्णुते येन विप्रास आपिरे ।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्याशत ।।2।।

२७. उर्ध्वसद्मा – ऋ. ९.१०८.८–९

सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने ।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ।।८।।
अभि धुम्नं बृहद्यश इषस्पते दिदीहि देव देवयुः। वि कोशं मध्यमं युव ।।९।।

२८. उशना – ऋ. ९.८७.१–९; ९.८८.१–८; ९.८९.१–७

ऋ. ९.८७.१–९

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ।।१।।
स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ।।2।।
ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।
स चिद्विवेद निहितं यदासामपीच्यं१ गुह्यं नाम गोनाम् ।।३।।
एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।
सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ।।४।।
एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।
पवित्रेभिः पवमाना असृग्रंछ्रवस्यवो न पृतनाजो अत्याः ।।५।।
परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना पूयमानः ।
अथा भर श्येनभृत प्रयांसि रयिं तुंजानो अभि वाजमर्ष ।।६।।
एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।
तिग्मे शिशानो महिषो न शृंगे गा गव्यन्नभि शूरो न सत्वा ।।७।।
एषा ययौ परमादन्तरद्रेः कुचित्सतीरूर्वे गा विवेद ।
दिवो न विद्युत्सतनयन्त्यभ्रैः सोमस्य ते पवत इन्द्र धारा ।।८।।
उत स्म राशि परि यासि गोनामिन्द्रेण सोम सरथं पुनानः ।
पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत् ।।९।।

ऋ. ९.८८.१–८

अयं सोम इन्द्रं तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ।।१।।
स ईं रथो न भुरिषळयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ।।2।।
वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शंभविष्ठः ।
विश्ववारो द्रविणोदा इव त्मन्पूषेव धीजवनोऽसि सोम ।।३।।
इन्द्रो न यो महा कर्माणि चक्रिर्हन्ता वृत्राणामसि सोम पूर्भित् ।
पैद्वो न हि त्वमहिनाम्ना हन्ता विश्वस्यासि सोम दस्योः ।।४।।
अग्निर्न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु ।
जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिम् ।।५।।
एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।

वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ।।६।।
शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ।।७।।
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्टवमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ।।८।।

ऋ. ६.८६.१–७

प्रो स्य वह्निः पथ्यभिरस्यान्दिवो न वृष्टिः पवमानो अक्षाः ।
सहस्रधारो असदन्न्य१स्मे मातुरुपस्थे वन आ च सोमः ।।१।।
राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठाम् ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाम् ।।2।।
सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ।।३।।
मधुपृष्ठं घोरमयासमश्वं रथे युज्जन्त्युरुचक्र ऋष्वम् ।
स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनमूर्जयन्ति ।।४।।
चतस्र ईं घृतदुहः सचन्ते समाने अन्तर्धरुणे निषत्ताः ।
ता ईमर्षन्ति नमसा पुनानास्ता ईं विश्वतः पवरि षन्ति पूर्वीः ।।५।।
विष्टम्भे दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य ।
असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इन्द्रियाय ।।६।।
वन्वन्नवातो अभि देववीतिमिन्द्राय सोम वृत्रहा पवस्व ।
शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम ।।७।।

२६. उशना काव्यः – सा. ५2३; ५३१; ६७७–६७६; १४७१–१४७३

सा. ५2३

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ।।१।।

सा. ५३१

एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ।।६।।

सा. ६७७–६७६

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ।।१।।
स्वायुधः पवते देव इन्दुशस्तिहा वृजना रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ।।2।।
ऋषिर्विप्रः पुर एता जनानामृभुर्धीर उशना काव्यने ।
न चिद्विवेद निहितं यदासापीच्यां३ गुह्यं नाम गोनाम् ।।३।।

सा. १४७१–१४७३

अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ।।१।।
स ईं रथो न भुरिषडयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ।।2।।
शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाणत यज्ञः ।।३।।

३०. ऊर्ध्व सद्मा आंगिरसः – सा. ५७६; १०११; १३६५

सा. ५७६

अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देव्युम्। वि कोशं मध्यमं युव ।।2।।

सा. १०११

अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम्। वि कोशं मध्यमं युव ।।१।।

सा. १३६५

सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने ।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ।।2।।

३१. ऋणंचयः – ऋ. ६.१०८.12–१३

वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपंज्योतिषा तमः।
स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा।।12।।
स सुन्वे यो वसूना यो रायामानेता य इळनाम्। सोमो यः सुक्षितीनाम् ।।१३।।

३2. ऋणंचयो आंगिरसः – सा. ५८2

स सुन्वे यो वसूनां यो रायामानेता य इडानाम्। सोमो यः सुक्षितीनाम् ।।५।।

३३. ऋणंचयो राजर्षिः – सा. १०६६

स सुन्वे यो वसूनां यो रायामानेता य इडानाम्। सोमो यः सुक्षितीनाम् ।।१।।

३४. ऋजिष्वा – ऋ. ६.१०८.६–७

य उस्रिया अप्या अन्तरश्मनो निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्वयं वर्मीव धृष्णवा रुज ।।६।।
आ सोता परि षिंचताश्वं न स्तोममप्तुरं रजस्तुरम् ।
वनऋक्षुमुदप्रुतम् ।।७।।

३५. ऋजिश्वा भारद्वाजः – सा. ५८०; ५८५; १३६४

सा. ५८०

आ सोता परि षिंचताश्वं न स्तोममप्तुरं रजस्तुरम्। वनप्रक्षमुदप्रुतम्।।३।।

सा. ५८५

य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ।।८।।

सा. १३६४

आ सोता परि षिंचताश्वं न स्तोममप्तुरं रजस्तुरम्। वनप्रक्षमुदप्रुतम् ।।१।।

३६. ऋषभो वैश्वामित्रः – ऋ. ६.७१.१–६

आदक्षिणा सृज्यते शुष्म्या३ सदं वेति द्रुहो रक्षसः पाति जागृविः ।
हरिरोपशं कृणुते नभस्पय उपस्तिरे चम्वो३ र्ब्रह्म निर्णिजे ।।१।।
प्र कृष्टिहेव शूष एति रोरुवद सुर्यं१ वर्णं नि रिणीते अस्य तम् ।
जहाति वव्रिं पितुरेतिं निष्कृतमुपप्रुतं कृणुते निर्णिजं तना ।।2।।
अद्रिभिः सुतः पवते गभस्त्योर्वृषायते नभसा वेपते मती ।
स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि ।।३।।
परि द्युक्षं सहसः पर्वतावृधं मध्वः सिंचन्ति हर्म्यस्य सक्षणिम् ।
आ यस्मिन्गावः सुहुताद ऊधनि मूर्धंछ्रीणन्त्यग्रियं वरीमभिः ।।४।।
समी रथं न भुरिजोरहेषत दश स्वसारो अदितेरुपस्थ आ ।
जिगादुप ज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन् ।।५।।
श्येनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति ।
ए रिणन्ति बर्हिषि प्रियं गिराश्वो न देवाँ अप्येति यज्ञियः ।।६।।
परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि ।
सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति ।।७।।

त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः ।
अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ।।८।।
उक्षेव यूथा परियन्नरावीदधि त्विषीरधित सूर्यस्य ।
दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ।।९।।

३७. कक्षीवान (दैर्धतमसः औशिजः) – ऋ. ९.७४.१–९

शिशुर्न जातोऽव चक्रदद्वने स्व१र्यद्वाज्यरुषः सिषासति ।
दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म सप्रथः ।।१।।
दिवो यः स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः ।
सेमे मही रोदसी यक्षदावृता समीची ने दाधार समिषः कविः ।।2।।
महि प्सरः सुकृतं सोम्यं मधूर्वी गव्यूतिरदितेर्ऋतं यते ।
ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिर्ऋग्मियः ।।३।।
आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।
समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव महन्ति पेरवः ।।४।।
अरावीदंशुः सचमान ऊर्मिणा देवाव्यं१ मनुषे पिन्वति त्वचम् ।
दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ।।५।।
सहस्रधारेऽव ता असश्चतस्तृतीये सन्तु रजसि प्रजावतीः ।
चतस्रो नाभो निहिता अबो दिवो हविर्भरन्त्यमृतं घृतश्चुतः ।।६।।
श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः ।
धिया शमी सचते सोमभि प्रवद्दिवस्कबन्धमव दर्षदुद्रिणम् ।।७।।
अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्रमीत्ससवान् ।
आ हिन्विरे मनसा देवयन्तः कक्षीवते शतहिमाय गोनाम् ।।८।।
अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति ।
स मृज्यमानः कविभिर्मदिन्तम स्वदस्वेन्द्राय पवमान पीतये ।।९।।

३८. कण्वः – ऋ. ९.९४.१–४

अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूर्ये न विशः ।
अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ।।१।।
द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त ।
धियः पिन्वानाः स्वसरे न गाव ऋतायन्तीरभि वावश्र इन्दुम् ।।2।।
परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा ।
देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः ।।३।।
श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ ।।४।।

३९. कण्वो घौरः – सा. ५३९

अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः ।
अपो वृणानः पवते कवीयान्व्रजं न पशुवर्धनाय मन्म ।।७।।

४०. कर्णश्रुत्वासिष्ठः – ऋ. ९.९७.22–2४

तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षेरनीके ।
आदीमायन्वरमा वावशाना जुष्टं पति कलशे गाव इन्दुम् ।।22।।
प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः ।
धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम ।।2३।।
पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानाम् ।
द्विता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विन्दुः ।।2४।।

४१. कर्णश्रुद् वासिष्ठः (साग्री.सास्वा. ऋसर्व.); दृढीको वासिष्ठः (सार्षेदी.) – सा. ५३७

तक्षद्यदी मनसो वेनतो वाग् जयेष्ठस्य धर्मं द्युक्षोरनीके ।
आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ।।५।।

४2. कविः – ऋ. ६.७५.१–५; ६.७६.१–५; ६.७७.–५; ६.७८.१–५; ६.७६.१–५

ऋ. ६.७५.१–५

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वंचमरुहद्विचक्षणः ।।१।।
ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः।
दधति पुत्रः पित्रोरपीच्यं१ नाम तृतीयमधि रोचने दिवः ।।2।।
अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिरण्यये ।
अभीमृतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजति ।।३।।
अद्रिभिः सुतो मातिभिश्चनोहितः प्ररोचयन्नोदसी मातरा शुचिः ।
रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिदिवे।।४।।
परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम् ।
ये ते मदा आहनसो विहायस्तेभिरिन्द्रं चोदय दातवे मघम् ।।५।।

ऋ. ६.७६.१–५

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते नदीष्वा ।।१।।
शूरो न धत्त आयुधा गभस्त्योः स्व१ः सिषासन्नथिरो गविष्टिषु ।
इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ।।2।।
इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।
प्रणः पिन्व विद्युदभ्रेव रोदसी धिया न वाजाँ उप मासि शश्चतः ।।३।।
विश्वस्य राजा पवते स्वर्दृशं ऋतस्य धीतिमृषिषाळवीवशत् ।
यः सूर्यस्यासिरेण मृज्यते पिता मतीनामसमष्टकाव्यः ।।४।।
वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत् ।
स इन्द्राय पवसे मत्सरिन्तमो यथा जेषाम समिथे त्वोतयः ।।५।।

ऋ. ६.७७.–५

एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टरः ।
अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः ।।१।।
स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः ।
स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ।।2।।
ते नः पूर्वास उपरास इन्दवो महे वाजाय धन्वन्तु गोमते ।
ईक्षेण्यासो अह्यो३न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ।।३।।
अयं नो विद्वान्वनवद्वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः ।
इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजम् ।।४।।
चाक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते ।
असावि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत् ।।५।।

ऋ. ६.७८.१–५

प्र राजा वाचं जनयन्नसिष्यददपो वसानो अभि गा इयक्षति ।
गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतभ् ।।१।।
इन्द्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने ।
पूर्वीहि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः ।।2।।
समुद्रिया अप्सरसो मनीषिणमासीना अन्तरभि सोमक्षरन् ।
ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम् ।।३।।

गोजिन्नःसोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् ।
यं देवसश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम् ।।४।।
एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन्द्रविणान्यर्षसि ।
जहि शुत्रुमन्तिके दूरके च य उर्वी गव्यूतिमभयं च नस्कृधि ।।५।।

ऋ. ६.७६.१–५

अचोदसो नो धन्वन्त्विन्दवः प्र सुवानासो बृहद्दिवेषु हरयः ।
वि च नशन्न इषो अरातयोऽर्यो नशन्त सनिषन्त नो धियः ।।१।।
प्र णो धन्वन्त्विन्दवो मदच्युतो धना वा येभिरर्वतो जुनीमसि ।
तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि विश्वधा भरेमहि ।।2।।
उत स्वस्या अरात्या अरिर्हि ष उतान्यस्या अरात्या वृको हि षः ।
धन्वन्न तृष्णा समरीत ताँ अभि सोम जहि पवमान दुराध्यः ।।३।।
दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।
अद्रयस्त्वा बप्सति गोरधि त्वच्य१प्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ।।४।।
एवा त इन्दो सुभ्वं सुपेशसं रसं तुंजन्ति प्रथमा अभिश्रियः ।
निदनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ।।५।।

४३. कविर् भार्गवः – ऋ. ६.४७.१–५; ६.४८.१–५; ६.४६.१–५; सा. ५०७; ५५४–५५६; ५५८; ७००–७02; ८३६–८४०; 122८–1230; १४३५–१४३६

ऋ. ६.४७.१–५

अया सोमः सुकृत्यया महश्चिदभ्यवर्धत। मन्दान उद्वृषायते ।।१।।
कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा। ऋणा च धृष्णुश्चयते ।।2।।
आत्सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत्। उक्थं यदस्य जायते ।।३।।
स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति। यदी मर्मृज्यते धियः ।।४।।
सिषासतू रयीणां वाजेष्वर्वतामिव। भरेषु जिग्युषामसि ।।५।।

ऋ. ६.४८.१–५

तं त्वा नृम्णनि बिभ्रतं सधस्थेषु महो दिवः। चारुं सुकृत्ययेमहे ।।१।।
संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम् ।।2।।
अतस्त्वा रयिमभि राजानं सुक्रतो दिवः। सुपर्णो अव्यथिर्भरत् ।।३।।
विश्वस्मा इत्स्वर्दृशे साधरणं रजस्तुरम्। गोपामृतस्य विर्भरत् ।।४।।
अधा हिन्वान् इन्द्रियं ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणि ।।५।।

ऋ. ६.४६.१–५

पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः ।।१।।
तया पवस्व धारया यया गाव इहागमन्। जन्यास उप नो गृहम् ।।2।।
घृतं पवस्व धारया यज्ञेषु देववीतमः। अस्मभ्यं वृष्टिमा पव ।।३।।
स न ऊर्जे व्य१ व्ययं पवित्रं धाव धारया। देवासः शृणवन्हि कम्।।४।।
पवमानो असिष्यदद्रक्षांस्यजपङ्घनत्। प्रत्नवद्वोचयन् रुचः ।।५।।

सा. ५०७

अया सोम सुकृत्यया महान्त्सन्न भ्यवर्धथाः। मन्दान इद् वृषायसे ।।११।।

सा. ५५४–५५६

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वश्चमरुहद्विचक्षणः ।।१।।
अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद्देवेषु हरयः ।
वि चिदश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ।।2।।

एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः ।
अभ्यृ३तस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ।।३।।

सा. ५५८

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ।।५।।

सा. ७००–७०२

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वंचमरुहद्विचक्षणः ।।१।।
ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।
दधाति पुत्रः पित्रोरपीच्यां३नाम तृतीयमधि रोचनं दिवः ।।2।।
अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमाणः कोश आ हिरण्यये ।
अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजसि ।।३।।

सा. ८३६–८४०

तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः चारुं सुकृत्ययेमहे ।।१।।
संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम् ।।2।।
अतस्त्वा रयिरभ्ययद्राजानं सुक्रतो दिवः सुपर्णो अव्यथी भरत् ।।३।।
अध हिन्वान इन्द्रियं ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणिः ।।४।।
विश्वस्मा इत् स्वर्दृशे साधारणं रजस्तुरम्। गोपामृतस्य विर्भरत् ।।५।।

सा. १२२८–१२३०

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ।।१।।
शूरो न धत्त आयुधा गभस्त्योः स्वा३ः सिषासन्रथिरो गविष्टिषु ।
इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अजयते मनीषिभिः ।।2।।
इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।
प्र नः पिन्व विद्युदभ्रेव रोदसी धिया नो वाजाँ उप माहि शश्वतः ।।३।।

सा. १४३५–१४३९

पवस्व वृष्टिमा सुनोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः ।।१।।
तया पवस्व धारया यया गाव इहागमन्। जन्यास उप नो गृहम् ।।2।।
घृतं पवस्व धारया यज्ञेषु देववीतमः। अस्मभ्यं वृष्टिमा पव ।।३।।
स न ऊर्जे व्य३व्ययं पवित्रं धाव धारया। देवासः शृणवन् हि कम् ।।४।।
पवमानो असिष्यदद्रक्षांस्यपजङ्घनत्। प्रत्नवद्रोचयन्रुचः ।।५।।

४४. कश्यपः – ऋ. ९.६४.१–३०; ९.६७.४–६; ९.९१.१–६; ९.११३.१–११; ९.११४.१–४; सा. ६५६

ऋ. ९.६४.१–३०

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे ।।१।।
वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः। सत्यं वृषन् वृषेदसि ।।2।।
अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः। वि नो राये दुरो वृधि।।३।।
असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः ।।४।।
शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये ।।५।।
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या ।।६।।
पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः ।।७।।
केतुं कृण्वन्दिस्वपरि विश्वा रूपाभ्यर्षसि। समुद्रः सोम पिन्वसे ।।८।।
हिन्वानो वाचमिष्यसि पवमान विधर्मणि। अक्रान्देवो न सूर्यः ।।९।।

इन्दुः पविष्ट चेतनः प्रियः कवीनां मती। सृजदश्वं रथीरिव ।।१०।।
ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत्। सीदन्नृतस्य योनिमा ।।११।।
स नो अर्ष पवित्र आ मदो यो देववीतमः। इन्द्रविन्द्राय पीतये ।।१2।।
इषे पवस्व धारया मृज्यमानो मनीषिभिः। इन्द्रो रुचाभि गा इहि ।।१३।।
पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः। हरे सृजान आशिरम् ।।१४।।
पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्यतः ।।१५।।
प्र हिन्वानास इन्दवोऽच्छा समुद्रमाशवः। धिया जूता असृक्षत ।।१६।।
मर्मृजानास आयवो वृथा समुद्रमिन्दवः। अग्मन्नृतस्य योनिमा ।।१७।।
परि णो याह्यसमयुर्विश्वा वसून्योजसा। पाहि नः शर्म वीरवत् ।।१८।।
मिमाति वह्निरेतशः पदं युजान ऋक्वभिः। प्र यत्समुद्र आहितः ।।१९।।
आ यद्योनिं हिरण्यमाशुर्ऋतस्य सीदति। जहात्यप्रचेतसः ।।2०।।
अभि वेना अनूषतेयक्षन्ति प्रचेतसः मज्जन्त्यविचेतसः ।।2१।।
इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः। ऋतस्य योनिमासदम् ।।22।।
तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः। संत्वा मृजन्त्यायवः।।2३।।
रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे। पवमानस्य मरुतः ।।2४।।
त्वं सोम विपश्चितं पुनानो वाचमिष्यसि। इन्दो सहस्रभर्णसम् ।।2५।।
उतो सहस्रभर्णसं वाचं सोम मखस्युवम्। पुनान इन्दवा भर ।।2६।।
पुनान इन्दवेषां पुरुहूत जनानाम्। प्रियः समुद्रमा विश ।।2७।।
दविद्युतत्या रुचा परिष्टोभन्त्या कृपा। सोमाः शुक्रा गवाशिरः ।।2८।।
हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत्। सीदन्तो वनुषो यथा ।।2९।।
ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः। पवस्व सूर्यो दृशे ।।३०।।

ऋ. ९.६७.४–६

इन्दुर्हिन्वानो अर्षति तिरो वाराण्यव्यया। हरिर्वाजमचिक्नदत् ।।४।।
इन्दो व्यव्यमर्षसि वि श्रवांसि वि सौभगा। वि वाजान्त्सोम गोमतः ।।५।।
आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम्। भरा सोम सहस्रिणम् ।।६।।

ऋ. ९.९१.१–६

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी ।
दश स्वसारो अधि सानो अव्येऽजन्ति वह्निं सदनान्यच्छ ।।१।।
वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुष्येभिरिन्दुः ।
प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः ।।2।।
वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः ।
सहस्रमृक्वा पथिमिर्वचोविदध्वस्मभिः सूरो अण्वं वि याति ।।३।।
रुजा दृळहा चिद्रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान् ।
वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ।।४।।
स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः ।
ये दुष्षहासो वनुषा बृहन्तस्ताँस्ते अश्याम पुरुकृत्पुरुक्षो ।।५।।
एवा पुनानो अपः स्व१र्गा अस्मभ्यं तोका तनयानि भूरि ।
शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ।।६।।

ऋ. ९.११३.१–११

शर्यणावति सोममिन्द्रः पिबतु वृत्रहा ।
बलं दधान आत्मनि करिष्यन्वीर्यं महदिन्द्रायेन्दो परि स्रव ।।१।।
आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः ।
ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परि स्रव ।।2।।
पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिताभरत् ।

तं गन्धवाः प्रत्यगृभ्णन्तं सोमे रसमादधुरिन्द्रायेन्दो परि स्रव ।।३।।
ऋतं वदन्नृतद्युम्न सत्यं वदन्त्सत्यकर्मन् ।
श्रद्धां वदन्त्सोम राजन्धात्रा सोम परिष्कृत इन्द्रायेन्दो परि स्रव ।।४।।
सत्यमुग्रस्य बृहतः सं स्रवन्ति संस्रावाः ।
सं यन्ति रसिनो रसाः पुनानो ब्राह्मणा हर इन्द्रायेन्दो परि स्रव ।।५।।
यत्र ब्रह्मा पवमान छन्दस्यां३ वाचं वदन् ।
ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्निन्द्रायेन्दो परि स्रव ।।६।।
यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितम् ।
तस्मिन्मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परि स्रव ।।७।।
यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।
यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ।।८।।
यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।
लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ।।९।।
यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।
स्वधा च यत्र तृप्श्चि तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ।।१०।।
यत्रानदाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामास्तत्र माममृतं कुधीन्द्रायेन्दो परि स्रव ।।११।।

ऋ. ९.११४.१–४

य इन्दोः पवमानस्यानु धामान्यक्रमीत् ।
तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इन्द्रायेन्दो परि स्रव ।।१।।
ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः ।
सोमं नमस्य राजानं यो जज्ञो वीरुधां परिरिन्द्रायेन्दो परि स्रव ।।2।।
सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।
देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्दो परि स्रव ।।३।।
यत्ते राजंछृतं हविस्तेन सोमाभि रक्ष नः ।
अरातीवा मा नस्तारीन्मो च नः चनामममदिन्द्रायेन्दो परि स्रव ।।४।।

सा. ९५६

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्धयं स्याम भुवनेषु जीवसे ।।2।।

४५. **कश्यपो मारीचः – सा. ४७2; ४८१; ४८2; ५०४; ५०५; ५४३; ६५४–६५६; ७८१–७८३; ८४१–८४३; ६५८–६६०; १०३४–१०३६; १०७६–१०७८**

सा. ४७2

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः। अर्कस्य योनिमासदम् ।।६।।

सा. ४८१–४८2

इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः। सृजदश्वं रथीरिव ।।५।।
असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासोा वीरयाशवः ।।६।।

सा. ५०४–५०५

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः। वृषा धर्माणि दध्रिषे ।।८।।
इषे पवस्व धारया मृज्यमानो मनीषिभिः। इन्दो रुचाभि गा इहि ।।९।।

सा. ५४३

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा ।
दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निं सदनेष्वच्छ ।।११।।

सा. ६५४–६५६

दविद्युतत्या रुचा परिष्टोभन्त्या कृपा। सोमाः शुक्रा गवाशिरः ।।१।।
हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत्। सीदन्तो वनुषो यथा ।।2।।
ऋधक्सोम स्वस्तये संजग्मानो दिवा कवे। पवस्व सूर्यो दृशे ।।३।।

सा. ७८१–७८३

वृषा सोम द्युमां असि वृषा देव वृषव्रतः। वृषा धर्माणि दध्रिषे ।।१।।
वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा सुतः। स त्वं वृषन्वृषेदसि ।।2।।
अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः।वि नो राये दुरो वृधि ।।३।।

सा. ८४१–८४३

इषे पवस्व धारया मृज्यमानो मनीषिभिः। इन्दो रुचाभि गा इहि ।।१।।
पुनानो परिवस्कृध्यूर्जं जनाय गिर्वणः। हरे सृजान आशिरम् ।।2।।
पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्हितः ।।३।।

सा. ६५८–६६०

पवमानस्य विश्वविठा ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः ।।१।।
केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि। समुद्रः सोम पिन्वसे ।।2।।
जज्ञानो वाचमिष्यसि पवमान विधर्मणि। क्रन्दन्देवो न सूर्यः ।।३।।

सा. १०३४–१०३६

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः ।।१।।
शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये ।।2।।
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या ।।३।।

सा. १०७६–१०७८

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः। अर्कस्य योनिमासदम् ।।१।।
तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिम्। सं त्वा मृजन्त्यायवः ।।2।।
रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे। पवमानस्य मरुतः ।।३।।

४६. कुत्स आंगिरसः – सा. ५४१; ११०४–११०६; १४2६–१४2८

सा. ५४१

अया पवा पवस्वैना वसूनि माँ श्चतव इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ।।६।।

सा. ११०४–११०६

अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ।।१।।
उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनद्रणाय ।।2।।
महीमे अस्य वृष नाम शूषे मांश्चत्वे वा पृशने वा वधत्रे ।
अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ।।३।।

सा. १४2६–१४2८

अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः ।
अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम ।।१।।
अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।
अभिचन्द्रा भर्तवे नो हिरण्याभ्यश्वानरथिनो देव सोम ।।2।।

४७. कृतयशा आंगिरसः – ऋ. ९.१०८.१०; सा. ५८१; १०१2

ऋ. ९.१०८.१०

आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः ।
वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः ।।१०।।

सा. ५८१

एतमु त्यं मदच्युतं सहस्राधारं वृषभं दिवोदुहम्। विश्वा वसूनि बिभ्रतम् ।।४।।

सा. १०१२

आ वच्यस्व सुदक्ष चम्वोः सुतो विशां बह्निर्न विश्पतिः ।
वृष्टिं दिवः पवस्व रीतिमपो जिन्वन् गविष्टये धियः ।।2।।

४८. गृत्समदः शौनकः (साग्री.सास्वा. ऋसर्व.); कुत्स आंगिरसः (सार्षेदी.) – सा. ५६४

अंजते व्यंजुते समंजते क्रतुं रिहन्ति मध्वाभ्यंजुते ।
सिन्धोरुछ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ।।११।।

४६. गृत्समदः शौनकः (सार्षेदी.) कुत्स आंगिरसः; गृत्समदः(साग्री. सास्वा.) – सा. ५६०

त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाभ शश्वत् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।५।।

५०. गोतमः – ऋ. ६.३१.१–६; ६.६७.७–६

ऋ. ६.३१.१–६

प्र सोमासः स्वाध्य१ः पवमानासो अक्रमुः। रयिं कृण्वन्ति चेतनम् ।।१।।
दिवस्पृथिव्या अधि भवेन्दो द्युम्नवर्धनः। भवा वाजानां पतिः ।।2।।
तुभ्यं वाता अभिप्रियस्तुभ्यमर्षन्ति सिन्धवः। सोम वर्धन्ति ते महः ।।३।।
आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे ।।४।।
तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम्। वर्षिष्ठे अधि सानवि ।।५।।
स्वायुधस्य ते सुतो भुवनस्य पते वयम्। इन्दो सखित्वमुश्मसि ।।६।।

ऋ. ६.६७.७–६

पवमानास इन्दवस्तिरः पवित्रमाशवः। इन्द्र यामेभिराशत ।।७।।
ककुहः सोम्यो रस इन्द्ररिन्द्राय पूर्व्यः। आयुः पवत आयवे ।।८।।
हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम्। अभि गिरा समस्वरन् ।।६।।

५१ गोरवीति शाक्त्यः – सा. ५७८; ६६2–६६३

सा. ५७८

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः ।।६।।

सा. ६६2–६६३

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ।।१।।
यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीत्वा स्वर्विदः ।
स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ।।2।।

५2. गौरिवीतिः – ऋ. ६.१०८.१–2

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ।।१।।
यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीता स्वर्विदः ।
स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ।।2।।

५३. चक्षुर् मानवः – ऋ. ६.१०६.४–६; सा. ५६७

ऋ. ६.१०६.४–६

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव। द्युमन्तं शुष्ममा भरा स्वर्विदम् ।।४।।
इन्द्राय वृषणं मदं पवस्व विश्वदर्शतः। सहस्रयामा पथिकृद्विचक्षणः ।।५।।
अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः। सहस्रं याहि पथिभिः कनिक्रदत् ।।६।।

सा. ५६७

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव। द्युमन्तं शुष्ममा भर स्वर्विदम् ।।2।।

५४. जमदग्निः – ऋ. ६.६2.१–३०; ६.६७.१६–१८

ऋ. ६.६2.१–३०

एते असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा ।।१।।
विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः। तना कृण्वन्तो अर्वते ।।2।।
कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम्। इळामस्मभ्यं संयतम् ।।३।।
असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत् ।।४।।
शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः। स्वदन्ति गावः पयोभिः ।।५।।
आदीमश्वं न हेतारोऽशुभन्नमृताय। मध्वो रसं सधमादे ।।६।।
यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये। ताभिः पवित्रमासदः ।।७।।
सो अर्षेन्द्राय पीतये तिरो रोमाण्यव्यया। सीदन्योना वनेष्वा ।।८।।
त्वमिन्दो परि स्रव स्वादिष्ठो अंगिरोभ्यः। वरिवोविद् घृतं पयः ।।६।।
अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत् ।।१०।।
एष वृषा वृषव्रतः पवमानो अशस्तिहा। करद्वसूनि दाशुषे ।।११।।
आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम्। पुरुश्चन्द्रं पुरुस्पृहम् ।।१2।।
एष स्य परि षिच्यते मर्मृज्यमान आयुभिः। उरुगायः कविक्रतुः ।।१३।।
सहस्रोतिः शतामघो विमानो रजसः कविः। इन्द्राय पवते मदः ।।१४।।
गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते। विर्योना वसताविव ।।१५।।
पवमानः सुतो नृभिः सोमो वाजमिवासरत्। चमूषु शक्मनासदम् ।।१६।।
तं त्रिपृष्ठे त्रिवन्धुरे रथे युंजन्ति यातवे। ऋषीणां सप्त धीतिभिः ।।१७।।
तं सोतारो धनस्पृतमाशुं वाजाय यातवे। हरिं हिनोत वाजिनम् ।।१८।।
आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति।।१६।।
आ त इन्दो मदाय कं पयो दुहन्त्यायवः। देवा देवेभ्यो मधु ।।2०।।
आ नः सोमं पवित्र आ सृजता मधुमत्तमम्। देवेभ्यो देवश्रुत्तमम् ।।2१।।
एते सोमा असृक्षत गृणानाः श्रवसे महे। मदिन्तमस्य धारया ।।22।।
अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि। सन्द्वाजः परि स्रव ।।2३।।
उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निना ।।2४।।
पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः अभि विश्वानि काव्या।।2५।।
त्वं समुद्रिया अपोऽग्रियो वाच ईरयन्। पवस्व विश्वमेजय ।।2६।।
तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यमर्षन्ति सिन्धवः ।।2७।।
प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः। अभि शुक्रामुपस्तिरम् ।।2८।।
इन्द्रायेन्दुं पुनीतनोग्रं दक्षाय साधनम्। ईशानं वीतिराधसम् ।।2६।।
पवमान ऋतः कवि सोमः पवित्रमासदत्। दधत्स्तोत्रे सुवीर्यम् ।।३०।।

ऋ. ६.६७.१६–१८

पवस्व सोम मन्दयिन्नन्द्राय मधुमत्तमः ।।१६।।
असृग्रन्देववीतये वाजयन्तो रथाइव ।।१७।।
ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत ।।१८।।

५५. जमदग्निः भार्गवः – सा. ४७३; ४८६; ५०८; ७७५–७७७; ८३०–८३2; ६७६; ६८०; ६८१; १००८–१०१०; १०६१–१०६३; १८१०–१८१2

सा. ४७३

असाव्यं शुर्मदायाप्सु दक्षो गिरिष्ठाः। श्यनो न योनिमासदत् ।।७।।

सा. ४८६
आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः। इन्दुरिन्द्राय धीयते ।।३।।
सा. ५०८
अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत् ।।१2।।
सा. ७७५–७७७
पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः। अभि विश्वानि काव्या ।।१।।
त्वं समुद्रिया आपोऽग्रियो वाच ईरयन्। पवस्व विश्वचर्षणे ।।2।।
तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यं धावन्ति धेनवः ।।३।।
सा. ८३०–८३2
एते असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा ।।१।।
विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः। त्मना कृण्वन्तो अर्वतः ।।2।।
कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम्। इडामस्मभ्यं संयतम् ।।३।।
सा. ६७६–८१
यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये। ताभिः पवित्रमासदः ।।१।।
सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया। सीदन्नृतस्य योनिमा ।।2।।
त्वं सोम परि स्रव स्वादिष्ठो अंगिरोभ्यः। वरिवोविदघुतं पयः ।।३।।
सा. १००८–१०१०
असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत् ।।१।।
शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतम्। स्वदन्ति गावः पयोभिः ।।2।।
आदीमश्वं न हेतारमशूशुभन्नमृताय। मधो रसं सधमादे ।।३।।
सा. १०६१–१०६३
एते सोमा असृक्षत गृणानाः शवसे महे। मदिन्तमस्य धारया ।।१।।
अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि। सन्द्वाजः परि स्रव ।।2।।
उत नो गोमतीरिषो विश्वाअर्ष परिष्टुभः। गृणानो जमदग्निना ।।३।।
सा. १८१०–१८१2
पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ।।१।।
ते सुतासो विपश्चितः शुक्रा वायुमसृक्षत ।।2।।
असृग्रं देववीतये वाजयन्तो रथा इव ।।३।।

५६. जेता माधुच्छन्दसः – सा. ८27–८2६

इन्द्र विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः रथीतमं रथीनां वाजानां सत्पतिं पतिम् ।।१।।
सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते। त्वामभि प्र नोनुमो जेतारमपराजितम् ।।2।।
पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः। यदा वाजस्य गोमत स्तोतृभ्यो मंहते मघम् ।।३।।

५७. त्रय ऋषिगणाः – ऋ. ६.८६.३१–४०

प्र रेभ एत्यति वारमव्ययं वृषा वनेष्वव चक्रदद्धरिः ।
सं धीतयो वावशाना अनूषत शिशुं रिहन्ति मतयः पनिप्नतम्। ।।३१।।
स सूर्यस्य रश्मिभिः परि व्यत तन्तुं तन्वानस्त्रिवृतं यथा विदे ।
नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतम् ।।३2।।
राजा सिन्धूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत् ।
सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ।।३३।।
पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया ।
गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ।।३४।।
इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि ।
इन्द्राय मद्वा मद्यो मदः सुतो दिवो विष्टम्भ उपमो विचक्षणः ।।३५।।
सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।

अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ।।३६।।
ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ।।३७।।
त्वं नृ चक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ।।३८।।
गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्द्रो भुवनेष्वर्पितः ।
त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते ।।३९।।
उन्मध्व ऊर्मिर्वनना अतिष्ठिपदपो वसानो महिषो वि गाहते ।
राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत् ।।४०।।

५८. त्रित आप्त्यः – सा. १०१; ४७१; ४७८; ५७०; ७६४–७६६; ८६९–८७१; १०१३–१०१५

सा. १०१

जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये। अयं ध्रुवा रयीणां चिकेतदा ।।५।।

सा. ४७१

तिस्रो वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत् ।।५।।

सा. ४७८

प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः। वनानि महिषा इव ।।2।।

सा. ५७०

प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्। विश्वा परि प्रिया भुवदध द्विता ।।५।।

सा. ७६४–७६६

प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः। वनानि महिषा इव ।।१।।
अभि द्रोणानि बभ्रवः शुक्राा ऋतस्य धारया। वाजं गोमन्तमक्षरन् ।।2।।
सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षन्तु विष्णवे ।।३।।

सा. ८६९–८७१

तिस्त्रो वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत् ।।१।।
अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः। मर्जयन्तीर्दिवः शिशुम् ।।2।।
रायः समुद्रां श्चतुरोस्मभ्यं सोम विश्वतः। आ पवस्व सहस्त्रिणः ।।३।।

सा. १०१३–१०१५

प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्। विश्वा परि प्रिया भुवदध द्विता ।।१।।
उप त्रितस्य पाष्यो३रभक्त युद्गुहा पदम्। यज्ञस्य सप्त धामभिरध प्रियम् ।।2।।
त्रीणि त्रितस्य धारया पृष्ठेष्वैरयद्रयिम्। मिमीते अस्य योजना वि सुक्रतुः ।।३।।

५९. यरुणस् त्रैवृष्णः त्रसदस्युः पौरुकुत्स्यः – ऋ. ९.११०.१–१2; सा. ४2८; ४३2; १३६४–६६; १४६४–६६; १५०६–१५०८

ऋ. ९.११०.१–१2

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईयसे ।।१।।
अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
वाजाँ अभि पवमान प्र गाहसे ।।2।।
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
गोजीरया रंहमाणः पुरन्ध्या ।।३।।
अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः ।
सदासरो वाजमच्छा सनिष्यदत् ।।४।।
अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।
शर्याभिर्न भरमाणो गभस्त्योः ।।५।।
आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।

वारं न देवः सविता व्यूर्णुते ।।६।।
त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।
स त्वं नो वीर वीर्याय चोदय ।।७।।
दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गहाद्दिव आ निरधुक्षत ।
इन्द्रमभि जायमानं समस्वरन् ।।८।।
अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।
यूथे न निःष्ठा वृषभो वि तिष्ठसे।।९।।
सोमः पुनानो अव्यये वारे शिशुर्न क्रीळन्पवमानो अक्षाः ।
सहस्रधारः शतवाज इन्दुः ।।१०।।
एष पुनानो मधुमाँ ऋतावेन्द्रायेन्दुः पवते स्वादुरूर्मिः ।
वाजसनिर्वरिवोविद्वयोधाः ।।११।।
स पवस्व सहमानः पृतन्यून्त्सेधन्रक्षांस्यप दुर्गहाणि ।
स्वायुधः सासह्वान्त्सोम शत्रून् ।।12।।

सा. ४2८

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः। द्विषस्तरध्या ऋणया न ईरसे ।।2।।

सा. ४३2

अनु ति त्वा सुतं सोम मदामसि महे समर्यराज्ये। वाजाँ अभि पवमान प्र गाहसे ।।६।।

सा. १३६४–१३६६

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः। द्विषस्तरध्या ऋणया न ईरसे ।।१।।
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः। गोजीरया रंहमाणः पुरन्ध्या ।।2।।
अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये। वाजाँ अभि पवमान प्र गाहसे।।३।।

सा. १४६४–१४६६

प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत ।
इन्द्रमभि जायमानं समस्वरन् ।।१।।
आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।
दिवो न वार सविता व्यूर्णते ।।2।।
अध यदिम पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।
यूथे न निष्ठा वृषभा वि राजसि ।।३।।

सा. १५०६–१५०८

त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।
स त्वं नो वीर वीर्याय चोदय ।।१।।
अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।
शर्याभिर्न भरमाणो गभस्त्योः ।।2।।
अजीजनो अमृत मर्त्याय कमृतस्य धर्मन्नमृतसय चारुणः ।
सदासरो वाजमच्छा सनिष्यदत् ।।३।।

६०. दृळहच्युतः आगस्त्यः – ऋ. ९.2५.१–६; सा. ४७४; ६१९–६2१

ऋ. ९.2५.१–६

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः ।।१।।
पवमान धिया हितो३भि योनि कानिक्रदत्। धर्मणा वायुमा विश ।।2।।
सं देवैः शेभते वृषा कविर्योनावधि प्रियः। वृत्रहा देववीतमः ।।३।।
विश्व रूपाण्याविशन्पुनानो याति हर्यतः। यत्रामृतास आसते ।।४।।
अरुषो जनयन्गिरः सोमः पवत आयुषक्। अरुषो जनयन्गिरः पवत आयुषक् ।
इन्द्रं गच्छन्कविक्रतुः ।।५।।

आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम् ।।६।।

सा. ४७४

पवस्व दक्षसाधनो देवेभ्यः पतये हरे। मरुद्भ्यो वायवे मदः ।।८।।

सा. ६१६–६२१

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः ।।१।।
सं देवैः शोभते वृषा कविर्योनावधि प्रियः। पवमानो अदाभ्यः ।।2।।
पवमान धिया हितो३ऽभि योनिं कनिक्रदत्। धर्मणा वायुमारुहः ।।३।।

६१. द्वित आप्त्यः – ऋ. ९.१०३.१–६; सा. ५७३; ५७७

ऋ. ९.१०३.१–६

प्र पुनानाय वेधसे सोमाय वच उद्यतम्। भृतिं न भरा मतिभिर्जुजोषते ।।१।।
परि वाराण्यव्यया गोभिरंजानो अर्षति। त्री षधस्था पुनानः कृणुते हरिः ।।2।।
परि कोशं मधुश्चुतमव्यये वारे अर्षति। अभि वाणीर्ऋषीणां सप्त नूषत ।।३।।
परि णेता मतीनां विश्वदेवो अदाभ्यः। सोमः पुनानश्चम्वोर्विशद्धरिः ।।४।।
परि देवीरनु स्वधा इन्द्रेण याहि सरथम्। पुनानो वाघद्वाघद्भिरमर्त्यः ।।५।।
परि सप्तिर्न वाजयुर्देवो देवेभ्यः सुताः। व्यानशिः पवमानो वि धावति ।।६।।

सा. ५७३

प्र पुनानाय वेधसे सोमाय वच उच्यते। भृतिं न भरा मतिभिर्जुजोषते ।।८।।

सा. ५७७

परि कोशं मधुश्चुतं सोमः पुनानो अर्षति। अभि वाणीर्ऋषीणां सप्ता नूषत ।।१2।।

६2. नहुषो मानवः – ऋ. ९.१३.७–९; सा. ५४६; ८१८–८20

ऋ. ९.१३.७–९

वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः। दधन्विरे गभस्त्योः ।।७।।
जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत्। विश्वा अप द्विषो जहि ।।८।।
अपघ्नन्तो अराव्णः पवमान स्वर्दृशः। योनावृतस्य सीदत् ।।९।।

सा. ५४६

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति। पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ।।2।।

सा. ८१८–20

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति। पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ।।१।।
समु प्रिया अनूषत गावो मदाय घृष्वयः। सोमासः कृण्वते पथः पवमानास इन्दवः ।।2।।
य ओजिष्ठस्तमा भर पवमान श्रवाय्यम्। यः पंच चर्षणीरभि रयिं येन वनामहे ।।३।।

६३. निध्रुविः काश्यपः – ऋ. ९.६३.१–३०; सा. ४८३; ४९2; ४९३; ५०१; १2१६–१८; १2३५–३७; १६९९–१७०१

ऋ. ९.६३.१–३०

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम्। अस्मे श्रवांसि धारय ।।१।।
इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः। चमूष्वा नि षीदसि ।।2।।
सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत्। मधुमाँ अस्तु वायवे ।।३।।
एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः। सोमा ऋतस्य धारया ।।४।।
इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्यम्। अपघ्नन्तो अरावणः ।।५।।
सुता अनु स्वमा रजोऽभ्यर्षन्ति बभ्रवः। इन्द्रं गच्छन्त इन्दवः ।।६।।
अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः ।।७।।
अयुक्त सूर एतशं पवमानो मनावधि। अन्तरिक्षेण यातवे ।।८।।
उत त्या हरितो दश सूरो अयुक्त यातवे। इन्दुरिन्द्र इति ब्रुवन् ।।९।।
परीतो वायवे सुतं गिर इन्द्राय मत्सरम्। अव्यो वारेषु सिंचत ।।१०।।

पवमान विदा रयिमस्मभ्यं सोम दुष्टरम्। यो दूणाशो वनुष्यता ।।११।।
अभ्यर्ष सहस्रिणं रयिं गोमन्तमश्विनम्। अभि वाजमुत श्रवः ।।१२।।
सोमो देवो न सूर्योऽद्रिभिः पवते सुतः। दधानः कलशे रसम् ।।१३।।
एते धामान्यार्या शुक्राा ऋतस्य धारया। वाजं गोमन्तमक्षरन् ।।१४।।
सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः। पवित्रमत्यक्षरन् ।।१५।।
प॰सोम मधुमत्तमो राये अर्ष पवित्र आ। मदो यो देववीतमः ।।१६।।
तमी मृजन्त्यायवो हरिं नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम् ।।१७।।
आ पवस्व हिरण्यवदश्वावत् सोम वीरवत्। वाजं गोमन्तमा भर ।।१८।।
परि वाजे न वाजयुमव्यो वारेषु सिंचत। इन्द्राय मधुमत्तमम् ।।१९।।
कविं मृजन्ति मर्ज्यं धीभिर्विप्रा अवस्यवः। वृषा कनिक्रदर्षति ।।२०।।
वृषणं धीभिरप्तुरं सोममृतस्य धारया। मती विप्राः समस्वरन् ।।२१।।
पवस्व देवायुषग्न्द्रिं गच्छतु ते मदः। वायुमा रोह धर्मणा ।।२२।।
पवमान नि तोशसे रयिं सोम श्रवाय्यम्। प्रियः समुद्रमा विश ।।२३।।
अपघ्नन् पवसे मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम् ।।२४।।
पवमाना असृक्षत सोमाः शुक्रास इन्दवः। अभि विश्वानि काव्या ।।२५।।
पवमानास आशवः शुभ्रा असृग्रमिन्दवः। घ्नन्तो विश्वा अप द्विषः ।।२६।।
पवमाना दिवस्पर्यन्तरिक्षादसृक्षत। पृथिव्या अधि सानवि ।।२७।।
पुनानः सोम धारयेन्दो विश्वा अप स्रिधः। जहि रक्षांसि सुक्रतो ।।२८।।
अपघ्नन्त्सोम रक्षसोऽभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम् ।।२९।।
अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा। इन्दो विश्वानि वार्या ।।३०।।

सा. ४८३

पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वायुमा रोह धर्मणा ।।७।।

सा. ४९२–९३

अपघ्नन्पवस मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम् ।।६।।
अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मनुषीरपः ।।७।।

सा. ५०१

आ पवस्व सहस्रिणं रयिं सोम सुवीर्य्यम्। अस्मे श्रवांसि धारय ।।५।।

सा. १२१६–१८

अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः ।।१।।
अयुक्त सूर एतशं पवमानो मनावधि। अन्तरिक्षेण यातवे ।।२।।
उत त्या हरितो रथे सूरो अयुक्त यातवे। इन्द्रुरिन्द्र इति ब्रुवन् ।।३।।

सा. १२३५–३७

पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वयुमा रोह धर्मणा ।।१।।
पवमान नि तोशसे रयिं सोम श्रवाय्यम्। इन्दो समुद्रमा विश ।।२।।
अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम् ।।३।।

सा. १६९९–१७०१

पवमाना असृक्षत सोमाः शुक्रास इन्दवः। अभि विश्वानि काव्या ।।१।।
पवमाना दिवस्पर्यनरिक्षादसृक्षत। पृथिव्या अधि सानवि ।।२।।
पवमानास आशवः शुभ्रा असृग्रमिन्दवः। घ्नन्तो विश्वा अप द्विषः ।।३।।

६४. नृमेधः – ऋ. ९.२७.१–६; ९.२९.१–६

ऋ. ९.२७.१–६

एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्नप स्रिधः ।।१।।
एष इन्द्राय वायवे स्वर्जित्परि षिच्यते। पवित्रे दक्षसाधनः ।।२।।

एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित् ।।३।।
एष गव्युरचिक्रदत् पवमानो हिरण्ययुः। इन्दुः सत्राजिदस्तृतः ।।४।।
एष सूर्येण हासते पवमानो अधि द्यवि। पवित्रे मत्सरो मदः ।।५।।
एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा ।।६।।

ऋ. ९.२९.१–६

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा। देवाँ अनु प्रभूषतः ।।१।।
सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा। ज्योतिर्जज्ञानमुक्थ्यम् ।।2।।
सुषहा सोम तानि ते पुनानाय प्रभूवसो। वर्धा समुद्रमुक्थ्यम् ।।३।।
विश्वा वसूनि संजयन्पवस्व सोम धारया। इनु द्वेषांसि सध्र्यक् ।।४।।
रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित्। निदो यत्र मुमुच्महे ।।५।।
एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया। द्युमन्तं शुष्ममा भर ।।६।।

६५. नृमेधः आंगिरसः – सा. १२८६–१२९१; १७६५–१७६७

सा. १२८६–९१

एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्प द्विषः ।।१।।
एष इन्द्राय वायवे स्वर्जित्परि षिच्यते। पवित्रे दक्षसाधनः ।।2।।
एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित् ।।३।।
एष गव्युरचिक्रदत्पवमानो हिरण्ययुः। इन्दुः सत्राजिदस्तुतः ।।४।।
एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा ।।५।।
एष शुषयदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा ।।६।।

सा. १७६५–६७

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसः। देवाँ अनु प्रभूषतः ।।१।।
सप्ति मृजन्ति वेधसो गृणन्तः कारवो गिरा। ज्योतिर्जज्ञानमुक्थ्यम् ।।2।।
सुषहा सोम तानि ते पुनानाय प्रभूवसो। वर्धा समुद्रमुक्थ्य ।।३।।

६६. नृमेध आंगिरसः (प्रथमः पादः) इध्मवाहो दार्ढच्युतः (त्रयः पादाः) – सा. १२८५

एष सूर्येण हासते संवसानो विवस्वता। पतिर्वाचो अदाभ्यः ।।६।।

६७. नोधा – ऋ. ९.९३.१–५

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ।।१।।
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः ।।2।।
उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ।।३।।
स नो देवेभिः पवमान रदेन्दो रयिमश्विनं वावशानः ।
रथिरायतामुशती पुरन्धिरस्मद्र्य१गा दावने वसूनाम् ।।४।।
नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम् ।
प्र वन्दितुरिन्दो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात् ।।५।।

६८. नोधा गौतमः – सा. १४१८–१४20

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ।।१।।
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभिः निष्कृतंक यन्त्सं गच्छते कलश उस्रियाभिः ।।2।।

उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ।।३।।

६६. नोधा गौतमः (साग्री. सास्वा. ऋसर्व.) नृमेधा काक्षीवतः (सार्षेदी.)– सा. ५३८

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ।।६।।

७०. परमेष्ठी – सा. १४१८–१४20

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ।।१।।
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभिः निष्कृतंक यन्त्सं गच्छते कलश उस्रियाभिः ।।2।।
उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ।।३।।

७१. नोधा गौतमः (साग्री. सास्वा. ऋसर्व.); नृमेधा काक्षीवतः (सार्षेदी.) – सा. ५३८

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ।।६।।

७2. पराशरः शाक्त्यः – सा. ५2५; ५2६; ५३४; ५४2; ८५६; ८६०; ८६१; १2५३–१2५५; १३५७–१३५६

सा. ५2५

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ।।३।।

सा. ५2६

अक्रांत्समुद्रः प्रथमे विधर्मं जनयन् प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ।।७।।

सा. ५३४

प्र ते धारा मधुमतीरसृग्रन्वारं यत्पूतो अत्येष्यव्यम् ।
पवमान पवसे धाम गोनां जनयत्सूर्यमपिन्वो अर्कैः ।।2।।

सा. ५४2

महत्तत्सोमो महिषश्चकारपां यद्गर्भोऽवृणीत देवान् ।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ।।१०।।

सा. ८५६–८६१

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ।।१।।
सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
सोमः सुत ऋच्यते पुयमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ।।2।।
एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
इन्द्रमा विश बृहता मदेन वर्धया वाचं जनया पुरन्धिम् ।।३।।

सा. १2५३–१2५५

अक्रान्त्समुद्रः प्रथमे विधर्मन् जनयन्प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ।।१।।
मत्सि वायुमिष्टये राधसे नो मत्सि मित्रावरुणा पूयमानः ।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ।।2।।
महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।

अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ।।३।।

सा. १३५७–१३५८

आ जागृविर्विप्र ऋतं मतीनां सोमः पुनानो असदच्चमूषु ।
सपन्ति यं मिथुनासो निकासा अध्वर्यवो रथिरासः सुहस्ता ।।१।।

७३. पर्वतः नारदौ – ऋ. ९.१०५.१–६

तं वः सखायो मदाय पुनानमभि गायत। शिशुं न यज्ञैः स्वदयन्त गूर्तिभिः ।।१।।
सं वत्सइव मातृभिरिन्दुर्हिन्वानो अज्यते। देवावीर्मदो मतिभिः परिष्कृतः ।।2।।
अयं दक्षाय साधनोऽयं शर्धाय वीतये। अयं देवेभ्यो मधुमत्तमः सुतः ।।३।।
गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धन्व। शुचिं ते वर्णमधि गोषु दीधरम् ।।४।।
स नो हरीणां पत इन्दो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव ।।५।।
सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणम्। साह्वाँ इन्दो परि बाधो अप द्वयुम् ।।६।।

७४. पर्वतनारदौ काण्वौ – सा. ५६८; ५६९; ५७४; ५७५; १०९८–११००; १६११–१६१३

सा. ५६८–५६९

सखाय आ नि षीदत पुनानाय प्र गायत। शिशुं न यज्ञैः परि भूषत श्रिये ।।३।।
तं वः सखायो मदाय पुनानमभि गायत। शिशु न हव्यैः स्वदयन्त गूर्तिभिः ।।४।।

सा. ५७४–५७५

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव। शुचिं च वर्णमधि गोषु धारय ।।९।।
अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत। गोभिष्टे वर्णमभि वासयामसि ।।१०।।

सा. १०९८–११००

तं वः सखायो मदाय पुनानमभि गायत। शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ।।१।।
सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते। देवावीर्मदो मतिभिः परिष्कृतः ।।2।।
अयं दक्षाय साधनोऽयं शर्धाय वीतये। अयं देवेभ्यो मधुमत्तरः सुतः ।।३।।

सा. १६११–१६१३

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव। शुचिं च वर्णमधि गोषु धारय ।।१।।
स नो हरीणां पत इन्दो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव ।।2।।
सनेमि त्वस्मदा अदेवं कं चिदत्रिणम्। साह्वा इन्दो परि बाधो अप द्वयुम् ।।३।।

७५. पर्वतनारदौ काण्वौ शिखण्डिन्यौ अप्सरसौ काश्यपौ वा – ऋ. ९.१०४.१–६; सा. ११५७–११५९

ऋ. ९.१०४.१–६

सखाय आ नि षीदत पुनानाय प्र गायत। शिशुं न यज्ञैः परि भूषत श्रिये ।।१।।
समी वत्सं न मातृभिः सृजता गयसाधनम्। देवाव्यं१ मदमभि द्विशवसम् ।।2।।
पुनाता दक्षसाधनं यथा शर्धाय वीतये। यथा मित्राय वरुणाय शंतमः ।।३।।
अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत। गोभिष्टे वर्णमभि वासयामसि ।।४।।
स नो मदानां पत इन्दो देवप्सरा असि। सखेव सख्ये गातुवित्तमो भव ।।५।।
सनेमि कृध्य१स्मदा रक्षसं कं चिदत्रिणम्। अपादेवं द्वयुमंहो युयोधि नः ।।६।।

सा. ११५७–११५९

सखाय आ नि षीदत पुनानाय प्रगायत। शिशुं न यज्ञैः परि भूषत श्रिये ।।१।।
समी वत्सं न मातृभिः सृजता गयसाधनम्। देवाव्यं३मदमभि द्विशवसम् ।।2।।
पुनाता दक्षसाधनं यथा शर्धाय वीतये। यथा मित्राय वरुणाय शन्तमम् ।।३।।

७६. पवित्रः – ऋ. ९.७३.१–९; ९.८३.१–५

ऋ. ९.७३.१–९

स्रक्वे द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरन्त नाभयः ।
त्रीन्त्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन् ।।१।।

सम्यक् सम्यंचो महिषा अहेषत सिन्धोरूर्मावधि वेना अवीविपन् ।
मधोर्धाराभिर्जनयन्तो अर्कमित्प्रियामिन्द्रस्य तन्वमवीवृधन् ।।2।।
पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम् ।
महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ।।३।।
सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः ।
अस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवः ।।४।।
पितुर्मातुरध्या ये समस्वरन्नृचा शोचन्तः संदहन्तो अव्रतान् ।
इन्द्रद्विष्टामप धमन्ति मायया त्वचमसिक्नीं भूमनो दिवस्परि ।।५।।
प्रत्नान्मानादध्या ये समस्वरंछ्लोकयन्त्रासो रभसस्य मन्तवः ।
अपानक्षासो बधिरा असाहत ऋतस्य पन्थां न तरन्ति दुष्कृतः ।।६।।
सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः ।
रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वंचः सुदृशो नृचक्षसः ।।७।।
ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्य१न्तरा दधे ।
विद्वान्त्स विश्वा भुवनाभि पश्यत्यवाजुष्टान्विध्यति कर्ते अव्रतान् ।।८।।
ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया ।
धीराश्चित्तत्समिनक्षन्त आशतात्रा कर्तमव पदात्यप्रभुः ।।९।।

ऋ. ९.८३.१–५

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्तनन्नूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत्समाशत ।।१।।
तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन् ।
अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा ।।2।।
अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ।।३।।
गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः ।
गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ।।४।।
हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरम् ।
राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ।।५।।

७७. पवित्र आंगिरसौ – सा. ५६५; ५६६

सा. ५६५

पवित्रं ते वितनं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ।।१2।।

सा. ५६६

अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ।।2।।

७८. पवित्र अंगिरसो वा वसिष्ठो वा उभौ वा – ऋ. ९.६७.22; ९.६७.2८–३०

ऋ. ९.६७.22

पवमानः सो अद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु नः ।।22।।

ऋ. ९.६७.2८–३०

प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः। देवेभ्य उत्तमं हविः ।।2८।।
उप प्रियं पनिप्नतं युवानमाहुतीवृधम्। अगन्म बिभ्रतो नमः ।।2९।।
अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम। आखुं चिदेव देव सोम ।।३०।।

७९. पृश्निय अजाः – ऋ. ९.८६.2१–३०; सा. ८2३

ऋ. ९.८६.2१–३०

अयं पुनान उषसो वि रोचयदयं सिन्धुभ्यो अभवदु लोककृत् ।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ।।2१।।
पवस्व सोम दिव्येषु धामसु सृजान इन्दो कलशे पवित्र आ ।
सीदन्निन्द्रस्य जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि ।।22।।
अद्रिभिः सुतः पवसे पवित्र आँ इन्दविन्द्रस्य जठरेष्वाविशन् ।
त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमंगिरेभ्योऽवृणोरप ।।2३।।
त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नवस्यवः ।
त्वां सुपर्ण आभरद्दिवस्परीन्दो विश्वाभिर्मतिभिः परिष्कृतम् ।।2४।।
अव्ये पुनानं परि वार ऊर्मिणा हरिं नवन्ते अभि सप्त धेनवः ।
अपामुपस्थे अध्यायवः कविमृतस्य योना महिषा अहेषत ।।2५।।
इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्त्सुपथानि यज्यवे ।
गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन्परि वारमर्षति ।।2६।।
असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः ।
क्षिपो मृजन्ति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ।।2७।।
त्वेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि ।
अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामधा असि ।।2८।।
त्वं समुद्रो असि विश्ववित्कवे तवेमाः पंच प्रदिशो विधर्मणि ।
त्वं द्यां च पृथिवीं चाति जाभ्रिषे तव ज्योतींषि पवमान सूर्यः ।।2९।।
त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे ।
त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ।।३०।।

सा. ८2३

अयं पुनान उषसो अरोचयदयं सिन्धुभ्यो अभवदु लोककृत् ।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ।।३।।

८०. प्रजापतिर्वाच्यः – ऋ. ९.८४.१–५

पवस्व देवमादनो विचर्षणिरप्सा इन्द्राय वरुणाय वायवे ।
कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनम् ।।१।।
आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति ।
कृण्वन्त्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः ।।2।।
आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः ।
आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन्दैव्यं जनम् ।।३।।
एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधम् ।
इन्दुः समुद्रमुदियर्ति वायुभिरेन्द्रस्य हार्दि कलशेषु सीदति ।।४।।
अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम् ।
धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ।।५।।

८१. प्रजापतिर् वैश्वामित्रः (साग्री.५५३); प्रजापतिः (ऋसर्व.) – ऋ. ९.१०१.१३–१६

प्र सुन्वानस्यान्धसो मर्तो न वृत तद्वचः ।
अप श्वानमराधसं हता मखं न भृगवः ।।१३।।
आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः
सरज्जारो न योषणां वरो न योनिमासदम् ।।१४।।
स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी ।
हरिः पवित्रे अव्यत वेधा न योनिमासदम् ।।१५।।
अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि ।
कनिक्रदद्वृषा हरिरिन्द्रस्याभ्येति निष्कृतम् ।।१६।।

८2. प्रजापतिर् वैश्वामित्रो वाच्यो वा (साग्री. सास्वा.); प्रजापतिः (सार्षेदी. ऋसर्व.) – सा. ५५३; ७७४; १३८६–१३८८

सा. ५५३

प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः। अप श्वानमराधसं हता मखं न भृगवः ।।६।।

सा. ७७४

प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः। अप श्वानमराधसं हता मखं न भृगवः ।।३।।

सा. १३८६–१३८८

प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः। अप श्वानमराधसं हता मखं न भृगवः ।।१।।
आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः। सरज्जारो न योषणां वरो न योनिमासदम् ।।2।।
स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी। हरिः पवित्रे अव्यत वेधा न योनिमासदम्।।३।।

८३. प्रतर्दनो दैवोदासिः – ऋ. ६.६६.१–24; सा. ५2७; ५३2; ५३३; ६४३–६४५; ११७५–११७७

ऋ. ६.६६.१–24

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ।।१।।
समस्य हरि हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः ।
आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ।।2।।
स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः ।
कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः ।।३।।
अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते ।
तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम ।।४।।
सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ।।५।।
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ।।६।।
प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः ।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ।।७।।
स मतसरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष ।
इन्द्रायेन्दो पवमानो मनीष्यं१शोरूर्मिमीरय गा इषण्यन् ।।८।।
परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय ।
सहस्रधारः शतवाज इन्दुर्वाजी न सप्तिः समना जिगाति ।।६।।
स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ ।
अभिशस्तिपा भुवनस्य राजा विद्दगातुं ब्रह्मणे पूयमानः ।।१०।।
त्वया हि नः पितर सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ।।११।।
यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् ।
एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ।।१2।।
पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः ।।१३।।
वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ ।
सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ।।१४।।
एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः ।
पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळहा ।।१५।।

स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम ।
अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ।।१६।।
शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति वह्निं मरुतो गणेन ।
कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ।।१७।।
ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ।।१८।।
चमूषच्छ्येनः शकुनो विभृतवा गोविन्दुर्द्रप्स आयुधानि बिभ्रत ।
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ।।१६।।
मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानाम् ।
वृषेव यूथा परि कोशमर्षन्कनिक्रदच्चम्वो३रा विवेश ।।20।।
पवस्वेन्दो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष ।
क्रीळंचम्वो३रा विश पूयमान इन्द्रं ते रसो मदिरो ममत्तु ।।२१।।
प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः कलशाँ आ विवेश ।
साम कृण्वन्त्सामन्यो विपश्चित्क्रन्दन्नेत्यभि सख्युर्न जामिम् ।।22।।
अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इन्दुः ।
सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ।।२३।।
आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः ।
हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनाम् ।।२४।।

सा. ५२७

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ।।५।।

सा. ५३२–५३३

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ।।१०।।
प्र सेनानिः शूरो अग्ने रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान् कृण्वन्निन्द्रहवांत्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ।।१।।

सा. ६४३–६४५

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ।।१।।
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ।।2।।
प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिर स्तोमान्पवमानो मनीषाः ।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ।।३।।

सा. ११७५–११७७

शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।
कविर्गीर्भिः काव्येन कविः सन्त्सोमः पवित्रकत्येति रेभन् ।।१।।
ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रनीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ।।2।।
चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ।।३।।

८४. प्रन्धीमुश्यावाश्विः – ऋ. ६.१०१.१–३

पुरोजिती वो अन्धसः सुताय मादयित्नवे। अप श्वानं श्नथिष्टन सखायो दीर्घजिह्क्यम् ।।१।।
यो धारया पावकया परिप्रस्यन्दते सुतः। इन्दुरश्वो न कृत्व्यः ।।2।।
तं दुरोषमभी नरः सोमं विश्वाच्या धिया। यज्ञं हिन्वन्त्यद्रिभिः ।।३।।

८५. प्रभूवसुः – ऋ. ६.३५.१–६; ६.३६.१–६

ऋ. ६.३५.१–६

आ नः पवस्व धारया पवमान रयिं पृथुम्। यया ज्योतिर्विदासि नः ।।१।।
इन्द्रो समुद्रमीङ्खय पवस्व विश्वमेजय। रायो धर्ता न ओजसा ।।2।।
त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः। क्षरा णो अभि वार्यम् ।।३।।
प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः। व्रता विदान आयुधा ।।४।।
तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि। सोमं जनस्य गोपतिम् ।।५।।
विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः। पुनानस्य प्रभूवसोः ।।६।।

ऋ. ६.३६.१–६

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः। कार्ष्मन्वाजी न्यक्रमीत् ।।१।।
स वह्निः सोम जागृविः पवस्व देववीरति। अभि कोशं मधुश्चुतम् ।।2।।
स नो ज्योतींषि पूर्व्य पवमान वि रोचय। क्रतवे दक्षाय नो हिनु ।।३।।
शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः। पवते वारे अव्यये ।।४।।
स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा। पवतामान्तरिक्ष्या ।।५।।
आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि। वीरयुः शवसस्पते ।।६।।

८६. प्रभूवसुर् आंगिरसः – सा. ४६०

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः। कार्ष्मन्वाजी न्यक्रमीत् ।।४।।

८७. प्रस्कण्वः – ऋ. ६.६५.१–५

कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः ।।१।।
हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम् ।
देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे ।2।।
अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ।।३।।
तं मर्मृजानं महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम् ।
तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ।।४।।
इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।
इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ।।५।।

८८. प्रस्कण्वः काण्वः – सा. ५३०; ५४४

सा. ५३०

कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयत स्वधाभिः ।।८।।

सा. ५४४

अपामिवे दूर्म यस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चाच विशन्त्युशतीरुशन्तम् ।।१2।।

८६. प्रियमेधः – ऋ. ६.2८.१–६

एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः। अव्यो वारं वि धावति ।।१।।
एष पवित्रे अक्षरत् सोमो देवेभ्यः सुतः। विश्वा धामान्याविशन् ।।2।।
एष देवः शुभायतेऽधि योनावमर्त्यः। वृत्रहा देववीतमः ।।३।।
एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति ।।४।।
एष सूर्यमरोचयत् पवमानो विचर्षणिः। विश्वा धामानि विश्ववित् ।।५।।
एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा ।।६।।

९०. प्रियमेध आंगिरसः – सा. १२८०–८३; १२८६–१२९१

सा. १२८०–८३

एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः। अव्यं वारं वि धावति ।।१।।
एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः। विश्वा धामान्याविशन् ।।2।।
एष देवः शुभायतेऽधि योनावमर्त्यः। वृत्रहा देववीतमः ।।३।।
एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति ।।४।।

सा. १२८६–१२९१

एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्नप द्विषः ।।१।।
एष इन्द्राय वायवे स्वर्जित्परि षिच्यते। पवित्र दक्षसाधनः ।।2।।
एष नृभिर्वि नीयते दिवो मूर्धा वृषाः सुतः। सोमो वनेषु विश्ववित् ।।३।।
एष गव्युरचिक्रदत्पवमानो हिरण्ययुः। इन्दुः सत्राजिदस्तृतः ।।४।।
एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा ।।५।।
एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा ।।६।।

९१. प्रियमेध आंगिरसः (प्रथमः पाठः) नृमेध आंगरिसः (त्रयःपादाः) – सा. १२८४

एष सूर्यमरोचयत्पवमानो अधि द्यवि। पवित्रे मत्सरो मदः ।।५।।

९2. बिन्दुः – ऋ. ९.३०.१–६

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन्। पुनानो वाचमिष्यति ।।१।।
इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत्। इयर्ति वग्नुमिन्द्रियम् ।।2।।
आ नः शुष्मं नृषाह्यं वीरवन्तं पुरुस्पृहम्। पवस्व सोम धारया ।।३।।
प्र सोमो अति धारया पवमानो असिष्यदत्। अभि द्रोणान्यासदम् ।।४।।
अप्सु त्वा मधुमत्तमं हरि हिन्वन्त्यद्रिभिः। इन्दविन्द्राय पीतये ।।५।।
सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे। चारुं शर्धाय मत्सरम् ।।६।।

९३. बृहन्मतिर् आंगिरसः – सा. ४८८; ८९८–९०३; ९2४–९2६

सा. ४८८

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः ।।2।।

सा. ८९८–९०३

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना। यत्रा देवा इति ब्रुवन् ।।१।।
परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः। वृष्टिं दिवः परि स्रव ।।2।।
अयं स या दिवस्परि रघुयामा पवित्र आ। सिन्धेरूर्मा व्यक्षरत् ।।३।।
सुत एति पवित्र आ त्विषिं दधान ओजसा। विचक्षाणो विरोचयन् ।।४।।
आविवासन्परावतो अथो अर्वावतः सुतः। इन्द्राय सिच्यते मधु ।।५।।
समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ।।६।।

सा. ९2४–९2६

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः ।।१।।
या योनिमरुणो रुहद्गमदिन्द्रो वृषा सुतम्। ध्रुवे सदसि सीदतु ।।2।।
नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम् ।।३।।

९४. भरद्वाजः – ऋ. ९.६७.१–३

त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः ।।१।।
त्वं सुतो नृमादनो दधन्वान्मत्सरिन्तमः। इन्द्राय सूरिरन्धसा ।।2।।
त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम् ।।३।।

९५. भरद्वाजो बार्हस्पत्यः – सा. १३2३–१३2५

त्वं सोमासि धरयुर्मन्द्र ओजिष्ठो अध्वरे। पवस्व मं हयद्रयिः ।।१।।

त्वं सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः। इन्दुः सत्राजिदस्तुतः ।।2।।
त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममा भर ।।३।।

६६. भृगुर्वारुणिर् जमदग्निर् भार्गवो वा – सा. ४६६; ४८०; ४९८; ५०३; ७८४–८६; ८०३–८०५; ८३३–३५; ९०४–९०६; ९९४–९६; ११३७–३९; ११६३–११६५

सा. ४६६
वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा ।।३।।
सा. ४८०
वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम् ।।४।।
सा. ४९८
आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम् ।।2।।
सा. ५०३
अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदन्योनौ वनेष्वा ।।७।।
सा. ७८४–८६
वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम् ।।१।।
यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः। द्रोणे सधस्थमश्नुषे ।।2।।
आ पवस्व सुवीर्यं मन्दमानः स्वायुध। इहो ष्विन्दवा गहि ।।३।।
सा. ८०३–८०५
वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा ।।१।।
तं त्वा धर्तारमोण्यो३ः पवमान स्वर्दृशम्। हिन्वे वाजेषु वाजिनम् ।।2।।
अया चित्तो विपानया हरिः पवस्व धारया। युजं वाजेषु चोदय ।।३।।
सा. ८३३–३५
राजा मेधाभिरीयते पवमानो मनावधि। अन्तरिक्षेण यातवे ।।१।।
आ नः सोम सहो जुवो रूपं न वर्चसे भर। सुष्वाणो देववीतये ।।2।।
आ न इन्द्रो शातग्विनं गवां पोषं स्वश्वयम्। वहा भगत्तिमूतये ।।३।।
सा. ९०४–९०६
हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम्। महामिन्दुं महीयुवः ।।१।।
पवमान रुचारुचा देव देवेभ्यः सुतः। विश्वा वसून्या विश ।।2।।
आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। इषे पवस्व संयतम् ।।३।।
सा. ९९४–९६
अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदन्योनौ वनेष्वा ।।१।।
अप्सा इन्द्राय वायवे वरुणाय वरुद्भ्यः। सोमा अर्षन्तु विष्णवे ।।2।।
इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम् ।।३।।
सा. ११३७–३९
आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम् ।।१०।।
आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम्। पान्तमा पुरुस्पृहम् ।।११।।
आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा। पान्तमा पुरुस्पृहम् ।।१2।।
सा. ११६३–११६५
ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति ।।१।।
य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम्। ये वा जनेषु पंचसु ।।2।।
ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम्। स्वाना देवास इन्दवः ।।३।।

६७. भृगुर्वारुणिः जमदग्निर्भार्गवो वा – ऋ. ९.६५.१–३०
हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम्। महामिन्दुं महीयुवः ।।१।।
पवमान रुचारुचा देवो देवेभ्यस्परि। विश्वा वसून्या विश ।।2।।

आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। इषे पवस्व संयतम् ।।३।।
वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वाध्यः ।।४।।
आ पवस्व सुवीर्यं मन्दमानः स्वायुध। इहो ष्विन्दवा गहि ।।५।।
यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः। द्रुणा सधस्थमश्नुषे ।।६।।
प्र सोमाय व्यश्ववत्पवमानाय गायत। महे सहस्रचक्षसे ।।७।।
यस्य वर्णं मधुश्चुतं हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ।।८।।
तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः सखित्वमा वृणीमहे ।।९।।
वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा ।।१०।।
तं त्वा धर्तारमोण्यो३ः पवमान स्वर्दृशम्। हिन्वे वाजेषु वाजिनम् ।।११।।
अया चित्तो विपानया हरिः पवस्व धारया। युजं वाजेषु चोदय ।।12।।
आ न इन्दो महीमिषं पवस्व विश्वदर्शतः। अस्मभ्यं सोमगातुवित् ।।१३।।
आ कलशा अनूषतेन्दो धाराभिरोजसा। एन्द्रस्य पीतये विश ।।१४।।
यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः। स पवस्वाभिमातिहा ।।१५।।
राजा मेधाभिरीयते पवमानो मनावधि। अन्तरिक्षेण यातवे ।।१६।।
आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम्। वहा भगत्तिमूतये ।।१७।।
आ नः सोम सहो जुवो रूपं न वर्चसे भर। सुष्वाणो देववीतये ।।१८।।
अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदंछ्येनो न योनिमा ।।१९।।
अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे ।।20।।
इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम् ।।2१।।
ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति ।।22।।
य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम्। ये वा जनेषु पंचसु ।।2३।।
ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम्। सुवाना देवास इन्दवः ।।2४।।
पवते हर्यतो हरिर्गृणानो जमदग्निना। हिन्वानो गोरधि त्वचि ।।2५।।
प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः। श्रीणाना अप्सु मृंजत ।।2६।।
तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये। स पवस्वानया रुचा ।।2७।।
आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम् ।।2८।।
आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम्। पान्तमा पुरुस्पृहम् ।।2९।।
आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा। पान्तमा पुरुस्पृहम् ।।३०।।

९८. मधुच्छन्दाः — ऋ. ९.१.१–१०

स्वदिष्ठया मदिष्ठया पवसव सोम धारया। इन्द्राय पातवे सुतः ।।१।।
रक्षोहा विश्वचर्षणिरभि योनिमयोहतम्। द्रुणा सधस्थमासदत् ।।2।।
वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः। पर्षि राघो मघोनाम् ।।३।।
अभ्यर्ष महानां देवानां वीतिमन्धसा। अभि वाजमुत श्रवः ।।४।।
त्वामच्छा चरामसि तदिदर्थं दिवेदिवे। इन्द्रो त्वे न आशसः ।।५।।
पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता। वारेण शश्वता तना ।।६।।
तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश। स्वसारः पार्ये दिवि ।।७।।
तमीं हिन्वन्त्यग्रुवो धमन्ति बाकुरं दृतिम्। त्रिधातु वारणं मधु ।।८।।
अभी३ममघ्न्या उत श्रीणन्ति धेनवः शिशुम्। सोममिन्द्राय पातवे ।।९।।
अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते। शूरो मघा च मंहते ।।१०।।

९९. मधुच्छन्दा वैश्वामित्रः — सा. ४६८; ६८९–६९१

सा. ४६८

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः ।।2।।

सा. ६८६–६६१

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः ।।१।।
रक्षोहा विश्वचर्षणिरभि योनिमयोहते। द्रोणे सधस्थमासदत् ।।2।।
वरिवोधातमो भुवो मंहिष्ठो वृत्रहन्तमः। पर्षि राधो मघोनाम् ।।३।।

१००. मनुर् आप्स्वः – ऋ. ९.१०६.७–९; सा. ५७१; १३2९–2८

९.१०६.७–९

पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः ।।७।।
तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः। त्वां देवासो अमृताय कं पपुः ।।८।।
आ नः सुतास इन्दवः पुनाना धावता रयिम्। वृष्टिद्यावो रीत्यापः स्वर्विदः ।।९।।

सा. ५७१

पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः ।।६।।

सा. १३2९–१३2८

पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः ।।१।।
तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः। त्वां देवासो अमृताय कं पपुः ।।2।।
आ नः सुतास इन्दवः पुनाना धावता रयिम्। वृष्टिद्यावो रीत्यापः स्वर्विदः ।।३।।

१०१. मनुः सांवरणः – ऋ. ९.१०१.१०–१2

ऋ. ९.१०१.१०–१2

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः। मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ।।१०।।
सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि। इषमस्मभ्यमभितः समस्वरन् वसुविदः ।।११।।
एते पूता विपश्चितः सोमासो दध्याशिरः। सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ।।१2।।

सा. ५४८

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः। मित्रा खाना अरेपसः स्वाध्यः स्वर्विदः ।।४।।

सा. ११०१–११०३

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः। मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ।।१।।
ते पूतासो विपश्चितः सोमासो दध्याशिरः। सुरासो न दर्शतासो जिगत्नवो ध्रुवा घृते ।।2।।
सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि। इषमस्मभ्यमभितः समस्वरन्वसुविद ।।३।।

१०2. मन्युर् वासिष्ठः – ऋ. ९.९७.१०–१2; सा. १०१९–१०2१

ऋ. ९.९७.१०–१2

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ।।१०।।
अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ।।११।।
अभि प्रियाणि पवते पुनानो देवो देवान्त्स्वेन रसेन पृंचन् ।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ।।१2।।

सा. १०१९–१०2१

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ।।१।।
अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ।।2।।
अभि व्रतानि पवते पुनानो देवो देवान्त्स्वेन रसेन पृंचन् ।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ।।३।।

१०३. मन्युर् वासिष्ठः (साग्री. सास्वा.) इन्दुर् वासिष्ठः (सार्षेदी.) – सा. ५४०

इन्दुर्वाजीपवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ।।८।।

१०४. मृळीको वासिष्ठः – ऋ. ९.९७.२५–२७

अर्वाँ इव श्रवसे सतिमच्छेन्द्रस्य वायोरभि वीतिमर्ष ।
स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित्पुनानः ।।२५।।
देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः ।
आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मन्द्रतमाः ।।२६।।
एवा देव देवताते पवस्व महे सोम प्सरसे देवपानः ।
महश्चिद्धि ष्मसि हिताः समर्ये कृधि सुष्ठाने रोदसी पुनानः ।।२७।।

१०५. मेधातिथिः – ऋ. ९.2.१–१०

पवस्व देववीरति पवित्रं सोम रंह्या। इन्द्रमिन्दो वृषा विश ।।१।।
आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः। आ योनि धर्णसिः सदः ।।2।।
अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः ।।३।।
महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः। यद्गोभिर्वासयिष्यसे ।।४।।
समुद्रो अप्सु मामृजे विष्टम्भे धरुणो दिवः। सोमः पवित्रे अस्मयुः ।।५।।
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण रोचते ।।६।।
गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भसे ।।७।।
तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे। तव प्रशस्तयो महीः ।।८।।
अस्मभ्यमिन्दविन्द्रयुर्मध्वः पवस्व धारया। पर्जन्यो वृष्टिमाँ इव ।।९।।
गोषा इन्दो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः ।।१०।।

१०६. मेधातिथिः काण्वः – सा. ४९७; १०३७–१०४६

सा. ४९७

अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। संसूर्येण दिद्युते ।।१।।

सा. १०३७–१०४६

पवस्व देववीरति पवित्रं सोम रंह्या। इन्द्रमिन्दो वृषा विश ।।१।।
आ वच्यस्व महि पसरो वृषेन्दो द्युम्रवत्तमः। आ योनि धर्णासिः सदः ।।2।।
अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः ।।३।।
महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः। यद्गोभिर्वासयिष्यसे ।।४।।
समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः। सोमः पवित्रे अस्मयुः ।।५।।
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण दिद्युते ।।६।।
गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भसे ।।७।।
तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे। तव प्रशस्तये महे ।।८।।
गोषा इन्दो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः ।।९।।
अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया। पर्जन्यो वृष्टिमाँ इव ।।१०।।

१०७. मेध्यातिथिः – ऋ. ९.४१.१–६; ९.४2.१–६; ९.४३.१–६

ऋ. ९.४१.१–६

प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णामप त्वचम् ।।१।।
सुवितस्य मनामहेऽति सेतुं दुराव्यम्। साह्वांसो दस्युमव्रतम् ।।2।।
शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि ।।३।।
आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत्। अश्वावद्वाजवत् सुतः ।।४।।
स पवस्व विचर्षण आ मही रोदसी पृण। उषाः सूर्यो न रश्मिभिः ।।५।।
परि णः शर्मयन्त्या धारया सोम विश्वतः। सरा रसेव विष्टपम् ।।६।।

ऋ. ९.४2.१–६

जनयन् रोचना दिवो जनयन्नप्सु सूर्यम्। वसानो गा अपो हरिः ।।१।।
एष प्रत्नेन मन्मना देवो देवेभ्यस्परि। धारया पवते सुतः ।।2।।
वावृधानाय तूर्वये पवन्ते वाजसातये। सोमाः सहस्रपाजसः ।।३।।
दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते। क्रन्दन्देवाँ अजीजनत् ।।४।।
अभि विश्वानि वार्याभि देवाँ ऋतावृधः। सोमः पुनानो अर्षति ।।५।।
गोमन्नः सोम वीरदश्वावद्वाजवत्सुतः। पवस्व बृहतीरिषः ।।६।।

ऋ. ६.४३.१–६

यो अत्य इव मृजयते गोभिर्मदाय हर्यतः। तं गीर्भिर्वासयामसि ।।१।।
तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा। इन्दुमिन्द्राय पीतये ।।2।।
पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः। विप्रस्य मेध्यातिथेः ।।३।।
पवमान विदा रयिमस्मभ्यं सोम सुश्रियम्। इन्दो सहस्रवर्चसम् ।।४।।
इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ। यदक्षारति देवयुः ।।५।।
पवस्व वाजसातये विप्रस्य गृणतो वृधे। सोम रास्व सुवीर्यम् ।।६।।

१०८. मेध्यातिथिः काण्वः – सा. ४६१; ७५६–७६०; ८६2–८६७

सा. ४६१

प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णामप त्वचम् ।।५।।

सा. ७५६–७६०

एष प्रत्नेन मन्मना देवो देवेभ्यस्परि। कविर्विप्रेण वावृधे ।।2।।
दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यसे। क्रन्दं देवाँ अजीजनः ।।३।।

सा. ८६2–८६७

प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णमप त्वचम् ।।१।।
सुवितस्य वनामहेऽति सेतुं दुराय्यम्। साह्याम दस्युमव्रतम् ।।2।।
शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि ।।३।।
आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत्। अश्ववत्सोम वीरवत् ।।४।।
पवस्व विश्वचर्षण आ मही रोदसी पृण।उषाः सूर्यो न रश्मिभिः ।।५।।
परिणः शर्मयन्त्या धारया सोम विश्वतः। सरा रसेव विष्टपम् ।।६।।

१०६. ययातिर् नाहुषः – सा. ५४७; ८७2–८७४

सा. ५४७

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ।।३।।

सा. ८७2–८७४

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरं देवान् गच्छन्तु वो मदाः।।१।।
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसः ।।2।।
सहस्रधारः पवते समुद्रो वाचमींखयः। सोमस्यती रयीणां सखेन्द्रस्य दिवेदिवे ।।३।।

ऋ. ६.१०१.४–६

सुतासो मधुमत्तमः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ।।४।।
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ।।५।।
सहस्रधारः पवते समुद्रो वाचमीङ्खयः। सोमः पती रयीणां सखेन्द्रस्य दिवेदिवे ।।६।।

११०. रहूगणः – ऋ. ६.३७.१–६; ६.३८.१–६

ऋ. ६.३७.१–६

स सुतः पीतये वृषा सोमः पवित्रे अर्षति। विघ्नन्नक्षांसि देवयुः ।।१।।
स पवित्रे विचक्षणो हरिरर्षति धर्णसिः। अभि योनिं कनिक्रदत् ।।2।।
स वाजी रोचना दिवः पवमानो वि धावति। रक्षोहा वारमव्ययम् ।।३।।

स त्रितस्याधि सानवि पवमानो अरोचयत्। जामिभिः सूर्यं सह ।।४।।
स वृत्रहा वृषा सुतो वरिवोविददाभ्यः। सोमो वाजमिवासरत् ।।५।।
स देवः कविनेषितो३ भि द्रोणानि धावति। इन्दुरिन्द्राय मंहना ।।६।।

ऋ. ६.३८.१–६

एष उ स्य वृषा रथोऽव्यो वारेभिरर्षति। गच्छन् वाजं सहस्रिणम् ।।१।।
एतं त्रितस्य योषणो हरि हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ।।2।।
एतं त्यं हरितो दश ममृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भते ।।३।।
एष स्य मानुषीष्वा श्येनो न विक्षु सीदति। गच्छंजारो न योषितम् ।।४।।
एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः। य इन्द्रर्वारमाविशत् ।।५।।
एष स्य पीतये सुतो हरिरर्षति धर्णसिः। क्रन्दन्योनिमभि प्रियम् ।।६।।

१११. रहूगण आंगिरसः – सा. १२७४–१२७६; १२६2–१२६७

सा. १२७४–१२७६

एष उ स्य वृषा रथोऽव्या वारेभिरव्यत। गच्छन्वाजं सहस्रिणम् ।।१।।
एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ।।2।।
एष स्य मानुषीष्वा श्येनो न विक्षु सीदति। गच्छंजारो न योषितम् ।।३।।
एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः। य इन्दुर्वारमाविशत् ।।४।।
एष स्य पीतये सुतो हरिरर्षति धर्णसिः। क्रन्दन्योनिमभि प्रियम् ।।५।।
एषं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भते ।।६।।

सा. १२६2–१२६७

स सुतः पीतये वृषा सोमः पवित्रे अर्षति। विघ्नन्रक्षांसि देवयुः ।।१।।
स पवित्रे विचक्षणो हरिरर्षति धर्णसिः। अभि यांेनिं कनिक्रदत्।।2।।
स वाजी रोचनं दिवः पवमानो वि धावति। रक्षोहा वारमव्ययम्।।३।।
स त्रितस्याधि सानवि पवमानो अरोचयत्। जामिभिः सूर्यं सह ।।४।।
स वृत्रहा वृषा सुतो वरिवोविददाभ्यः। सोमो वाजमिवासरत् ।।५।।
स देवः कविनेषितो३ऽभि द्रोणानि धावति। इन्दुरिन्द्राय हयन् ।।६।।

११2. रेणुर् वैश्वामित्रः – ऋ. ६.७०.१–१०

त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि ।
चन्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ।।१।।
स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।
तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः ।।2।।
ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषीं उभे अनु ।
येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ।।३।।
स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा ।
व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ ।।४।।
स मर्मृजान इन्द्रियाय धायस ओभे अन्ता रोदसी ईषते हितः ।
वृषा शुष्मेण बाधते वि दुर्मतीरादेदिशानः शर्यहेव शुरुधः ।।५।।
स मातरा न ददृशान उस्रियो नानददेति उरुतामिव स्वनः ।
जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ।।६।।
रुवति भीमो वृषभस्तविष्यया शृंगे शिशानो हरिणी विचक्षणः ।
आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी ।।७।।
शुचिः पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि ।
जुष्टो मित्राय वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ।।८।।
पवस्व सोम देववीतये वृषेन्द्रस्य हार्दि सोमधानमा विश ।
पुरा नो वाधाद् दुरितापि पारया क्षेत्रविद्धि दिश आहा विपृच्छते ।।६।।

हितो न सप्तिरभि वाजमर्षेन्द्रस्येन्दो जठरमा पवस्व ।
नावा न सिन्धुमति पर्षि विद्वांछूरो न युध्यन्नव नो निदः स्पः ।।१०।।

११३. रेभसूनू काश्यपौ – ऋ. ६.६६.१–८; ६.१००.१–६; सा. ५५०; ५५१; १०१६–१०१८; १६३१–१६३३

ऋ. ६.६६.१–८

आ हर्ताय धृष्णवे धुनस्तन्वन्ति पौंस्यम्। शुक्रां वयन्त्यसुराय निर्णिजं विपामग्रं महीयुवः ।।१।।
अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते। यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ।।2।।
तमस्य मर्जयामसि मदो य इन्द्रपातमः। यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ।।३।।
तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपन्त धीतयो देवानां नाम बिभृतीः ।।४।।
तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम्। दूतं न पूर्वचित्तय आ शासते मनीषिणः ।।५।।
स पुनानो मदिन्तमः सेमश्चमूषु सीदति। पशौ न रेत आदधत्पतिर्वचस्यते धियः ।।६।।
स मृज्यते सुकर्भभिर्देवो देवेभ्यः सुतः। विदे यदासु संददिर्महीरपो वि गाहते ।।७।।
सुत इन्दो पवित्र आ नृभिर्यतो वि नीयसे। इन्द्राय मत्सरिन्तमश्चमूष्वा नि षीदसि ।।८।।

ऋ. ६.१००.१–६

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम्। वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ।।१।।
पुनान इन्दवा भर सोम द्विबर्हसं रयिम्। त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ।।2।।
त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः। त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि।।३।।
परि ते जिग्युपो यथा धारा सुतस्य धावति। रंहमाणा व्य१व्ययं वारं वाजीव सानसिः ।।४।।
क्रत्वे दक्षाय नः कवे पवस्व सोम धारया। इन्द्राय पातवे सुतो मित्राय वरुणाय च ।।५।।
पवस्व वाजसातमः पवित्रे धारया सुतः। इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ।।६।।
त्वां रिहन्ति मातरो हरि पवित्रे अद्रुहः। वत्सं जातं न धेनवः पवमान विधर्मणि ।।७।।
पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः। शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ।।८।।
त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे। प्रति द्रापिममुंचथाः पवमान महित्वना ।।६।।

सा. ५५०–५५१

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम्। वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ।।६।।
आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौंस्यम्। शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः।।७।।

सा. १०१६–१०१८

पवस्व वाजसातये पवित्रे धारया सुतः। इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तरः ।।१।।
त्वां रिहन्ति धीतयो हरिं पवित्रे अद्रुहः। वत्सं जातं न मातरः पवमान विधर्मणि ।।2।।
त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे। प्रति द्रापिममुंचथाः पवमान महित्वना ।।३।।

सा. १६३१–१६३३

अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहसे। यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ।।१।।
तमस्य मर्जयामसि मदो य इन्द्रपातमः। यं गाव आसभिर्दधुः पुरा नूनं न सूरयः ।।2।।
तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ।।३।।

११४. वत्सप्रिर्भालन्दनः – ऋ. ६.६८.१–१०

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ।।१।।
स रोरुवदभि पूर्वा अचिक्रददुपारुहः श्रथयन्त्स्वादते हरिः ।
तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरम् ।।2।।
वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता ।
मही अपारे रजसी विवेविददभिव्रजन्नक्षितं पाज आ ददे ।।३।।
स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदम् ।
अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः ।।४।।

सं दक्षेण मनसा जायते कविर्ऋतस्य गर्भो निहितो यमा परः ।
यूना ह सन्ता प्रथमं वि जज्ञतर्गुहा हितं जिनिम नेममुद्यतम् ।।५।।
मन्द्रस्य रूपं विविदुर्मनीषिणः श्येनो यदन्धो अभरत्परावतः ।
तं मर्जयन्त सुवृध नदीष्वाँ उशन्तमंशुं परियन्तमृग्मियम् ।।६।।
त्वां मृजन्ति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितम् ।
अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये ।।७।।
परिप्रयन्तं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः ।
यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः ।।८।।
अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति ।
अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इन्दुर्वरिवो विदत्प्रियम् ।।९।।
एवा नः सोम परिषिच्यमानो वयो दधिच्चित्रतमं पवस्व ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ।।१०।।

११५. वत्सप्रिर् भालन्दनः (साग्री. सास्वा. ऋसर्व.); वत्स (सार्षेदी. ७४); वत्सप्रिय (सार्षेदी. ७७) – सा. ५६३

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ।।१०।।

११६. वसिष्ठः – ऋ. ९.६७.१९–२१; ९.९०.१–६; ९.९७.१–३

ऋ. ९.६७.१९–२१

ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यम् ।।१९।।
एष तुन्नो अभिष्टुतः पवित्रमति गाहते। रक्षोहा वारमव्ययम् ।।20।।
यदन्ति यच्च दूरके भयं विन्दति मामिह। पवमान वि तज्जहि ।।21।।

ऋ. ९.९०.१–६

प्र हिन्वानो जनिता रोदस्यो रथे न वाजं सनिष्यन्नयासीत् ।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ।।१।।
अभि त्रिपृष्ठं वृषणं वयोधामाङ्गूषणामवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धून्वि रत्नधा दयते वार्याणि ।।2।।
शूरग्रामः सर्ववीरः सहावांजेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळहः साह्वान् पृतनासु शत्रून् ।।३।।
उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी ।
अपः सिषासन्नुषसः स्व१र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ।।४।।
मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।
मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिन्द्रमिन्दो मदाय ।।५।।
एवा राजेव क्रतुमाँ अमेन विश्वा घनिघ्नद्दुरिता पवस्व ।
इन्दो सूक्ताय वचसे वयो धा यूयं पात स्वस्तिभिः सदा नः ।।६।।

ऋ. ९.९७.१–३

अस्य प्रेषा हेमना पूयमानो देवो देवभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमान्ति होता ।।१।।
भद्रा वस्त्रा समन्या३ वसानो महान्कविर्निवचनानि शंसन् ।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ।।2।।
समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ।।३।।

११७. वासिष्ठो मैत्रावरुणिः – सा. ५२६; ५२८; ५३६; १३९६–१४०१; १४०८–१४१०

सा. ५2६
अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन् मितेव सद्म पशुमन्ति होता ।।४।।
सा. ५2८
अभि त्रिपृष्ठं वृष्णं वयोधामंगोषिणमवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ।।६।।
सा. ५३६
प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्नयासीत् ।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ।।४।।
सा. १३९९–१४०१
अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता ।।१।।
भद्रा वस्त्रा समन्या३वसानो महान्कविर्निवचनानि शंसन् ।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ।।2।।
समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ।।३।।
सा. १४०८–१४१०
अभि त्रिपृष्ठं वृषणं वयोधामंगोषिणमवावशंत वाणीः ।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ।।१।।
शूरग्रामः सर्ववीरः सहावान् जेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाढः साह्वान्पृतनासु शत्रून् ।।2।।
उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी ।
अपः सिषासन्नुषसः स्वऽ३र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ।।३।।

११८. वासुर् भरद्वाजः – सा. ५६2; १३१६–१३१८

सा. ५६2
असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ।।६।।
सा. १३१६–१३१८
असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ।।१।।
पर्जन्य पिता महिषस्य पार्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसार आपो अभि गा उदासरन्त्सं ग्रावभिर्वसते वीते अध्वरे ।।2।।
कविर्वेधस्या पर्येषि महिनमत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन् दुरिता सोम नो मृड घृता वसानः परि यासि निर्णिजम् ।।३।।

११९. वसुर् भारद्वाजः – ऋ. ९.८०.१–५; ९.८१.१–५; ९.८2.१–५

ऋ. ९.८०.१–५
सोमस्य धारा पवते नृचक्षस ऋतेन देवान्हवते दिवस्परि ।
बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः ।।१।।
यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान् ।
मघोनामायुः प्रतिरन्महि श्रव इन्द्राय सोम पवसे वृषा मदः ।।2।।
एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमंगलः ।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन्हरिरत्यः स्यन्दते वृषा ।।३।।
तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।

नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित् ।।४।।
तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः ।
इन्द्र सोम मादयन्दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ।।५।।

ऋ. ९.८१.१–५

प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः ।
दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः ।।१।।
अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळहा रघुवर्तनिर्वृषा ।
अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ।।2।।
आ नः सोम पवमानः किरा वस्विन्दो भव मघवा राधसो महः ।
शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ।।३।।
आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः ।
बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ।।४।।
उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।
भगो नृशंस उर्व१ न्तरिक्षं विश्वे देवाः पवमानं जुषन्त ।।५।।

ऋ. ९.८2.१–५

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् ।।१।।
कविर्वेधस्या पर्येषि महिनमत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् ।।2।।
पर्जन्यः पिता पहिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसार आपो अभि गा उतासरन्त्सं ग्रावभिर्नसते वीते अध्वरे ।।३।।
जायेव पत्यावधि शेव मंहसे प्रजाया गर्भ शृणुहि ब्रवीमि ते ।
अन्तर्वणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ।।४।।
यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिन्दो ।
एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचन्ते ।।५।।

१2०. वसुश्रुत आत्रेयः – सा. १०22–१०2४

आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ।।१।।
आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ।।2।।
ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ।।३।।

१2१. विश्वामित्रः – ऋ. ९.६७.१३–१५

वाचो जन्तुः कवीनां पवस्व सोम धारया। देवेषु रत्नधा असि ।।१३।।
आ कलशेषु धावति श्येनो वर्म वि गाहते। अभि द्रोणा कनिक्रदत् ।।१४।।
परि प्र सोम ते रसोऽसर्जि कलशे सुतः। श्येनो न तक्तो अर्षति ।।१५।।

१22. विश्वेदेवाः – सा. १८2६–2७

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ।।५।।
अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति ।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः।।६।।

१2३. वृषगणो वासिष्ठः – ऋ. ९.९७.७–९; सा. ५2४; ११1६–१११८

ऋ. ९.९७.७–९

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ।।७।।
प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः ।
आङ्गूष्यं१ पवमानं सखायो दुर्मर्षं साकं प्र वदन्ति वाणम् ।।८।।
स रंहत उरुगायस्य जूतिं वृथा क्रीळन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृंगो दिवा हरिर्ददृशे नक्तमृज्रः ।।९।।

सा. ५२४

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ।।2।।

सा. १११६–१११८

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ।।१।।
प्र हंसासस्तृपला वग्नुमच्छामादस्तं वृषगणा अयासुः ।
अंगोषिणं पवमानं सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ।।2।।
स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृंगो दिवा हरिर्ददृशे नक्तमृज्रः ।।३।।

१2४. वृहन्मतिः – ऋ. ९.३९.१–६; ९.४०.१–६

ऋ. ९.३९.१–६

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना। यत्र देवा इति ब्रवन् ।।१।।
परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः। वृष्टिं दिवः परि स्रव ।।2।।
सुत एति पवित्र आ त्विषिं दधान ओजसा। विचक्षाणो विरोचयन् ।।३।।
अयं स यो दिवस्परि रघुयामा पवित्र आ। सिन्धोरूर्मा व्यक्षरत् ।।४।।
आविवासन् परावतो अथो अर्वावतः सुतः। इन्द्राय सिच्यते मधु। ।।५।।
समीचीना अनूषत हरि हिन्वन्त्यद्रिभिः। योनावृतस्य सीदत ।।६।।

ऋ. ९.४०.१–६

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः ।।१।।
आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः। ध्रुवे सदसि सीदति ।।2।।
नू नो रयिं महामिन्द्रोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम् ।।३।।
विश्वा सोम पवमान द्युम्नानीन्दवा भर। विदाः सहस्रिणीरिषः ।।४।।
स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम्। जरितुर्वर्धया गिरः ।।५।।
पुनान इन्दवा भर सोमं द्विबर्हसं रयिम्। वृषन्निन्दो न उक्थ्यम् ।।६।।

१2५. वेनो भार्गवः – ऋ. ९.८५.१–१2; सा. ५६१

ऋ. ९.८५.१–१2

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ।।१।।
अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।
जहि शत्रूँरभ्या भन्दनायतः पिबेन्द्र सोममव नो मृधो जहि ।।2।।
अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः ।
अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ।।३।।
सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु ।
जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ।।४।।
कनिक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि ।

मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ।।५।।
स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने ।
स्वादुर्मित्राय वरुणय वायवे बृहस्पतेय मधुमाँ अदाभ्यः ।।६।।
अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते ।
पवमाना अभ्यर्षन्ति सुष्टुतिमेन्द्रं विशन्ति मदिरास इन्दवः ।।७।।
पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः ।
माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ।।८।।
अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः ।
राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ।।९।।
दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम् ।
अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धेरूर्मा मधुमन्तं पवित्र आ ।।१०।।
नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः ।
शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम् ।।११।।
ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य ।
भानुः शुक्रेण शोचिषा व्यद्यौत्प्रारूरुचद्रोदसी मातरा शुचिः ।।१२।।

सा. ५६१

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ।।८।।

१२६. शक्तिः – ऋ. ९.१०८.३; १४–१६

ऋ. ९.१०८.३

तवं ह्य१ंग दैव्या पवमान जनिमानि द्युमत्तमः। अमृतत्वाय घोषयः ।।३।।

ऋ. ९.१०८.१४–१६

यस्य न इन्द्रः पिबाद्यस्य रुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रमवसे महे ।।१४।।
इन्द्राय सोम पातवे नृभिर्यतः स्वायुधो मदिन्तमः ।
पवस्व मधुमत्तमः ।।१५।।
इन्द्रस्य हार्दि सोमधानमा विश समुद्रमिव सिन्धवः ।
जुष्टो मित्राय वरुणाय वायवे दिवो विष्ट्म्भ उत्तमः ।।१६।।

१२७. शक्तिर्वासिष्ठः – ऋ. ९.९७.१९–२१; सा. ५८३; ६३८; १०९७

ऋ. ९.९७.१९–२१

जुष्टो मदाय देवतात इन्दो परि ष्णुना धन्व सानो अव्ये ।
सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये ।।१९।।
अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।
एते शुक्रासो धन्वन्ति सोमा देवासस्ताँ उप याता पिबध्यै ।।२०।।
एवा न इन्दो अभि देववीति परि स्रव नभो अर्णश्चमूषु ।
सोमो अस्मभ्यं काम्यं बृहन्तं रयिं ददातु वीरवन्तमुग्रम् ।।२१।।

सा. ५८३

त्वं ह्य३ंग दैव्यं पवमान जनिमानि द्युमत्तमः। अमृतत्वाय घोषयन् ।।६।।

सा. ६३८

त्वं ह्य३ंग दैव्यं पवमान जनिमानि द्युमत्तमः। अमृतत्वाय घोषयन् ।।१।।

सा. १०९७

यस्य त इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रमवसे महे ।।२।।

१२८. शतं वैखानसः – ऋ. ९.६६.१–१८; 22–३०; सा. ६५७–६५९; १३१०–१३१२

ऋ. ९.६६.१–१८

पवस्व विश्वचर्षणेऽभि विश्वानि काव्या। सखा सखिभ्य ईड्यः ।।१।।
ताभ्यां विश्वस्य राजसि ये पवमान धामनी। प्रतीची सोम तस्थतुः ।।2।।
परि धामानि यानि ते त्वं सोमासि विश्वतः। पवमान ऋतुभिः कवे ।।३।।
पवस्व जनयन्निषोऽभि विश्वानि वार्या। सखा सखिभ्य ऊतये ।।४।।
तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते। पवित्रं सोम धामभिः ।।५।।
तवेमे सप्त सिन्धवः प्राशिषं सोम सिस्रते। तुभ्यं धावन्ति धेनवः ।।६।।
प्र सोम याहि धारया सुत इन्द्राय मत्सरः। दधानो अक्षिति श्रवः ।।७।।
समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः। विप्रमाजा विवस्वतः ।।८।।
मृजन्ति त्वा समग्रुवोऽव्ये जीरावधि ष्वणि। रेभो यदज्यसे वने ।।९।।
पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत। अर्वन्तो न श्रवस्यवः ।।१०।।
अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशन्त धीतयः ।।११।।
अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा ।।१2।।
प्र ण इन्दो महे रण आपो अर्षन्ति सिन्धवः। यद् गोभिर्वासयिष्यसे ।।१३।।
अस्य ते सख्ये वयमियक्षन्तस्त्वोतयः। इन्दो सखित्वमुश्मसि ।।१४।।
आ पवस्व गविष्टये महे सोम नृचक्षसे। एन्द्रस्य जठरे विश ।।१५।।
महाँ असि सोम ज्येष्ठ उग्राणमिन्द ओजिष्ठः। युध्वा संछश्वज्जिगेथ ।।१६।।
य उग्रेभ्यश्चिदोजीयांछूरेभ्यश्चिच्छूरतरः। भूरिदाभ्यश्चिन्मंहीयान् ।।१७।।
त्वं सोम सूर एषस्तोकस्य साता तनूनाम्। वृणीमहे सख्याय वृणीमहे युज्याय ।।१८।।

ऋ. ९.६६.22–३०

पवमानो अति स्रिधोऽभ्यर्षति सुष्टुतिम्। सूरो न विश्वदर्शतः ।।22।।
स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः। इन्दुरत्यो विचक्षणः ।।2३।।
पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत्। कृष्णा तमांसि जंघनत् ।।2४।।
पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः ।।2५।।
पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः ।।2६।।
पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यम् ।।2७।।
प्र सुवान इन्दुरक्षाः पवित्रमत्यव्ययम्। पुनान इन्दुरिन्द्रमा ।।2८।।
एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः। इन्द्रं मदाय जोहुवत् ।।2९।।
यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः। तेन नो मृळ जीवसे ।।३०।।

सा. ६५७–६५९

पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत। अर्वन्तो न श्रवस्यवः ।।१।।
अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशन्त धीतयः ।।2।।
अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा ।।३।।

सा. १३१०–१३१२

पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः ।।१।।
पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः ।।2।।
पवमान व्यश्नुहि रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यम् ।।३।।

१२९. शिशुः – ऋ. ९.११2.१–४

नानानं वा उ नो धियो व्रतानि जनानाम् ।
तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव ।।१।।

जरतीभिरोषधीभिः पर्णेभिः शकुनानाम् ।
कार्मारो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव ।।2।।
कारुरहं ततो भिषगुपलप्रक्षिणी नना ।
नानाधियो वसूयवोऽनु गाइव तस्थिमेन्द्रायेन्दो परि स्रव ।।३।।
अश्वो वोळहा सुखं रथं हसनामुपमन्त्रिणः ।
शेपो रोमण्वन्तौ भेदौ वरिन्मण्डूक इच्छतीन्द्रायेन्दो परि स्रव ।।४।।

१३०. शुनःशेप आजीगर्तिः देवरातः कृत्रिमो वैश्वामित्रः (साग्री. सास्वा.); शुनःशेप (ऋसर्व.) – ऋ. ६.३.१–१०; सा. ७५८; १२५६–१२६५

ऋ. ६.३.१–१०

एष देवो अमर्त्यः पर्णवीरिव दीयति। अभि द्रोणन्यासदम् ।।१।।
एष देवो विपा कृतोऽति ह्वरांसि धावति। पवमानो अदाभ्यः ।।2।।
एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृजयते ।।३।।
एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति ।।४।।
एष देवो रथर्यति पवमानो दशस्यति। आविष्कृणोति वग्वनुम् ।।५।।
एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे ।।६।।
एष दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत् ।।७।।
एष दिवं व्यासरत्तिरो रजांस्यस्पृतः। पवमानः स्वध्वरः ।।८।।
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ।।६।।
एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः ।।१०।।

सा. ७५८

एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ।।१।।

सा. १२५६–१२६५

एष देवो अमर्त्यः पर्णवीरिव दीयते। अभि द्रोणान्यासदम् ।।१।।
एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे ।।2।।
एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति ।।३।।
एष देवो रथर्यति पवमानो दिशस्यति। आविष्कृणोति वग्वनुम् ।।४।।
एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृजयते ।।५।।
एष देवो विपा कृतोऽति ह्वरांसि धावति। पवमानो अदाभ्यः ।।६।।
एष दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत् ।।७।।
एष दिवं व्यासरत्तिरो रजांस्यस्तृतः। पवमानः स्वध्वरः ।।८।।
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ।।६।।
एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः ।।१०।।

१३१. श्यावाश्वः – ऋ. ६.३2.१–६

प्र सोमासो मदच्युतः श्रवसे नो मघोनः। सुता विदथे अक्रमुः ।।१।।
आदीं त्रितस्य योषणो हरि हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ।।2।।
आदी हंसो यथा गणं विश्वस्यावीवशन्मतिम्। अत्यो न गोभिरज्यते ।।३।।
उभे सोमावचाकशन्मृगो न तक्तो अर्षसि। सीदन्नृतस्य योनिमा ।।४।।
अभि गावो अनूषत योषा जारमिव प्रियम्। अगन्नाजिं यथा हितम् ।।५।।
अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च। सनिं मेधामुत श्रवः ।।६।।

१३2. श्यावाश्व आत्रेयः – सा. ४७७; ७६६–७७१

सा. ४७७

प्र सोमासो मदच्युतः श्रवसे नो मघोनाम्। सुता विदथे अक्रमुः ।।१।।

सा. ७६६–७७१

प्र सोमासो मदच्युतः श्रवसे नो मघोनाम्। सुता विदथे अक्रमुः ।।१।।
आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम्। अत्यो न गोभिरज्यते ।।2।।
आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ।।३।।

१३३. श्रुतकक्षः सुकक्षो वा आंगिरसः – सा. ८2४–८2६

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः। एवा ते राध्यं मनः ।।१।।
एवा रातिस्तविमघ विश्वेभिर्धायि धातृभिः। अधा चिदिन्द्र नः सचाा ।।2।।
मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः ।।३।।

१३४. सप्तर्षयः – ऋ. ६.१०७.१–2६; सा. ५११–५22; ६७५–६७६; ७६७–७६८; ८५६–८५८; ६22–६2३; ६६७–६६८; १०७६–१०८०; १३१३–१३१५; १६८६–१६६०

ऋ. ६.१०७.१–2६

परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्व१न्तरा सुषाव सोममद्रिभिः ।।१।।
नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिंतरः ।
सुते चित्त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ।।2।।
परि सुवानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ।।३।।
पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ।।४।।
दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ।
आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ।।५।।
पुनानः सोम जागृविरव्यो वारे परि प्रियः ।
त्वं विप्रो अभवोऽंगिरस्तमो मध्वा यज्ञं मिमिक्ष नः ।।६।।
सोमो मीढ्वान्पवते गातुवित्तम ऋषिर्विप्रो विचक्षणः ।
त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि ।।७।।
सोम उ षुवाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ।।८।।
अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ।।६।।
आ सोम सुवानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे ।।१०।।
स मामृजे तिरो अण्वानि मेष्यो मीळहे सप्तिर्न वाजयुः ।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ।।११।।
प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ।।१2।।
आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ।।१३।।
अभि सोमाय आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ।।१४।।
तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ।।१५।।
नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ।।१६।।
इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ।।१७।।

पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति ।
अपो वसानः परि गोभिरुत्तर सीदन्वनेष्वव्यत ।।१८।।
तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधींरति ताँ इहि ।।१९।।
उताहं नक्तमुत सोम ते दिवा सख्याय बभ्र ऊधनि ।
घृणा तपन्तमति सूर्यं परः शकुनाइव पप्तिम ।।२०।।
मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।
रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ।।२१।।
मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने ।
देवानां सोम पवमान निष्कृतं गोभिरंजानो अर्षसि ।।22।।
पवस्व वाजसातयेऽभि विश्वानि काव्या ।
त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ।।२३।।
स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः ।
त्वां विप्रासो मतिभिर्विचक्षा शुभ्रं हिन्वन्ति धीतिभिः ।।२४।।
पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ।।२५।।
अपो वसानः परि कोशमर्षतीन्दुर्हियानः सोतृभिः ।
जनयंजयोतिर्मन्दना अवीवशद्गाः कृण्वानो न निर्णिजम्।।२६।।

सा. ५११–५22

पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ।।१।।
परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वानयो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः ।।2।।
आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ।।३।।
प्र सोम दीववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ।।४।।
सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ।।५।।
तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीँ रति ताँ इहि ।।६।।
मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।
रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ।।७।।
अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ।।८।।
पुनानः सोम जागृविरव्या वारैः परि प्रियः ।
त्वं विप्रो अभवोऽगिरस्तम मध्वा यज्ञं मिमिक्ष णः ।।९।।
इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ।।१०।।
पवस्व वाजसातमोऽभि विश्वानि वार्या ।
त्वं समुद्रः प्रथमे विधर्मन् देवेभ्यः सोम मत्सरः ।।११।।
पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ।।१2।।

सा. ६७५–६७६

पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ।।१।।
दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ।
आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणः ।।2।।

सा. ७६७–७६८

प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ।।१।।
आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ।।2।।

सा. ८५६–८५८

भि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ।।१।।
तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ।।2।।
नुभिर्येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः ।।३।।

सा. ६22–६2३

तवाहं सोम रारण सख्य इन्द्रो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीं रति ताँ इहि ।।१।।
तवाहं नक्तमुत सोम ते दिवा दुहानो बभ्र ऊधनि ।
घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम ।।2।।

सा. ६६७–६६८

सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ।।१।।
अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ।।2।।

सा. १०७६–१०८०

मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।
रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ।।१।।
पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद्वने ।
देवानां सोम पवमान निष्कृतं गोभिरंजानो अर्षसि ।।2।।

सा. १३१३–१३१५

परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वा३ऽन्तरा सुषाव सोममद्रिभिः ।।१।।
नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिंतरः ।
सुते चित्वाप्सु मदामो अंधसा श्रीणन्तो गोभिरुत्तरम् ।।2।।
परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ।।३।।

सा. १६८६–१६६०

आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ।।१।।
स मामृजे तिरो अण्वानि मेष्यो मीढ्वांत्सप्तिर्न वाजयुः ।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ।।2।।

१३५. सिकता निवावरी – ऋ. ६.८६.११–20; सा. ५५७; ५५६; ८2१–८22; ११५2–११५४

ऋ. ६.८६.११–20

अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ।।११।।
अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति ।
अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ।।12।।
अयं मतवांछकुनो यथा हितोऽव्ये ससार पवमान ऊर्मिणा ।
तव क्रत्वा रोदसी अन्तरा कवे शुचिर्धिया पवते सोम इन्द्र ते ।।१३।।
द्रापिं वसानो यजतो दिविस्पृशमन्तरिक्षप्रा भुवनेष्वर्पितः ।
स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितरमा विवासति ।।१४।।
सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे ।
पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः ।।१५।।
प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।
मर्यइव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ।।१६।।
प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवनेष्वक्रमुः ।
सोमं मनीष अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः ।।१७।।
आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमानो अस्रिधम् ।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ।।१८।।
वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः ।
क्राणा सिन्धूनां कलशाँ अवीवशदिन्द्रस्य हार्द्याविशन्मनीषिभिः ।।१६।।
मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् ।
त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोः सख्याय कर्तवे ।।2०।।

सा. ५५७

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न न मिनाति संगिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ।।४।।

सा. ५५६

वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
प्राणा सिन्धूनाँ कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ।।६।।

सा. ८2१–८22

वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ।।१।।
मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ असिष्यदत् ।
त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायुं सख्याय वर्धयन् ।।2।।

सा. ११५2–११५४

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ।।१।।
प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्वक्रमुः ।
हरिं क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवः पयसेदशिश्रयुः ।।2।।
आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान ऊर्मिणा ।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ।।३।।

१३६. हरिमन्तः – ऋ. ६.७2.१–६

हरिं मृजन्त्यरुषो न युज्यते सं धेनुभिः कलशे सोमो अज्यते ।
उद्वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति चित्परिप्रियः ।।१।।
साके वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यदादुहुः ।
यदी मृजन्ति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु ।।2।।

अरममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवम् ।
अन्वस्मै जोषमभरद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ।।३।।
नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुर्ऋत्वियः ।
पुरन्धिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते ।।४।।
नृबाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते सोम इन्द्र ते ।
आप्राः क्रतून्त्समजैरध्वरे मतीर्वेर्न द्रुषच्चम्वो३रासदद्धरिः ।।५।।
अंशुं दुहन्ति स्तनयन्तमक्षितं कविं कवयोऽपसो मनीषिणः ।
समी गावो मतयो यन्ति सयंत ऋतस्य योना सदने पुनर्भुवः ।।६।।
नाभा पृथिव्या धरुणो महो दिवो३पामूर्मौ सिन्धुष्वन्तरुक्षितः ।
इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ।।७।।
स तू पवस्व परि पार्थिवं रजः स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो ।
मा नो निर्भाग्वसुनः सादनस्पृशो रयिं पिशंगं बहुलं वसीमहि ।।८।।
आ तू न इन्दो शतदात्वश्वयं सहस्रदातु पशुमद्धिरण्यवत् ।
उप मास्व बृहती रेवतीरिषोऽधि स्तोत्रस्य पवमान नो गहि ।।९।।

१३७. हिरण्यस्तूपः – ऋ. ९.४.१–१०; ९.६९.१–१०

ऋ. ९.४.१–१०

सना च सोम जेषि च पवमान महि श्रवः। अथा नो वस्यसस्कृधि ।।१।।
सना ज्योतिः सना स्व१र्विश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि ।।2।।
सना दक्षमुत क्रतुमप सोम मृधो जहि। अथा नो वस्यसस्कृधि ।।३।।
पवीतारः पुनीतन सोममिन्द्राय पातवे। अथा नो वस्यसस्कृधि ।।४।।
त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधि ।।५।।
तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम्। अथा नो वस्यसस्कृधि ।।६।।
अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम्। अथ नो वस्यसस्कृधि ।।७।।
अभ्य१र्षानपच्युतो रयिं समत्सु सासहिः। अथा नो वस्यसस्कृधि ।।८।।
त्वां यज्ञैरवीवृधन् पवमान विधर्मणि। अथा नो वस्यसस्कृधि ।।९।।
रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर। अथा नो वस्यसस्कृधि ।।१०।।

ऋ. ९.६९.१–१०

इषुर्न धन्वन् प्रति धीयते मतिर्वत्सो न मातुरुप सर्ज्यूधनि ।
उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम इष्यते ।।१।।
उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासिन ।
पवमानः संतनिः प्रघ्नतामिव मधुमान्द्रप्सः परि वारमर्षति ।।2।।
अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेर्ऋतं यते ।
हरिरक्रान्यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते ।।३।।
उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ।।४।।
अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत ।
दिवस्पृष्ठं बर्हणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयम् ।।५।।
सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते ।
तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन ।।६।।
सिन्धोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत ।
शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठन्तु कृष्टयः ।।७।।
आ नः पवस्व वसुमद्धिरण्यवदश्वावद् गोमद्यवमत्सुवीर्यम् ।
यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः ।।८।।

एते सोमाः पवमानास इन्द्रं रथा इव प्र ययुः सातिमच्छ ।
सुताः पवित्रमति यन्त्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ ।।६।।
इन्दविन्द्राय बृहते पवस्व सुकृळीको अनवद्यो रिशादाः ।
भरा चन्द्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः ।।१०।।

१३८. हिरण्यस्तूपः आंगिरसः – सा. १०४७–१०५६; १३७०–१३७२

सा. १०४७–१०५६

सना च सोम जेषि च पवमान महि श्रवः। अथा नो वस्यसस्कृधि ।।१।।
सना ज्योतिः सना स्व३र्विश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि ।।2।।
सना दक्षमुत क्रतुमप सोम मृधो जहि अथा नो वस्यसस्कृधि ।।३।।
पवीतारः पुनीतन सोममिन्द्राय पातवे। अथा नो वस्यसस्कृधि ।।४।।
त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधि ।।५।।
तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम्। अथा नो वस्यसस्कृहिध ।।६।।
अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम्। अथा नो वस्यसस्कृधि ।।७।।
अभ्या३र्षानपच्युतो वाजिन्त्समत्सु सासहिः। अथा नो वस्यसस्कृधि ।।८।।
त्वां यज्ञैरवीवृधन्पवमान विधर्मणि। अथा नो वस्यसस्कृधि ।।६।।
रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर। अथा नो वस्यसस्कृधि ।।१०।।

सा. १३७०–१३७२

सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकमीरते ।
तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किंचन ।।१।।
उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरा सनि ।
पवमानः सन्तनिः सुन्वतामिव मधुमान् द्रप्सः परि वारमर्षति ।।2।।
उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ।।३।।

४७३. पवमानः सोमः पूषा वा

१. अत्रिर् भौमः – ऋ. ६.६७.१०–१2

अविता नो अजाश्वः पूषा यामनियामनि। आ भक्षत्कन्यासु नः ।।१०।।
अयं सोमः कमर्दिने घृतं न पवते मधु। आ भक्षत्कन्यासु नः ।।११।।
अयं त आघृणे सुतो घृतं न पवते शुचि। आ भक्षत्कन्यासु नः ।।१2।।

४७४. पवमानाध्येता

१. पवित्र अंगिरसो वा वसिष्ठो वा उभौ वा– सा. १2६८–१३०३

यः पावमानीरध्येत्यृषिभिः संभृतं रसम्। सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ।।१।।
पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम्। तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ।।2।।
पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः। ऋषिभिः संभृतो रसो ब्राह्मणोष्वमृतं हितम् ।।३।।
पावमानीर्दधन्तु न इमं लोकमथो अमुम्। कामान्त्समर्धयन्तु नो देवीर्देवैः समाहृताः ।।४।।
येन देवाः पवित्रेणात्मानं पुनते सदा। तेन सहस्रधारेण पावमानीः पुनन्तु नः ।।५।।
पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम्। पुण्याँ श्च भक्षान्भक्षयत्यमृतत्वं च गच्छति ।।६।।

४७५. पवित्रकर्त्ता

१. वैखानसः – य. १६.४2

पवमानः सोऽद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु मा ।।४2।।

४७६. पशवः

१. सविता – अ. 2.2६.१–५

एह यन्तु पशवो ये परेयुर्वायुर्येषां सहचारं जुजोष ।
त्वष्टा येषां रूपधेयानि वेदास्मिन् तान् गोष्ठे सविता नि यच्छतु ।।१।।
इमं गोष्ठं पशवः सं स्रवन्तु बृहस्पतिरा नयतु प्रजानन् ।
सिनीवाली नयत्वाग्रमेषामाजग्मुषो अनुमते नि यच्छ ।।2।।
सं सं स्रवन्तु पशवः समश्वाः समु पूरुषाः ।
सं धान्यस्य या स्फातिः संस्राव्येण हविषा जुहोमि ।।३।।
सं सिंचामि गवां क्षीरं समाज्येन बलं रसम् ।
संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ ।।४।।
आ हरामि गवां क्षीरमाहार्षं धान्यं१ रसम् ।
आहृता अस्माकं वीरा आ पत्नीरिदमस्तकम् ।।५।।

४७७. पशुपतिः

१. अथर्वा – अ. 2.३४.१

य ईशे पशुपतिः पशूनां चतुष्पदामुत यो द्विपदाम् ।
निष्क्रीतः स यज्ञियं भागमेतु रायस्पोषा यजमानं सचन्ताम् ।।१।।

४७८. पाकस्थाम्नः कौरयाणस्य दानस्तुतिः

१. मेध्यातिथिः काण्वः – ऋ. ८.३.2१–2४

यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः। विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम् ।।2१।।
रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम्। अदाद्रायो विबोधनम् ।।22।।
यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः। अस्तं वयो न तुग्र्यम् ।।2३।।
आत्मापितुस्तनूर्वास ओजोदा अभ्यंजनम्। तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवम् ।।2४।।

४७९. पाप्मा

१. ब्रह्म – अ. ६.2६.१–३

अव मा पाप्मन्त्सृज वशी सन् मृडयासि नः। आ मा भद्रस्य लोके पाप्मन् धेह्यविह्रुतम् ।।१।।
यो नः पाप्मन् न जहासि तमु त्वा जहिमो वयम्। पथामनु व्यावर्तनेऽन्यं पाप्मानु पद्यताम् ।।2।।
अन्यत्रास्मन्न्युच्यतु सहस्राक्षो अमर्त्यः। यं द्वेषाम तमृच्छतु यमु द्विषमस्तमिज्जहि ।।३।।

४८०. पितृमेधः

१. सङ्कुसुको१यामायनः – ऋ. १०.१८.७–१३

इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं विशन्तु ।
अनश्रवोऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ।।७।।
उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ।।८।।
धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय ।
अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम ।।९।।
उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् ।।१०।।
उच्छ्वंचस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवंचना ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ।।११।।
उच्छ्वंचमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सन्त्वत्र ।।१2।।
उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं रिषम् ।

एतां स्थूणां पितरो धारयन्तु तेऽत्रा यमः सादना ते मिनोतु ।।१३।।
प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः ।
प्रतीचीं जग्रभा वाचमश्वं रशनया यथा ।।१४।।

४८१. पितृमेधः प्रजापतिर् वा

१. सङ्कुसुको१यामायनः – ऋ. १०.१८.१४

प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः। प्रतीची जग्रभा वाचमश्वं रशनया यथा ।।१४।।

४८2. पितरः

१. अथर्वा – अ. ४.१५.१५; ५.2४.१५; १८.१.४४–४६; ५१; ५2; १८.2.2६; १८.४.८१.८७

अ. ४.१५.१५

खण्वखा३इ खैमखा३इ मध्ये तदुरि। वर्ष वनुध्वं पितरो मरुतां मन इच्छत।।१५।।

अ. ५.2४.१५

पितरः परे ते भावन्तु अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां
प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।१५।।

अ. १८.१.४४–४६

उदीरतामवर उत् परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ।।४४।।
आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो य स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठा ।।४५।।
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो ये अपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु दिक्षु ।।४६।।

अ. १८.१.५१–५2

बर्हिषदः पितर ऊत्य१र्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाधा नः शं योररपो दधात ।।५१।।
आच्या जानु दक्षिणतो निषद्येदं नो हविरभि गृणन्तु विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद् व आगः पुरुषता कराम ।।५2।।

अ. १८.2.2६

सं विशन्त्विह पितरः स्वा नः स्योनं कृण्वन्तः प्रतिरन्तु आयुः ।
तेभ्यः शकेम हविषा नक्षमाणा ज्योग् जीवन्तः शदः पुरूचीः ।।2६।।

अ. १८.४.८१–८७

नमो वः पितर ऊर्जे नमो वः पितरो रसाय ।।८१।।
नमो वः पितरो भामाय नमो वः पितरो मन्यवे ।।८2।।
नमो वः पितरो यद् घोरं तस्मै नमो वः पितरो यत् क्रूरं तस्मै ।।८३।।
नमो वः पितरो यच्छिवं तस्मै नमो वः पितरो यत् स्योनं तस्मै ।।८४।।
नमो वः पितरः स्वधा वः पितरः ।।८५।।
येऽत्र पितरः पितरो येऽत्र यूयं स्थ युष्माँस्तेऽनु यूयं तेषां श्रेष्ठा भूयास्थ ।।८६।।
य इह पितरो जीवा इह वयं स्मः। अस्माँस्तेऽनु वयं तेषां श्रेष्ठा भूयास्म ।।८७।।

2. आदित्या देवा वा – य. ३५.१

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः।
अस्यलोकः सुतावतः। द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ।।१।।

३. प्रजापतिः – य. १६.३६; 2४.१८

य. १६.३६

पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः

स्वधा नमः। अक्षन् पितरोऽमीमदन्त पितरोऽतीतृप्न्त पितरः पितरः शुन्धध्वम् ।।३६।।

य. 2४.१८

धूम्रा बभ्रुनीकाशाः पितॄणां सोमवतां बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदां कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः ।।१८।।

४. वामदेवः – य. 2.३१–३३

अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्। अमीमदन्त पितरो यथाभागमावृ षायिषत ।।३१।।

नमो व पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासः ।।३2।।

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषोऽसत् ।।३३।।

५. वैखानसः – य. १६.४५; ४७

य. १६.४५

ये समानाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ।।४५।।

य. १६.४७

द्वे सृतीऽअशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ।।४७।।

६. शङ्खः – य. १६.४६–५३; ५५–५६; ६७–७०

य. १६.४६–५३

उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः ।
असुं यऽईयुरवृकाऽऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ।।४६।।
अंगिरसो नः पितरो नवग्वाऽअथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ।।५०।।
ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ।।५१।।
त्वं सोम प्रचिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो नऽइन्दो देवेषु रत्नमभजन्त धीराः ।।५2।।
त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीँ2ऽ रपोर्णु वीरेभिरश्वैर्मघवा भवा नः ।।५३।।

य. १६.५५–५६

बर्हिषदः पितरऽऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
तऽआ गतावसा शंत मेनाथा नः शं योररपो दधात ।।५५।।
आहं पितॄन्त्सुविदत्राँ2ऽ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्तऽइहागमिष्ठाः ।।५६।।

य. १६.६७–७०

ये चेह पितरो ये च नेह याँश्च विद्म याँ2ऽउ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ।।६७।।
इदं पितृभ्यो नमोऽअस्त्वद्य ये पूर्वासो यऽउपरासऽईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ।।६८।।
अधा पथा नः पितरः परासः प्रत्नासोऽ अग्नऽऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तोऽअरुणीरप व्रन् ।।६६।।
उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि ।
उशन्नुशतऽआ वह पितॄन्हविषेऽअत्तवे ।।७०।।

७. शंखो यामायनः – ऋ. १०.१५.१–१४

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ।।१।।
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ।।2।।
आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ।।३।।
बर्हिषदः पितर ऊत्य१ र्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाथा नः शं योररपो दधात ।।४।।
उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ।।५।।
आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ।।६।।
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ।।७।।
ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः सरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ।।८।।
ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ।।९।।
ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः ।
आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ।।१०।।
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ।।११।।
त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ।।१2।।
ये चेह पितरो ये च नेह याँश्च विद्म याँ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ।।१३।।
ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।
तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ।।१४।।

८. सोमाहुतिः – य. १2.४५

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः ।
अदाद्यमोऽवसानं पृथिव्याऽअक्रन्निमं पितरो लोकमस्मै ।।४५।।

४८३. पुरीष्या अग्नये

१. गाथी कौशिकः – ऋ. ३.22.१–५

अयं सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः ।।१।।
अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ।।2।।
अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये ।
या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ।।३।।

पुरीष्यासो अग्नयः प्रावणोभिः सजोषसः ।
जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ।।४।।
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ।।५।।

४८४. पुरुमीळहो वैददश्विः

१. श्यावाश्व आत्रेयः – ऋ. ५.६१.६

उत मेऽरपद्युवतिर्ममन्दुषी प्रति श्यावाय वर्तनिम् ।
वि रोहिता पुरुमीळहाय येमतुर्विप्राय दीर्घयशसे ।।६।।

४८५. पुरुरवा ऐळः

१. उर्वशी – ऋ. १०.९५.2; ४; ५; ७; ११; १३; १५; १६; १८

ऋ. १०.९५.2
किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ।।2।।
ऋ. १०.९५.४–५
सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात् ।
अस्तं ननक्षे यस्मिंचाकन्दिवा नक्तं श्नथिता वैतसेन ।।४।।
त्रि स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि ।
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व१स्तदासीः ।।५।।
ऋ. १०.९५.७
समस्मिज्जायमान आसत ग्ना उतेमवर्धन्नद्य१ः स्वगूताः ।
महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ।।७।।
ऋ. १०.९५.११
जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः ।
अशासं त्वा विदुषी सहिसमन्नहन्न म आशृणोः किमभुग्वदासि ।।११।।
ऋ. १०.९५.१३
प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रन्ददाध्ये शिवायै ।
प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ।।१३।।
ऋ. १०.९५.१५–१६
पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ।।१५।।
यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ।।१६।।
ऋ. १०.९५.१८
इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबन्धुः ।
प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ।।१८।।

४८६. पुरुषः

१. नारायणः – ऋ. १०.९०.१–१६; य. ३१.१; ३; ४; ६; ८–१६

ऋ. १०.९०.१–१६
सहस्रीशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम् ।।१।।
पुरुष एवेदं सर्वं यदभूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।2।।

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।३।।
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ।।४।।
तस्माद्विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।।५।।
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।।६।।
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ।।७।।
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशून्ताँश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ।।८।।
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।।९।।
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ।।१०।।
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ।।११।।
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ।।12।।
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ।।१३।।
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ।।१४।।
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ।।१५।।
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।१६।।

य. ३१.१

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्वत स्पृत्वाऽत्यतिष्ठद्दशांगुलम् ।।१।।

य. ३१.३–४

एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।३।।
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने अभि।।४।।

य. ३१.६

तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।।६।।

य. ३१.८–१६

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ।।८।।
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ।।९।।
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ।।१०।।
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ।।११।।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।12।।
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ2 अकल्पयन् ।।१३।।
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।।१४।।
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।।१५।।
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।१६।।

2. नारायणः (साग्री. सास्वा.) साध्यो नारायणः (सार्षेदी.) – सा. ६१७–६21

सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ।।३।।
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
तथा विष्वङ् व्यक्रामदशनानशने अभि ।।४।।
पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ।।५।।
तावानस्य महिमा ततो ज्यायाँ श्च पूरुषः ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।६।।
ततो विराडजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चादूभूमिमथो पुरः ।।७।।

४८७. पुरुषः ब्रह्मप्रकाशनम्

१. नारायणः – अ. १०.2.१–३३; १६.६.१–१६

अ. १०.2.१–३३

केन पार्ष्णी आभृते पूरुषस्य केन मांसं संभृतं केन गुल्फौ ।
केनाङ्गुलीः पेशनीः केन खानि केनोच्छ्लंखौ मध्यतः कः प्रतिष्ठाम् ।।१।।
कस्मान्नु गुल्फावधरावकृण्वन्नष्ठीवन्तावुत्तरौ पुरुषस्य ।
जंघे निर्ऋत्य न्यदधुः क्वस्विज्जानुनोः सन्धी क उ तच्चिकेत ।।2।।
चतुष्टयं युज्यते संहितान्त जानुभ्यामूर्ध्वं शिथिरं कबन्धम् ।
श्रोणी यदूरू क उ तज्जजान याभ्यां कुसिन्धं सुदृढं बभूव ।।३।।
कति देवाः कतमे त आसन् य उरो ग्रीवाश्चिक्युः पुरुषस्य ।
कति स्तनौ व्यदधुः कः कफोडौ कति स्कन्धान् कति पृष्टीरचिन्वन् ।।४।।
को अस्य बाहू समभरद् वीर्यं करवादिति ।
अंसौ को अस्य तद् देवः कुसिन्धे अध्या दधौ ।।५।।
कः सप्त खानि वि ततर्द शीर्षणि कर्णाविमौ नासिके चक्षणी मुखम् ।
येषां पुरुत्रा विजयस्य मह्मनि चतुष्पादो द्विपदो यन्ति यामम् ।।६।।
हन्वोहि जिह्वामदधात् पुरूचीमधा महीमधि शिश्राय वाचम् ।
स आ वरीवर्ति भुवनेष्वन्तरपो वसानः क उ तच्चिकेत ।।७।।
मस्तिष्कमस्य यतमो ललाटं कलाटिकां प्रथमो यः कपालम् ।
चित्सा चित्यं हन्वो५ पुरुषस्य दिवं रुरोह कतमः स देवः ।।८।।
प्रियाप्रियाणि बहुला स्वप्नं संबाधतन्द्र्यः ।
आनन्दानुग्रो नन्दांश्च कस्माद् वहति पुरुषः ।।६।।

आर्तिरवर्तिर्निर्ऋतिः कुतो नु पुरुषेऽमतिः ।
राद्धिः समृद्धिरव्यृद्धिर्मतिरुदितयः कुतः ।।१०।।
को अस्मिन्नापो व्यदधाद् विषूवृतः पुरूवृतः सिन्धुसृत्याय जाताः ।
तीव्रा अरुणा लोहिनीस्ताम्रधूम्रा ऊर्ध्वा अवाचीः पुरुषे तिरश्चीः ।।११।।
को अस्मिन् रूपमदधात् को मह्वानं च नाम च ।
गातुं को अस्मिन् कः केतुं कश्चरित्राणि पुरुषे ।।१2।।
को अस्मिन् प्राणमवयत् को अपानं व्यानमु ।
समानमस्मिन् को देवोऽधि शिश्राय पूरुषे ।।१३।।
को अस्मिन् यज्ञमदधादेको देवोऽधि पूरुषे ।
को अस्मिन्त्सत्यं कोऽनृतं कुतो मृत्युः कुतोऽमृतम् ।।१४।।
को अस्मै वासः पर्यदधात् को अस्यायुरकल्पयत् ।
बलं को अस्मै प्रायच्छत् को अस्याकल्पयज्जवम् ।।१५।।
केनापो अन्वतनुत केनाहरकरोद् रुचे ।
उषसं केनान्वैन्द्ध केन सायंभवं ददे ।।१६।।
को अस्मिन् रेतो न्यदधात् तन्तुरा तायतामिति ।
मेधां को अस्मिन्नध्यौहत् को बाणं को नृतो दधौ ।।१७।।
केनेमां भूमिमौर्णोत् केन पर्यभवद् दिवम् ।
केनाभि मह्ना पर्वतान् केन कर्माणि पूरुषः ।।१८।।
केन पर्जन्यमन्वेति केन सोमं विचक्षणम् ।
केन यज्ञं च श्रद्धां च केनास्मिन् निहितं मनः ।।१९।।
केन श्रोत्रियमाप्नोति केनेमं परमेष्ठिनम् ।
केनेममग्निं पूरुषः केन संवत्सरं ममे ।।2०।।
ब्रह्म श्रोत्रियमाप्नोति ब्रह्मेमं परमेष्ठिनम् ।
ब्रह्मेममग्निं पूरुषो ब्रह्म संवत्सरं ममे ।।2१।।
केन देवाँ अनु क्षियति केन दैवजनीर्विशः ।
केनेदमन्यन्नक्षत्रं केन सत् क्षत्रमुच्यते ।।22।।
ब्रह्म देवाँ अनु क्षियति ब्रह्म दैवजनीर्विशः ।
ब्रह्मेदमन्यन्नक्षत्रं ब्रह्म सत् क्षत्रमुच्यते ।।2३।।
केनयं भूमिर्विहिता केन द्यौररुत्तरा हिता ।
केनेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् ।।2४।।
ब्रह्मणा भूमिर्विहिता ब्रह्म द्यौरुत्तरा हिता ।
ब्रह्मेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् ।।2५।।
मूर्धानमस्य संसीव्याथर्वा हृदयं च यत् ।
मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधि शीर्षतः ।।2६।।
तद् वा अथर्वणः शिरो देवकोशः समुब्जितः ।
तत् प्राणो अभि रक्षति शिरो अन्नमथो मनः ।।2७।।
ऊर्ध्वो नु सृष्टा३स्तिर्यङ् नु सृष्टा३ः सर्वा दिशः पुरुष आ बभूवाँ३ ।
पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते ।।2८।।
यो वै तां ब्रह्मणा वेदामृतेनावृतां पुरम् ।
तस्मै ब्रह्म च ब्राह्माश्च चक्षुः प्राणं प्रजां ददुः ।।2९।।
न वै तं चक्षुर्जहाति न प्राणो जरसः पुरा ।
पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते ।।३०।।
अष्टाचक्रा नवद्वारा देवानां पूरयोध्या ।
तस्या हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः ।।३१।।

तस्मिन् हिरण्यये कोशे त्र्यरे त्रिप्रतिष्ठिते ।
तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः ।।३2।।
प्रभ्राजमानां हरिणीं यशसा संपरीवृताम्द ।
पुरं हिरण्ययीं ब्रह्मा विवेशापराजिताम् ।।३३।।

अ. १६.६.१–१६

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम् ।।१।।
त्रिभिः पद्भिर्द्यामरोहत् पादस्येहाभवत् पुनः ।
तथा व्यक्रामद् विष्वङ्ङशनानशने अनु ।।2।।
तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।३।।
पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येश्वरो यदन्येनाभवत् सह ।।४।।
यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य किं बाहू किमूरू पादा उच्येते ।।५।।
ब्राह्मणोस्य मुखमासीद् बाहू राजन्योऽभवत् ।
मध्यं तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ।।६।।
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत ।।७।।
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ।।८।।
विराडग्रे समभवद् विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमतो पुरः ।।९।।
यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।।१०।।
तं यज्ञं प्रावृषा प्रौक्षन् पुरुषं जातमग्रशः ।
तेन देवा अयजन्त साध्या वसवश्च ये ।।११।।
तस्मादश्वा अजायन्त ये च के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जातो अजावयः ।।१2।।
तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दो ह जज्ञिरे तस्माद्यजुस्तस्मादजायत ।।१३।।
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूँस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्व ये ।।१४।।
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।।१५।।
मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः ।
राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ।।१६।।

४८८. पुरुषेश्वरः

१. प्रजापतिः – य. 2३.५१

केष्वन्तः पुरुष ऽ आ विवेश कान्यन्तः पुरुषे अर्पितानि ।
एतद् ब्रह्मन्नुप वल्हामसि त्वा किं स्विन्नः प्रति वोचास्यत्र ।।५१।।

४८९. पुरोहित–यजमानौ

१. नाभानेदिष्टः – य. ११.८१; ८३

य. ११.८१

संशितं मे ब्रह्म संशितं वीर्यं बलम्। संशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ।।८१।।

य. ११.८३

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः।
प्रप्र दातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे।।८३।।

४६०. पूषा

१. अर्थवणः – य. ३८.३

अदित्यै राम्नासीन्द्राणयाऽउष्णीषः। पूषांसि धर्माय दीष्व।।३।।

2. उपरिबभ्रवः – अ. ७.६.१–४

प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।
उभे अभिप्रियतमे सधस्थे आ च परा च चरति प्रजानन् ।।१।।
पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् ।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन् पुर एतु प्रजानन् ।।2।।
पूषन् तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्त इह स्मसि ।।३।।
परि पूषा परस्ताद्धस्तं दधातु दक्षिणम्। पुनर्नो नष्टमाजतु सं नष्टेन गमेमहि ।।४।।

३. ऋजिष्वा – य. ३४.42

पथस्पथः परिपतिं वचस्या कामेन कृतोऽअभ्यानडर्कम् ।
सा नो रासच्छुरुधश्चन्द्राग्रा धियं धियंसीषधाति प्रपूषा ।।४2।।

४. कण्वो घौरः – ऋ. १.४2.१–१०

सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात्। सक्ष्वा देव प्र णस्पुरः ।।१।।
यो नः पूषन्नघो वृको दुःशेव आदिदेशति। अप स्म तं पथो जहि ।।2।।
अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम्। दूरमधि स्रुतेरज ।।३।।
त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित्। पदाभि तिष्ठ तपुषिम् ।।४।।
आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे। येन पितॄनचोदयः ।।५।।
अधा नो विश्वसौभग हिरण्यवाशीमत्तम। धनानि सुषणा कृधि ।।६।।
अति नः सश्चतो नय सुगा नः सुपथा कृणु। पूषन्निह ऋतुं विदः ।।७।।
अभि सूयवसं नय न नवज्वारो अध्वने। पूषन्निह क्रतुं विदः ।।८।।
शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम्। पूषन्निह क्रतुं विदः ।।९।।
न पूषणं मेथामसि सूक्तैरभि गृणीमसि। वसूनि दस्ममीमहे ।।१०।।

५. देवश्रवा यामायनः – ऋ. १०.१७.३–६

पूषा त्वेतश्चयावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ।।३।।
आयुर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ।।४।।
पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् ।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन् ।।५।।
प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।
उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन्।।६।।

६. परुच्छेपो दैवोदासिः – ऋ. १.१३८.१–४

प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तन्दते स्तोत्रमस्य न तन्दते ।

अर्चामि सुम्नयन्नहमन्त्यूतिं मयोभुवम्। विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः।।१।।
प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः ।
हुवे यत्त्वा मयोभुवं देवं सख्याय मर्त्यः। अस्माकमांगूषान्द्युम्निनस्कृधि वाजेषु द्युम्निनस्कृधि ।।2।।
यस्य ते पूषन्त्सख्ये विपन्यवः क्रत्वा चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ।
तामनु त्वा नवीयसीं नियुतं राय ईमहे। अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ।।३।।
अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व।
ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः। नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ।।४।।

७. भरद्वाजो बार्हस्पत्यः – ऋ. ६.५३.१–१०; ६.५४.१–१०; ६.५५.१–६; ६.५६.१–६; ६.५८.१–४; सा. ७५; १५६३

ऋ. ६.५३.१–१०

वयमु त्वा पथस्पते रथं वाजसातये। धिये पूषन्नयुज्महि ।।१।।
अभि नो नर्यं वसु वीरं प्रयतदक्षिणम्। वामं गृहपतिं नय ।।2।।
अदित्सन्तं चिदाधृणे पूषन्दानाय चोदय। पणेश्चिद्वि म्रदा मनः ।।३।।
वि पथो वाजसातये चिनुहि वि मृधो जहि। साधन्तामुग्र नो धियः ।।४।।
परि तृन्धि पणीनामारया हृदया कवे। अथेमस्मभ्यं रन्धय ।।५।।
वि पूषन्नारया तुद पणेरिच्छ हृहि प्रियम्। अथेमस्मभ्यं रन्धय ।।६।।
आ रिख किकिरा कृणु पणीननां हृदया कवे। अथेमस्मभ्यं रन्धय ।।७।।
या पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे। तया समस्य हृदयमा रिख किकिरा कृणु ।।८।।
या ते अष्ट्रा गोओपशाघृणे पशुसाधनी। तस्यास्ते सुम्नमीमहे ।।६।।
उत नो गोषणिं धियमश्वसां वाजासामुत। नृवत कृणुहि वीतये ।।१०।।

ऋ. ६.५४.१–१०

सं पूषन् विदुषा नय यो अंजसानुशासति। यं एवेदमिति ब्रवत् ।।१।।
समु पूष्णा गमेमहि यो गृहाँ अभिशासति। इम एवेति च ब्रवत् ।।2।।
पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते। नो अस्य व्यथते पविः ।।३।।
यो अस्मै हविषाविधन्न तं पूषापि मृष्यते। प्रथमो विन्दते वसु ।।४।।
पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजं सनोतु नः ।।५।।
पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः। अस्माकं स्तुवतामुत ।।६।।
माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे। अथारिष्टाभिरा गहि ।।७।।
शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम्। ईशानं राय ईमहे ।।८।।
पूषन्तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्त इह स्मसि ।।६।।
परि पूषा परस्ताद्धस्तं दधातु दक्षिणम्। पुनर्नो नष्टमाजतु ।।१०।।

ऋ. ६.५५.१–६

एहि वां विमुचो नपादाघृणे सं सचावहै। रथीर्ऋतस्य नो भव ।।१।।
रथीतमं कपर्दिनमीशानं राधसो महः। रायः सखायमीमहे ।।2।।
रायो धारास्याघृणे वसो राशिरजाश्व। धीवतोधीवतः सखा ।।३।।
पूषणं न्व१जाश्वमुप स्तोषाम वाजिनम्। स्वसुर्यो जार उच्यते ।।४।।
मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः। भ्रातेन्द्रस्य सखा मम ।।५।।
आजासः पूषणं रथे निशृम्भास्ते जनश्रियम्। देवं वहन्तु बिभ्रतः ।।६।।

ऋ. ६.५६.१–६

य एनमादिदेशति करम्भादिति पूषणम्। न तेन देव आदिशे ।।१।।
उत घा स रथीतमः सख्या सत्पतिर्युजा। इन्द्रो वृत्राणि जिघ्नते ।।2।।
उतादः परुषे गवि सूरश्चक्रं हिरण्ययम्। न्यैरयद्रथीतमः ।।३।।

यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः। तत्सु नो मन्म साधय ।।४।।
इमं च नो गवेषणं सातये सीषधो गणम्। आरात् पूषन्नसि श्रुतः ।।५।।
आ ते स्वस्तिमीमह आरे अघामुपावसुम्। अद्या च सर्वतातये श्वश्च सर्वतातये ।।६।।

ऋ. ६.५८.१–४

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ।।१।।
अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत् संचक्षाणो भुवना देव ईयते ।।2।।
यास्ते पूषन्नाावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ।।३।।
पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वंचम् ।।४।।

सा. ७५

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावन्भद्रा ते पूषन्निह रातिरस्तु ।।३।।

सा. १५६३

उत नो गोषणिं धियमश्वसां वाजसामुत। नृवत्कृणुह्यूतये ।।१।।

८. मेधातिथिः काण्वः – ऋ. १.2३.१३–१५

आ पूषंचित्रबर्हिषमाघृणे धरुणं दिवः। आजा नष्टं यथा पशुम् ।।१३।।
पूषा राजानमाघृणिरपगूळ्हं गुहा हितम्। अविन्दच्चित्रबर्हिषम् ।।१४।।
उतो स मह्यमिन्दुभिः षडयुक्ताँ अनुसेषिधत्। गोभिर्यवं न चर्कृषत् ।।१५।।

९. विमद ऐन्द्रः वसुकृद्वा वासुक्रः (साग्री. सास्वा.); विमद ऐन्द्रः वसुकृद्वा वसुक्रो वा प्राजापत्यः (ऋसर्व.); वसुकृदृषि विमदो वा (सार्षेदी.) – ऋ. १०.2६.१–६

प्र ह्यच्छा मनीषः स्पार्हा यन्ति नियुतः। प्र दस्रा नियुद्रथः पूषा अवष्टु माहिनः ।।१।।
यस्य त्यन्महित्वं वाताप्यमयं जनः। विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनाम् ।।2।।
स वेद सुष्टुतीनामिन्दुर्न पूषा वृषा। अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति ।।३।।
मंसीमहि त्वा वयमस्माकं देव पूषन्। मतीनां च साधनं विप्राणां चाधवम् ।।४।।
प्रत्यर्धिर्यज्ञानामश्वहयो रथानाम्। ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः ।।५।।
आधीषमाणायाः पतिः शुचायाश्च शुचस्य च। वासोवायोऽवीनामा वासांसि मर्मृजत् ।।६।।
इनो वाजानां पतिरिनः पुष्टीनां सखा। प्र श्मश्रु हर्यतो दूधोद्वि वृथा यो अदाभ्यः ।।७।।
आ ते रथस्य पूषन्नजा धुरं ववृत्युः। विश्वस्यार्थिनः सखा सनोजा अनपच्युतः ।।८।।
अस्माकमूर्जा रथं पूषा अविष्टु माहिनः। भुवद्वाजानां वृध इमं नः शुणवद्धवम् ।।६।।

१०. विश्वामित्रो गाथिनः – ऋ. ३.६2.७–६

इयं ते पूषन्नाघृणे सुष्टुतिर्देव नव्यसी। अस्माभिस्तुभ्यं शस्यते ।।७।।
तां जुषस्व गिरं मम वाजयन्तीमवा धियम्। वधूयुरिव योषणाम् ।।८।।
यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पूषाविता भुवत् ।।६।।

११. शंयुर् बार्हस्पत्यः – ऋ. ६.४८.१६–१६

आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे। अघा अर्यो अरातयः ।।१६।।
मा काकम्बीरमुद्वृहो वनस्पतिमशस्तीर्वि हि नीनशः ।
मोत सूरो अह एवा चन ग्रीवा आदधते वेः ।।१७।।
दृतेरिव तेऽवृकमस्तु सख्यम्। अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः ।।१८।।
परो हि मर्त्यैरसि समो देवैरुत श्रिया। अभि ख्यः पूषन् पृतनासु नस्त्वमवा नूनं यथा पुरा।।१६।।

४६१. पूषाः

१. अथर्वा – अ. ६.११३.१–३

त्रिते देवा अमृजतैतदेनस्त्रित एनन्मनुष्येषु ममृजे ।
ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ।।१।।
मरीचीर्धूमान् प्र विशानु पाप्मन्नुदारान् गच्छोत वा नीहारान् ।
नदीनां फेनाँ अनु तान् वि नश्य भ्रूणघ्नि पूषन् दुरितानि मृक्ष्व ।।2।।
द्वादशधा निहितं त्रितस्यापमृष्टं मनुष्यैनसानि ।
ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ।।३।।

2. सुहोत्रः – य. ३४.४१

पूषन्त्व व्रते वयं न रिष्येम कदा चन। स्तोतारस्तऽइह स्मसि ।।४१।।

४६2. पूषादयः

१. प्रजापतिः – य. 2५.७; ६

य. 2५.७

पूषणं वनिष्ठनान्धाहीन्त्स्थूलगुदया सर्पान् गुदाभिर्विह्रुत ऽ आन्त्रैरपो वस्तिना वृषणमाण्डाभ्यां वाजिनं शेपेन प्रजां रेतसा चाषान् पित्तेन प्रदरान् पायुना कूश्मांछकपिण्डैः ।।७।।

य. 2५.६

विधृति नाभ्या घृतं रसेनापो यूष्णा मरीची र्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्वा ऽ अश्रुभिर्ह्रादुनीर्दूषीकाभिरस्ना रक्षांसि चित्राण्यंगैर्नक्षत्राणि रूपेण पृथिवीं
त्वचा जुम्बकाय स्वाहा।।६।।

४६३. पूषादयो मन्त्रोक्ताः

१. अथर्वा – अ. १.११.१–६

वषट् ते पूषन्नस्मिन्त्सूतावर्यमा होता कृणोतु वेधाः ।
सिस्रतां नार्यृतप्रजाता वि पर्वाणि जिहतां सूतवा उ ।।१।।
चतस्रो दिवः प्रदिशश्चतस्रो भूम्या उत ।
देवा गर्भं समैरयन् तं व्यूर्णुवन्तु सूतवे ।।2।।
सूषा व्यूर्णोतु वि योनिं हापयामसि ।
श्रथया सूषणे त्वमव त्वं बिष्कले सृज ।।३।।
नेव मांसे न पीबसि नेव मज्जस्वाहतम् ।
अवैतु पृश्नि शेवलं शुने जराय्वत्तवेऽव जरायु पद्यताम् ।।४।।
वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके ।
वि मातरं च पुत्रं च वि कुमारं जरायुणाव जरायु पद्यताम् ।।५।।
यथा वातो यथा मनो यथा पतन्ति पक्षिणः ।
एवा त्वं दशमास्य साकं जरायुणा पताव जरायु पद्यताम् ।।६।।

2. तापसः – य. ६.३2

पूषा पंचाक्षरेण पंच दिशऽउदजयत्ताऽउज्जेषं सविता षडक्षरेण षड् ऋतूनुदजयत्तानुज्जेषं
मरुतः सप्ताक्षरेण सप्त ग्राम्यान् पशूनुदजयँस्तानुज्जेषं
बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ।।३2।।

४६४. पूषादयो लिंगोक्ताः

१. दीर्घतमा – य. ३८.१५

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः। स्वाहा पितृभ्यऽऊर्ध्वबर्हिभ्यो
घर्मपावभ्यः स्वाहा द्यावापृथिवीभ्यां स्वाहा विश्वेभ्यो देवेभ्यः ।।१५।।

४६५. पृथिवी

१. **अत्रिर् भौमः – ऋ. ५.८४.१–३**

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवी। प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ।।१।।
स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्युभिः। प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ।।2।।
दृळ्हा चिद्या वनस्पीन्क्ष्मया दर्धर्ष्योजसा। यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः ।।३।।

2. **आथर्वणः दध्यङ् – य. ३७.१2**

अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मे दाः। पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजां मे दाः ।
सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दाः। आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः ।
विधृतिरुपारिष्टाद् बृहस्तेराधिपत्यऽओजो मे दाः। विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरष्वासि ।।१2।।

३. **दध्यङ् आथर्वणः – य. ३७.१2**

अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मे दाः। पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजां मे दाः।
सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दाः। आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः।
विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्यऽओजो मे दाः। विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि।१2।।

४. **मेधातिथिः – य. ३५.2१; ३६.१३**

य. ३५.2१

स्योना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः। अप नः शोशुचदघम् ।।2१।।

य. ३६.१३

स्योना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः ।।१३।।

५. **मेधातिथिः काण्वः – ऋ. १.22.१५**

सयोना पृथिवी भवानृक्षरा निवेशनी। यच्छाः न शर्म सप्रथः ।।१५।।

४६६. पृथिव्यग्नी

१. **अंगिराः – अ. ४.३६.१–2**

पृथिव्यामग्नये समनमन्त्स आर्ध्नोत् ।
यथा पृथिव्यामग्नये समनमन्नेवा मह्यं संनमः सं नमन्तु ।।१।।
पृथिवी धेनुस्तस्या अग्निर्वत्सः ।
सा मेऽग्निना वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजा पोषं रयिं स्वाहा ।।2।।

४६७. पृथिव्यादयः

१. **विश्वेदेवाः – य. १४.१६**

पृथिवी छन्दोऽनरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो वाक् छन्दो
मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजाच्छन्दोऽश्वश्छन्दः ।।१६।।

४६८. पृथिव्यादयो मन्त्रोक्ताः

१. **वृहच्छुक्रः – अ. ६.५३.१–३**

द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणया पिपर्तु ।
अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च ।।१।।
पुनः प्राणः पुनरात्मा न ऐतु पुनश्चक्षुः पुनरसुर्न ऐतु ।
वैश्वानरो नो अदब्धस्तनूपा अन्तस्तिष्ठाति दुरितानि विश्वा ।।2।।
सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
त्वष्टा नो अत्र वरीयः कृणोत्वनु नो मार्ष्टु तन्वो३ यद् विरिष्टम् ।।३।।

४६६. पृथिव्यन्तरिक्षे

१. **वसिष्ठः – ऋ. ७.१०४.2३**[2]

मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात् पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ।।2३।।

५००. पृथिवी पर्जन्यः

१. अथर्वा – अ. ७.१८.१–2

प्र नभस्व पृथिवी भिन्द्धी३दं दिव्यं नभः। उद्नो दिव्यस्य नो धातरीशानो वि ष्या दृतिम् ।।१।।
न घ्रंस्तताप न हिमो जघान प्र नभतां पृथिवी जीरदानुः ।
आपश्चिदस्मै घृतमित् क्षरन्ति यत्र सोमः सदमित् तत्र भद्रम् ।।2।।

५०१. पृथुश्रवसः कानीनस्य दानस्तुतिः

१. वशोऽश्व्यः – ऋ. ८.४६.2१–2४

आ स एतु य ईवदाँ अदेवः पूर्तमाददे ।
यथा चिद्वशो अश्व्यः पृथुश्रवसि कानीतेऽस्या व्युष्याददे ।।2१।।
षष्टिं सहस्राश्व्यस्यायुतासनमुष्ट्राणां विंशतिं शता ।
दश श्यावीनां शता दश त्र्यरुषीणां दश गवां सहस्रा ।।22।।
दश श्यावा ऋधद्रयो वीतवारास आशवः ।
मथ्रा नेमिं नि वावृतुः ।।2३।।
दानासः पृथुश्रवसः कानीतस्य सुराधसः ।
रथं हिरण्ययं ददन् मंहिष्ठः सूरिरभूद्वर्षिष्ठमकृत श्रवः ।।2४।।

५०2. पृश्निर्द्यावा भूमी वा

१. शंयुर् बार्हस्पत्यः – ऋ. ६.४८.22

सकृद्ध द्यौरजायत सकृद्भूमिरजायत। पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते ।।22।।

५०३. पौर्णमासी

१. अथर्वा – अ. ७.८०.१–2; ४

अ. ७.८०.१–2

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय ।
तस्यां देवैः संवसन्तो महित्वा नाकस्य पृष्ठे समिषा मदेम।।१।।
वृषभं वाजिनं वयं पौर्णमासं यजामहे ।
स नो ददात्वक्षितां रयिमनुपदस्वतीम् ।।2।।

अ. ७.८०.४

पौर्णमासी प्रथमा यज्ञियासीदहूनां रात्रीणामतिशर्वरेषु ।
ये त्वां यज्ञैर्यज्ञिये अर्धयन्त्यमी ते नाके सुकृतः प्रविष्टाः ।।४।।

५०४. पृश्निपर्णी

१. चातनः – अ. 2.2५.१–५

शं नो देवी पृश्निपर्ण्यशं निर्ऋतया अकः। उग्रा हि कण्वजम्भनी तामभक्षि सहस्वतीम् ।।१।।
सहमानेयं प्रथमा पृश्निपर्ण्य जायत। तयाहं दुर्णाम्नां शिरो वृश्चामि शकुनेरिव ।।2।।
अरायमसृक्पावानं यश्च स्फातिं जिहीर्षति। गर्भादं कण्वं नाशय पृश्निपर्णि सहस्व च ।।३।।
गिरिमेनाँ आ वेशय कण्वांजीवितयोपनान्। तांस्त्वं देवि पृश्निपर्ण्यग्निरिवानुदहन्निहि ।।४।।
पराच एनान् प्र णुद कण्वांजीवितयोपनान्। तमांसि यत्र गच्छन्ति तत् क्रव्यादो अजीगमम्।।५।।

५०५. प्रजा

१. गोतमः – य. 2५.४५

सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ2ऽ उत विश्वापुषं रयिम्।

अनागास्त्वं नोऽअदितिः कृणोतु क्षत्रं नोऽअश्वे वनतां हविष्मान् ।।४५।।

५०६. प्रजाः

१. प्रजापतिः – य. 2३.३४; ३५; ४०; ४१

य. 2३.३४–३५

द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः।
विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तु त्वा।।३४।।
महानम्न्यो रेवत्यो विश्वा आशाः प्रभूवरीः। मैघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा ।।३५।।

य. 2३.४०–४१

ऋतवस्त ऽ ऋतुथा पर्व शमितारो वि शासतु ।
संवत्सरस्यतेजसा शमीभिः शम्यन्तु त्वा ।।४०।।
अर्द्धमासाः परूंषि ते मासा ऽ आ च्छ्यन्तु शम्यन्तः। अहोरात्राणि मरुतो विलिष्टं सूदयन्तु ते ।।४१।।

५०७. प्रजापतिः

१. आदित्या देवाः – य. ३५.६

प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ। अप नः शोशुचदघम् ।।६।।

2. इन्द्राग्नी – य. १३.2४

विराड् ज्योतिरधारयत् स्वराड् ज्योतिरधारयत्। प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या ज्योतिष्मतीम्। विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ। अग्निष्टेऽधिपतिस्तया देवतयांगिरस्वद् ध्रुवा सीद ।।2४।।

३. उशना – य. १३.५५–५८

अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब ग्रैष्मी त्रिष्टुभः स्वारम्। स्वारादन्तर्य्यामोऽन्तर्यामात्पंचदशः पंचदशाद् बृहद् भरद्वाजऽऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ।।५५।।

अयं पश्चाद् विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्याऽऋक्समम्। ऋक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्नि ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ।।५६।।

इदमुत्तरात् स्वस्तस्य श्रोत्रं सौवंशरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभऽऐडमैडान्मन्थी मन्थिनऽएकविंशऽएकविंशाद् वैराजं विश्वमित्रऽऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ।।५७।।

इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः पंक्तिहैमन्ती पङ्क्त्यै निधनवन्निधनवतऽआग्रयणः। आग्रयणात् त्रिणवत्रयस्त्रिँशौ त्रिणवत्रयस्त्रिंशाभ्यां शाक्वररैवते विश्वकर्मऽऋषि प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ।।५८।।

४. गालवः – य. १८.६१

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सं सृजेथामयं च। अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ।।६१।।

५. गृत्समदः – य. ११.2३

आ त्वां जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्टमन्नै रभसं दृशानम् ।।2३।।

६. गोतमः – य. १३.३०

अपां गम्भन्त्सीद मा त्वा सूर्य्योऽभिताप्सीन्माग्निर्वैश्वानरः ।
अच्छिन्नपत्राः प्रजाऽअनुवीक्षस्वानु त्वा दिव्या वृष्टिः सचताम् ।।३०।।

७. त्रिशिराः – य. १३.१७

प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन्। व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ।।१७।।

८. दीर्घतमा – य. ३६.५

प्रजापतिः सम्भ्रियमाणः सम्राट् सम्भृतो वैश्वदेवः संसन्नो घर्मः प्रवृक्तस्तेजऽउद्यतऽआश्विनः पयस्यानीयमाने पौष्णो विष्पन्दमाने मारुतः क्नथन् । मैत्रः शरसि सन्ताय्यमाने वायव्यो ह्रियमाणऽआग्नेयो हूयमानो वाग्घुतः ।।५।।

९. देववातः – य. १०.20

प्रजापते न त्वेदतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्य पिताऽसावस्य पिता वयं स्याम पतयो रयीणां स्वाहा। रुद्र यत्ते क्रिवि परं नाम तस्मिन् हुतमस्मेष्टमसि स्वाहा ।।2०।।

१०. देवश्रवाः – य. ७.2९–३०

कोऽसि कतमोऽसि कस्यासि को नामासि। यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम । भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैः ।।2९।।
उपयामगृहीतोऽसि मध्वे त्वोमयामगृहीतोऽसि माध्वाय त्वोपयामगृहीतोऽसि शुक्राय त्वोपयामगृहीतोऽसि शुचये त्वोपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽसि नभस्याय तवोपयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्यूर्ज्जे त्वोपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्याय त्वोपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वोपयामगृहीतोऽस्यंहसस्पतये त्वा ।।३०।।

११ देवाः – य. ८.५2; १८.2–७; ४४

य. ८.५2

सत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम।
दिवं पृथिव्याऽअध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ।।५2।।

य. १८.2–७

प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च मऽआधीतं च मे वाक् च मे मानश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं यज्ञेन कल्पन्ताम् ।।2।।
ओजश्च मे सहश्च मऽआत्मा च मे तनूश्च मे शर्म चमे वर्म च मेऽंगानि च मेऽस्थीनि च मे परूंषि च मे शरीराणि च मऽआयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ।।३।।
ज्यैष्ठ्यं च मऽआधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ।।४।।
सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम् ।।५।।
ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुखं च मे शयनं च मे सूषाश्च मे सुदिनं च मे यज्ञेन कल्पन्ताम् ।।६।।
यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे क्षात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे यज्ञेन कल्पन्ताम् ।।७।।

य. १८.४४

स नो भुवनस्य पते प्रजापते यस्य तऽउपरि गृहा यस्य वेह ।
अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ।।४४।।

१2. परमेष्ठी – य. १५.८–९

प्रतिपदसि प्रतिपदे त्वा ऽनुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा ।।८।।
त्रिवृदसि त्रिवृते त्वा प्रवृदसि प्रवृते त्वा विवृदसि विवृते त्वा सवृदसि सवृते त्वा ऽऽक्रमोऽस्याक्रमाय त्वो संक्रमोऽसि स्रक्रमाय त्वोत्क्रमोऽस्युत्क्रमाय त्वोत्क्रान्तिरस्युत्क्रान्त्यै त्वा ऽधिपतिनोर्जोर्जं जिन्वे ।।९।।

१३. परमेष्ठी प्रजापतिः – य. १.६

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति। कर्मणे वां वेषाय वाम् ।।६।।

१४. प्रजापतिः – य. 2३.2८; 2४.१

य. 2३.2८

यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत्। मुष्काविदस्या एजतो गोशफे शकुलाविव ।।2८।।

य. 2४.१

अश्वस्तूपरो गोमृगस्ते प्राजापःयाः कृष्णग्रीव आग्नेयो रराटे पुरस्तात्सारस्वती मेष्यधस्ताद्धराश्विनावधोरामौ बाह्वोः सौमापोष्णः श्यामो नाभ्यां सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ।।१।।

१५. बृहस्पतिः – य. ६.८

वातरंहा भव वाजिन् युज्मानऽइन्द्रस्येव दक्षिणः श्रियैधि ।
युंजन्तु त्वा मरुतो विश्ववेदसऽआ ते त्वष्टा पत्सु जवं दधातु ।।८।।

१६. यमः – अ. १६.६.१

जितमस्माकमुद्भिन्नमस्माकमभ्यष्ठां विश्वाः पृतना अरातीः ।।१।।

१७. वत्सः – य. ७.४०

महाँ2ऽइन्द्रो यऽओजसा पर्जन्यो वृष्टिमाँ2ऽइव। स्तोमैर्वत्सस्य वावृधे ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ।।४०।।

१८. वत्सारः काश्यपः – य. ७.१८

सुप्रजाः प्रजाः प्रजनयन् परीह्यभि रायस्पोषेण यजमानम्। संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्को मन्थिनोऽधिष्ठानमसि ।।१८।।

१६. वरुणः – य. १०.६

आविर्मर्य्याऽआवित्तोऽअग्निर्गृहपतिरावित्तऽइन्द्रो वृद्धश्रवाऽआवित्तौ मित्रावरुणौ धृतव्रतावावित्तः पूषा विश्ववेदाऽआवित्ते द्यावापृथिवी विश्वशम्भुवावावित्तादितिरुरुशर्म्मा ।।६।।

2०. वसिष्ठः – य. ६.१६–2०; 2३–2५

य. ६.१६–2०

आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे ।
आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्त्वेन गम्यात् ।
वाजिनो वाजजितो वाजं ससृवांसो बृहस्पते र्भागमवजिघ्रत निमृजानाः ।।१६।।
आपये स्वाहा स्वापये स्वाहाऽपिजाय स्वाहा क्रतवे स्वहा वसवे स्वाहाऽहर्पतये स्वाहाऽह्ने मुग्धाय स्वाहा मुग्धाय वैनंशिनाय स्वाहा विनंशिनऽआन्त्यायनाय स्वाहाऽऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाऽधिपतये स्वाहा ।।2०।।

य. ६.2३–2५

वाजस्येमं प्रसवः सुषुवेऽग्रे सोमं राजानमोषधीष्वप्सु ।
ताऽअस्मभ्य मधुमतीर्भवन्तु वयं राष्ट्रे जागृयाम पुरोहिताः स्वाहा ।।2३।।
वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् ।
अदित्सन्तं दापयति प्रजानन्त्स नो रयिं सर्ववीरं नियच्छतु स्वाहा ।।2४।।
वाजस्य नु प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः ।
सनेमि राजा परियाति विद्वान् प्रजां पुष्टिं वर्धयमानोऽअस्मे स्वाहा ।।2५।।

2१. वामदेवः – य. 2.2१; 2३; ३.३७

य. 2.2१

वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः।

देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पतऽ इमं देव यज्ञं स्वाहा वाते धाः ।।21।।

य. 2.2३

कस्त्वा विमुंचति स त्वा विमुंचति कस्मै त्वा विमुंचति तस्मै त्वा विमुंचति ।
पोषाय रक्षसां भागोऽसि ।।2३।।

य. ३.३७

भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैः ।
नर्य प्रजां मे पाहि शंस्य पशून् मे पाह्यथर्य पितुं मे पाहि ।।३७।।

22. वामदेवो गौतमः – सा. ६०2

मयि वर्चो अथो यशोऽथो यज्ञस्य यत्पयः। परमेष्ठी प्रजापतिर्दिवि द्यामिव दृंहतु ।।१।।

2३. विश्वकर्मा – य. १८.५६

एतं सधस्थ परि ते ददामि यमावहाच्छेवधि जातवेदाः ।
अन्वागनता यज्ञपतिर्वोऽअत्र तं स्म जानीत परमे व्योमन् ।।५६।।

2४. विश्वामित्रः – य. ७.३५–३८

इन्द्र मरुत्वऽइह पाहि सोमं यथा शार्य्यातेऽअपिबः सुतस्य। तव प्रणीती तव शूर शर्म्मन्नाविवासन्ति कवयः सुयज्ञाः। उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ।।३५।।

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम। उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते। उपयामगृहीतोऽसि मरुतां त्वौजसे ।।३६।।

सजोषाऽइन्द्र सागणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्।
जहि शत्रूँ2ऽ रप मृधो नुदस्वाथाभयं कृणुहि विश्वेतो नः।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते।।३७।।

मरुत्वाँ2ऽइन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय। आसिंचस्व जठरे मध्वऽऊमिर्मं त्वं राजासि प्रतिपत्सुतानाम्। उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ।।३८।।

2५. विश्वेदेवाः – य. १४.३१

नवविंशत्यास्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीत्।
एकत्रिंशतास्तुवत प्रजाऽअसृज्यन्त यवाश्चायवाश्चाधिपतयऽआसन्।
त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीत् ।।३१।।

2६. विहव्यः – अ. १०.५.४2–५०

यं वयं मृगयामहे तं वधै स्तृणवामहै ।
व्यात्ते परमेष्ठिनो ब्रह्मणापीपदाम तम् ।।४2।।
वैश्वानरस्य दंष्ट्राभ्यां हेतिस्तं समधादभि ।
इयं तं पसात्वाहुतिः समिद् देवी सहीयसी ।।४३।।
राज्ञो वरुणस्य बन्धोऽसि ।
सो३मुमामुष्यायणममुष्याः पुत्रमन्ने प्राणे बधान ।।४४।।
यत् ते अन्नं भुवस्पत आक्षियति पृथिवीमनु ।
तस्य नस्त्वं भुवस्पते संप्रयच्छ प्रजा पते ।।४५।।
अपो दिव्या अचायिषं रसेन समपृक्ष्महि ।
पयस्वानग्न आगमं तं मा सं सृज वर्चसा ।।४६।।
सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः ।।४७।।
यदग्ने अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयन्त रेभाः ।
मन्योर्मनसः शरव्या३ जायते या तया विध्य हृदये यातुधानान् ।।४८।।

परा शृणीहि तपसा यातुधानान् पराऽग्ने रक्षो हरसा शृणीहि ।
पराऽर्चिषा मूरदेवांछृणीहि परासुतृपः शोशुचतः शृणीहि ।।४६।।
अपामस्मै वज्रं प्र हरामि चतुर्भृष्टिं शीर्षभिद्याय विद्वान् ।
सो अस्यांगानि प्र शृणातु सर्वा तन्मे देवा अनु जानन्तु विश्वे ।।५०।।

२७. शुनःशेप आजीगर्ति कृत्रिमो देवरातो वैश्वामित्रो वा (साग्री. सास्वा.) शुनःशेप आजगर्ति कृत्रिमो देवरातो वैश्वामित्रः (ऋसर्व.) शुनःशेपः (सार्षेदी.) – ऋ. १.२४.१

कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम ।
को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ।।१।।

२८. शुनः शेपः – य. १८.४५

समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्मयोभूरभि मा वाहि स्वाहा। मारुतोऽसि मरुतां गणः शम्भूर्मयोभूरभि मा वाहि स्वाहा। अवस्यूरसि दुवस्वांछम्भूर्मयोभूरभि मा वाहि स्वाहा ।।४५।।

२९. शङ्खः – य. १६.७५; ७७–७६

य. १६.७५

अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।।७५।।

य. १६.७७–७६

दृष्ट्वा रूपे व्याकरोत्सत्यानृते प्रजापतिः। अश्रद्धामनृतेऽदाधाच्छ्रद्धां सत्ये प्रजापतिः।
ऋतेन सत्यामिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।।७७।।
वेदेन रूपे व्यपिबत्सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।।७८।।
दृष्ट्वा परिस्रुतो रसं शुक्रेण शुक्रं व्यपिबत् पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।।७६।।

३०. हिरण्यगर्भः – य. १३.४

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवी द्यामुतेमां कस्मै देवाय हविषा विधेम ।।४।।

३१. प्रजापतिः – य. २४.१३

पष्ठवाहो विराजऽउक्षाणो बृहत्याऽऋषभाः ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे ।।१३।।

५०८. प्रजापतयः

१. देवाः – य. ८.४८

व्रेशीनां त्वा पत्मन्नाधूनोमि। कुकूननानां त्वा पत्मन्नाधूनोमि। भन्दनानां त्वा पत्मन्नाधूनोमि। मदिन्तमानां त्वा पत्मन्नाधूनोमि। मधुन्तमानां त्वा पत्मन्नाधूनोमि। शुक्रंऽआधूनोम्यह्नो रूपे सूर्य्यस्य रश्मिषु ।।४८।।

2. देवाः – य. ८.४६

ककुभं रूपं वृषभस्य रोचते बृहच्छुक्रः शुक्रस्य पुरोगः सोमः सोमस्य पुरोगाः ।
यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि तस्मै ते सोम सोमाय स्वाहा।।४६।।

५०६. प्रजापतयो गृहस्थाः

१. देवाः – य. ८.५१

इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा। उपसृजन्धरुणं मात्रे धरुणो मातरं धयन्। रायस्पोषमस्मासु दीधरत् स्वाहा ।।५१।।

५१०. प्रजापतिः धाता

१. ब्रह्म – अ. ७.१६.१

प्रजापतिर्जनयति प्रजा इमा धाता दधातु सुमनस्यमानः।
संजानानाः संमनसः सयोनयो मयि पुष्टं पुष्टपतिर्दधातु ।।१।।

५११. प्रजापतिः स्तनयित्नुः

१. अथर्वा – अ. ४.१५.११; ७.८०.३; १६.१.१–१३

अ. ४.१५.११

प्रजापतिः सलिलादा समुद्रादाप ईरयन्नुदधिमर्दयाति ।
प्र प्यायतां वृष्णो अश्वस्य रेतोऽर्वाङेतेन स्तनयित्नुनेहि ।।११।।

अ. ७.८०.३

प्रजापते न त्वेदेतान्यन्यो वि□वा रूपाणि परिभूर्जजान ।
यत्कमास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ।।३।।

अ. १६.१.१–१३

अतिसृष्टो अपां वृषभोतिसृष्टा अग्नयो दिव्याः ।।१।।
रुजन् परिरुजन् मृणन् प्रमृणन् ।।2।।
म्रोको मनोहा खनो निर्दाह आत्मदूषिस्तनूदूषिः ।।३।।
इदं तमति सृजामि तं माभ्यवनिक्षि ।।४।।
तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।५।।
अपामग्रमसि समुद्रं वोऽभ्यवसृजामि ।।६।।
यो३प्स्व१ग्निरति तं सृजामि म्रोकं खनिं तनूदूषिम् ।।७।।
यो व आपोऽग्निराविवेष स एष यद् वो घोरं तदेतत् ।।८।।
इन्द्रस्य व इन्द्रियेणाभि षिंचेत ।।९।।
अरिप्रा आपो अप रिप्रमस्मत् ।।१०।।
प्रास्मदेनो वहन्तु प्र दुःष्वप्न्यं वहन्तु ।।११।।
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे ।।१2।।
शिवानग्नीनप्सुषदो हवामहे मयि क्षत्रं वर्च आ धत्त देवीः ।।१३।।

५१2. प्रजा–सेनापतिः

१. भरद्वाजः – य. ७.३९

महाँ2ऽइन्द्रो नृवदा चर्षणिप्राऽउत द्विबर्हाऽअमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्य्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ।।३९।।

५१३. प्रजापत्यादयः

१. विश्वेदेवाः – य. १४.९

मूर्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विष्टम्भो वयोऽधिपतिश्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो वस्तो वयो विबलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सिंहो वयश्छदिश्छन्दः पष्ठवाड् वयो बृहती छनदऽउक्षा वयः ककुप् छन्दऽऋषभो वयः सतोबृहती छन्दः ।।९।।

५१४. प्रजापत्यादयः

१. प्रजापतिः – य. 22.2०; 2३.2९; ३१

य. 22.2०

काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा स्वाहाऽऽधिमाधीताय स्वाहा मनः प्रजापतये स्वाहा चित्तं विज्ञातायादित्यै स्वाहा ऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा

सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा। पूष्णे नरन्धिपाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा ।।20।।

य. 2३.2६

यद्देवासो ललामगुं प्र विष्टीमिनमाविषुः। सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभूवो यथा ।।2६।।

य. 2३.३१

यद्धरिणो यवमत्ति न पुष्टं बहु मन्यते। शूद्रो यदर्यायै जारो न पोषमनु मन्यते ।।३१।।

५१५. प्रतीची वरुणः पृदाकु अन्नम्

१. अथर्वा – अ. ३.27.३

प्रतीची दिग् वरुणोऽधिपतिः प्रदाकू रक्षितान्नमिषवः ।
तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ।।३।।

५१६. प्रतोदः

१. पायुर् भरद्वाजः – ऋ. ६.७५.१३

आ जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते। अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ।।१३।।

५१७. प्रपणः विक्रयश्च

१. अथर्वा (पण्यकामः) – अ. ३.१५.४

शुनं नो अस्तु प्रपणो विक्रयश्च प्रतिपणः फलिनं मा कृणोतु।
इदं हव्यं संविदानौ जुषेथां शुनं नो अस्तु चरितमुत्थितं च ।।४।।

५१८. प्रयत्नवन्तो जीवादयः

१. प्रजापतिः – य. 22.८

यते स्वाहा धावते स्वाहो द्रावाय स्वाहो द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्याय स्वाहोत्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा शूश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा यन्मूत्रं करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ।।८।।

५१९. प्रष्ट्रसमाधातारौ

१. प्रजापतिः – य. 2३.४६

पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्व भुवनमा विवेशाँ३ऽ ।।४६।।

५20. प्रष्ठा

१. प्रजापतिः – य. 2३.५३; ५५; ५७

य. 2३.५३

का स्विदासीत्पूर्वचित्तिः किं स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशंगिला ।।५३।।

य. 2३.५५

का ऽ ईमरे पिशंगिला का ऽ ई कुरुपिशंगिला ।
क ऽ ईमास्कन्दमर्षति क ऽ ईं पन्थां वि सर्पति ।।५५।।

य. 2३.५७

कत्यस्य विष्ठा कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऽ ऋतुशो यजन्ति ।।५७।।

५2१. प्रस्कण्वस्य दानस्तुतिः

१. कृशः काण्वः – ऋ. ८.५५.१–५

भूरीदिन्द्रस्य वीर्यं१ व्यख्यमभ्यायति। राधस्ते दस्यवे वृक ।।१।।
शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते। मह्ना दिवं न तस्तभुः ।।2।।
शतं वेणूंछतं शुनः शतं चर्माणि म्लातानि। शतं मे बल्वजस्तुका अरुषीणां चतुःशतम्।।३।।
सुदेवाः स्थ काण्वायना वयोवयो विचरन्तः। अश्वासो न चङ्क्रमत ।।४।।
आदित्साप्तस्य चार्किरन्नानूनस्य महि श्रवः। श्यावीरतिध्वसन्पथश्चक्षुषा चन संनशे ।।५।।

2. पृषध्रः काण्वः – ऋ. ८.५६.१–४

प्रति ते दस्यवे वृक राधे अदर्श्यह्नयम्। द्यौर्न प्रथिना शवः ।।१।।
दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः। नित्याद्रायो अमंहत ।।2।।
शतं मे गर्दभानां शतमूर्णावतीनाम्। शतं दासाँ अति स्रजः ।।३।।
तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता। अश्वानामिन्न यूथ्याम् ।।४।।

५22. प्रस्तोकस्य सार्जयस्य दानस्तुतिः

१. गर्गः – ऋ. ६.४७.22–2५

प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात् ।
दिवोदासादतिथिग्वस्य राधः शाम्बरं वसु प्रत्यग्रभीष्म ।।22।।
दशाश्वन्दश कोशान्दश वस्त्राधिभोजना ।
दशो हिरण्यपिण्डान्दिवोदासादसानिषम् ।।2३।।
दश रथान्प्रष्टिमतः शतं गा अथर्वभ्यः। अश्वथः पायवेऽदात् ।।2४।।
महि राधो विश्वजन्यं दधानान् भरद्वाजान्त्सार्जयो अभ्ययष्ट ।।2५।।

५2३. प्राणः

१. उशना – य. १३.५४

अयं पुरो भुवस्तस्य प्राणो भैवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत् त्रिवृतो रथन्तरं वसिष्ठऽऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ।।५४।।

2. गोतमः – य. ७.१

वाचस्पतये पवस्व वृष्णोऽअंशुभ्यां गभस्तिपूतः। देवो देवेभ्यः पवस्व येषां भागोऽसि ।।१।।

३. ब्रह्म – अ. 2.१५.१–६

यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ।।१।।
यथाहश्च रात्री च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ।।2।।
यथा सूर्यश्च चन्द्रश्च न बिभीतो न रिष्यतः। एवा मे प्राणा मा बिभेः ।।३।।
यथा ब्रह्म च क्षंत्रं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ।।४।।
यथा सत्यं चानृतं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ।।५।।
यथा भूतं च भव्यं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः ।।६।।

४. लोपामुद्रा – य. १७.१३–१४

ये देवा देवानां यज्ञिया यज्ञियानां संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञेऽअस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ।।१३।।
ये दे‍ा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुर एतारो अस्य।
येभ्यो न ऋते पवते धाम किंचन न ते दिवो न पृथिव्या अधि स्नुषु ।।१४।।

५. वेदर्भिः भार्गवः – अ. ११.४.१–2६

प्राणाय नमो यस्य सर्वमिदं वशे। यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम् ।।१।।

नमस्ते प्राण क्रन्दाय नमस्ते स्तनयित्नवे। नमस्ते प्राण विद्युते नमस्ते प्राण वर्षते ।।2।।
यत् प्राण स्तनयित्नुनाभिक्रन्दत्योषधीः। प्र वीयन्ते गर्भान् दधतेऽथो बह्वीर्वि जायन्ते ।।३।।
यत् प्राण ऋतावागतेऽभिक्रन्दत्योषधीः। सर्वं तदा प्र मोदते यत् किं च भूम्यामधि ।।४।।
यत् प्राण अभ्यवर्षीद् वर्षेण पृथिवीं महीम्। पशवस्तत् प्र मोदन्ते महो वै नो भविष्यति ।।५।।
अभिवृष्टा ओषधयः प्राणेन समवादिरन्। आयुर्वै नः प्रातीतरः सर्वा नः सुरभीरकः ।।६।।
नमस्ते अस्त्वायते नमो अस्तु परायते। नमस्ते प्राण तिष्ठत आसीनायोत ते नमः ।।७।।
नमस्ते प्राण प्राणते नमो अस्त्वपानते ।
पराचीनाय ते नमः प्रतीचीनाय ते नमः सर्वस्मै त इदं नमः ।।८।।
या ते प्राण प्रिया तनूर्यो ते प्राण प्रेयसी। अथो यद् भेषजं तव तस्य नो धेहि जीवसे ।।९।।
प्राणः प्रजा अनु वस्ते पिता पुत्रमिव प्रियम्। प्राणो ह सर्वस्येश्वरो यच्च प्राणति यच्च न ।।१०।।
प्राणो मृत्युः प्राणस्तक्मा प्राणं देवा उपासते। प्राणो ह सत्यवादिनमुत्तमे लोक आ दधत् ।।११।।
प्राणो विराट् प्राणो देष्ट्री प्राणं सर्व उपासते। प्राणो ह सूर्यश्चन्द्रमाः प्राणमाहुः प्रजापतिम्।।१2।।
प्राणापानौ व्रीहियवावनड्वान् प्राण उच्यते। यवे ह प्राण आहितोऽपानो व्रीहिरुच्यते ।।१३।।
अपानति प्राणति पुरुषो गर्भे अन्तरा। यदा त्वं प्राण जिन्वस्यथ स जायते पुनः ।।१४।।
प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते। प्राणे ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम् ।।१५।।
आथर्वणीरांगिरसीर्दैवीर्मनुष्यजा उत। ओषधयः प्र जायन्ते यदा त्वं प्राण जिन्वसि ।।१६।।
यदा प्राणो अभ्यवर्षीद् वर्षेण पृथिवीं महीम्। ओषधयः प्र जायन्तेऽथो याः काश्च वीरुधः ।।१७।।
यस्ते प्राणेदं वेद यस्मिंश्चासि प्रतिष्ठितः। सर्वे तस्मै बलिं हरानमुष्मिल्लोँक उत्तमे ।।१८।।
यथा प्राण बलिहृतस्तुभ्यं सर्वाः प्रजा इमाः। एवा तस्मै बलिं हरान् यस्त्वा शृणवत् सुश्रवः।।१९।।
अन्तर्गर्भ रति देवतास्वाभूतो भूतः स उ जायते पुनः ।
स भूतो भव्यं भविष्यत् पिता पुत्रं प्र विवेशा शचीभिः ।।20।।
एकं पादं नोत्खिदति सलिलाद्धंस उच्चरन् ।
यदंग स तमुत्खिदेन्नैवाद्य न श्वः स्यान्न रात्रि नाहः स्यान्न व्युच्छेत् कदा चन ।।2१।।
अष्टाचक्रं वर्तत एकनेमि सहस्राक्षरं प्र पुरो नि पश्चा ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः ।।22।।
यो अस्य विश्वजन्मन ईशे विश्वस्य चेष्टतः। अन्येषु क्षिप्रधन्वने तस्मै प्राण नमोऽस्तु ते ।।2३।।
यो अस्य सर्वजन्मन ईशे सर्वस्य चेष्टतः। अतन्द्रो ब्रह्मणा धीरः प्राणो मानु तिष्ठतु ।।2४।।
ऊर्ध्वः सुप्तेषु जागार ननु तियङ् नि पद्यते। न सुप्तमस्य सुप्तेष्वनु शुश्राव कश्चन ।।2५।।
प्राण मा मत् पर्यावृतो न मदन्यो भविष्यसि। अपां गर्भमिव जीवसे प्राण बध्नामि त्वा मयि।।2६।।

५2४. प्राणाः

१. कण्वः – य. ३४.५५

सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति मदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्न जौ सत्रसदौ च देवौ ।।५५।।

५2५. प्राणादयः

१. प्रजापतिः – य. 22.७; 2३; 2३.१८; 2५.2

य. 22.७

हिंकाराय स्वाहा हिंककृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्रातायस्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वहा जाग्रतें स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृताय स्वाहा संहानाय स्वहोपस्थिताय स्वाहाऽयनाय स्वाहा प्रायणाय स्वाहा ।।७।।

य. 22.2३

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा

।।2३।।

य. 2३.१८

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा ।
अम्बे ऽ अम्बिकेऽम्बालिके न मा नयति कश्चन ।
समस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ।।१८।।

य. 2५.2

वातं प्राणेनापानेन नासिके ऽ उपयाममधरेणौष्ठेन सदुत्तरेण प्रकाशेनान्तरमनूकाशेन बाह्यं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं कनीनकाभ्यां कर्णाभ्यां श्रोत्रं श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिरदितिं शीर्ष्णा निर्ऋतिं निर्जर्जल्येन शीर्ष्णा संक्रोशैः प्राणान् रेष्माणं स्तुपेन ।।2।।

५2६. प्राणादयो लिंगोक्ताः

१. दीर्घतमा – य. ३६.१

स्वाहा प्राणेभ्यः साधिपतिकेभ्यः। पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा दिवे स्वाहा सूर्य्याय स्वाहा ।।१।।

५2७. प्राणपानौ

१. ब्रह्म – अ. 2.१६.१

प्राणापानै मृत्योर्मा पातं स्वाहा ।।१।।

५2८. प्राची अग्निः असितः आदित्या दक्षिण; इन्द्रः तिरश्चिराजिः पितरः

१. अथर्वा – अ. ३.2७.१

प्राची दिगग्निरधिपतिरसितो रक्षितादित्या इषवः ।
तेभ्यो नमोऽधिपतिभ्यो रमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ।।१।।

५2६. बर्हिः

१. दीर्घतमा औचथ्यः – ऋ. १.१४2.५

स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे। वृंजे देवव्यचस्तममिन्द्राय शर्म सप्रथः ।।५।।

५३०. बलासः

१. बभ्रुपिङ्गलः – अ. ६.१४.१–३

अस्थिस्रंसं परुः स्रंसमास्थितं हृदयामयम्। बलासं सर्वं नाशयांगेष्ठा यश्च पर्वसु ।।१।।
निर्बलासं बलासिनः क्षिणोमि मुष्करं यथा। छिनद्म्यस्य बन्धनं मूलमुर्वार्वाइव ।।2।।
निर्बलासेतः प्र पताशुंगः शिशुको यथा। अथो इटइव हायनोऽप द्राह्यवीरहा ।।३।।

५३१. बर्हिः

१. मेधातिथिः काण्वः – ऋ. १.१३.५

स्तृणीत बर्हिरानुषग् घृतपृष्ठं मनीषिणः। यत्रामृतस्य चक्षणम् ।।५।।

५३2. बार्हस्पत्यौदनः

१. अथर्वा – अ. ११.३(१).१–३१

तस्यौदनस्य बृहस्पतिः शिरो ब्रह्म मुखम् ।।१।।
द्यावापृथिवी श्रोत्रे सूर्याचन्द्रमसावक्षिणी सप्तऋषयः प्राणापानाः ।।2।।
चक्षुर्मुसलं काम उलूखलम् ।।३।।
दितिः शूर्पमदितिः शूर्पग्राहि वातोऽपाविनक् ।।४।।
अश्वाः कणा गावस्तण्डुला मशकास्तुषाः ।।५।।
कब्रु फलीकरणाः शरोऽभ्रम् ।।६।।

श्याममयोऽस्य मांसानि लोहितमस्य लोहितम् ।।७।।
त्रपु भसा हरितं वर्णः पुष्करमस्य गन्धः ।।८।।
खलः पात्रं स्फयावंसावीषे अनूक्ये ।।९।।
आन्त्राणिं जत्रवो गुदा वरत्राः ।।१०।।
इयमेव पृथिवी कुम्भी भवति राध्यमानस्यौदनस्य द्यौरपिधानम् ।।११।।
सीताः पर्शवः सिकता ऊबध्यम् ।।12।।
ऋतं हस्तावनेजनं कुल्योपसेचनम्। ।।१३।।
ऋचा कुम्भ्यधिहितात्विज्येन प्रेषिता ।।१४।।
ब्रह्मणा परिगृहीता साम्ना पर्यूढा ।।१५।।
बृहदायवनं रथन्तरं दर्विः ।।१६।।
ऋतवः पक्तार आर्तवाः समिन्धते ।।१७।।
चरुं पंचबिलमुखं घर्मो३भीन्धे ।।१८।।
ओदनेन यज्ञवचः सर्वे लोकाः समाप्याः ।।१९।।
यस्मिन्त्समुद्रो द्यौर्भूमिस्त्रयोऽवरपरं श्रिताः ।।२०।।
यस्य देवा अकल्पन्तोच्छिष्टे षडशीतयः ।।२१।।
तं त्वौदनस्य पृच्छामि यो अस्य महिमा महान् ।।22।।
स य ओदनस्य महिमानं विद्यात् ।।2३।।
नाल्प इति ब्रूयान्ननुपसेचन इति नेदं च किं चेति ।।2४।।
यावद् दाताभिमनस्येत तन्नाति वदेत् ।।2५।।
ब्रह्मवादिनो वदन्ति परांचमोदनं प्राशी३ः प्रत्यंचा३मिति ।।2६।।
त्वमोदनं प्राशी३स्त्वामोदना३ इति ।।2७।।
परांचं चैनं प्राशीः प्राणास्त्वा हास्यन्तीत्येनमाह ।।2८।।
प्रत्यंचं चैनं प्राशीरपानास्त्वा हास्यन्तीत्येनमाह ।।2९।।
नैवाहमोदनं न मामोदनः ।।३०।।
ओदन एवौदनं प्राशीत् ।।३१।।

५३३. बृबुतक्षा

१. शंयुर् बार्हस्पत्यः –ऋ. ६.४५.३१–३३

अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात्। इरुः कक्षो न गांग्य ।।३१।।
यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी। सद्यो दानाय मंहते ।।३2।।
तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः। बृबुं सहस्रदातमं सूरिं सहस्रसातमम्।।३३।।

५३४. बृहस्पतिः

१. अगस्त्यो मैत्रावरुणिः – ऋ.१.१९०.१–८

अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः ।।१।।
तमृत्विया उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि ।
बृहस्पतिः स हंजो वरांसि विभ्वाभवत्समृते मातरिश्वा ।।2।।
उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्र बाहू ।
अस्य क्रत्वाहन्यो३ यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् ।।३।।
अस्य श्लोको दिवीयते पृथिव्यमात्यो न यंसद्यक्षभृद्विचेताः ।
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिमायाँ अभि द्यून् ।।४।।
ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति प्रजाः ।
न दूढ्ये३ अनु ददासि वामं बृहस्पते चयम इतिपयारुम् ।।५।।
सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्राः ।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ।।६।।

सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ।।७।।
एवा महस्तुविजातस्तुविष्मान्बृहस्पतिवृषभो धायि देवः ।
स नः स्तुतो वीरवधातु गोमद्विद्यामेषं वृजनं जीरदानुम् ।।८।।

2. अथर्वा – अ. 2.१३.2–३

परि धत्त धत्त नो वर्चसेमं जरामृत्यु कृणुत दीर्घमायुः ।
बृहस्पतिः प्रायच्छद् वास एतत् सोमाय राज्ञे परिधातवा उ ।।2।।
परीदं वासो अधिथाः स्वस्तयेऽभूर्गृष्टीनामभिशस्तिपा उ ।
शतं च जीव शदः पुरूची रायश्च पोषमुपसंव्ययस्व ।।३।।

३. अथर्वा (वर्चस्कामः) – अ. ६.३६.१–३

यशो हविर्वर्धतामिन्द्रजूतं सहस्रवीर्यं सुभृतं सहस्कृतम् ।
प्रसर्स्राणमनु दीर्घाय चक्षसे हविष्मन्तं मा वर्धय ज्येष्ठतातये ।।१।।
अच्छा न इन्द्र यशसं यशोभिर्यशस्विनं नमसाना विधेम ।
स नो रास्व राष्ट्रमिन्द्रजूतं तस्य ते रातौ यशसः स्याम ।।2।।
यशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत ।
यशा विश्वस्य भूतस्याहमस्मि यशस्तमः ।।३।।

४. अप्रतिरथ ऐन्द्रः – ऋ. १०.१०.३–४; सा. १८५2

ऋ. १०.१०.३–४

उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य ।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिंस्तन्व१मा विविश्याः ।।३।।
न यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम ।
गन्धर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ।।४।।

सा. १८५2

बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभंजन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्।।१।।

५. अयास्यः – ऋ. १०.६७.१–१2; १०.६८.१–१2; अ. 2०.१६.१–१2; 2०.६१.१–१2

ऋ. १०.६७.१–१2

इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत् ।
तुरीयं सिवज्जनयद्विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन् ।।१।।
ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः ।
विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त ।।2।।
हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् ।।३।।
अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ ।
बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ।।४।।
विभिद्या पुरं शयथेमपाचीं तिस्त्रीणि साकमुदधेरकृन्तत् ।
बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ।।५।।
इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता वि रवेण ।
स्वेदांजिभिराशिरमिच्छभानोऽरोदयत्पणिमा गा अमुष्णात् ।।६।।
स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वदेभिर्द्रविणं व्यानट् ।।७।।
ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः ।
बृहस्पतिर्मिथो अवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ।।८।।

तं वर्धयन्तो मतिभिः शिवाभिः सिंहमिव नानदंत सधस्थे ।
बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम् ।।६।।
यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म ।
बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा ।।१०।।
सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः ।
पश्चा मृधो अप भवन्तु विश्वास्तद्रोदसी शृणुतं विश्वमिन्वे ।।११।।
इन्द्रो मह्ना महतो अर्णवस्य वि मूर्धनमभिन्दर्बुदस्य ।
अहन्नहिमरिणात्सप्त सिन्धून्देवैर्द्यावापृथिवी प्रावतं नः ।।१2।।

ऋ. १०.६८.१–१2

उदप्रुतो न वयो रक्षमाणा वावदतो अभियस्येव घोषाः ।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्य१र्का अनावन् ।।१।।
सं गोभिरांगिरसो नक्षमाणो भग इवेदर्यमणं निनाय ।
जने मित्रो न दम्पती अनक्ति बृहस्पते वाजयाशूँरिवाजौ ।।2।।
साध्वर्या अतिथिनीरिषिराः स्पार्हाः सुवर्णा अनवद्यरूपाः ।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्य।।३।।
आप्रुषायन्मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः ।
बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्नेव वि त्वचं बिभेद ।।४।।
अप ज्योतिषा तमो अन्तरिक्षादुद्नः शीपालमिव वात आजत् ।
बृहस्पतिरनुमृश्या बलस्याभ्रमिव वात आ चक्र आ गाः ।।५।।
यदा वलस्य पीयतो जसुं भेद् बृहस्पतिरग्नितपोभिरर्कैः ।
दद्भिर्न जिह्वा परिविष्टमाददाविर्निधींरकृणोदुस्रियाणाम् ।।६।।
बृहस्पतिरमत हि त्यदासां नाम स्वरीणां सदने गुहा यत् ।
आण्डेव भित्त्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत् ।।७।।
अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम् ।
निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेणा विकृत्य ।।८।।
सोषामविन्दत्स स्व१ः सो अग्निं सो अर्केण वि बबाधे तमांसि ।
बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार ।।९।।
हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद्वलो गाः ।
अनानुकृत्यमपुनश्चकार यात्सूर्यामासा मिथ उच्चरातः ।।१०।।
अभि श्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन् ।
रात्र्यां तमो अदधुर्ज्योतिरहन्बृहस्पतिर्भिनदद्रिं विदद्गाः ।।११।।
इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति ।
बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात् ।।१2।।

अ. 2०.१६.१–१2

उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः ।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्य१र्का अनावन् ।।१।।
सं गोभिरांगिरसो नक्षमाणो भगइवेदर्यमणं निनाय ।
जने मित्रो न दम्पती अनक्ति बृहस्पते वाजयाशूँरिवाजौ ।।2।।
साध्वर्या अतिथिनीरिषिरा स्पार्हाः सुवर्णा अनवद्यरूपाः ।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्यः ।।३।।
आप्रुषायन् मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः ।
बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उदनेव वि त्वचं बिभेद ।।४।।
अप जयोतिषा तमो अन्तरिक्षादुदनः शीपालमिव वात आजत् ।
बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आ चक्र आ गाः ।।५।।

यदा वलस्य पीयतो जसुं भेद बृहस्पतिरग्नितपोभिरर्कैः ।
दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीँरकृणोदुस्रियाणाम् ।।६।।
बृहस्पतिरमत हि त्यदासां नाम स्वरीणां सदने गुहा यत् ।
आण्डेव भित्त्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत् ।।७।।
अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम् ।
निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेणा विकृत्य ।।८।।
सोषामविन्दत् स स्व१ः सो अग्निं सो अर्केण वि बबाधे तमांसि ।
बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार ।।६।।
हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद् वलो गाः ।
अनानुकृत्यमपुनश्चकार यात् सूर्यामासा मिथ उच्चरातः ।।१०।।
अभि श्यावं न कृषनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन् ।
रात्र्यां तमो अदधुर्ज्योतिरहन् बृहस्पतिर्भिनदद्रिं विदद् गाः ।।११।।
इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति ।
बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात् ।।१2।।

अ. 2०.६१.१–१2

इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत् ।
तुरीयं स्विज्जतयद् विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन् ।।१।।
ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः ।
विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त ।।2।।
हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद् गा उत प्रास्तोदुच्च विद्वाँ अगायत् ।।३।।
अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ ।
बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ।।४।।
विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृन्तत् ।
बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ।।५।।
इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण ।
स्वेदांजिभिराशिरमिच्छमानोऽरोदयत् पणिमा गा अमुष्णात् ।।६।।
स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदोभिर्द्रविणं व्यानट् ।।७।।
ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः ।
बृहस्पतिर्मिथोअवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ।।८।।
तं वर्धयन्तो मातिभिः शिवाभिः सिंहमिव नानदतं सधस्थे ।
बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम् ।।६।।
यदा वाजमसनद् विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म ।
बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा ।।१०।।
सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः ।
पश्चा मृधो अप भवन्तु विश्वास्तद् रोदसी शृणुतं विश्वमिन्वे ।।११।।
इन्द्रो मह्ना महतो अर्णवस्य वि मूर्धानमभिनदर्बुदस्य ।
अहन्नहिमरिणात् सप्त सिन्धून् देवैर्द्यावापृथिवी प्रावतं नः ।।१2।।

६. आथर्वणः दध्यङ् – य. ३६.2

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृणणां बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः।।2।।

७. इन्द्राग्नी – य. १३.2३

या वो देवाः सूर्य्ये रुचो गोष्वश्वेषु या रुचः।
इन्द्राग्नी ताभिः सर्वाभि रुचं नो धत्त बृहस्पते।।2३।।

८. **उपरिबभ्रवः – अ. ७.८.१**

भद्रादधि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्तु ।
अथेममस्या वर आ पृथिव्या आरेशत्रुं कृणुहि सर्ववीरम् ।।१।।

९. **कण्वो घौरः – ऋ. १.४०.१–८**

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ।।१।।
त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते ।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ।।2।।
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ।।३।।
यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः ।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ।।४।।
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ।।५।।
तमिद्वोचेमा विदथेषु शंभुवं मन्त्रं देवा अनेहसम् ।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ।।६।।
को देवयन्तमश्नवज्जनं को वृक्त बर्हिषम् ।
प्रप्र दाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयं दधे ।।७।।
उप क्षत्रं पृंचीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ।।८।।

१०. **गृत्समदः शौनकः – ऋ. 2.2३.2–४; ६–८; १०; १2–१६; १८; 2.३०.६**

ऋ. 2.2३.2–४

देवाश्चिते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।
उस्राइव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि।।2।।
आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि।
बृहस्पते भीमममित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ।।३।।
सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ।।४।।

ऋ. 2.2३.६–८

त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे ।
बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ।।६।।
उत वा यो नो मर्चयादनागसो□रातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ।।७।।
त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ।।८।।

ऋ. 2.2३.१०

त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ।।१०।।

ऋ. 2.2३.१2–१६

अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ।।१2।।

भरेषु हव्यो नमसोपसद्यो गन्ता वाजेषु सनिता धनंधनम् ।
विश्वा इदर्यो अभिदिप्स्वो३ मृधो बृहस्पतिर्वि ववर्हा रथाँइव ।।१३।।
तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यम् ।
आविस्तत्कृष्व यदसत्त उक्थ्यं१ बृहस्पते वि परिरापो अर्दय ।।१४।।
बृहस्पते अति यदर्यो अहाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।।१५।।
मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ।।१६।।

ऋ. 2.2३.१८

तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदंगिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौबजो अर्णवम् ।।१८।।

ऋ. 2.३०.६

यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य ।
बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषन्तं परि धेहि राजन् ।।६।।

११. तपुर्मूर्धा बार्हस्पत्यः – ऋ. १०.१८2.१–३

बृहस्पतिर्नयतु दुर्गहा तिरः पुनर्नेषदघशंसाय मन्म ।
क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ।।१।।
नराशंसो नोऽवतु प्रयाजे शं नो अस्त्वनुयाजो हवेषु ।
क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ।।2।।
तपुर्मूर्धा तपतु रक्षसे ये ब्रह्मद्विषः शरवे हन्तवा उ ।
क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ।।३।।

१2. दधिक्रावा – य. ६.१४–१५

एष स्य वाजी क्षिपणि तुरण्यति ग्रीवायां बद्धोऽअपिकक्षऽआसनि ।
क्रतुं दधिक्राऽअनु सं सनिष्यदत्पथामंकांस्यन्वापनीफणत् स्वाहा ।।१४।।
उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः ।
श्येनस्येव ध्रजतोऽअंकसं परि दधिक्राव्णः सहोर्जा तरित्रतः स्वाहा ।।१५।।

१३. दध्यङ् आथर्वणः – य. ३६.2

यन्मे छिद्रं चक्षुषो हृदस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः ।।2।।

१४. दीर्घतमा – य. ६.८

रेवती रमध्वं बृहस्पते धारया वसूनि। ऋतस्य त्वा देवहविः पाशेन प्रति मुंचामि धर्षा मानुषः ।।८।।

१५. नाभानेदिष्टः – य. ६.१७

ते नोऽअर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता सनिष्यवो महो ये धनं समिथेषु जभ्रिरे ।।१७।।

१६. परमेष्ठी प्रजापतिः – य. 2.१३

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधातु।
विश्वे देवास ऽ इह मादयन्तामो३म्प्रतिष्ठ ।।१३।।

१७. परुच्छेपो दैवोदासिः – ऋ. १.१३६.१०

होता यक्षद्वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः ।
जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना। अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः।।१०।।

१८. प्रजापतिः – य. 2८.१०

होता यक्षद्वनस्पतिं शमितारं शतक्रतुं धियो जोष्टारमिन्द्रियम् ।
मध्वा समंजन् पाथिभिः सुगेभिः स्वदाति यज्ञं मधुना घृतेन वेत्वाज्यस्य होतर्यज ।।१०।।

१६. भरद्वाजः – अ. 20.९०.१–३

यो अद्रिभित् प्रथमजा ऋतावा बृहस्पतिरांगिरसो हविष्मान् ।
द्विबर्हज्मा प्राघर्मसत् पिता न आ रोदसी वृषभो रोरवीति ।।१।।
जनाय चिद् य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।
घ्नन् वृत्राणि वि पुरो दर्दरीति जयंछत्रूंरमित्रान् पृत्सु साहन् ।।2।।
बृहस्पतिः समजयद् वसूनि महो व्रजान् गोमतो देव एषः ।
अपः सिषासन्त्स्व१रप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ।।३।।

20. भरद्वाजो बार्हस्पत्यः – ऋ. ६.७३.१–३

योअद्रिभित्प्रथमजा ऋतावा बृहस्पतिरांगिरसो हविष्मान् ।
द्विर्बहज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रोरवीति ।।१।।
जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।
घ्नन्वृत्राणि वि पुरो दर्दरीति जयंछत्रूँमित्रान्पृत्सु साहन् ।।2।।
बृहस्पतिः समजयद्वसूनि महो व्रजान् गोमतो देव एषः ।
अपः सिषासन्त्स्व१ रप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ।।३।।

2१. मेधातिथिः – य. ३.2९

यो रेवान् योऽअमीवहा वसुवित् पुष्टि वर्द्धनः। स नः सिषक्तु यस्तुरः ।।2९।।

22. वसिष्ठः – ऋ. ७.९७.2; ४–८; य. ९.१६; १८

ऋ. ७.९७.2

आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
यथा भवेम मीळहुषे अनागा यो नो दाता परावतः पितेव ।।2।।

ऋ. ७.९७.४–८

स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति ।
कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान् ।।४।।
तमा नो अर्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः ।
शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम ।।५।।
तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।
सहश्चिद्यस्य नीळवत्सधस्थं नभो न रूपमरुषं वसानाः ।।६।।
स हि शुचिः शतपत्रः स शुन्ध्युर्हिरण्यवाशीरीपिरः स्वर्षाः ।
बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ।।७।।
देवी देवस्य रोदसी जनित्री बृहस्पति वापृधतुर्महित्वा ।
दक्षाय्याय दक्षता सखायः करद् ब्रह्मणे सुतरा सुगाधा ।।८।।

य. ९.१६

शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ।।१६।।

य. ९.१८

वाजेवाजेऽवत वाजिनो नो धनेषु विप्राऽअमृताऽऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ।।१८।।

2३. वामदेवः – अ. 20.८८.१–६

यस्तस्तम्भ सहसा वि ज्मो अन्तान् बृहस्पतिस्त्रिषधस्थो रवेण ।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम् ।।१।।

धुनेतयः सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे ।
पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम् ।।2।।
बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः ।
तुभ्यं खाता अवता आद्रिदुग्धा मध्व श्चोतन्त्यभितो विरप्शम् ।।३।।
बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत् तमांसि ।।४।।
स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।
बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद् वावशतीरुदाजत् ।।५।।
एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविभिः ।
बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ।।६।।

2४. वामदेवो गौतमः – ऋ. ४.५०.१–६

यस्तस्तम्भ सहसा वि ज्मो अन्तान्बृहस्पतिस्त्रिषधस्थो रवेण ।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम् ।।१।।
धुनेतयः सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे ।
पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम् ।।2।।
बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः ।
तुभ्यं खाता अवता अद्रिदुग्धा मध्वः श्चेतन्त्यभितो विरप्शम् ।।३।।
बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि ।।४।।
स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।
बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ।।५।।
एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ।।६।।
स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ।
बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ।।७।।
स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम् ।
तस्मै विशः स्वयमेवा नमन्ते यस्मिन्ब्रह्मा राजनि पूर्व एति ।।८।।
अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या ।
अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवन्ति देवाः ।।६।।

2५. विप्रबन्धुः – य. ३.2८

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं यऽऔशिजः ।।2८।।

2६. विश्वामित्रो गाथिनः – ऋ. ३.६2.४–६

बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य। रास्व रत्नानि दाशुषे ।।४।।
शुचिमर्कैबृहस्पातिमध्वरेषु नमस्यत। अनाम्योज आ चके ।।५।।
वृषभं चर्षणीनां विश्वरूपमदाभ्यम्। बृहस्पतिं वरेण्यम् ।।६।।

५३५. बृहस्पतिः अश्विनौ

१. अथर्वा (वर्चस्कामो यशस्कामश्च) – अ. ६.६६.१–३

गिरावरगराटेषु हिरण्ये गोषु यद् यशः। सुरायां सिच्यमानाया कीलाले मधु तन्मयि ।।१।।
अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती। यथा गर्भस्वतीं वाचमावदानि जनाँ अनु ।।2।।
मयिवर्चो अथो यशोऽथो यज्ञस्य यत् पयः। तन्मयि प्रजापतिर्दिवि द्यामिव दृंहतु ।।३।।

५३६. बृहस्पतिः आदित्यः

१. **वेनः – अ. ४.१.१–७**

ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ।।१।।
इयं पित्र्या राष्ट्र्येत्वग्रे प्रथमाय जनुषे भुवनेष्ठाः ।
तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणन्तु प्रथमाय धास्यवे ।।2।।
प्र यो जज्ञे विद्वानस्य बन्धुर्विश्वा देवानां जनिमा विवक्ति ।
ब्र□ ब्रह्मण उज्जभार मध्यान्नीचैरुच्चैः स्वधा अभि प्रतस्थौ ।।३।।
स हि दिवः स पृथिव्या ऋतस्था मही क्षेमं रोदसी अस्कभायत् ।
महान् मही अस्कभायद् वि जातो द्यां सद्म पार्थिवं च रजः ।।४।।
स बुध्न्यादाष्ट्र जनुषोऽभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट् ।
अहर्यच्छुक्रं ज्योतिषो जनिष्टाथ द्युमन्तो वि वसन्तु विप्राः ।।५।।
नूनं तदस्य काव्यो हिनोति महो देवस्य पूर्वर्यस्य धाम ।
एष जज्ञे बहुभिः साकमित्था पूर्वे अर्धे विषिते समन् नु ।।६।।
योऽथर्वाणं पितरं देवबन्धुं बृहस्पतिं नमसाव च गच्छात् ।
त्वं विश्वेषां जनिता यथासः कविर्देवो न दभायत् स्वधावान् ।।७।।

५३७. बृहस्पत्यादयः

१. **उच्छोचनः – अ. ६.१०३.१–३**

सादनं वो बृहस्पतिः संदानं सविता करत्। संदानं मित्रो अर्यमा संदानं भगो अश्विना ।।१।।
सं परमान्त्समवमानथो सं द्यामि मध्यमान्। इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सं द्या त्वम् ।।2।।
अमी ये युधमायन्ति केतून् कृत्वानीकशः। इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सं द्या तवम् ।।३।।

५३८. बृहस्पति युक्ता अवस्वन्तः

१. **अथर्वा – अ. ३.2६.६**

ये३स्यां स्थोध्र्वायां दिश्यवस्वन्तो नाम देवास्तेषां वो बृहस्पतिरिषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ।।६।।

५३९. बृहस्पतिर् अग्नीषोमौ च

१. **चातनः – अ. १.८.१–2**

इदं हविर्यातुधानान् नदी फेनमिवा वहत्। य इदं स्त्री पुमानकरिह स स्तुवता जनः ।।१।।
अयं स्तुवान आगमदिमं स्म प्रति हर्यत। बृहस्पते वशे लब्ध्वाग्नीषोमा वि विध्यतम् ।।2।।

५४०. ब्रह्म

१. **ब्रह्म – अ. १६.४2.१–४**

ब्रह्म होता ब्रह्म यज्ञा ब्रह्मणा स्वरवो मिताः ।
अध्वर्युर्ब्रह्मणो जातो ब्रह्मणोऽन्तर्हितं हविः ।।१।।
ब्रह्म स्रुचो घृतवतीर्ब्रह्मणा वेदिरुद्धिता ।
ब्रह्म यज्ञस्य तत्त्वं च ऋत्विजो ये हविष्कृतः। शमिताय स्वाहा ।।2।।
अंहोमुचे प्र भरे मनीषामा सुत्राव्णे सुमतिमावृणानः ।
इममिन्द्र प्रति हव्यं गृभाय सत्याः सन्तु यजमानस्य कामाः ।।३।।
अंहोमुचं वृषभं यज्ञियानां विराजन्तं प्रथममध्वराणाम् ।
अपां नपातमश्विना हुवे धिय इन्द्रियेण तं इन्द्रियं दत्तमोजः ।।४।।

2. **ब्रह्म – अ. १६.५2.१–५**

कामस्तदग्रे समवर्तत मनसो रेतः प्रथमं यदासीत् ।
स काम कामेन बृहता सयोनी रायस्पोषं यजमानाय धेहि ।।१।।
त्वं काम सहसासि प्रतिष्ठितो विभुर्विभावा सख आ सखीयते ।

त्वमुग्रः पृत्नासु सासहिः सह ओजो यजमानाय धेहि ।।2।।
दूराच्चकमानाय प्रतिपाणयाक्षये ।
आस्मा अशृण्वन्नाशाः कामेनाजनयन्त्स्वः ।।३।।
कामेन मा काम आगन् हृदयाद्धृदयं परि ।
यदमीषामदो मनस्तदैतूप मामिह ।।४।।
यत्काम कामयमाना इदं कृण्मसि ते हविः ।
तन्नः सर्वं समृध्यतामथेतस्य हविषो वीहि स्वाहा ।।५।।

५४१. ब्रह्मः

१. दीर्घतमा – य. ४०.४

अनेजदेकं मनसो जीवीयो नैनद्देवाऽआप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ।।४।।

५४2. ब्रह्मगवी

१. कश्यपः – अ. १2.५(१).१–६; १2.५(2).७–११; १2.५(३).१2–2७; १2.५(४).2८–३८; १2.५(५).३४–४६; १2.५(६).४७–६१; १2.५(७).६2–७३

अ. १2.५(१).१–६

श्रमेण तपसा सृष्टा ब्रह्मणा वित्तऋते श्रिता ।।१।।
सत्येनावृता श्रिया प्रावृता यशसा परीवृता ।।2।।
स्वधया परिहिता श्रद्धया पर्यूढा दीक्षया गुप्ता यज्ञे प्रतिष्ठिता लोको निधनम् ।।३।।
ब्रह्म पदवायं ब्रह्मणोऽधिपतिः ।।४।।
तामाददानस्य ब्रह्मगवीं जिनतो ब्राह्मणं क्षत्रियस्य ।।५।।
अप क्रामति सूनृता वीर्यं१ पुण्या लक्ष्मीः ।।६।।

अ. १2.५(2).७–११

ओजश्च तेजश्च सहश्च बलं च वाक् चेन्द्रियं च श्रीश्च धर्मश्च ।।७।।
ब्रह्म च क्षत्रं च राष्ट्रं च विशश्च त्विषिश्च यशश्च वर्चश्च द्रविणं च ।।८।।
आयुश्च रूपं च नाम च कीर्तिश्च प्राणश्चापानश्च चक्षुश्च श्रोत्रं च ।।६।।
पयश्च रसश्चान्नं चान्नाद्यं च ऋतं च सत्यं चेष्टं च पूर्तं च प्रजा च पशवश्च ।।१०।।
तानि सर्वाण्यप क्रामन्ति ब्रह्मगवीमाददानस्य जिनतो ब्राह्मणं क्षत्रियस्य ।।११।।

अ. १2.५(३).१2–2७

सैषा भीमा ब्रह्मगव्य१घविष साखात् कृत्या कूल्बजमावृता ।।१2।।
सर्वाण्यस्या घोराणि सर्वे च मृत्यवः ।।१३।।
सर्वाणस्यां क्रूराणि सर्वे पुरुषवधाः ।।१४।।
सा ब्रह्मज्यं देवपीयुं ब्रह्मगव्यादीयमाना मृत्योः पड्बीश आ द्यति ।।१५।।
मेनिः शतवधा हि सा ब्रह्मज्यस्य क्षितिर्हि सा ।।१६।।
तस्माद् वै ब्राह्मणानां गौर्दुराधर्षा विजानता ।।१७।।
वज्रो धावन्ती वैश्वानर उद्वीता ।।१८।।
हेतिः शफानुत्खिदन्ती महादेवो३पेक्षमाणा ।।१६।।
क्षुरपविरीक्षमाणा वाश्यमानाभि स्फूर्जति ।।2०।।
मृत्युर्हिङ्कृण्वत्यु१ग्रो देवः पुच्छं पर्यस्यन्ती ।।2१।।
सर्वज्यानिः कर्णौ वरीवर्जयन्ती राजयक्ष्मो मेहन्ती ।।22।।
मेनिर्दुह्यमाना शीर्षक्तिर्दुग्धा ।।2३।।
सेदिरुपतिष्ठन्ती मिथोयोधः परामृष्टा ।।2४।।
शरव्या३ मुखेऽपिनह्यमान ऋतिर्हन्यमाना ।।2५।।
अघविषा निपतन्ती तमो निपतिता ।।2६।।

अनुगच्छन्ती प्राणानुप दासयति ब्रह्मगवी ब्रह्मज्यस्य ।।2७।।

अ. १2.५(४).2८–३८

वैरं विकृत्यमाना पौत्राद्यं विभाज्यमाना ।।2८।।
देवहेतिर्ह्रियमाणा व्यृ द्धिर्हृता ।।2६।।
पाप्माधिधीयमाना पारुष्यमवधीयमाना ।।३०।।
विषं प्रयस्यन्ती तक्मा प्रयस्ता ।।३१।।
अघं पच्यमाना दुःष्वप्न्यं पक्वा ।।३2।।
मूलबर्हणी पर्याक्रियमाणा क्षितिः पर्याकृता ।।३३।।
असंज्ञा गन्धेन शुगुद्ध्रियमाणाशीविष उद्धृता ।।३४।।
अभूतिरुपह्रियमाणा पराभूतिरुपहृता ।।३५।।
शर्वः क्रुद्धः पिश्यमाना शिमिदा पिशिता ।।३६।।
अवर्तिरश्यमाना निर्ऋतिरशिता ।।३७।।
अशिता लोकाच्छिनत्ति ब्रह्मगवी ब्रह्मज्यमस्माच्चामुष्माच्च ।।३८।।

अ. १2.५(५).३४–४६

तस्या आहननं कृत्या मेनिराशसनं वलग ऊबध्यम् ।।३६।।
अस्वगता परिह्णुता ।।४०।।
अग्निः क्रव्याद् भूत्वा ब्रह्मगवी ब्रह्मज्यं प्रविश्यात्ति ।।४१।।
सर्वास्याङ्गा पर्वा मूलानि वृश्चति ।।४2।।
छिनत्त्यस्य पितृबन्धु परा भावयति मातृबन्धु ।।४३।।
विवाहां ज्ञातीन्त्सर्वानपि क्षापयति ब्रह्मगवी
ब्रह्मज्यस्य क्षत्रियेणपुनर्दीयमाना ।।४४।।
अवास्तुमेनमस्वगमप्रजसं करोत्यपरापरणो भवति क्षीयते ।।४५।।
य एवं विदुषो ब्राह्मणस्य क्षत्रियो गामादत्ते ।।४६।।

अ. १2.५(६).४७–६१

क्षिप्रं वै तस्याहनने गृध्राः कुर्वत ऐलबम् ।।४७।।
क्षिप्रं वै तस्यादहनं परि नृत्यन्ति केशिनीराघ्नानाः
पाणिनोरसि कुर्वाणाः पापमैलबम् ।।४८।।
क्षिप्रं वै तस्य वास्तुषु वृकाः कुर्वत ऐलबम् ।।४६।।
क्षिप्रं वै तस्य पृच्छन्ति यत् तदासी३दिदं नु ता३दिति ।।५०।।
छिन्ध्या च्छिन्धि प्र च्छिन्ध्यपि क्षापय क्षापय ।।५१।।
आददानमांगिरसि ब्रह्मज्यमुप दासय ।।५2।।
वैश्वदेवी ह्यु१च्यसे कृत्वा कूल्बजमावृता ।।५३।।
ओषन्ती समोषन्ती ब्रह्मणो वज्रः ।।५८।।
क्षुरपविर्मृत्युर्भूत्वा वि धाव त्वम् ।।५५।।
आ दत्से जिनतां वर्च इष्टं पूर्तं चाशिषः ।।५६।।
आदाय जीतं जीताय लोके३ऽमुष्मिन् प्र यच्छसि ।।५७।।
अघ्न्ये पदवीर्भव ब्राह्मणस्याभिशस्त्या ।।५८।।
मेनिः शरव्या भवाघादघविषा भव ।।५६।।
अहन्ये प्र शिरो जहि ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ।।६०।।
त्वया प्रमुर्णं मृदितमग्निर्दहतु दुश्चितम् ।।६१।।

अ. १2.५(७).६2–७३

वृश्च प्र वृश्च सं वृश्च दह प्र दह सं दह ।।६2।।
ब्रह्मज्यं देव्यघ्न्य आ मूलादनुसंदह ।।६३।।
यथायाद् यमसादनात् पापलोकान् परावतः ।।६४।।

एवा त्वं देव्यघ्न्ये ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ।।६५।।
वज्रेण शतपर्वणा तीक्षणेन क्षुरभृष्टिना ।।६६।।
प्र स्कन्धान् प्र शिरो जहि ।।६७।।
लोमान्यस्य सं छिन्धि त्वचमस्य वि वेष्टय ।।६८।।
मासांन्यस्य शातय स्नावान्यस्य सं वृह ।।६६।।
अस्थीन्यस्य पीडय मज्जानमस्य निर्जहि ।।७०।।
सर्वास्याङ्गा पर्वाणि वि श्रथय ।।७१।।
अग्निरेनं क्रव्यात् पृथिव्या नुदतामुदोषत
वायुरन्तरिक्षान्महतो वरिम्णः ।।७2।।
सूर्य एनं दिवः प्र णुदतां न्योषतु ।।७३।।

2. मयोभूः – अ. ५.१८.१–१५; ५.१६.१–१५

अ. ५.१८.१–१५

नैतां ते देवा अददुस्तुभ्यं नृपते अत्तवे। मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् ।।१।।
अक्षद्रुग्धो राजन्यः पाप आत्मपराजितः। स ब्राह्मणस्य गामद्यादद्य जीवानि मा श्वः ।।2।।
आविष्ठिताघविषा पृदाकूरिव चर्मणा। सा ब्राह्मणस्य राजन्य तृष्टैषा गौरनाद्या ।।३।।
निर्वै क्षत्रं नयति हन्ति वर्चोऽग्निरिवारब्धो वि दुनोति सर्वम् ।
यो ब्राह्मणं मन्यते अन्नमेव स विषस्य पिबति तैमातस्य ।।४।।
य एनं हन्ति मुदुं मन्यमानो देवपीयुर्धनकामो न चित्तात् ।
सं तस्येन्द्रो हृदयेऽग्निमिन्ध उभे एनं द्विष्टो नभसी चरन्तम् ।।५।।
न ब्राह्मणो हिंसितव्यो३ग्निः प्रियतनोरिव। सोमो ह्यस्य दायाद इन्द्रो अस्याभिशस्तिपाः ।।६।।
शतापाष्ठां नि गिरति तां न शक्नोति निः खिदन्। अन्नं यो ब्रह्मणां मल्वः
स्वाद्व१द्मीति मन्यते।।७।।
जिह्वा ज्या भवति कुल्मलं वाङ्नाडीका दन्तास्तपसाभिदिग्धाः तेभिर्ब्रह्मा
विध्यति देवपीयून् हृद्बलैर्धनुर्भिर्देवजूतैः ।।८।।
तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो यामस्यन्ति शरव्यां३ न सा मृषा ।
अनुहाय तपसा मन्युना चोत दूरादव भिन्दन्त्येनम् ।।६।।
ये सहस्रमराजन्नासन् दशशता उत। ते ब्राह्मणस्य गां जग्ध्वा वैतहव्याः पराभवन् ।।१०।।
गौरेव तान् हन्यमाना वैतहव्याँ अवातिरत्। ये केसरप्राबन्धायाश्चरमाजामपेचिरन् ।।११।।
एकशतं ता जनता या भूमिर्व्यधूनुत। प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन् ।।१2।।
देवपीयुश्चरति मर्त्येषु गरगीर्णो भवत्यस्थिभूयान् ।
यो ब्राह्मणं देवबन्धुं हिनस्ति न स पितृयाणमप्येति लोकम् ।।१३।।
अग्निर्वै नः पदवायः सोमो दायाद उच्यते। हन्ताभिशस्तेन्द्रस्तथा तद् बेधसो विदुः ।।१४।।
इषुरिव दिग्धा नृपते पृदाकूरिव गोपते। सा ब्राह्मणस्येषुर्घोरा तया विध्यति पीयतः ।।१५।।

अ. ५.१६.१–१५

अतिमात्रमवर्धन्त नोदिव दिवमस्पृशन् ।
भृगुं हिंसित्वा सृंजया वैतहव्याः पराभवन् ।।१।।
ये बृहत्सामानमांगिरसमार्पयन् ब्राह्मणं जनाः ।
पेत्वस्तेषामुभयादमविस्तोकान्यावयत् ।।2।।
ये ब्राह्मणं प्रत्यष्ठीवन् ये वास्मिंछुल्कमीषिरे ।
अस्नस्ते मध्ये कुल्यायाः केशान् खादन्त आसते ।।३।।
ब्रह्मगवी पच्यमाना यावत् साभि विजंगहे ।
तेजो राष्ट्रस्य निर्हन्ति न वीरो जायते वृषा ।।४।।
क्रूरमस्या आशसनं तृष्ट पिशितमस्यते ।

क्षीरं यदस्याः पीयते तद् वै पितृषु किल्बिषम् ।।५।।
उग्रो राजा मन्यमानो ब्राह्मणं यो जिघत्सति ।
परा तत् सिच्यते राष्ट्रं ब्राह्मणो यत्र जीयते ।।६।।
अष्टापदी चतुरक्षी चतुःश्रोत्रा चतुर्हनुः ।
द्व्यास्या द्विजिह्वा भूत्वा सा राष्ट्रमव धूनुते ब्रह्मज्यस्य ।।७।।
तद् वै राष्ट्रमा स्रवति नावं भिन्नामिवोदकम् ।
ब्रह्माणं यत्र हिंसन्ति तद् राष्ट्रं हन्ति दुच्छुना ।।८।।
तं वृक्षा अप सेधन्ति च्छायां नो मोप गा इति ।
यो ब्राह्मणस्य सद्धनमभि नारद मन्यते ।।९।।
विषमेतद् देवकृतं राजा वरुणोऽब्रवीत् ।
न ब्राह्मणस्य गां जग्ध्वा राष्ट्रे जागार कश्चन ।।१०।।
नवैव ता नवतयो या भूमिर्व्यधूनुत ।
प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन् ।।११।।
यां मृतायानुबध्नन्ति कूद्यं पदयोपनीम् ।
तद् वै ब्रह्मज्य ते देवा उपस्तरणमब्रुवन् ।।12।।
अश्रूणि कृपमाणस्य यानि जीतस्य वावृतुः ।
तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ।।१३।।
येन मृतं स्नपयन्ति श्मश्रूणि येनोन्दते ।
तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ।।१४।।
न वर्षं मैत्रावरुणं ब्रह्मज्यमभि वर्षति ।
नास्मै समितिः कल्पते न मित्रं नयते वशम् ।।१५।।

५४३. ब्रह्मणम्

१. ब्रह्म – अ. ७.६६.१

यद्यन्तरिक्षे यदि वात आस यदि वृक्षेषु यदि वोलपेषु ।
यदस्रवन् पशव उद्यमानं तद् ब्राह्मणं पुनरस्मानुपैतु ।।१।।

५४४. ब्रह्मजाया

१. मयोभूः – अ. ५.१७.१–१८

तेवदन् प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ।
वीडुहरास्तप उग्रं मयोभूरापो देवीः प्रथमजा ऋतस्य ।।१।।
सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ।।2।।
हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेति चेदवोचत् ।
न दूताय प्रहेया तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ।।३।।
यामाहुस्तारकैषा विकेशीति दुच्छुनां ग्राममवपद्यमानाम् ।
सा ब्रह्मजाया वि दुनोति राष्ट्रं यत्र प्रापादि शश उल्कुषीमान् ।।४।।
ब्रह्मचारी चरति वेविषद् विषः स देवानां भवत्येकमंगम् ।
तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं१ न देवाः ।।५।।
देवा वा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसा ये निषेदुः ।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ।।६।।
ये गर्भा अवपद्यन्ते जगद् यच्चापलुप्यते ।
वीरा ये तृह्यनते मिथो ब्रह्मजाया हिनस्ति तान् ।।७।।
उत यत् पतयो दश स्त्रियाः पूर्वे अब्राह्मणः ।

ब्रह्मा चेद्धस्तमग्रहीत् स एव पतिरेकधा ।।८।।
ब्राह्मण एव पतिर्न राजन्यो३ न वैश्यः ।
तत् सूर्यः प्रब्रुवन्नेति पंचभ्यो मानवेभ्यः ।।६।।
पुनर्वै देवा अददुः पुनर्मनुष्या अददुः ।
राजानः सत्यं गृह्णाना ब्रह्मजायां पुनर्ददुः ।।१०।।
पुनर्दाय ब्रह्मजायां कृत्वा देवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्त्वोरुगायमुपासते ।।११।।
नास्य जाया शतवाही कल्याणी तल्पमा शये ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ।।१2।।
न विकर्णः पृथुशिरास्तस्मिन् वेश्मनि जायते ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ।।१३।।
नात्य क्षत्ता निष्कग्रीवः सूनानामेत्यग्रतः ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ।।१४।।
नास्य श्वेतः कृष्णकर्णो धुरि युक्तो महीयते ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ।।१५।।
नात्य क्षेत्रे पृष्करिणी नाण्डीकं जायते बिसम् ।
यस्मित् राष्ट्रे निरुध्यते ब्रह्मजायाचित्या ।।१६।।
नास्मै पृश्निं वि दुहन्ति येइस्या दोहमुपासते ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचितया ।।१७।।
नास्य धेनुः कल्याणी नानड्वान्त्सहते धुरम् ।
विजानिर्यत्र ब्राह्मणो रात्रिं वसति पापया ।।१८।।

५४५. ब्रह्मणस्पतिः

१. अथर्वा – अ. ६.६.१

यो३स्मान् ब्रह्मणस्पतेऽदेवो अभिमन्यते। सर्वं तं रन्धयासि मे यजमानाय सुन्वते ।।१।।

2. अथर्वांगिरा – अ. ६.१०१.१–३

आ वृषायस्व श्वसिहि वर्धस्व प्रथयस्व च। यथांग वर्धतां शेपस्तेन योषितमिज्जहि ।।१।।
येन कृशं वाजयन्ति येन हिन्वन्त्यातुरम्। तेनास्य ब्रह्मणस्पते धनुरिवा तानया पसः ।।2।।
आहं तनोमि ते पसो अधि ज्यामिव धन्वनि। क्रमस्वर्श इव रोहितमनवग्लायता सदा ।।३।।

३. कण्वः – य. ३४.५६–५७

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उप प्र यन्तु मरुतः सुदानवऽ इन्द्र प्राशूर्भवा सचा ।।५६।।
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्। याम्मन्निन्द्रो वरुणो मित्रोऽअर्य्यमा देवाऽ ओकांसि चक्रिरे।।५७।।

४. गृत्समदः – य. ३४.५८

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ।
य ऽइमा विश्वा विश्वकर्म्मा। यो नः पिता। अन्नापतेऽन्नस्य नो देहि ।।५८।।

५. गृत्समदः शौनकः – ऋ. 2.2३.१; ५; ६; ११; १७; १६; 2.2४.१–११; १३.१६; 2.2५.१–५; 2. 2६.१–४

ऋ. 2.2३.१

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ।।१।।

ऋ. 2.2३.५

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।

विश्वा इदस्मादूध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ।।५।।

ऋ. 2.2३.६

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरो तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ।।६।।

ऋ. 2.2३.११

अनानुदो वृषभो जग्मिराहवं निष्ट्पता शत्रुं पृतनासु सासहिः ।
असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणः ।।११।।

ऋ. 2.2३.१७

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नः साम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ।।१७।।

ऋ. 2.2३.१९

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व।
विश्व तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ।।१९।।

ऋ. 2.2४.१–११

सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा ।
यथा नो मीढ्वान्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिम्।।१।।
यो नन्त्वान्यनमन्न्योजसोतादर्दर्मन्युना शम्बराणि वि ।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम् ।।2।।
तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळहाव्रदन्त वीळिता ।
उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत् स्वः ।।३।।
अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम् ।।४।।
सना ता का चिद्भुवना भवीत्या माद्भिः शद्भिर्दुरो वरन्त वः ।
अयतन्ता चरतो अन्यदन्यदिद्या चकार वयुनां ब्रह्मणस्पतिः ।।५।।
अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम् ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशम् ।।६।।
ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।
ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तम् ।।७।।
ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।
तस्य साधवीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ।।८।।
स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः ।
चाक्ष्मो यद्वाजं भरते मती धनादित्सूर्यस्तपति तप्यतुर्वृथा ।।९।।
विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ।
इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुंजते विशः ।।१०।।
योऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ ।
स देवो देवान्प्रति पप्रथे मृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ।।११।।

ऋ. 2.2४.१३–१६

उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः ।।१३।।
ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः ।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ।।१४।।
ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो३ वयस्वतः ।
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ।।१५।।
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।

विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ।।१६।।

ऋ. 2.2५.१–५

इन्धनो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत् ।
जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः ।।१।।
वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद् बोधति त्मना ।
तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः ।।2।।
सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रींरभि वष्ट्योजसा ।
अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्वतिः ।।३।।
तस्मा अर्षन्ति दिव्या असश्चतसः स्तवभिः प्रथमो गोषु गच्छति ।
अनिभृष्टतविषिर्हन्त्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ।।४।।
तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म दधिरे पुरूणि ।
देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ।।५।।

ऋ. 2.2६.१–४

ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयन्तमभ्यसत् ।
सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ।।१।।
यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ।
हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्तेरव आ वृणीमहे ।।2।।
स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ।।३।।
यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः ।
उरुष्यतीमंहसो रक्षती रिषोंऽहोश्चिदस्मा उरुचक्रिरद्भुतः ।।४।।

६. ब्रह्म – अ. १६.६१.१; १६.६2.१; १६.६३.१

अ. १६.६१.१

तनूस्तमन्वा मे सहे दतः सर्वमायुरशीय। स्योनं मे सीद पुरुः पृणस्व पवमानः स्वर्गे ।।१।।

अ. १६.६2.१

प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु। प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ।।१।।

अ. १६.६३.१

उत् तिष्ठ ब्रह्मणस्पते देवान् यज्ञेन बोधय।
आयुः प्राणं प्रजां पशून् कीर्तिं यजमानं च वर्धय।।१।।

७. मेधातिथिः काण्वः – ऋ. १.१८.१–३; सा. १४६३

ऋ. १.१८.१–३

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः ।।१।।
यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः ।।2।।
मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य। रक्षा णो ब्रह्मणस्पते ।।३।।

सा. १४६३

सोमानां स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः ।।2।।

८. मातृनामा – अ. ८.६.१५

येषां पश्चात् प्रपदानि पुरः पार्ष्णीः पुरो मुखा ।
खलजाः शकधूमजा उरुण्डा ये च मट्मटाः कुम्भमुष्का अयाशवः ।
तानस्या ब्रह्मणस्पते प्रतीबोधेन नाशय ।।१५।।

६. शिरिम्बिठो भारद्वाजः – ऋ. १०.१५५.2–३

चत्तो इतश्चत्तामुतः सर्वा भ्रूणान्यारुषी। अराय्यं ब्रह्मणस्पते तीक्ष्णशृंगोदृषन्निहि ।।2।।

अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषम्। तदा रभस्व दुर्हणो तेन गच्छ परस्तरम् ।।३।।

१०. सत्यधृतिर्–वरुणिः – य. ३.३०

मा नः शंसोऽअररुषो धूर्तिः प्रणङ् मर्त्यस्य। रक्षा णो ब्रह्मणस्पते ।।३०।।

५४६. ब्रह्मणस्पतिः अभीवर्तमणिः

१. वसिष्ठः – अ. १.2६.१–६

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे। तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय ।।१।।
अभिवृत्य सपत्नानभि या नो अरातयः। अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति ।।2।।
अभि त्वा देवः सविताभि सोमो अवीवृधत्। अभि त्वा विश्वाः भूतान्यभीवर्तो यथाससि ।।३।।
अभीवर्तो अभिभवः सपत्नक्षयणो मणिः। राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे ।।४।।
उदसौ सूर्यो अगादुदिदं मामकं वचः। यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा ।।५।।
सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः। यथाहमेषां वीराणां विराजानि जनस्य च ।।६।।

५४७. ब्रह्मणस्पतिर् इन्द्रश्च

१. गृत्समदः शौनकः – ऋ. 2.2४.१2

विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ।
अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ।।१2।।

५४८. ब्रह्मणस्पतिर्–इन्द्र–सोमश्च

१. मेधातिथिः काण्वः – ऋ. १.१८.४

स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः। सोमो हिनोति मर्त्यम् ।।४।।

५४९. ब्रह्मणस्पतिदक्षिणे

१. मेधातिथिः काण्वः – ऋ.१.१८.५

त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम्। दक्षिणा पात्वंहसः ।।५।।

५५०. ब्रह्मणस्पतिः दन्ता

१. अथर्वा – अ. ६.१४०.१–३

यौ व्याघ्रावववरूढौ जिघत्सतः पितरं मातरं च ।
तौ दन्तौ ब्रह्मणस्पते शिवौ कृणु जातवेदः ।।१।।
व्रीहिमत्तं यवमत्तमथो माषमथो तिलम् ।
एष वां भागो निहितो रत्नधेयाय दन्तौ मा हिंसिष्टं पितरं मातरं च ।।2।।
अपहूतौ सयुजौ स्योनौ दन्तौ सुमङ्गलौ ।
अन्यत्र वां घोरं तन्व१ः परैतु दन्तौ मा हिंसिष्टं पितरं मातरं च ।।३।।

५५१. ब्रह्मणस्पतिः (विषभैषज्यं)

१. अथर्वा – अ. ७.५६.४

अयं यो वक्रो विपरुर्व्यङ्गो मुखानि वक्रा वृजिना कृणोषि ।
तानि त्वं ब्रह्मणस्पत इषीकामिव सं नमः ।।४।।

५५2. ब्रह्मणस्पत्यादयः

१. अथर्वा – अ. ६.७४.१–३

सं वः पृच्यन्तां तन्व१ः सं मनांसि समु व्रता ।
सं वोऽयं ब्रह्मणस्पतिर्भगः सं वो अजीगमत् ।।१।।
संज्ञपनं वो मनसोथो संज्ञपनं हृदः ।
अथो भगस्य यच्छ्रान्तं तेन संज्ञपयामि वः ।।2।।
यथादित्या वसुभिः संबभूवुमरुद्भिरुग्रा अहृणीयमानाः।
एवा त्रिणामन्नहृणीयमान इमान् जनान्त्संमनसस्कृधीह ।।३।।

५५३. ब्रह्म आत्मा

१. वेनः – अ. 2.१.१–५

वेनस्तत् पश्यत् परमं गुहा यद् यत्र विश्वं भवत्येकरूपम् ।
इदं पृश्निरदुहज्जायमानाः स्वर्विदो अभ्यनूषत व्राः ।।१।।
प्र तद् वोचेदमृतस्य विद्वान् गन्धर्वो धाम परमं गुहा यत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुष्पितासत् ।।2।।
स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा ।
यो देवानां नामध एक एव तं संप्रश्न भुवना यन्ति सर्वा ।।३।।
परि द्यावापृथिवी सद्य आयमुपातिष्ठे प्रथमजामृतस्य ।
वाचमिव वक्तरि भुवनेष्ठा धास्युरेष नन्वे३षो अग्निः ।।४।।
परि विश्वा भुवनान्यायमृतस्य तन्तुं विततं दृशे कम् ।
यत्र देवा अमृतमानशानाः समाने योनावध्यैरयन्त ।।५।।

५५४. ब्रह्म आदित्यः

१. अथर्वा – अ. ५.६.१

ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ।।१।।

५५५. ब्रह्मचारी

१. ब्रह्म – अ. ११.५.१–2६

ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन् देवाः संमनसो भवन्ति ।
स दाधार पृथिवीं दिवं च स आचार्यं१ तपसा पिपर्ति ।।१।।
ब्रह्मचारिणं पितरो देवजनाः पृथग् देवा अनुसंयन्ति सर्वे ।
गन्धर्वा एनमन्वायन् त्रयस्त्रिंशत् त्रिशताः षट्सहस्राः सर्वान्त्स देवांस्तपसा पिपर्ति ।।2।।
आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।।३।।
इयं समित् पृथिवी द्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति ।
ब्रह्मचारी समिधा मेखलया श्रमेण लोकास्तपसा पिपर्ति ।।४।।
पूर्वो जातो ब्रह्मणो ब्रह्मचारी घर्मं वसानस्तपसोदतिष्ठत् ।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ।।५।।
ब्रह्मचार्येति समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः ।
स सद्य एति पूर्वस्मादुत्तरं समुद्रं लोकान्त्संगृभ्य मुहुराचरिक्रत् ।।६।।
ब्रह्मचारी जनयन् ब्रह्मापो लोकं प्रजापतिं परमेष्ठिनं विराजम् ।
गर्भो भूत्वामृतस्य योनाविन्द्रो ह भूत्वासुरांस्ततर्ह ।।७।।
आचार्यस्ततक्ष नभसी उभे इमे उर्वी गम्भीरे पृथिवी दिवं च ।
ते रक्षति तपसा ब्रह्मचारी तस्मिन् देवाः संमनसो भवन्ति ।।८।।
इमां भूमिं पृथिवीं ब्रह्मचारी भिक्षामा जभार प्रथमो दिवं च ।
ते कृतवा समिधावुपास्ते तयोरार्पिता भुवनानि विश्वा ।।९।।
अर्वागन्यः परो अन्यो दिवस्पृष्ठाद् गुहा निधी निहितौ ब्राह्मणस्य ।
तौ रक्षति तपसा ब्रह्मचारी तत् केवलं कृणुते ब्रह्म विद्वान् ।।१०।।
अर्वागन्य इतो अन्यः पृथिव्या अग्नी समेतो नभसी अन्तरेमे ।
तयोः श्रयन्ते रश्मयोऽधि दृढास्ताना तिष्ठति तपसा ब्रह्मचारी ।।११।।
अभिक्रन्दन् स्तनयन्नरुणः शितिंगो बृहच्छेपोऽनु भूमौ जभार ।

ब्रह्मचारी सिंचति सानौ रेतः पृथिव्यां तेन जीवन्ति प्रदिशश्चतस्रः ।।१२।।
अग्नौ सूर्ये चन्द्रमसि मातरिश्वन् ब्रह्मचार्य१प्सु समिधमा दधाति ।
तासामर्चींषि पृथगभ्रे चरन्ति तासामाज्यं पुरुषो वर्षमापः ।।१३।।
आचार्ये मृत्युर्वरुणः सोम ओषधयः पयः ।
जीमूता आसन्त्सत्वानस्तैरिदं स्व१राभृतम् ।।१४।।
अमा घृतं कृणुते केवलमाचार्यो भूतवा वरुणो यद्यदैच्छत् प्रजापतौ ।
तद् ब्रह्मचारी प्रायच्छत् स्वान्मित्रो अध्यात्मनः ।।१५।।
आचार्यो ब्रह्मचारी ब्रह्मचारी प्रजापतिः ।
प्रजापतिर्वि राजति विराडिन्द्रोऽभवद् वशी ।।१६।।
ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति ।
आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते ।।१७।।
ब्रह्मचर्येण कन्या३ युवानं विन्दते पतिम् ।
अनड्वान् ब्रह्मचर्येणाश्वो घासं जिगीषति ।।१८।।
ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत ।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्व१राभरत् ।।१९।।
ओषधयो भूतभव्यमहोरात्रे वनस्पतिः ।
संवत्सरः सहर्तुभिस्ते जाता ब्रह्मचारिणः ।।२०।।
पार्थिवा दिव्याः पशव आरण्या ग्राम्याश्च ये ।
अपक्षाः पक्षिणश्च ये ते जाता ब्रह्मचारिणः ।।२१।।
पृथक् सर्वे प्राजापत्याः प्राणानात्मसु बिभ्रति ।
तान्त्सर्वान् ब्रह्म रक्षति ब्रह्मचारिण्याभृतम् ।।२२।।
देवानामेतत् परिषूतमनभ्यारूढं चरति रोचमानम् ।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ।।२३।।
ब्रह्मचारी ब्रह्म भ्राजद् बिभर्ति तस्मिन् देवा अधि विश्वे समोताः ।
प्राणापानौ जनयन्नाद् व्यानं वाचं मनो हृदयं ब्रह्म मेधाम् ।।२४।।
चक्षुः श्रोत्रं यशो अस्मासु धेह्यन्नं रेतो लोहितमुदरम् ।।२५।।
तानि कल्पद् ब्रह्मचारी सलिलस्य पृष्ठे तपोऽतिष्ठत् तप्यमानः समुद्रे ।
स स्नातो बभ्रुः पिङ्गलः पृथिव्यां बहु रोचते ।।२६।।

५५६. ब्रह्मा

१. प्रजापतिः – य. २३.१४

संशितो रश्मिना रथः संशितो रश्मिना हयः। संशितो अप्स्वप्सुजा ब्रह्मा सोमपुरोगवः ।।१४।।

५५७. ब्रह्मादयः

१. प्रजापतिः – य. २३.१३; ४८

य. २३.१३

वायुष्ट्वा पचतैरवत्वसितग्रीवश्छागैर्न्यग्राधश्चमसैः शल्मलिर्वृद्ध्या ।
एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन्ब्रह्माकृष्णश्च नोऽवतु नमोऽग्नये ।।१३।।

य. २३.४८

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमं सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते ।।४८।।

५५८. ब्रह्मादित्यौ

१. अथर्वा – अ. १६.३.१–६; १६.४.१–७

अ. १६.३.१–६

मूर्धाहं रयीणां मूर्धा समानानां भूयासम् ।।१।।

रुजश्च मा वेनश्च मा हासिष्टां मूर्धा च मा विधर्मा च मा हासिष्टाम् ।।2।।
उर्वश्च मा चमसश्च सा हासिष्टां धर्ता च मा धरुणश्च मा हासिष्टाम् ।।३।।
विमोकश्च मार्द्रपविश्च मा हासिष्टामार्द्रदानुश्च मा मातरिश्वा च मा हासिष्टाम।।४।।
बृहस्पतिर्म आत्मा नृमणा नाम हृद्यः।।५।।
असंतापं मे हृदयमुर्वी गव्यूतिः समुद्रो अस्मि विधर्मणा ।।६।।

अ. १६.४.१–७

नाभिरहं रयीणां नाभिः समानानां भूयासम् ।।१।।
स्वासदसि सूषा अमृतो मर्त्येष्वा ।।2।।
मा मां प्राणो हासीन्मो अपानोऽवहाय परा गात् ।।३।।
सूर्यो माह्नः पात्वग्निः पृथिव्या वायुरन्तरिक्षाद् यमो मनुष्येभ्यः सरस्वती पार्थिवेभ्यः ।।४।।
प्राणापानौ मा मा हासिष्टं मा जने प्र मेषि ।।५।।
स्वस्त्य१द्योषसो दोषसश्च सर्व आपः सर्वगणो अशीय ।।६।।
शक्वरी स्थ पशवो मोप स्थेषुर्मित्रावरुणौ मे प्राणापानावग्निर्मे दक्षं दधातु ।।७।।

५५६. ब्राह्मणः

१. गरुत्मान् – अ. ४.६.१

ब्राह्मणो जज्ञे प्रथमो दशशीर्षो दशास्यः। स सोमं प्रथमः पपौ स चकाराररसं विषम् ।।१।।

५६०. ब्रह्मौदनः

१. ब्रह्म – अ. ११.१.१–३७

अग्ने जायस्वादितिर्नाथितेयं ब्रह्मौदनं पचति पुत्रकामा ।
सप्तऋषयो भूतकृतस्ते त्वा मन्थन्तु प्रजया सहेह ।।१।।
कृणुत धूमं वृषणः सखायोऽद्रोघाविता वाचमच्छ ।
अयमग्निः पृतनाषाट् सुवीरो येन देवा असहन्त दस्यून् ।।2।।
अग्नेऽजनिष्ठा महते वीर्याय ब्रह्मौदनाय पक्तवे जातवेदः ।
सप्तऋषयो भूतकृतस्ते त्वाजीजनन्नस्यै रयिं सर्ववीरं नि यच्छ ।।३।।
समिद्धो अग्ने समिधा समिध्यस्व विद्वान् देवान् यज्ञियाँ एह वक्षः ।
तेभ्यो हविः श्रपयंजातवेद उत्तमं नाकमधि रोहयेमम् ।।४।।
त्रेधा भागो निहितो यः पुरा वो देवानां पितॄणां मर्त्यानाम् ।
अंशंजानीध्वं वि भजामि तान् वो यो देवानां स इमां पारयाति ।।५।।
अग्ने सहस्वानभिभूरभीदसि नीचो न्युब्ज द्विषतः सपत्नान् ।
इयं मात्रा मीयमाना मिता च सजातांस्ते बलिहृतः कृणोतु ।।६।।
साकं सजातैः पयसा सहैध्युदुब्जैनां महते वीर्याय ।
ऊर्ध्वो नाकस्याधि रोह विष्टपं स्वर्गो लोक इति यं वदन्ति ।।७।।
इयं मही प्रति गृह्णातु चर्म पृथिवी देवी सुमनस्यमाना ।
अथ गच्छेम सुकृतस्य लोकम् ।।८।।
एतौ ग्रावाणौ सयुजा युङ्ग्धि चर्मणि निर्भिन्ध्यंशून् यजमानाय साधु ।
अवघ्नती नि जहि य इमां पृतन्यव ऊर्ध्वं प्रजामुद्भरन्त्युदूह ।।६।।
गृहाण ग्रावाणौ सकृतौ वीर हस्त आ ते देवा यज्ञिया यज्ञमगुः ।
त्रयो वरा यतमांस्त्वं वृणीषे तास्ते समृद्धीरिह राधयामि ।।१०।।
इयं ते धीतिरिदमु ते जनित्रं गृह्णातु त्वामदितिः शूरपुत्रा ।
परा पुनीहि य इमां पृतन्यवोऽस्यै रयिं सर्ववीरं नि यच्छ ।।११।।
उपश्वसे द्रुवये सीदता यूयं वि विच्यध्वं यज्ञियासस्तुषैः ।
श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयामि ।।१2।।

परेहि नारि पुनरेहि क्षिप्रमपां त्वा गोष्ठोऽध्यरुक्षद् भराय ।
तासां गृह्णीताद् यतमा यज्ञिया असन् विभाज्य धीरीतरा जहीतात् ।।१३।।
एमा अगुर्योषितः शुम्भमाना उत्तिष्ठ नारि तवसं रभस्व ।
सुपत्नी पत्या प्रजया प्रजावत्या त्वागन् यज्ञः प्रति कुम्भं गृभाय ।।१४।।
ऊर्जो भागो निहितो यः पुरा व ऋषिप्रशिष्टाप आ भरैताः ।
अयं यज्ञो गातुविन्नाथवित् प्रजाविदुग्रः पशुविद् वीरविद् वो अस्तु ।।१५।।
अग्ने चरुर्यज्ञियस्त्वाध्यरुक्षच्छुचिस्तपिष्ठस्तपसा तपैनम् ।
आर्षेया दैवा अभिसंगत्य भागमिमं तपिष्ठा ऋतुभिस्तपन्तु ।।१६।।
शुद्धाः पूता योषितो यज्ञिया इमा आपश्चरुमव सर्पन्तु शुभ्राः ।
अदुः प्रजां बहुलां पशून् नः पक्तौदनस्य सुकृतामेतु लोकम् ।
ब्रह्मणा शुद्धा उत पूता घृतेन सोमस्यांशवस्तण्डुला यज्ञिया इमे ।
अपः प्र विशत प्रति गृह्णातु वश्चरुरिमं पक्त्वा सुकृतामेत लोकम् ।।१८।।
उरुः प्रथस्व महता महिम्ना सहस्रपृष्ठः सुकृतस्य लोके ।
पितामहाः पितरः प्रजोपजाहं पक्ता पंचदशस्ते अस्मि ।।१९।।
सहस्रपृष्ठः शतधारो अक्षितो ब्रह्मौदनो देवयानः स्वर्गः ।
अमूंस्त आ दधामि प्रजया रेषयैनान् बलिहाराय मृडतान्मह्यमेव ।।20।।
उदेहि वेदिं प्रजया वर्धयैनां नुदस्व रक्षः प्रतरं धेह्येनाम् ।
श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयामि ।।21।।
अभ्यावर्तस्व पशुभिः सहैनां प्रत्यङ्ङेना देवताभिः सहैधि ।
मा त्वा प्रापच्छपथो माभिचारः स्वे क्षेत्रे अनमीवा वि राज ।।22।।
ऋतेन तष्टा मनसा हितैषा ब्रह्मौदनस्य विहिता वेदिरग्रे ।
अंसद्रीं शुद्धामुप धेहि नारि तत्रौदनं सादय दैवानाम् ।।2३।।
अदितेर्हस्तां स्रुचमेतां द्वितीयां सप्तऋषयो भूतकृतो यामकृण्वन् ।
सा गात्राणि विदुष्योदनस्य दर्विर्वेद्यामध्येनं चिनोतु ।।2४।।
शृतं त्वा हव्यमुप सीदन्तु दैवा निः सृप्याग्नेः पुनरेनान् प्र सीद् ।
सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयास्ते मा रिषन् प्राशितारः ।।2५।।
सोम राजन्त्संज्ञानमा वपैभ्यः सुब्राह्मणा यतमे त्वोपसीदान् ।
ऋषीनार्षेयांस्तपसोऽधि जातान् ब्रह्मौदने सुहवा जोहवीमि ।।2६।।
शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदमभिषिंचामि वोऽहमिन्द्रो मरुत्वान्त्स ददादिदं मे ।।2७।।
इदं मे ज्योतिरमृतं हिरण्यं पक्वं क्षेत्रात् कामदुघा म एषा ।
इदं धनं नि दधे ब्राह्मणेषु कृण्वे पन्थां पितृषु यः स्वर्गः ।।2८।।
अग्नौ तुषाना वप जातवेदसि परः कम्बूकाँ अप मृड्ढि दूरम् ।
एतं शुश्रुम गृहराजस्य भागमथो विद्म निर्ऋतेर्भागधेयम् ।।2९।।
श्राम्यतः पचतो विद्धि सुन्वतः पन्थां स्वर्गमधि रोहयैनम् ।
येन रोहात् परमापद्य यद् वय उत्तमं नाकं परमं व्योम ।।३०।।
बभ्रेरध्वर्यो मुखमेतद् वि मृड्ढ्याज्याय लोकं कृणुहि प्रविद्वान् ।
घृतेन गात्रानु सर्वा वि मृड्ढि कृण्वे पन्थां पितृषु यः स्वर्गः ।।३१।।
बभ्रे रक्षः समदमा वपैभ्योऽब्राह्मणा यतमे त्वोपसीदान् ।
पुरीषिणः प्रथमानाः पुरस्तादार्षेयास्ते मा रिषन् प्राशितारः ।।३2।।
आर्षेयेषु नि दध ओदन त्वा नानार्षेयाणामप्यस्त्यत्र ।
अग्निर्मे गोप्ता मरुतश्च सर्वे विश्वे देवा अभि रक्षन्तु पक्वम् ।।३३।।
यज्ञं दुहानं सदमित् प्रपीनं पुमांसं धेनुं सदनं रयीणाम् ।
प्रजामृतत्वमुत दीर्घमायू रायश्च पोषैरुप त्वा सदेम ।।३४।।
वृषभोऽसि स्वर्ग ऋषीनार्षेयान् गच्छ ।

सुकृतां लोके सीद तत्र नौ संस्कृतम् ।।३५।।
समाचिनुष्वानुसंप्रयाह्यग्ने पथः कल्पय देवयानान् ।
एतैः सुकृतैरनु गच्छेम यज्ञं नाके तिष्ठन्तमधि सप्तरश्मौ ।।३६।।
येन देवा ज्योतिषा द्यामुदायन् ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् ।।३७।।

५६१. भगः

१. अथर्वा – अ. ३.१६.2–६; ६.१2६.१–३

अ. ३.१६.2–६

प्रातर्जितं भगमुग्रं हवामहे वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद् यं मन्यमानस्तुरश्चिद् राजा चिद् यं भगं भक्षीत्याह ।।2।।
भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ।।३।।
उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदितौ मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ।।४।।
भग एव भगवाँ अस्तु देवस्तेना वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर एता भवेह ।।५।।
समध्वरायोषमो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं मे रथमिवाश्वा वाजिन आ वहन्तु ।।६।।

अ. ६.१2६.१–३

भगेन मा शंशपेन साकमिन्द्रेण मेदिना। कृणोभि भागिनं माप द्रान्त्वरातयः ।।१।।
येन वृक्षाँ अभयभवो भगेन वर्चसा सह। तेन मा भगिनं कृण्वप द्रान्त्वरातयः ।।2।।
यो अन्धो यः पुनः सरो भगो वृक्षेष्वाहितः। तेन मा भगिनं कृण्वप द्रान्त्वरातयः ।।३।।

2. ब्रह्म – अ. ५.2६.६

भगो युनक्त्वाशिषो न्व१स्मा अस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा ।।६।।

३. वसिष्ठः – ऋ. ७.४१.2–६

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ।।2।।
भगर प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग नृभिर्नृवन्तः स्याम ।।३।।
उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ।।४।।
भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ।।५।।
समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ।।६।।

५६2. भवाशर्वौ

१. मृगारः – अ. ४.2८.१–७

भवाशर्वौ मन्वे वां तस्य वित्तं ययोर्वामिदं प्रदिशि यद् विरोचते।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ।।१।।
ययोरभ्यध्व उत यद् दूरे चिद् यौ विदिताविषुभृतामसिष्ठौ ।

यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ।।2।।
सहस्राक्षौ वृत्रहणा हुवेऽहं दूरेगव्यूती स्तुवन्नेम्युग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ।।३।।
यावारेभाथे बहु साकमग्रे प्र चेदस्राष्ट्रमभिभां जनेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ।।४।।
ययोर्वधान्नापपद्यते कश्चनान्तर्देवेषूत मानुषेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ।।५।।
यः कृत्याकृन्मूलकृद् यातुधानो नि तस्मिन् धत्तां वज्रमुग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुंचतमंहसः ।।६।।
अधि नो ब्रूतं पृतनासूग्रौ सं वज्रेण सृजतं यः किमीदी ।
स्तौमि भवाशर्वौ नाथितो जोहवीमि तौ नो मुंचतमंहसः ।।७।।

५६३. भाववृत्तम्

१. अधमर्षणो माधुच्छन्दसः – ऋ. १०.१९०.१–३

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत।ततो रात्र्यजायत ततः समुद्रो अर्णवः ।।१।।
समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ।।2।।
सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।।३।।

2. प्रजापतिः परमेष्ठी – ऋ. १०.129.१–७

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ।।१।।
न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ।।2।।
तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ।।३।।
कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन्हृदि प्रतीष्या कवयो मनीषा ।।४।।
तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ।।५।।
को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ।।६।।
इह विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद ।।७।।

३. यज्ञः प्राजापत्यः – ऋ. १.३०.१–७

आ व इन्दं क्रिविं यथा वाजयन्तः शतक्रतुम्। मंहिष्ठं सिंच इन्दुभिः ।।१।।
शतं वा यः शुचीनां सहस्रं वा समाशिराम्। एदु निम्नं न रीयते ।।2।।
सं यन्मदाय शुष्मिण एना ह्यस्योदरे। समुद्रो न व्यचो दधे ।।३।।
अयमु ते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे ।।४।।
स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता ।।५।।
ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो। समन्येषु ब्रवावहै ।।६।।
योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ।।७।।

४. यमी – ऋ. १०.१५४.१–५

सोम एकेभ्यः पवते घृतमेक उपासते। योभ्यो मधु प्रधावति ताँश्चिदेवापि गच्छवात् ।।१।।
तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः। तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छतात् ।।2।।
ये युध्यन्ते प्रधनेषु शरासो ये तनूत्यजः। ये वा सहस्रदक्षिणास्ताँश्चिदेवापि गच्छतात् ।।३।।

ये चित्पूर्व ऋतसाप ऋतावान ऋतावृधः। पितॄन्तपस्वतो यम ताँश्चिदेवापि गच्छतात् ।।४।।
सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम्। ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ।।५।।

५६४. भिषग्वराः

१. वरुणः – य. १२.६७

नाशयित्री बलासस्यार्शसऽउपचितामसि। अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ।।६७।।

५६५. भिषजः

१. वरुणः – य. १२.६४; १०१

य. १२.६४

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः। सर्वाः संगत्य वीरुधेऽस्यै संदत्त वीर्य्यम् ।।६४।।

य. १२.१०१

त्वमुत्तमास्योषधे तव वृक्षाऽउपस्तयः। उपस्तिरस्तु सोऽस्माकं योऽअस्माँ2ऽ अभिदासति ।।१०१।।

५६६. भूमिः

१. अथर्वा – अ. १२.१.१–६३; १८.३.५०

अ. १२.१.१–६३

सत्यं बृहद्दतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ।।१।।
असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ।।2।।
यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः ।
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः गोष्वप्यन्ने दधातु ।।३।।
यस्याश्चतस्रः प्रादिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः ।
या बिभर्ति बहुधा प्राणदेजत् सा नो भूमिर्गोष्वप्यन्ने दधातु ।।४।।
यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन् ।
गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ।।५।।
विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।
वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ।।६।।
यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम् ।
सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा ।।७।।
यार्णवेऽधि सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः ।
यस्या हृदयं परमे वयोमन्त्सत्येनावृतममृतं पृथिव्याः ।
सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे ।।८।।
यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति ।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा ।।९।।
यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे ।
इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपतिः ।
सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः ।।१०।।
गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवी स्योनमस्तु ।
बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् ।
अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम् ।।११।।
यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः ।
तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः ।
पर्जन्यः पिता स उ नः पिपर्तु ।।१2।।
यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः ।
यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः पुरस्तात् ।

सा नो भूमिर्वर्धयद् वर्धमाना ।।१३।।
यो नो द्वेषत् पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन ।
तं नो भूमे रन्धय पूर्वकृत्वरि ।।१४।।
त्वज्जातास्त्वयि चरन्ति भर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः ।
तवेमे पृथिवि पंच मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति ।।१५।।
ता नः प्रजाः सं दुह्रतां समग्रा वाचो मधु पृथिवि धेहि मह्यम् ।।१६।।
विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम् ।
शिवां स्योनामनु चरेम विश्वहा ।।१७।।
महत् सधस्थं महती बभूविथ महान् वेग एजथुर्वेपथुष्टे। महांस्त्वेन्द्रो रक्षत्यप्रमादम् ।
सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन ।।१८।।
अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु। अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः ।।१९।।
अग्निर्दिव आ तपत्यग्नेर्देवस्योर्व१न्तरिक्षम्।अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम् ।।२०।।
अग्निवासाः पृथिव्य सितज्ञूस्त्विषीमन्तं संशितं मा कृणोतु ।।२१।।
भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतम्। भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः ।
सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु ।।22।।
यस्ते गन्धः पृथिवि संबभूव यं विभ्रत्योषधयो यमापः ।
यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन ।।२३।।
यस्ते गन्धः पुष्करमाविवेश यं संजभ्रुः सूर्याया विवाहे ।
अमर्त्याः पृथिवि गन्धमग्रे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन ।।२४।।
यस्ते गन्धः पुरुषेषु स्त्रीषु पुंसु भगो रुचिः। यो अश्वेषु वीरेषु यो मृगेषूत हस्तिषु ।
कन्यायां वर्चो यद् भूमे तेनास्माँ अपि सं सृज मा नो द्विक्षत कश्चन ।।२५।।
शिला भूमिरश्मा पांसुः सा भूमिः संधृता धृता। तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः ।।२६।।
यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठन्ति विश्वहा। पृथिवीं विश्वधायसं धृतामच्छावदामसि ।।२७।।
उदीराणा उतासीनास्तिष्ठन्तः प्रक्रामन्तः। पदभ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम् ।।२८।।
विमृग्वरीं पृथिवीमा वदामि क्षमां भूमिं ब्रह्मणा वावृधानाम् ।
ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतं त्वाभि नि षीदेम भूमे ।।२९।।
शुद्धा न आपस्तन्वे क्षरन्तु यो नः सेदुरप्रिये तं नि दध्मः। पवित्रेण पृथिवी मोत् पुनामि ।।३०।।
यास्ते प्राचीः प्रदिशो या उदीचीर्यास्ते भूमे अधराद् याश्च पश्चात् ।
स्योनास्ता मह्यं चरते भवन्तु मा नि पप्तं भुवने शिश्रियाणः ।।३१।।
मा नः पश्चान्मा पुरस्तान्नुदिष्ठा मोत्तरादधरादुत ।
स्वस्ति भूमे नो भव मा विदन् परिपन्थिनो वरीयो यावया वधम् ।।३2।।
यावत् तेऽभि विपश्यामि भूमे सूर्येण मेदिना। तावन्मे चक्षुर्मा मेष्टोत्तरामुत्तरां समाम् ।।३३।।
यच्छयानः पर्यावर्ते दक्षिणं सव्यमभि भूमे पार्श्वम्। उत्तानास्त्वा प्रतीचीं यत् पृष्टीभिरधिशेमहे।
मा हिंसीस्तत्र नो भूमे सर्वस्य प्रतिशीवरि ।।३४।।
यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु। मा ते मर्म विमृग्वरि मा ते हृदयमर्पिपम् ।।३५।।
ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः ।
ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम् ।।३६।।
याप सर्पं विजमाना विमृग्वरी यस्यामासन्नग्नयो ये अप्स्व2न्तः ।
परा दस्यून् ददती देवपीयूनिन्द्रं वृणाना पृथिवी न वृत्रम्। शक्राय दध्रे वृषभाय वृष्णे ।।३७।।
यस्यां सदोहविर्धाने यूपो यस्यां निमीयते। ब्रह्माणे यस्यामर्चन्त्यृग्भिः साम्ना यजुर्विदः ।
युज्यन्ते यस्यामृत्विजः सोममिन्द्राय पातवे ।।३८।।
यस्यां पूर्वे भूतकृत ऋषयो गा उदानृचुः। सप्त सत्रेण वेधसो यज्ञेन तपसा सह ।।३९।।
सा नो भूमिरा दिशतु यद्धनं कामयामहे। भगो अनुप्रयुङ्क्तामिन्द्र एतु पुरोगवः ।।४०।।
यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलबाः। युध्यन्ते यस्यामाक्रन्दो यस्यां वदति दुन्दुभिः।
सा नो भूमिः प्र णुदतां सपत्नानसपत्नं मा पृथिवी कृणेतु ।।४१।।
यस्यामन्नं व्रीहियवौ यस्या इमाः पंच कृष्टयः। भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे ।।42।।
यस्याः पुरो देवकृताः क्षेत्रे यस्या विर्कुवते ।

प्रजापतिः पृथिवीं विश्वगर्भामाशामाशां रण्यां नः कृणोतु ।।४३।।
निधिं बिभ्रति बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे ।
वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना ।।४४।।
जनं बिभ्रति बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम् ।
सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती ।।४५।।
यस्ते सर्पो वृश्चिकस्तृष्टदंश्मा हेमन्तजब्धो भृमलो गुहा शये ।
क्रिमिर्जिन्वत् पृथिवि यद्यदेजति प्रावृषि तन्नः सर्पन्मोप सृपद् यच्छिवं तेन नो मृड ।।४६।।
ये ते पन्थानो बहवो जनायना रथस्य वर्त्मानसश्च यातवे ।
यैः संचरन्त्युभये भद्रपापास्तं पन्थानं ज्येमानमित्रमतस्करं यच्छिवं तेन नो मृड ।।४७।।
मलवं बिभ्रती गुरुभृद् भद्रपापस्य निधनं तितिक्षुः ।
वराहेण पृथिवी संविदाना सूकराय वि जिहीते मृगाय ।।४८।।
ये त आरण्याः पशवो मृगा वने हिताः सिंहा व्याघ्राः पुरुषादश्चरन्ति ।
उलं वृकं पृथिवि दुच्छुनामित ऋक्षीकां रक्षो अप बाधयास्मत् ।।४६।।
ये गन्धर्वा अप्सरसो ये चारायाः किमीदिनः। पिशाचान्त्सर्वा रक्षांसि तानस्मद् भूमे यावय ।।५०।।
यां द्विपादः पक्षिणः संपतन्ति हंसाः सुपर्णाः शकुना वयांसि ।
यस्यां वातो मातरिश्वेयते रजांसि कृण्वंश्च्यावयंश्च वृक्षान्। वातस्यं प्रवामुपवामनु वात्यर्चिः ।।५१
यस्यां कृष्णमरुणं च संहिते अहोरात्रे विहिते भूम्यामधि ।
वर्षेण भूमिः पृथिवी वृतावृता सा नो दधातु भद्रया प्रिये धामनिधामनि ।।५2।।
द्यौश्च म इदं पृथिवी च मे व्यचः। अग्निः सूर्य आपो मेधां विश्वे देवाश्च सं ददुः ।।५३।।
अहमस्मि सहमान उत्तरो नाम भूम्याम्। अभीषडस्मि विश्वाषाडाशामाशां विषामहिः ।।५४।।
अदो यद् देवि प्रथमाना पुरस्ताद् देवैरुक्ता व्यसर्पो महित्वम् ।
अ त्वा सुभूतमविशत् तदानीमकल्पयथाः प्रदिशश्चतस्रः ।।५५।।
ये ग्रामा यदरण्यं याः सभा अधि भूम्याम्। ये संग्रामाः समितयस्तेषु चारु वदेम ते ।।५६।।
अश्वइव रजो दुधुवे वि तान् जनान् य आक्षियन् पृथिवीं यादजायत ।
मन्द्राग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिरोषधीनाम् ।।५७।।
यद् वदामि मधुमत् तद् वदामि यदीक्षे तद् वनन्ति मा ।
त्विषीमानस्मि जूतिमानवान्यान् हन्मि दोधतः ।।५८।।
शन्तिवा सुरभिः स्योना कीलालोध्नी पयस्वती। भूमिरधि ब्रवीतु मे पृथिवी पयसा सह ।।५६।।
यामन्वैच्छद्धविषा विश्वकर्मान्तरर्णवे रजसि प्रविष्टाम् ।
भुजिष्यं१ पात्रं निहितं गुहा यदाविर्भोगे अभवन्मातृमद्भ्यः ।।६०।।
त्वमस्यावपनी जनानामदितिः कामदुघा पप्रथाना ।
यत् त ऊनं तत् त आ पूरयाति प्रजापतिः प्रथमजा ऋतस्य ।।६१।।
उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः ।
दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम ।।६2।।
भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम्। संविदाना दिवा कवे श्रियां मा धेहि भूत्याम्।।६३।।

अ. १८.३.५०

उच्छ्वंचस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपसर्पणा ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ।।५०।।

2. उद्दालकः — अ. ३.2६.८

भूमिष्ट्वा प्रति गृह्णात्वन्तरिक्षमिदं महत् ।
माहं प्राणेन मात्मना मा प्रजया प्रतिगृह्य वि राधिषि ।।८।।

३. प्रजापतिः — य. 2३.2४–2५

माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः। प्रतिलामीति ते पिता गभे मुष्टिमतंसयत् ।।2४।।
माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडतः। विवक्षतऽइव ते मुखं ब्रह्मन्मा त्वं वदो बहु ।2५।

५६७. भूम्यादयः

१. **प्रजापतिः – य. 2३.2६**

ऊर्ध्वामेनामुच्छ्रापय गिरौ भारं हरन्निव। अथास्यै मध्यमेधतां शीते वाते पुनन्निव ।।2६।।

५६८. भूवादयो मन्त्रोक्ताः

१. **अथर्वा – अ. ११.2.१–३**

भवाशर्वौ मृडतं माभि यातं भूपती पशुपती नमो वाम् ।
प्रतिहितामायतां मा वि स्राष्टं मा नो हिंसिष्टं द्विपदो मा चतुष्पदः ।।१।।
शुने क्रोष्ट्रे मा शरीराणि कर्तमलिक्लवेभ्यो गृध्रेभ्यो ये च कृष्णा अविष्यवः ।
मक्षिकास्ते पशुपते वयांसि ते विघसे मा विदन्त ।।2।।
क्रनदाय ते प्राणाय याश्च ते भव रोपयः। नमस्ते रुद्र कृण्मः सहस्राक्षायामर्त्य ।।३।।

५६९. भेषजम्

१. **भागलिः – अ. ६.५2.३**

आयुर्ददं विपश्चितं श्रुतां कण्वस्य वीरुधम्। आभारिषं विश्वभेषजीमस्यादृष्टान् नि शमयत् ।।३।।

५७०. भैषज्य आयुष्यं ओषधयः

१. **अथर्वा – अ. ८.७.१–2८**

या बभ्रवो याश्च शुक्रा रोहिणीरुत पृश्नयः ।
असिक्नीः कृष्णा ओषधीः सर्वा अच्छावदामसि ।।१।।
त्रायन्तामिमं पुरुषं यक्ष्माद् देवेषितादधि ।
यासां द्यौष्पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव ।।2।।
आपो अग्रं दिव्या ओषध्यः ।
तास्ते यक्ष्ममेनस्य१मङ्गदङ्गादनीनशन्। ।।३।।
प्रस्तृणती स्तम्बिनीरेकशुङ्गाः प्रतन्वतीरोषधीरा वदामि ।
अंशुमतीः काण्डिनीर्या विशाखा ह्वयामि ते वीरुधो वैश्वदेवीरुग्राः पुरुषजीवनीः ।।४।।
यद् वः सहः सहमाना वीर्य१ यच्च वो बलम् ।
तेनममस्माद् यक्ष्मात् पुरुषं मुंचतौषधीरथो कृणोमि भेषजम् ।।५।।
जीवलां नघारिषां जीवन्तीमोषधीमहम् ।
अरुन्धतीमुन्नयन्तीं पुष्पां मधुमतीमिह हुवेऽस्मा अरिष्टतातये ।।६।।
इहा यन्तु प्रचेतसो मेदिनीर्वचसो मम ।
यथेमं पारयामसि पुरुषं दुरितादधि ।।७।।
अग्नेर्वासो अपां गर्भो या रोहन्ति पुनर्णवाः ।
ध्रुवा : सहस्रनाम्नीर्भेषजीः सन्त्वाभृताः ।।८।।
अवकोल्बा उदकात्मान ओषधयः ।
व्यृषन्तु दुरितं तीक्ष्णशृङ्गयः ।।९।।
उन्मुंचन्तीर्विवरुणा उग्रा या विषदूषणीः ।
अथो बलासनाशनीः कृत्यादूषणीश्च यास्ता इहा यन्त्वोषधीः ।।१०।।
अपक्रीताः सहीयसीर्वीरुधो या अभिष्टुताः ।
त्रायन्तामस्मिन् ग्रामे गामश्वं पुरुषं पशुम् ।।११।।
मधुमन्मूलं मधुमदग्रमासां मधुमन्मध्यं वीरुधां बभूव।
मधुमत् पर्णं मधुमत् पुपमासां मधोःसंभक्ता अमृतस्य भक्षो घृतमन्नं दुह्रतां गोपुरोगवम् ।।१2।।
यावतीः कियतीश्चेमाः पृथिव्यामध्योषधीः ।
ता मा सहस्रपर्ण्यो मृत्योर्मुंचन्त्वंहसः ।।१३।।
वैयाघ्रो मणिर्वीरुधां त्रायमाणोऽभिशस्तिपाः ।
अमीवाः सर्वा रक्षांस्यप हन्त्वधि दूरमस्मत् ।।१४।।
सिंहस्येव स्तनथोः सं विजन्तेऽग्नेरिव विजन्त आभृताभ्यः ।

गवां यक्ष्मः पुरुषाणां वीरुद्भिरतिनुत्तो नावया एतु स्रोत्याः ।।१५।।
मुमुचाना ओषधयोऽग्नेवैश्वानरादधि ।
भूमि संतन्वतीरितं यासां राजा वनस्पतिः ।।१६।।
या रोहन्त्यांरिसीः पर्वतेषु समेषु च ।
ता नः पयस्वतीः शिवा अषिधीः सन्तु शं हृदे ।।१७।।
याश्चाहं वेद वीरुधो याश्च पश्यामि चक्षुषा ।
अज्ञाता जानीमश्च या यासु विद्म च संभृतम् ।।१८।।
सर्वाः समग्रा ओषधीर्बोधन्तु वचसो मम ।
यथेमं पारयामसि पुरुषं दुरितादधि ।।१६।।
अश्वत्थो दर्भो वीरुधां सोमो राजामृतं हविः ।
व्रीहिर्यवश्च भेषजौ दिवस्पत्रावमर्त्यौ ।।20।।
उज्जिहीध्वे स्तनयत्यभिक्रन्दत्योषधीः ।
यदा वः पृश्निमातरः पर्जन्यो रेतसावति ।।21।।
तस्यामृतस्येमं बलं पुरुषं पाययामसि ।
अथो कृणोमि भेषजं यथासच्छतहायनः ।।22।।
वराहो वेद वीरुधं नकुलो वेद भेषजीम् ।
सर्पा गन्धर्वा या विदुस्ता अस्मा अवसे हुवे ।।2३।।
याः सुपर्णा आंरिसीर्दिव्या या रघटो विदुः ।
वयांसि हंसा या विदुर्याश्च सर्वे पतत्रिणः ।
मृगा या विदुरोषधीस्ता अस्मा अवसे हुवे ।।2४।।
यावतीनामोषधीनां गावः प्राश्नन्त्यघ्न्या यावतीनामजावयः ।
तावतीस्तुभ्यमोषधीः शर्म यच्छन्त्वाभृताः ।।2५।।
यावतीषु मनुष्या भेषजं भिषजो विदुः ।
तावतीर्विश्वभेषजीरा भरामि त्वामभि ।।2६।।
पुष्पवतीः प्रसूमतीः फलिनीरफला उत ।
संमातरइव दुह्रामस्मा अरिष्टतातये ।।27।।
उत् त्वाहार्षं पंचशलादथो दशशलादुत ।
अथो यमस्य पड्बाशाद् वि□वस्माद् देवकिल्बिषात् ।।2८।।

५७१. मण्डूकाः

१. अथर्वा – अ. ४.१५.१३–१५

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ।।१३।।
अपप्रवद् मण्डूकि वर्षमा वद तादुरि। मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः ।।१४।।
खण्वखा३इ खैमखा३इ मध्ये तदुरि। वर्षं वनुध्वं पितरो मरुतां मन इच्छत ।।१५।।

2. वसिष्ठः – ऋ. ७.१०३.१–१०

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ।।१।।
दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानम् ।
गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्नुरत्रा समेति ।।2।।
यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायाम् ।
अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति ।।३।।
अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमन्दिषाताम् ।
मण्डूको यदभिवृष्टः कनिष्क्रन्पृश्निः सम्पृङ्क्ते हरितेन वाचम् ।।४।।
यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।

सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथानाध्यप्सु ।।५।।
गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम् ।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदन्तः ।।६।।
ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः ।
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ।।७।।
ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम् ।
अध्वर्यवो धर्मिणः सिष्वदाना आविर्भवन्ति गुह्या न के चित् ।।८।।
देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गम् ।।९।।
गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ।।१०।।

५७2. मघवा

१. गोतमः – य. ७.४

उपयामगृहीतोऽस्यन्तर्य्यच्छ मघवन् पाहि सोमम्। उरुष्य रायऽएषो यजस्व ।।४।।

५७३. मधुला औषधिः

१. विश्वामित्रः – अ. ५.१५.१–११

एका च मे दश च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।१।।
द्वे च मे विंशतिश्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।2।।
तिस्रश्च मे त्रिंशच्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।३।।
चतस्रश्च मे चत्वारिंशच्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।४।।
पंच च मे पंचाशच्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।५।।
षट् च मे षष्टिश्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।६।।
सप्त च मे सप्ततिश्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।७।।
अष्ट च मेऽशीतिश्च मेऽपवक्तारे ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।८।।
नव च मे नवतिश्च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।९।।
दश च मे शतं च मेऽपवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।१०।।
शतं च मे सहस्रं चापवक्तार ओषधे। ऋतजात ऋतावरि मधु मे मधुला करः ।।११।।

५७४. मधुवनस्पतिः

१. अथर्वा – अ. १.३४.१–५

इयं वीरुन्मधुजाता मधुना त्वा खनामसि। मधोरधि प्रजातासि सा नो मधुमतस्कृधि ।।१।।
जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम्। ममेदह क्रतावसो मम चित्तमुपायसि ।।2।।
मधुमन्मे निक्रमणं मधुमन्मे परायणम्। वाचा वदामि मधुमद् भूयासं मधुसन्दृशः ।।३।।
मधोरस्मि मधुतरो मदुघान्मधुमत्तरः। मामित् किल त्वं वनाः शाखं मधुमतीमिव ।।४।।
परि त्वा परितत्नुनेक्षुणागामविद्विषे। यथा मां कामिन्यसो यथा मन्नापगा असः ।।५।।

५७५. मनः

१. अथर्वा – अ. ३.८.५–६

सं वो मनांसि सं व्रता समाकूतीर्नमामसि ।
अमी ये विव्रता स्थन तान् वः सं नमयामसि ।।५।।
अहं गृभ्णामि मनसा मनांसि मम चित्तमनु चित्तेभिरेत ।
मम वशेषु हृदयानि वः कृणोमि मम यातमनुवर्त्मान एत ।।६।।

2. प्रजापतिः – अ. 2.३०.१

यथेदं भूम्या अधि तृणं वातो मथायति।

एवा मथ्नामि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ।।१।।

३. **बन्धुः – य. ३.५३–५५**

मनो न्वाह्वामहे नाराशंसेन स्तोमेन। पितॄणां च मन्मभिः ।।५३।।
आ नऽएतु मनः पुनः क्रत्वे दक्षाय जीवसे। ज्योक् च सूर्यं दृशे ।।५४।।
पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातं सचेमहि ।।५५।।

४. **शिवसङ्कल्पः – य. ३४.१–६**

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ।।१।।
येन कर्माण्यपसो मनीषिणो यज्ञो कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ।।2।।
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्नऽ ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ।।३।।
येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ।।४।।
यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिँश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ।।५।।
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिनऽइव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ।।६।।

५. **शौनकः – अ. ७.१2.४**

यद् वो मनः परागतं यद् बद्धमिह वेह वा। तद् व आ वर्तयामसि मयि वो रमतां मनः ।।४।।

५७६. मन आदयो दैव्यात्रृषयः

१. **ब्रह्मा – अ. ६.४१.१–३**

मनसे चेतसे धिय आकूतय उत चित्तये ।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ।।१।।
अपानाय व्यानाय प्राणाय भूरिधायसे ।
सरस्वत्या उरुव्यचे विधेम हविषा वयम् ।।2।।
मा नो हासिषुर्ऋषयो दैव्या ये तनूपा ये नस्तन्वस्तनूजाः ।
अमर्त्या मर्त्याँ अभि नः सच वमायुर्धत्त प्रतरं जीवसे नः ।।३।।

५७७. मन आवर्त्तनम्

१. **बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः – ऋ. १०.५८.१–१2**

यत्ते यमं वैवस्वतं मनो जगाम् दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।१।।
यत्ते दिवं यत्पृथिवीं मनो जगाम् दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।2।।
यत्ते भूमिं चतुर्भृष्टि मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।३।।
यत्ते चतस्रः प्रदिशो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।४।।
यत्ते समुद्रमर्णवं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।५।।
यत्ते मरीचीः प्रवतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।६।।
यत्ते अपो यदोषधीर्मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।७।।
यत्ते सूर्यं यदुषसं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।८।।
यत्ते पर्वतान्बृहतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।९।।
यत्ते विश्वमिदं जगन्मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।१०।।
यत्ते पराः परावतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ।।११।।
यत्ते भूतं च भव्यं च मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे।।१2।।

५७८. मनुष्यः

१. जमदग्निः भार्गवः — य. 2९.१९; 2४

य. 2९.१९

अनु त्वा रथोऽअनु मर्योऽअर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ।।१९।।

य. 2९.2४

उप प्रागात्परमं यत्सधस्थमर्वाँ अच्छा पितरं मातरं च।
अद्या देवांजुष्टतमो हि गम्याऽअथा शास्ते दाशुषे वार्याणि ।।2४।।

५७९. मनुष्याः

१. जमदग्निः भार्गवः — य. 2९.2१; 2३

य. 2९.2१

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्राम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ।।2९।।

य. 2९.2३

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चत्कवयो यन्ति रेभाः ।।2३।।

2. बृहदुक्थो वामदेव्यः — य. 2९.६

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने ।
उषासा वां सहिरण्ये सुशिल्पेऽऋतस्य योनाविह सादयामि ।।६।।

५८०. मनुष्येषवः

१. ब्रह्म — अ. १.१९.2

विष्वंचो अस्मच्छरवः पतन्तु ये अस्ता ये चास्याः। दैवीर्मनुष्येषवो ममामित्रान् वि विध्यत ।।2।।

५८१. मन्त्रोक्ता

१. अथर्वा — अ. ६.८९.१—३; ७.९८.१; ७.१०५.१; ८.९.१—2६; ११.३(2).३2—३९; ११.३(३).५०—५६; १९.2४.१—८; १९.2३.१—३०

अ. ६.८९.१—३

इदं यत् प्रेण्यः शिरो दत्तं सोमेन वृष्ण्यम्। ततः परि प्रजातेन हार्दि ते शोचयामसि ।।१।।

अ. ७.९८.१

सं बर्हिरक्तं हविषा घृतेन समिन्द्रेण वसुना सं मरुद्भिः ।
सं देवैर्विश्वदेवेभिरक्तमिन्द्रं गच्छतु हविः स्वाहा ।।१।।

अ. ७.१०५.१

अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वचः। प्रणीतीरभ्यावर्तस्व विश्वेभिः सखिभिः सह ।।१।।

अ. ८.९.१—2६

कुतस्तौ जातौ कतमः सो अर्धः कस्माल्लोकात् कतमस्याः पृथिव्याः ।
वत्सौ विराजः सलिलादुदैतां तौ त्वा पृच्छामि कतरेण दुग्धा ।।१।।
यो अक्रन्दयत् सलिलं महित्वा योनिं कृत्वा त्रिभुजं शयानः ।
वत्सः कामदुघो विराजः स गुहा चक्रे तन्वः पराचैः ।।2।।
यानि त्रीणि बृहन्ति येषां चतुर्थं वियुनक्ति वाचम् ।
ब्रह्मैनद् विद्यात् तपसा विपश्चिद् यस्मिन्नेकं युज्यते यस्मिन्नेकम् ।।३।।
बृहतः परि सामानि पष्ठात् पंचाधि निर्मिता ।
बृहद बृहत्या निर्मितं कुतोऽधि बृहती मिता ।।४।।
बृहती परि मात्राया मातुर्मात्राधि निर्मिता ।

माया ह जज्ञे मायाया मायाया मातली परि ।।५।।
वैशवानरस्य प्रतिमोपरि द्यौर्यावद् रोदसी विबबाधे अग्निः ।
ततः षष्ठादामुतो यन्ति स्तोमा उदितो यन्त्यभि षष्ठमह्नः ।।६।।
षट् त्वा पृच्छाम ऋषयः कश्यपेमे त्वं हि युक्तं युयुक्षे योग्यं च ।
विराजमाहुर्ब्रह्मणः पितरं तां नो वि धेहि यतिधा सखिभ्यः ।।७।।
यां प्रच्युतामनु यज्ञाः प्रच्यवन्त उपतिष्ठन्त उपतिष्ठमानाम् ।
यस्या व्रते प्रसवे यक्षमेजति सा विराडृषयः परमे व्योमन् ।।८।।
अप्राणैति प्राणेन प्राणतीनां विराट् स्वराजमभ्येति पश्चात् ।
विश्वं मृशन्तीमभिरूपां विराजं पश्यन्ति त्वे न त्वे पश्यन्त्येनाम् ।।९।।
को विराजो मिथुनत्वं प्र वेद क ऋतून् क उ कल्पमस्याः ।
क्रमान् को अस्याः कतिधा विदुग्धान् को अस्या धाम कतिधा व्युष्टीः ।।१०।।
इयमेव सा या प्रथमा व्यौच्छदास्वितरासु चरति प्रविष्टा ।
महान्तो अस्यां महिमानो अन्तर्वधूर्जिगाय नवगज्जनित्री ।।११।।
छन्दःपक्षे उषसा पेपिशाने समानं योनिमनु सं चरेते ।
सूर्यपत्नी सं चरतः प्रजानती केतुमती अजरे भूरि रेतसा ।।१2।।
ऋतस्य पन्थामनु तिस्र आगुस्त्रायो घर्मा अनु रेत आगुः ।
प्रजामेका जिन्वत्यूर्जमेका राष्ट्रमेका रक्षति देवयूनाम् ।।१३।।
अनीषोमावदधुर्या तुरीयासीद् यज्ञस्य पक्षावृषयः कल्पयन्तः ।
गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कीं यजमानाय स्वराभरन्तीम् ।।१४।।
पंच व्युष्टीरनु पंच दोहा गां पंचनाम्नीमृतवोऽनु पंच।
पंच दिशः पंचदशेन क्लृप्तास्ता एकमूधर्नीरभि लोकमेकम् ।।१५।।
षड् जाता भूता प्रथमज ऋतस्य षडु सामानि षडहं वहन्ति ।
षड्योगं सीरमनु सामसाम षडाहुर्द्यावापृथिवीः षडुर्वीः ।।१६।।
षडाहुः शीतान् षडु मास उष्णानृतुं नो ब्रूत यतमोऽतिरिक्त ।।
सप्त सुपर्णाः कवयो नि षेदुः सप्त च्छन्दांस्यनु सप्त दीक्षाः ।।१७।।
सप्त होमाः समिधो ह सप्त मधूनि सप्त ऋतवो ह सप्त ।
सप्ताज्यानि परि भूतमायन् ताः सप्तगृध्रा इति शुश्रुमा वयम् ।।१८।।
सप्त च्छन्दांसि चतुरुत्तराण्यन्यो अन्यस्मिन्नध्यार्पितानि ।
कथं स्तोमाः प्रति तिष्ठन्ति तेषु तानि स्तोमेषु कथमार्पितानि ।।१९।।
कथं गायत्री त्रिवृतं व्याप कथं त्रिष्टुप् पंचदशेन कल्पते ।
त्रयस्त्रिंशेन जगती कथमनुष्टुप् कथमेकविंशः ।।2०।।
अष्ट जाता भूता प्रथमज ऋतस्याष्टेन्द्र ऋत्विजो दैव्या ये ।
अष्टयोनिरदितिरष्टपुत्राष्टमीं रात्रिमभि हव्यमेति ।।2१।।
इत्थं श्रेयो मन्यमानेदमागमं युष्माकं सख्ये अहमस्मि शेवा ।
समानजन्मा क्रतुरस्ति वः शिवः स वः सर्वाः सं चरति प्रजानन् ।।22।।
अष्टेन्द्रस्य षड् यमस्य ऋषीणां सप्त सप्तधा ।
अपो मनुष्या३नोषधीस्ताँ उ पंचानु सेचिरे ।।2३।।
केवलीन्द्राय दुदुहे हि गृष्टिर्वशं पीयूषं प्रथमं दुहाना ।
अथातर्पयच्चतुरश्चतुर्धा देवान् मनुष्याँ३ असुरानुत ऋषीन् ।।2४।।
को नु गौः क एकऋषिः किमु धाम का आशिषः ।
यक्षं पृथिव्यामेकवृदेकऋतुः कतमो नु सः ।।2५।।
एको गौरेक एकऋषिरेकं धामेकधाशिषः। यक्षं पृथिव्यामेकवृदेकऋतुर्नातिरिच्यते ।।2६।।

अ. ११.३(2).३2–३६

ततश्चैनमन्येन शीषर्णा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ।

ज्येष्ठतस्ते प्रजा मरिष्यतीत्येनमाह ।
तं वा अहं नावांचं नन परांचं न प्रत्यंचम् ।
बृहस्पतिना शीर्ष्णा। तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ।।३2।।
ततश्चैनमन्याभ्यां श्रोत्राभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन् ।
बधिरो भविष्यसीत्येनमाह ।
तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
द्यावापृथिवीभ्यां श्रोत्राभ्याम्। ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ।।३३।।
ततश्चैनमन्याभ्यामक्षीभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन् ।
अन्धो भविष्यसीत्येनमाह ।
तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
सूर्याचन्द्रमसाभ्यामक्षीभ्याम्। ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ।।३४।।
ततश्चैनमन्येन मुखेन प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ।
मुखतस्ते प्रजा मरिष्यतीत्येनमाह ।
तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
बह्माणा मुखेन। तेनैनं प्राशिषं तेनैनमजीगमम् ।
एषवा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सवाङ्ङ्गं एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ।।३५।।
ततश्चैनमन्यया जिह्वया प्राशीर्यया चैतं पूर्वर्षयः प्राश्नन् ।
जिह्वा ते मरिष्यतीत्येनमाह ।
तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
अग्नेर्जिह्वया। तयैनं प्राशिषं तयैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सवार्ङ् एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ।।३६।।
ततश्चैनमन्यैर्दन्तैः प्राशीर्यैश्चैतं पूर्व ऋषयः प्राश्न् ।
दन्तास्ते शत्सयन्तीत्येनमाह ।
तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
ऋतुभिर्दन्तैः। तैरेनं प्राशिषं तैरेनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ।।३७।।
ततश्चैनमन्यैः प्राणापानैः प्राशीर्यैश्चैतं पूर्व ऋषयः प्राश्नन् ।
प्राणापानास्त्वा हास्यन्तीत्येनमाह ।
तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
सप्तऋषिभिः प्राणापानैः। तैरेनं प्राशिषं तैरेनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ।।३८।।
ततश्चैनमन्येन व्यचसा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ।
राजयक्ष्मस्त्वा हनिष्यतीत्येनमाह ।

तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
अन्तरिक्षेण व्यचसा। तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतूनः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३६॥

अ. ११.३(३).५०–५६

एतद् वै ब्रधनस्य विष्टपं यदोदनः ॥५०॥
ब्रध्नलोको भवति ब्रध्नस्य विष्टपि श्रयते य एवं वेद ॥५१॥
एतस्माद् वा ओदनात् त्रयस्त्रिंशतं लोकान् निरमिमीत प्रजापतिः ॥५2॥
तेषां प्रज्ञानाय यज्ञमसृजत ॥५३॥
स य एवं विदुष उपद्रष्टा भवति प्राणं रुणद्धि ॥५४॥
न च प्राणं रुणद्धि सर्वज्यानिं जीयते ॥५५॥
न च सर्वज्यानिं जीयते पुरैनं जरसः प्राणो जहाति ॥५६॥

अ. १६.2४.१–८

येन देवं सवितारं परि देवा अधारयन् ।
तेनमं ब्रह्मणस्पते परि राष्टाय धत्तन ॥१॥
परीममिन्द्रमायुषे महे क्षत्राय धत्तन ।
यथैनं जरसे नयां ज्योक् क्षत्रेऽधि जागरत् ॥2॥
परीमं सोममायुषे महे श्रोत्राय धत्तन ।
यथैनं जरसे नयां ज्योक् श्रोत्रेऽधि जागरत् ॥३॥
परि धत्त धत्त नो वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः ।
बृहस्पतिः प्रायच्छद् वास एतत् सोमाय राज्ञे परिधातवा उ ॥४॥
जरां सु गच्छ परि धत्स्व वासो भवा गृष्टीनामभिशस्तिपा उ ।
शतं च जीव शदः पुरूची गायश्च पोषमुपसंव्ययस्व ॥५॥
परीदं वासो अधिथाः स्वस्तयेऽभूर्वापीनामभिशस्तिपा उ ।
शतं च जीव शदः पुरूचीर्वसूनि चारुर्वि भजासि जीवन् ॥६॥
योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ॥७॥
हिरण्यवर्णो अजरः सुवीरो जरामृत्युः प्रजया सं विशस्व ।
तदग्निराह तदु सोम आह बृहस्पतिः सविता तदिन्द्रः ॥८॥

अ. १६.2३.१–३०

आथर्वणानां चतुऋचेभ्यः स्वाहा ॥१॥
पंचर्चेभ्यः स्वाहा ॥2॥
षड्चेभ्यः स्वाहा ॥३॥
सप्तर्चेभ्यः स्वाहा ॥४॥
अष्टर्चेभ्यः स्वाहा ॥५॥
नवर्चेभ्यः स्वाहा ॥६॥
दशर्चेभ्यः स्वाहा ॥७॥
एकादशर्चेभ्यः स्वाहा ॥८॥
द्वादशर्चेभ्यः स्वाहा ॥६॥
त्रयोदशर्चेभ्यः स्वाहा ॥१०॥
चतुर्दशर्चेभ्यः स्वाहा ॥११॥
पंचदशर्चेभ्यः स्वाहा ॥१2॥
षोडशर्चेभ्यः स्वाहा ॥१३॥
सप्तदशर्चेभ्यः स्वाहा ॥१४॥

अष्टादशर्चेभ्यः स्वाहा ।।१५।।
एकोनविंशतिः स्वाहा ।।१६।।
विंशतिः स्वाहा ।।१७।।
महत्काण्डाय स्वाहा ।।१८।।
तृचेभ्यः स्वाहा ।।१९।।
एकर्चेभ्यः स्वाहा ।।२०।।
क्षुद्रेभ्यः स्वाहा ।।२१।।
एकानृचेभ्यः स्वाहा ।।२०।।
रोहितेभ्यः स्वाहा ।।२३।।
सूर्याभ्यां स्वाहा ।।२४।।
व्रात्याभ्यां स्वाहा ।।२५।।
प्राजापत्याभ्यां स्वाहा ।।२६।।
विषासह्यै स्वाहा ।।२७।।
मङ्गलिकेभ्यः स्वाहा ।।२८।।
ब्रह्मणे स्वाहा ।।२९।।
ब्रह्मज्येष्ठा संभृता वीर्याणि ब्रह्माग्रे ज्येष्ठं दिवमा ततान ।
भूतानां ब्रह्मा प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ।।३०।।

2. कौशिकः – अ. १०.५.२५–३६

पृथिवीमनु वि क्रमेऽहं पृथिव्यास्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।२५।।
विष्णोः क्रमोऽसि सपत्नहान्तरिक्षसंशितो वायुतेजाः ।
अन्तरिक्षमनु वि क्रमेऽहमन्तरिक्षात् तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।२६।।
विष्णेः क्रमोऽसि सपत्नहा द्यौसंशितः सूर्यतेजाः ।
दिवमनु वि क्रमेऽहं दिवस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।२७।।
विष्णोः क्रमोऽसि सपत्नहा दिक्संशितो मनस्तेजाः ।
दिशोऽनु वि क्रमेऽहं दिग्भ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।२८।।
विष्णोः क्रमोऽसि सपत्नहाशासंशितो वाततेजाः ।
आशा अनु वि क्रमेऽहमाशाभ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।२९।।
विष्णेः क्रमोऽसि सपत्नह ऋक्संशितः सामतेजाः ।
ऋचोऽनु वि क्रमेऽहमृग्भ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
सा मा जीवीत् तं प्राणो जहातु ।।३०।।
विष्णोः क्रमोऽसि सपत्नहा यज्ञसंशितो ब्रह्मतेजाः ।
यज्ञमनु वि क्रमेऽहं यज्ञातं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।३१।।
विष्णोः क्रमोऽसि सपत्नहौषधीसंशितः सोमतेजाः ।
ओषधीरन् वि क्रमेऽहमोषधीभ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।३२।।
विष्णेः क्रमोऽसि सपत्नहाप्सुसंशितो वरुणतेजाः ।
आपोऽनु वि क्रमेऽहमद्भस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणे जहातु ।।३३।।

विष्णोः क्रमोऽसि सपत्नहा कृषिसंशितोऽन्नतेजाः ।
कृषिमनु वि क्रमेऽहं कृष्यास्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।३४।।
विष्णोः क्रमोऽसि सपत्नहा प्राणसंशितः पुरुषतेजाः ।
प्राणमनु वि क्रमेऽहं प्राणात् तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ।।३५।।
जितमस्कमुद्भिन्नस्माकमभ्यष्ठां विश्वाः पृतना अरातीः ।
इदमहमामुष्यायणस्यामुष्याः पुत्रस्य वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि।।३६।।

३. परुच्छेपो दैवोदासिः – ऋ. १.१३६.६–७

नमो दिवे बृहते रोदसीभ्यां मित्रावोचं वरुणाय मीळहुषे सुमृळीकाय मीळहुषे ।
इन्द्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगम्। ज्योग्जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ।।६।।
ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः ।
अग्निर्मित्रो वरुणः शर्म यंसन् तदश्याम मघवानो वयं च ।।७।।

४. प्रजापतिः – अ. ६.११.३

प्रजापतिरनुमतिः सिनीवाल्यचीक्लृपत्। स्त्रैषूयमन्यत्र दधत् पुमांसमु दधदिह ।।३।।

५. ब्रह्म – अ. १०.५.३७–४१; १६.५८.१–६; १६.६८.१

अ. १०.५.३७–४१

सूर्यस्यावृतमन्वावर्ते दक्षिणामन्वावृतम्। सा मे द्रविणं यच्छतु सा मे ब्राह्मणवर्चसम् ।।३७।।
दिशो ज्योतिष्मतीरभ्यावर्ते। ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम् ।।३८।।
सप्तऋषीनभ्यावते। ते मे द्रविणं यच्छन्तु ते मे ब्राह्मणवर्चसम् ।।३६।।
ब्रह्माभ्यावर्ते। तन्मे द्रविणं यच्छन्तु तन्मे ब्राह्मणवर्चसम् ।।४०।।
ब्राह्मणाँ अभ्यावर्ते। ते मे द्रविणं यच्छन्तु ते मे ब्राह्मणवर्चसम् ।।४१।।

अ. १६.५८.१–६

घृतस्य जूतिः समना सदेवा संवत्सरं हविष वर्धयन्ती ।
श्रोत्रं चक्षुः प्राणोऽछिन्नो नो अस्त्वच्छिन्ना वयमायुषो वर्चसः ।।१।।
उपास्मान् प्राणो ह्वयतामुप वयं प्राणं हवामहे ।
वर्चो जग्राह पृथिव्य१न्तरिक्षं वर्चः सोमो बृहस्पतिर्विधर्त्ता ।।2।।
वर्चसो द्यावापृथिवी संग्रहणी बभूवथुर्वर्चो गृहीत्वा पृथिवीमनु सं चरेम ।
यशसं गावो गोपतिमुष तिष्ठन्त्यायतीर्यशो गृहीत्वा पृथिवीमनु सं चरेम ।।३।।
व्रजं कृणुध्वं स हि वो नृपाणो वर्मा सीव्यध्वं बहुला पृथूनि ।
पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ।।४।।
यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि ।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः ।।५।।
ये देवानामृत्विजो ये च यज्ञिया येभ्यो हव्यं क्रियते भागधेयम् ।
इमं यज्ञं सह पत्नीभिरेत्य यावन्तो देवास्तविषा मादयन्ताम् ।।६।।

अ. १६.६८.१

अव्यसश्च व्यचसश्च बिलं वि ष्यामि मायया। ताभ्यामुद्धृत्य वेदमथ कर्माणि कृण्महे ।।१।।

६. शौनकः – अ. ६.१६.१–४

आबयो अनाबयो रसस्त उग्र आबयो। आ ते करम्भमद्मसि ।।१।।
विहल्हो नाम ते पिता मदावती नाम ते माता ।
स हि न त्वमसि यस्त्वमात्मानमावयः ।।2।।
तौविलिकेऽवेलयावायमैलब ऐलयीत्। बभ्रुश्च बभ्रुकर्णश्चापेहि निराल ।।३।।
अलसालासि पूर्वा सिलांजालास्युत्तरा। नीलागलसाला ।।४।।

५८2. मन्त्रोक्ताः

१. अंगिराः – अ. ७.६०.१–2; १६.22.१–2१

अ. ७.६०.१–2

अपि वृश्च पुराणवद् व्रततेरिव गुष्पितम्। ओजो दासस्य दम्भय ।।१।।
वयं तदस्य संभृतं वस्विन्द्रेण वि भजामहे। म्लापयामि भ्रजः शिभ्रं वरुणस्य व्रतेन ते।।2।।

अ. १६.22.१–2१

आङ्गिरसानामाद्यैः पंचानुवाकैः स्वाहा ।।१।।
षष्ठाय स्वाहा ।।2।।
सप्तमाष्टमाभ्यां स्वाहा ।।३।।
नीलनखेभ्यः स्वाहा ।।४।।
हरितेभ्यः स्वाहा ।।५।।
क्षुद्रेस्यः स्वाहा ।।६।।
पर्यायिकेभ्यः स्वाहा ।।७।।
प्रथमेभ्यः शङ्खेभ्यः स्वाहा ।।८।।
द्वितीयेभ्यः शङ्खेभ्यः स्वाहा ।।६।।
तृतीयेभ्यः शङ्खेभ्यः स्वाहा ।।१०।।
उपोत्तमेभ्यः स्वाहा ।।११।।
उत्तमेभ्यः स्वाहा ।।१2।।
उत्तरेभ्यः स्वाहा ।।१३।।
ऋषिभ्यः स्वाहा ।।१४।।
शिखिभ्यः स्वाहा ।।१५।।
गणेभ्यः स्वाहा ।।१६।।
महागणेभ्यः स्वाहा ।।१७।।
सर्वेभ्योऽंगिरोभ्यो विदगणेभ्यः स्वाहा ।।१८।।
पृथक्स्हस्राभ्यां स्वाहा ।।१६।।
ब्रह्मणे स्वाहा ।।2०।।
ब्रह्मज्येष्ठा संभृता वीर्याणि ब्रह्मग्रे ज्येष्ठं दिव्मा ततान ।
भूतानां ब्रह्मा प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ।।2१।।

2. अंगिराः प्रचेता यमश्च – अ. ६.४८.१–३

श्येनोऽसि गायत्राच्छन्दा अनु त्वा रभे। स्वस्ति मा सं वहास्य यज्ञस्योद्दचि स्वाहा ।।१।।
ऋभुरसि जगच्छन्दा अनु त्वा रभे। स्वस्ति मा सं वहास्य यज्ञस्योद्दचि स्वाहा ।।2।।
वृषासि त्रिष्टुप्छन्दा अनु त्वा रभे। स्वस्ति मा सं वहास्य यज्ञस्योद्दचि स्वाहा ।।३।।

३. अथर्वा (अभयकामः) – अ. ६.४०.१–2

अभयं द्यावापृथिवी इहास्तु नोऽभयं सोमः सविता नः कृणोतु ।
अभयं नोऽस्तूर्व१न्तरिक्षं सप्तऋषीणां च हविषाभयं नो अस्तु ।।१।।
अस्मै ग्रामाय प्रदिशश्चतस्र ऊर्जं सुभूतं स्वस्ति सविता नः कृणोतु ।
अशत्रिन्द्रो अभयं नः कृणोत्वन्यत्र राज्ञामभि यातु मन्युः ।।2।।

४. अथर्वांगिरा – अ. ७.७४.१–३

अपचितां लोहिनीनां कृष्णा मातेति शुश्रुम। मनुर्देवस्य मूलेन सर्वा विध्यामि ता अहम् ।।१।।
विध्याम्यासां प्रथमां विध्याम्युत मध्यमाम्। इदं जघन्यामासामा च्छिनद्मि स्तुकामिव ।।2।।
त्वाष्ट्रेणाहं वचसा वि त ईर्ष्याममीमदम्। अथो यो मन्युस्ते पते तमु ते शमयामसि ।।३।।

५. तापसः – य. ६.३१

अग्निरेकाक्षरेण प्राणमुदजयत् तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्याानुदजयतां तानुज्जेषं

विष्णुस्त्र्यक्षरेण त्रील्लौँकानुदजयत्तानुज्जेषं सोमश्चतुरक्षेण चतुष्पदः पशूनुदजयत्तानुज्जेषम्।।३१।।

६. **प्रत्यंगिरसः – अ १०.१.१–३2**

यो कल्पयन्ति वहतौ वधूमिव विश्वरूपां हस्तकृतां चिकित्सवः। सारादेत्वप नुदाम एनाम् ।।१।।
शीर्षण्वती नस्वती कर्णिनी कृत्याकृता संभृता विष्वरूपा। सारादेत्वप नुदाम एनाम् ।।2।।
शूद्रकृता राजकृता स्त्रीकृता ब्रह्मभिः कृता। जाया पत्या नुत्तेव कर्तारं बन्ध्वृच्छतु ।।३।।
अनयाहमोषध्या सर्वाः कृत्या अदूदुषम्। यां क्षेत्रे चक्रुर्यां गोषु यां वा ते पुरुषेषु ।।४।।
अघमस्त्वघकृते शपथः शपथीयते। प्रत्यक् प्रतिग्रहिण्मो यथा कृत्याकृतं हनत् ।।५।।
प्रतीचीन आंगिरसोऽध्यक्षे नः पुरोहितः। प्रतीचीः कृत्या आकृत्याऽमून् कृत्याकृतो जहि ।।६।।
यस्त्वोवाच परेहीति प्रतिकूलमुदय्यम्। तं कृत्येऽभिनिवर्तस्व माऽस्मानिच्छो अनागसः ।।७।।
यस्ते परूंषि संदधौ रथस्येवर्भुर्धिया। तं गच्छ तत्र तेऽयनमज्ञातस्तेऽयं जनः ।।८।।
ये त्वा कृत्वाऽऽलेभिरे विद्वला अभिचारिणः ।
शंभवी३दं कृत्यादूषणं प्रतिवर्त्म पुनःसरं तेन त्वा स्नपयामसि ।।६।।
यद् दुर्भगां प्रस्नपितां मृतवत्सामुपेयिम। अपैतु सर्वं मत् पापं द्रविणं मोप तिष्ठतु ।।१०।।
यत् ते पितृभ्यो ददतो यज्ञे वा नाम जगृहुः ।
संदेश्या३त् सर्वस्मात् पापादिमा मुंचन्तु त्वौषधीः ।।११।।
देवैनसात् पित्र्यान्नामग्राहात् संदेश्यादभिनिष्कृतात् ।
मुंचन्तु त्वा वीरुधो वीर्येण ब्रह्मण ऋग्भिः पयस ऋषीणाम् ।।१2।।
यथा वातश्च्यावयति भूम्या रेणुमन्तरिक्षाच्चाभ्रम्। एव मत् सर्वं दुर्भूतं ब्रह्मनुत्तमपायति ।।१३।।
अप क्राम नानदती विनद्धा गर्दभीवः कर्तॄन् नक्षस्वेतो नुत्ता ब्रह्मणा वीर्यावता ।।१४।।
अयं पन्थाः कृत्येति त्वा नयामोऽभिप्रहितां प्रति त्वा प्र हिण्मः ।
तेनाभि याहि भंजत्यनस्वतीव वाहिनी विश्वरूपा कुरूटिनी ।।१५।।
पराक् ते ज्योतिरपथं ते अर्वागन्यत्रास्मदयना कृणुष्व ।
परेणेहि नवतिं नाव्या३ अति दुर्गाः स्रोत्या मा क्षणिष्ठाः परेहि ।।१६।।
वात इव वृक्षान् नि मृणीहि पादय मा गामश्वं पुरुषमुच्छिष एषाम् ।
कर्तॄन् निवृत्येतः कृत्येऽप्रजास्त्वाय बोधय ।।१७।।
यां ते बर्हिषि यां श्मशाने क्षेत्रे कृत्यां वलगं वा निचख्नुः ।
अग्नौ वा त्वा गार्हपतयेऽभिचेरुः पाकं सन्तं धीरतरा अनागसम् ।।१८।।
उपाहृतमनुबुद्धं निखातं वैरं त्सार्यन्वविदाम कर्त्रम् ।
तदेतु यत आभृतं तत्राश्व इव वि वर्ततां हन्तु कृत्याकृतः प्रजाम् ।।१६।।
स्वायसा असयः सन्ति नो गृहे विद्या ते कृत्ये यतिधा परूंषि ।
उत्तिष्ठैव परेहीतोऽज्ञाते किमिहेच्छसि ।।20।।
ग्रीवास्ते कृत्ये पादौ चापि कर्त्स्यामि निर्द्रव।
इन्द्राग्नी अस्मान् रक्षतां यौ प्रजानां प्रजापती।।21।।
सोमो राजाधिपा मृडिता च भूतस्य नः पतयो मृडयन्तु ।।22।।
भवाशर्वावस्यतां पापकृते कृत्याकृते। दुष्कृते विद्युतं देवहेतिम् ।।2३।।
यद्येयथ द्विपदी चतुष्पदी कृत्याकृता संभृता विश्वरूपा ।
सेतो३ऽष्टापदी भूत्वा पुनः परेहि दुच्छुने ।।2४।।
अभ्य१क्ताक्ता स्वरंकृता सर्वं भरन्ती दुरितं परेहि।
जानीहि कृत्ये कर्तारं दुहितेव पितरं स्वम्।।2५।।
परेहि कृत्ये मा तिष्ठो विद्धस्येव पदं नय। मृगः स मृगयुस्त्वं न त्वा निकर्तुमर्हति ।।2६।।
उत हन्ति पूर्वासिनं प्रत्यादायापर इष्वा। उत पूर्वस्य निघ्नतो नि हन्त्यपरः प्रति ।।2७।।

एतद्धि शृणु मे वचोऽथेहि यत एयथ। यस्त्वा चकार तं प्रति ।।२८।।
अनागोहत्या वै भीमा कृत्ये मा नो गामश्वं पुरुषं वधीः ।
यत्रयत्रासि निहिता ततस्त्वोत्थापयामसि पर्णाल्लघीयसी भव ।।२६।।
यदि स्थ तमसाऽऽवृता जालेनाभिहिता इव। सर्वाः संलुप्येतः कृत्याः पुनः कर्त्रे प्र हिण्मसि।।३०।।
कृत्याकृतो वलगिनोऽभिनिष्कारिणः प्रजाम्। मृणीहि कृत्ये मोच्छिषोऽमून् कृत्याकृतो जहि ।।३१।।
यथा सूर्यो मुच्यते तमसस्परि रात्रिं जहातयुषसश्च केतून् ।
एवाहं सर्वं दुर्भूतं कर्त्रं कृत्याकृता कृतं हस्तीव रजो दुरितं जहामि ।।३२।।

७. प्रस्कण्वः – अ. ७.३६.१

दिव्यं सुपर्णं पयसं बृहन्तमपां गर्भं वृषभोषधीनाम् ।
अभीपतो वृष्ट्या तर्पयन्तमा नो गोष्ठे रयिष्ठां स्थापयाति ।।१।।

८. मातृनामा – अ. ८.६.१–१४; १६–२६

अ. ८.६.१–१४

यौ ते मातोन्ममार्ज जातायाः पतिवेदनौ। दुर्णामा तत्र मा गृधदलिंश उत वत्सपः ।।१।।
पलालानुपलालौ शर्कुं कोकं मलिम्लुचं पलीजकम्। आश्रेषं वव्रिवाससमृक्षग्रीवं प्रमीलिनम् ।।२।।
मा सं वृतो मोप सृप ऊरू माव सृपोऽन्तरा। कृणोम्यस्यै भेषजं बजं दुर्णामचातनम् ।।३।।
दुर्णामा च सुनामा चोभा संवृतममिच्छतः। अरायानप हन्मः सुनामा स्त्रैणमिच्छताम् ।।४।।
यः कृष्णः केश्यसुर स्तम्बज उत तुण्डिकः। अरायानस्या मुष्काभ्यां भंससोऽप हन्मसि ।।५।।
अनुजिघ्रं प्रमृशन्तं क्रव्यादमुत रेरिहम्। अरायांछ्वकिष्किणो बजः पिंगो अनीनशत् ।।६।।
यस्त्वा स्वप्ने निपद्यते भ्राता भूत्वा पितेव च। बजस्तान्त्सहतामितः क्लीबरूपांस्तिरीटिनः ।।७।।
यस्त्वा स्वपन्तीं त्सरति यस्त्वा दिप्सति जाग्रतीम्।
छायामिव प्र तान्त्सूर्यः परिक्रामन्ननीनशत्।।८।।
यः कृणोति मृतवत्सामवतोकामिमां स्त्रियम्। तमोषधे त्वं नाशयास्याः कमलमञ्जिवम् ।।६।।
ये शालाः परिनृत्यन्ति सायं गर्दभनादिनः। कुसूला ये च कुक्षिलाः कुकुभाः करुमाः स्रिमाः ।
तानोषधे त्वं गन्धेन विषूचीनान् वि नाशय ।।१०।।
ये कुकुन्धाः कुकूरभाः कृत्तीर्दूर्शानि बिभ्रति ।
क्लीबाइव प्रनृत्यन्तो वने ये कुर्वते घोषं तानितो नाशयामसि ।।११।।
ये सूर्यं न तितिक्षन्त आतमपन्तममुं दिवः ।
अरायान् बस्तवासिनो दुर्गन्धील्लोहितास्यान् मककान् नाशयामसि ।।१२।।
य आत्मानमतिमात्रमंस आधाय बिभ्रति। स्त्रीणां श्रोणिप्रतोदिन इन्द्र रक्षांसि नाशय ।।१३।।
ये पूर्वे वध्वो३ यन्ति हस्ते शृंगाणि बिभ्रतः ।
आपाकेस्थाः प्रहासिन स्तम्बे ये कुर्वते ज्योतिस्तानितो नाशयामसि ।।१४।।

अ. ८.६.१६–२६

पर्यस्ताक्षा अप्रचंकशा अस्त्रैणाः सन्तु पण्डगाः ।
अव भेषज पादय य इमां संविवृत्सत्यपतिः स्वपतिं स्त्रियम् ।।१६।।
उद्धर्षिणं मुनिकेशं जम्भयन्तं मरीमृशम् ।
उपेषन्तमुदुम्बलं तुण्डेलमुत शालुडम् ।
पदा प्र विध्य पार्ष्ण्या स्थालीं गौरिव स्पन्दना ।।१७।।
यस्ते गर्भं प्रतिमृशाज्जातं वा मारयाति ते ।
पिंगस्तमुग्रधन्वा कृणोतु हृदयाविधम् ।।१८।।
ये अम्नो जातान् मारयन्ति सूतिका अनुशेरते।
स्त्रीभागान् पिंगो गन्धर्वान् वातो अभ्रमिवाजतु।।१६।।
परिसृष्टं धारयतु यद्धितं माव पादि तत्। गर्भं त उग्रौ रक्षतां भेषजौ नीविभार्यौ ।।२०।।
पवीनसात् तङ्गल्वा३च्छायकादुत नग्नकात्। प्रजायै पत्ये त्वा पिंग परि पातु किमीदिनः ।।२१।।

द्व्यास्याच्चतुरक्षात् पंचपादादनङ्गरेः। वृन्तादभि प्रसर्पतः परि पाहि वरीवृतात् ।।22।।
य आमं मांसमदन्ति पौरुषेयं च ये क्रविः। गर्भान् खादन्ति केशवास्तानितो नाशयामसि ।।२३।।
ये सूर्यात् परिसर्पन्ति स्नुषेव श्वशुरादधि। बजश्च तेषां पिंगश्च हृदयेऽधि नि विध्यताम् ।।२४।।
पिंग रक्ष जायमानं मा पुमांसं स्त्रियं क्रन्। आण्डादो गर्भान्मा दभन् बाधस्वेतः किमीदिनः।।२५।।
अप्रजास्त्वं मार्तवत्समाद् रोदमघमावयम्। वृक्षादिव स्रजं कृत्वाप्रिये प्रति मुंच तत् ।।२६।।

९. यमः – अ. १६.९.2

तदग्निराह तदु सोम आह पूषा मा धात् सुकृतस्य लोके ।।2।।

१०. वसिष्ठः – अ. १९.१०.१–१०; १९.११.१–६

अ. १९.१०.१–१०

शं नो इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ।।१।।
शे नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ।।2।।
शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं ना अद्रिः शं नो देवानां सुहवानि सन्तु ।।३।।
शं नो अगिनर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ।।४।।
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ।।५।।
शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ।।६।।
शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्व१ः शम्वस्तु वेदिः ।।७।।
शं नः सूर्य उरुचक्षा उदेतु शं नो भवन्तु प्रदिशश्चतस्रः ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ।।८।।
शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ।।९।।
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो बिभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ।।१०।।

अ. १९.११.१–६

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ।।१।।
शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ।।2।।
शं नो अज एकपाद् देवो अस्तु शमहिर्बुध्न्य१ः शं समुद्रः ।
शं नो अपां नपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ।।३।।
आदित्या रुद्रा वसवो जुषन्तामिदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ।।४।।
ये देवानामृत्विजो यज्ञियासो मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ।।५।।
तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ।।६।।

११. विश्वामित्रः – अ. ६.४४.१–३

अस्थाद् द्यौरस्थात् पृथिव्यस्थाद् विश्वमिदं जगत् ।
अस्थुर्वृक्षा ऊर्ध्वस्वप्नास्तिष्ठाद् रोगो अयं तव ।।१।।
शतं या भेषजानि ते सहस्रं संगतानि च ।
श्रेष्ठमास्रावभेषजं वसिष्ठं रोगनाशनम् ।।2।।
रुद्रस्य मूत्रमस्यमृतस्य नाभिः ।
विषाणका नाम वा असि पितॄणां मूलादुत्थिता वातीकृतनाशनी ।।३।।

१2. विश्वेदेवाः – य. १४.७

सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोना धैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजू रुद्रैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ।।७।।

१३. शन्तातिः – अ. ६.१६.१–३; १६.६.१–१४

अ. ६.१६.१–३

पुनन्तु मा देवजनाः पुनन्तु मनवो धिया। पुनन्तु विश्वा भूतानि पवमानः पुनातु मा ।।१।।
पवमानः पुनातु मा क्रत्वे दक्षाय जीवसे। अथो अरिष्टतातये ।।2।।
उभाभ्यां देव सवितः पवित्रेण सवेन च। अस्मान् पुनीहि चक्षसे ।।३।।

अ. १६.६.१–१४

शान्ता द्यौः शान्ता पृथिवी शान्तमिदर्मुव१न्तरिक्षम् ।
शान्ता उदन्वतीरापः शान्ता नः सन्त्वोषधीः ।।१।।
शान्तानि पूर्वरूपाणि शान्तं नो अस्तु कृताकृतम् ।
शान्तं भूतं च भव्यं च सर्वमेव शमस्तु नः ।।2।।
इयं या परमेष्ठिनी वाग् देवी ब्रह्मसंशिता ।
ययैव ससृजे घोरं तयैव शान्तिरस्तु नः ।।३।।
इदं यत् परमेष्ठिनं मनो वां ब्रह्मसंशितम् ।
येनैव ससृजे घोरं तेनैव शान्तिरस्तु नः ।।४।।
इमानि यानि पंचेन्द्रियाणि मनःषष्ठानि मे हृदि ब्रह्मणा संशितानि ।
यैरेव ससृजे घोरं तैरेव शान्तिरस्तु नः ।।५।।
शं नो मित्रः शं वरुणः शं विष्णुः शं प्रजापतिः ।
शं न इन्द्रो बृहस्पतिः शं नो भवत्वर्यमा ।।६।।
शं नो मित्रः शं वरुणः शं विवस्वांछमन्तकः ।
उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचरा ग्रहाः ।।७।।
शं नो भूमिर्वेप्यमाना शमुल्का निर्हतं च यत् ।
शं गावो लोहितक्षीराः शं भूमिरव तीर्यतीः ।।८।।
नक्षत्रमुल्काभिहतं शमस्तु नः शं नोऽभिचाराः शमु सन्तु कृतयाः ।
शं नो निखाता वल्गाः शमुल्का देशोपसर्गाः शमु नो भवन्तु ।।९।।
शं नो ग्रहाश्चान्द्रमसाः शमादित्यश्च राहुणा ।
शं नो मृत्युर्धूमकेतुः शं रुद्रास्तिग्मतेजसः ।।१०।।
शं रुद्राः शं वसवः शमादित्याः शमग्नयः ।
शं नो महर्षयो देवाः शं देवाः शं बृहस्पतिः ।।११।।
ब्रह्म प्रजपतिर्धाता लोका वेदाः सप्तऋषयोऽग्नयः ।
तैर्मे कृतं स्वस्त्ययनमिन्द्रो मे शर्म यच्छतु ब्रह्मा मे शर्म यच्छतु ।

विश्वे मे देवाः शर्म यच्छन्तु सर्वे मे देवाः शर्म यच्छन्तु ।।१2।।
यानि कानि चिच्छान्तानि लोके सप्तऋषयो विदुः ।
सर्वाणि शं भवन्तु मे शं मे अस्त्वभयं मे अस्तु ।।१३।।
पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वे मे देवाः शान्तिः सर्वे मे देवाः शान्तिः शान्तिः शान्तिः शान्तिभिः ।
ताभिः शान्तिभिः सर्व शान्तिभिः शमयामोऽहं यदिह घोरं यदिह क्रूरं यदिह पापं तच्छान्तं तच्छिवं सर्वमेव शमस्तु नः ।।१४।।

१४. शुक्रः – अ. 2.११.१–५; ८.५.१–22

अ. 2.११.१–५

दूष्या दूषिरसि हेत्या हेतिरसि मेन्या मेनिरसि। आप्नुहि श्रेयांसमति समं क्राम ।।१।।
स्रक्त्योऽसि प्रतिसरोऽसि प्रतयभिचरणोऽसि। आप्नुहि श्रेयांसमति समं क्राम ।।2।।
प्रति तमभि चर यो३स्मान् द्वेष्टि यं वयं द्विष्मः। आप्नुहि श्रेयांसमति समं क्राम ।।३।।
सूरिरसि वर्चोधा असि तनूपानोऽसि। आप्नुहि श्रेयांसमति समं क्राम ।।४।।
शुक्रोऽसि भ्राजोऽसि स्वरसि ज्योतिरसि। आप्नुहि श्रेयांसमति समं क्राम ।।५।।

अ. ८.५.१–22

अयं प्रतिसरो मणिर्वीरो वीराय बध्यते ।
वीर्यवान्त्सपत्नहा शूरवीरः परिपाणः सुमंगलः ।।१।।
अयं मणिः सपत्नहा सुवीरः सहस्वान् वाजी सहमान उग्रः ।
प्रतयक् कृत्या दूषयन्नेति वीरः ।।2।।
अनेनेन्द्रो मणिना वृत्रमहन्ननेनासुरान् पराभावयनमनीषी ।
अनेनाजयद् द्यावापृथिवी उभे इमे अनेनाजयत् प्रदिशश्चतस्रः ।।३।।
अयं स्राक्त्यो मणिः प्रतीवर्तः प्रतिसरः ।
ओजस्वान् विमृधो वशी सो अस्मान् पातु सर्वतः ।।४।।
तदग्निराह तदु सोम आह बृहस्पतिः सविता तदिन्द्रः ।
ते मे देवाः पुरोहिताः प्रतीचीः कृत्याः प्रतिसरैरजन्तु ।।५।।
अन्तर्दधे द्यावापृथिवी उताहरुत सूर्यम् ।
ते मे देवाः पुरोहिताः प्रतीचीः कृत्याः प्रतिसरैरजन्तु ।।६।।
ये स्राक्त्यं मणिं जना वर्माणि कृण्वते ।
सूर्यइव दिवमारुह्य वि कृत्या बाधते वशी ।।७।।
स्राक्त्येन मणिन ऋषिणेव मनीषिणा ।
अजैषं सर्वाः पृतना वि मृधो हन्मि रक्षसः ।।८।।
याः कृत्या आंगिरसीर्याः कृत्या आसुरीर्याः कृत्याः स्वयंकृता या उ चान्येभिराभृताः ।
उभयीस्ता परा यन्तु परावतो नवतिं नाव्या३ अति ।।९।।
अस्मै मणिं वर्म वध्नन्तु देवा इन्द्रो विष्णुः सविता रुद्रो अग्निः ।
प्रजापतिः परमेष्ठी विराड् वैश्वानर ऋषयश्च सर्वे ।।१०।।
उत्तमो अस्योषधीनामनड्वांजगतामिव व्याघ्रः श्वपदामिव ।
यमैच्छामाविदाम तं प्रतिस्पाशनमन्तिमतम् ।।११।।
स इद् व्याघ्रो भवत्यथो सिंहो अथो वृषा ।
अथो सपत्नकर्शनो यो बिभर्तीमं मणिम् ।।१2।।
नैनं घ्नन्त्यप्सरसो न गन्धर्वा न मर्त्याः ।
सर्वा दिशो वि राजति यो बिभर्तीमं मणिम् ।।१३।।
कश्यपस्त्वामसृजत कश्यपस्त्वा समैरयत् ।
अबिभस्त्वेन्द्रो मानुषे बिभ्रत् संश्रेषिणेऽजयत् ।

मणिं सहस्रवीर्यं वर्म देवा अकृण्वत ।।१४।।
यस्त्वा कृत्याभिर्यस्त्वा दीक्षाभिर्यज्ञैर्यस्तवा जिघांसति ।
प्रत्यक् त्वमिन्द्र तं जहि वज्रेण शतपर्वणा ।।१५।।
अयमिद् वै प्रतीवर्त ओजस्वान्त्संजयो मणिः ।
प्रजां धनं च रक्षतु परिपाणः सुममंगलः ।।१६।।
असपत्नं नो अधरादसपत्नं न उत्तरात् ।
इन्द्रासपत्नं नः पश्चाज्ज्योतिः शूर पुरस्कृधि ।।१७।।
वर्म मे द्यावापृथिवी वर्माहर्वर्म सूर्यः ।
वर्म म इन्द्रश्चग्निश्च वर्म धाता दधातु मे ।।१८।।
ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नाति विध्यन्ति सवे ।
तन्मे तन्वं त्रयतां सर्वतो बृहदायुष्मांजरदष्टिर्यथासानि ।।१६।।
आ मारुक्षद् देवमणिर्मह्या अरिष्टाततये ।
इमं मेथिमभिसंविशध्वं तनूपानं त्रिवरूथमोजसे ।।20।।
अस्मिन्निन्द्रो नि दधातु नृम्णमिमं देवासो अभिसंविशध्वम् ।
दीघा।युत्वाय शतशारदायायुष्मांजरदष्टिर्यथासत् ।।21।।
स्वस्तिदा विशां पतिवृत्रहा विमृधो वशी ।
इन्द्रो वध्नातु ते मणिं जिगीवाँ अपराजितः सोमपा अभ्यंकरो वृषा ।
स त्वा रक्षतु सर्वतो दिवा नक्तं च विश्वतः ।।22।।

५८३. मन्त्रोक्ताः अथवा मातृनामा

१. मातृनामा – अ. ८.६.१–१४; १६–2६

अ. ८.६.१–१४

यौ ते मातोन्ममार्ज जातायाः पतिवेदनौ। दुर्णामा तत्र मा गृधदलिंश उत वत्सपः ।।१।।
पलालानुपलालौ शर्कुं कोकं मलिम्लुचं पलीजकम्। आश्रेषं वव्रिवाससमृक्षग्रीवं प्रमीलिनम् ।।2।।
मा सं वृतो मोप सृप ऊरू माव सृपोऽन्तरा। कृणोम्यस्यै भेषजं बजं दुर्णामचातनम् ।।३।।
दुर्णामा च सुनामा चोभा संवृतममिच्छतः। अरायानप हन्मः सुनामा स्त्रैणामिच्छताम् ।।४।।
यः कृष्णः केश्यसुर स्तम्बज उत तुण्डिकः। अरायानस्या मुष्काभ्यां भंससोऽप हन्मसि ।।५।।
अनुजिघ्रं प्रमृशन्तं क्रव्यादमुत रेरिहम्। अरायां किष्किणो बजः पिंगो अनीनशत् ।।६।।
यस्त्वा स्वप्ने निपद्यते भ्राता भूत्वा पितेव च। बजस्तान्त्सहतामितः क्लीबरूपांस्तिरीटिनः ।।७।।
यस्त्वा स्वपन्तीं त्सरति यस्त्वा दिप्सति जाग्रतीम्।
छायामिव प्र तान्त्सूर्यः परिक्रामन्ननीनशत्।।८।।
यः कृणोति मृतवत्सामवतोकामिमां स्त्रियम्। तमोषधे त्वं नाशयास्याः कमलमंजिवम् ।।६।।
ये शालाः परिनृत्यन्ति सायं गर्दभनादिनः। कुसूला ये च कुक्षिलाः कुकुभाः करुमाः स्रिमाः ।
तानोषधे त्वं गन्धेन विषूचीनान् वि नाशय ।।१०।।
ये कुकुन्धाः कुकूरभाः कृत्तीर्दूर्शानि बिभ्रति ।
क्लीबाइव प्रनृत्यन्तो वने ये कुर्वते घोषं तानितो नाशयामसि ।।११।।
ये सूर्यं न तितिक्षन्त आतमपन्तममुं दिवः ।
अरायान् बस्तवासिनो दुर्गन्धील्लोहितास्यान् मककान् नाशयामसि ।।१2।।
य आत्मानमतिमात्रमंस आधाय बिभ्रति। स्त्रीणां श्रोणिप्रतोदिन इन्द्र रक्षांसि नाशय ।।१३।।
ये पूर्वे वध्वो३ यन्ति हस्ते शृंगाणि बिभ्रतः ।
आपाकेस्थाः प्रहासिन स्तम्बे ये कुर्वते ज्योतिस्तानितो नाशयामसि ।।१४।।

अ. ८.६.१६–2६

पर्यस्ताक्षा अप्रचंकशा अस्त्रैणाः सन्तु पण्डगाः ।
अव भेषज पादय य इमां संविवृत्सत्यपतिः स्वपतिं स्त्रियम् ।।१६।।

उद्धर्षिणं मुनिकेशं जम्भयन्तं मरीमृशम् ।
उपेषन्तमुदुम्बलं तुण्डेलमुत शालुडम्। पदा प्र विध्य पार्ष्ण्या स्थालीं गौरिव स्पन्दना ।।१७।।
यस्ते गर्भं प्रतिमृशाज्जातं वा मारयाति ते। पिंगस्तमुग्रधन्वा कृणोतु हृदयाविधम् ।।१८।।
ये अम्नो जातान् मारयन्ति सूतिका अनुशेरते।
स्त्रीभागान् पिंगो गन्धर्वान् वातो अभ्रमिवाजतु।।१६।।
परिसृष्टं धारयतु यद्धितं माव पादि तत्। गर्भं त उग्रौ रक्षतां भेषजौ नीविभार्यौ ।।20।।
पवीनसात् तङ्गल्वा३च्छायकादुत नग्नकात्। प्रजायै पत्ये त्वा पिंग परि पातु किमीदिनः।।21।।
द्व्यास्याच्चतुरक्षात् पंचपादादनङ्गरेः। वृन्तादभि प्रसर्पतः परि पाहि वरीवृतात् ।।22।।
य आमं मांसमदन्ति पौरुषेयं च ये क्रविः। गर्भान् खादन्ति केशवास्तानितो नाशयामसि ।।23।।
ये सूर्यात् परिसर्पन्ति स्नुषेव श्वशुरादधि। बजश्च तेषां पिंगश्च हृदयेऽधि नि विध्यताम् ।।24।।
पिंग रक्ष जायमानं मा पुमांसं स्त्रियं क्रन्। आण्डादो गर्भान्मा दभन् बाधस्वेतः किमीदिनः।।25।
अप्रजास्त्वं मार्तवत्समाद् रोदमघमावयम्। वृक्षादिव स्रजं कृत्वाप्रिये प्रति मुंच तत् ।।26।।

५८४. मन्युः

१. ब्रह्मास्कन्दः – अ. ४.३१.१–७; ४.३2.१–७

अ. ४.३१.१–७

त्वया मन्यो सरथमारुजन्तो हर्षमाणा हृषितासो मरुत्वन् ।
तिग्मेषव आयुधा संशिशाना उप प्र यन्तु नरो अग्निरूपाः ।।१।।
अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ।।2।।
सहस्व मन्यो अभिमातिमस्मै रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयासा एकज त्वम् ।।३।।
एको बहूनामसि मन्य ईडिता विशंविशं युद्धाय सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं द्युमन्तं घेषं विजयाय कृण्मसि ।।४।।
विजेष्कृदिन्द्र इवानवब्रवो३स्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथा ।।५।।
आभूत्या सहजा वज्र सायक सहो बिभर्षि सहभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूतं संसृजि ।।६।।
संसृष्टं धनमुभयं समाकृतमस्मभ्यं धत्तां वरुणश्च मन्युः ।
भियो दधाना हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम् ।।७।।

अ. ४.३2.१–७

यस्ते मन्योऽविधद् वज्र सायक सह ओजः पुष्यति विश्वमानुषक् ।
साह्याम दासमार्यं त्वया युजा वयं सहस्कृतेन सहसा सहस्वता ।।१।।
मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः ।
मन्युर्विश ईडते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ।।2।।
अभीहि मन्यो तवसस्तवीयान् तपसा युजा वि जहि शत्रून् ।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ।।३।।
त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः ।
विश्वचर्षणिः सहुरिः सहीयानस्मास्वोजः पृतनासु धेहि ।।४।।
अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर्जिहीडाहं स्वा तनूर्बलदावा न एहि ।।५।।
अयं ते अस्म्युप न एह्यर्वाङ् प्रतीचीनः सहुरे विश्वदावन् ।
मन्यो वज्रिन्नभि न आ ववृत्स्व हनाव दस्यूंरुत बोध्यापेः ।।६।।

अभि प्रेहि दक्षिणतो भवा नोऽधा वृत्राणि जंघनाव भूरि।
जुहोमि ते धरुणं मध्वो अग्रमुभावुपांशु प्रथमा पिबाव ।।७।।

2. **भृग्वंगिरा – अ. ६.४2.१–३**

अव ज्यामिव धन्वनो मन्युं तनोमि ते हृदः। यथा संमनसौ भूत्वा सखायाविव सचावहै ।।१।।
सखायाविव सचावहा अव मन्युं तनोमि ते। अधस्ते अश्मनो मन्युमुपास्यामसि यो गुरुः ।।2।।
अभि तिष्ठामि ते मन्युं पार्ष्ण्या प्रपदेन च। यथावशो न वादिषो मम चित्तमुपायसि ।।३।।

३. **मनुस् तापसः – ऋ. १०.८३.१–७; १०.८४.१–७**

ऋ. १०.८३.१–७

यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक् ।
साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ।।१।।
मनयुरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो वातवेदाः ।
मन्युं विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ।।2।।
अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि जहि शत्रून् ।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ।।३।।
त्वं हि मन्यो अभिभूतयोजाः स्वयम्भूर्भामो अभिमातिषाहः ।
विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ।।४।।
अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि ।।५।।
अयं ते अस्म्युप मेह्यर्वाङ् प्रतीचीनः सहुरे विश्वधयः ।
मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ।।६।।
अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जंघनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ।।७।।

ऋ. १०.८४.१–७

त्वया मन्यो सरथमारुजन्तो हर्षमाणासो धृषिता मरुत्वः ।
तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः ।।१।।
अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ।।2।।
सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वम् ।।३।।
एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे ।।४।।
विजेषकृदिन्द्र इवानवब्रवो३स्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ।।५।।
आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ।।६।।
संसृष्टं धनमुभ्यं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम् ।।७।।

५८५. मन्युः अध्यातमम्

१. **कौरुपथिः – अ. ११.८.१–३४**

यन्मन्युर्जायामावहत् संकल्पस्य गृहादधि। क आसं जन्या के वराः क उ ज्येष्ठवरोऽभवत् ।।१।।
तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे। त आसं जन्यास्ते वरा ब्रह्म ज्येष्ठवरोऽभवत् ।।2।।
दश साकमजायन्त देवा देवेभ्यः पुरा। यो वै तान् विद्यात् प्रत्यक्षं स वा अद्य महद् वदेत् ।।३।।
प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या। व्यानोदानौ वाङ् मनस्ते वा आकूतिमावहन् ।।४।।

अजाता आसन्नृतवोऽथो धाता बृहस्पतिः। इन्द्राग्नी अश्विना तर्हि कं ते ज्येष्ठमुपासत ।।५।।
तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे। तपो ह जज्ञो कम्रणस्तत् ते ज्येष्ठमुपासत ।।६।।
येत आसीद् भूमिः पूर्वा यामदधातय इद् विदुः। यो वै ता विद्यान्नामथा न स मन्येत पुराणवित्।।७।।
कुत इन्द्रः कुतः सोमः कुतो अग्निरजायत। कुतस्त्वष्टा समभवत् कुतो धाताजायत ।।८।।
इन्द्रादिन्द्रः सोमात् सोमो अग्नेरग्निरजायत। त्वष्टा ह जज्ञे त्वष्टुर्धातुर्धाताजायत ।।६।।
ये त आसन् दश जाता देवा देवेभ्यः पुरा। पुत्रेभ्यो लोकं दत्त्वा कस्मिंस्ते लोक आसते ।।१०।।
यदा केशानस्थि स्नाव मांसं मज्जानमाभरत्। शरीरं कृत्वा पादवत् कं लोकमनु प्राविशत्।।११।।
कुतः केशान् कुतः स्नाव कुतो अस्थीन्याभरत्। अङ्गा पर्वाणि मज्जानं को मासं कुत आभरत्।।12।
संसिचो नाम ते देवा ये संभारान्त्समभरन्। सर्वं संसिच्य मर्त्यं देवाः पुरुषमाविशन् ।।१३।।
ऊरू पादावष्ठीवन्तौ शिरो हस्तावथो मुखम्। पृष्टीर्बर्जह्ये पार्श्वे कस्तत् समदधादृषिः ।।१४।।
शिरो हस्तावथो मुखं जिह्वां ग्रीवाश्च कीकसाः। त्वचा प्रावृत्य सर्वं तत् संधा समदधान्मही।।१।
यत्तच्छरीरमशयत् संधया संहितं महत्। येनेदमद्य रोचते को अस्मिन् वर्णमाभरत् ।।१६।।
सर्वे देवा उपाशिक्षन् तदजानाद् वधूः सती। ईशा वशस्य या जाया सास्मिन् वर्णमाभरत्।।१७।।
यदा त्वष्टा व्यतृणत् पिता त्वष्टुर्य उत्तरः। गृहं कृतवाा मर्त्यं देवाः पुरुषमाविशन् ।।१८।।
स्वप्नो वै तन्द्रीर्निर्ऋतिः पाप्मानो नाम देवताः। जरा खालत्यं पालित्यं शरीरमनु प्राविशन्।।१६।।
स्तेयं दुष्कृतं वृजिनं सत्यं यज्ञो यशो बृहत्। बलं च क्षत्रमोजश्च शरीरमनु प्राविशन् ।।2०।।
भूतिश्च वा अभूतिश्च रातयोऽरातयश्च याः। क्षुधश्च सर्वास्तृष्णाश्च शरीरमनु प्राविशन् ।।2१।।
निन्दाश्च वा अनिन्दाश्च यच्च हन्तेति नेति च। शरीरं श्रद्धा दक्षिणाश्रद्धा चानु प्राविशन्।।22।
विद्याश्च वा अविद्याश्च यच्चान्यदुपदेश्यम्। शरीरं ब्रह्म प्राविशदृचः सामाथो यजुः ।।2३।।
आनन्दा मोदाः प्रमुदोऽभीमोदमुदश्च ये। हसो नरिष्टा नृत्तानि शरीरमनु प्राविशन् ।।2४।।
आलापाश्च प्रलापाश्चाभीलापलपश्च ये। शरीरं सर्वे प्राविशन्नायुजः प्रयुजो युजः ।।2५।।
प्राणपानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या। व्यानोदानौ वाङ्मनः शरीरेण त ईयन्ते ।।2६।।
आशिषश्च प्रशिषश्च संशिषो विशिषश्च याः। चित्तानि सर्वे संकल्पाः शरीरमनु प्राविशन् ।।2७।।
आस्नेयीश्च वास्तेयीश्च त्वरणाः कृपणाश्च याः।
गुह्याः शुक्रा स्थूला अपस्ता बीभत्सावसादयन्।।2८।।
अस्थि कृत्वा समिधं तदष्टापो असादयन्। रेतः वृत्वाज्यं देवाः पुरुषमाविशन् ।।2६।।
या आपो याश्च देवता या विराड् ब्रह्मणा सह। शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः ।।३०।।
सूर्यश्चक्षुर्वातः प्राणं पुरुषस्य वि भेजिरे। अथास्येतरमात्मानं देवः प्रायच्छन्नग्नये ।।३१।।
तस्माद् वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते। सर्वा ह्यस्मिन् देवता गावो गोष्ठइवासते ।।३2।।
प्रथमेन प्रामारेण त्रेधा विष्वङ् वि गच्छति। अद एकेन गच्छत्यद एकेन गच्छतीहैकेन नि षेवते।।३३।।
अप्सु स्तीमासु वृद्धासु शरीरमन्तरा हितम्। तस्मिन्ंछवोऽध्यन्तरा तस्माच्छवोऽध्युच्यते ।।३४।।

५८६. मन्यु विनाशनम्

१. शुनः शेपः – अ. ६.2५.१–३

पंच च याः पंचाशच्च संयन्ति मन्या अभि। इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ।।१।।
सप्त च याः सप्ततिश्च संयन्ति ग्रैव्या अभि। इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ।।2।।
नव च या नवतिश्च संयन्ति स्कन्ध्या अभि। इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ।।३।।

५८७. मन्युशमनम्

१. भृग्वंगिरा – अ. ६.४३.१–३

अयं दर्भो विमन्युकः स्वाय चारणाय च। मन्योर्विमन्युकस्यायं मन्युशमन उच्यते ।।१।।
अयं यो भरिमूलः समुद्रमवतिष्ठति। दर्भः पृथिव्या उत्थितो मन्युशसन उच्यते ।।2।।
वि ते हन्व्यां शरणिं वि ते मुख्यां नयामसि। यथावशो न वादिषो मम चित्तमुपायसि ।।३।।

५८८. मरुतः

१. अगस्त्यः – य. ३४.४८

एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ।।४८।।

2. **अगस्त्यो मैत्रावरुणिः – ऋ. १.१६६.१–१५; १.१६८.१–१०; १.१७१.१–६; १.१७2.१–३**

ऋ. १.१६६.१–१५

तन्नु वोचाम रभसाय जन्मने पूर्वं महित्वं वृषभस्य केतवे ।
ऐधेय यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन ।।१।।
नित्यं न सूनुं मधु बिभ्रत उप क्रीळन्ति क्रीळा विदथेषु घृष्वयः ।
नक्षन्ति रुद्रा अवसा नमस्विनं न मर्धन्ति स्वतवसो हविष्कृतम् ।।2।।
यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे ।
उक्षन्त्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः ।।३।।
आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन् ।
भयन्ते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु ।।४।।
यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।
विश्वो वो अज्मन्भयते वनस्पति रथीयन्तीव प्र जिहीत ओषधिः ।।५।।
यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन ।
यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सु धितेव बर्हणा ।।६।।
प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः ।
अर्चन्त्यर्कं मदिदरस्य पीतये विदुर्वीरस्य प्रथमानि पौंसया ।।७।।
शतभुजिभिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत ।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ।।८।।
विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषण्याहिता ।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ।।६।।
भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अंजयः ।
अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ।।१०।।
महान्तो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः ।
मन्द्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इन्द्रे मरुतः रिष्टुभः।।११।।
तद्वः सुजाता मरुतो मजित्वनं दीर्घं वो दात्रमदितेरिव व्रतम् ।
इन्द्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वम् ।।१2।।
तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत ।
अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे ।।१३।।
येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।
आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्याम् ।।१४।।
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ।।१५।।

ऋ. १.१६८.१–१०

यज्ञायज्ञा वः समना तुतुर्वणिर्धियन्धियं वो देवया उ दधिध्वे ।
आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिभिः ।।१।।
वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः ।
सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः ।।2।।
सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते ।
ऐषामंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ।।३।।
अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना ।

अरेणवस्तुविजाता अचुच्यवुर्दृळहानि चिन्मरुतो भ्राजदृष्टयः ।।४।।
को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया ।
धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो३ नैतशः ।।५।।
क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय ।
यच्च्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवम् ।।६।।
सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती ।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जंजती ।।७।।
प्रति ष्टोभन्ति सिन्धवः पविभ्यो यदभ्रियां वाचमुदीरयन्ति ।
अव स्मयन्त विद्युतः पृथिव्यां यदी घृतं मरुतः प्रष्णुवन्ति ।।८।।
असूत पृश्निर्महते रणाय त्वेषमयासां मरुतामनीकम् ।
ते सप्सरासोऽजनयन्ताभ्वमादित्स्वधामिषिरां पर्यपश्यन् ।।९।।
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ।।१०।।

ऋ. १.१७१.१–६

प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणाम् ।
रराणताा मरुतो वेद्याभिर्नि हेळो धत्त वि मुचध्वमश्वान् ।।१।।
एष वः स्तोमो मरुतो नमस्वान्हृदा तष्टो मनसा धायि देवाः ।
उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस इद्वृधासः ।।2।।
स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शम्भविष्ठः ।
ऊर्ध्वा नः सन्तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा ।।३।।
अस्मादहं तविषादीषमाण इन्द्राद्भिया मरुतो रेजमानः ।
युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता नः ।।४।।
येन मानासश्चितयन्त उस्रा व्युष्टिषु शवसा शश्वतीनाम् ।
स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः।।५।।
त्वां पाहीन्द्र सहीयसो नृन्भवा मरुद्भिरवयातहेळाः ।
सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुम् ।।६।।

ऋ. १.१७2.१–३

चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः। मरुतो अहिभानवः ।।१।।
आरे सा वः सुदानवो मरुत ऋंजती शरुः। आरे अश्मा यमस्यथ ।।2।।
तृणस्कन्दस्य नु विशः परिवृङ्क्त सुदानवः। ऊर्ध्वान्नः कर्त जीवसे ।।३।।

३. अंगिराः – अ. ७.७७.१–३

सांतपना इदं हविर्मरुतस्तज्जुजुष्टन ।
अस्माकोति रिशादसः ।।१।।
यो नो मर्तो मरुतो दुर्हृणायुस्तिरश्चित्तानिं वसवो जिघांसति ।
द्रुहः पाशान् प्रतिं मुंचतां स तपिष्ठेन तपसा हन्तना तम् ।।2।।
संवत्सरीणा मरुतः सवर्का उरुक्षयाः सगणा मानुषासः ।
ते अस्मत् पाशान् प्र मुंचन्त्वेनसः सांतपना मत्सरा मादयिष्णवः ।।३।।

४. अथर्वा – अ. ३.१.2; ३.2.६; ४.१५.५–६

अ. ३.१.2

यूयमुग्रा मरुत ईदृशे स्थाभि प्रेत मृणत सहध्वम ।
अमीमृणन् वसवो नाथिता इमे अग्निर्ह्येषां दूतः प्रत्येतु विद्वान् ।।2।।

अ. ३.2.६

असौ या सेना मरुतः परेषामस्मानैत्यभ्योजसा स्पर्धमाना ।
तां विध्यत तमसापव्रतेन यथैषामन्यो अन्यं न जानात् ।।६।।

अ. ४.१५.५–६

उदीरयत मरुतः समुद्रतस्त्वेषो अर्को नभ उत् पातयाथ ।
महऋषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवी तर्पयन्तु ।।५।।
अभि क्रन्द स्तनयार्दयोदधिं भूमिं पर्जन्य पयसा समङ्ग्धि ।
त्वया सृष्टं बहुलमैतु वर्षमाशरैषी कृशगुरेत्वस्तम् ।।६।।
सं वोऽवन्तु सुदानव उत्सा अजगरा उत ।
मरुदभिः प्रच्युता मेघा वर्षन्तु पृथिवीमनु ।।७।।
आशामाशां वि द्योततां वाता वान्तु दिशोदिशः ।
मरुदभिः प्रच्युता मेघाः सं यन्तु पृथिवीमनु ।।८।।
आपो विद्युदभ्रं वर्षं सं वोऽवन्तु सुदानव उत्सा अजगरा उत ।
मरुद्भिः प्रच्युता मेघाः प्रावन्तु पृथिवीमनु ।।९।।

५. अप्रतिरथः – य. १७.४७

असौ या सेना मरुतः परेषामभ्यैति नऽओजसा स्पर्द्धमाना ।
तां गूहत तमसापव्रतेन यथामीऽअन्योऽअन्यन्न जानन् ।।४७।।

६. एवयामरुद्आत्रेयः – ऋ. ५.८७.१–९

प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ।।१।।
प्र ये जाता महिना ये च नु स्वयं प्र विद्मना ब्रुवत एवयामरुत् ।
क्रत्वा तद्वो मरुतो नाधृषे शवो दाना मह्ना तदेषामधृष्टासो नाद्रयः ।।2।।
प्र ये दिवो बृहतः शृण्विरे गिरा सुषुक्वानः सुभ्व एवयामरुत् ।
न येषामिरी सधस्थ ईष्ट आँ अग्नयो न स्वविद्युतः प्र स्यन्द्रासो धुनीनाम् ।।३।।
स चक्रमे महतो निरुरुक्रमः समानस्मात्सदस एवयामरुत् ।
यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः ।।४।।
स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो ययिस्तविष एवयामरुत् ।
येना सहन्त ऋंजत स्वरोचिषः स्थारश्मानो हिरण्ययाः स्वायुधास इष्मिणः।।५।।
अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेवयामरुत् ।
स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता निदः शुशुक्वांसो नाग्नयः।।६।।
ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवन्त्वेवयामरुत् ।
दीर्घं पृथु पप्रथे सद्म पार्थिवं येषामज्मेष्वा महः शर्धांस्यद्भुतैनसाम् ।।७।।
अद्वेषो नो मरुतो गातुमेतन श्रोता हवं जरितुरेवयामरुत् ।
विष्णोर्महः समन्यवो युयोतन स्मद्रथ्यो३ न दंसनाप द्वेषांसि सनुतः ।।८।।
गन्ता नो यज्ञं यज्ञियाः सुशमि श्रोता हवमरक्ष एवयामरुत् ।
ज्येष्ठासो न पर्वतासो व्योमनि यूयं तस्य प्रचेतसः स्यात दुर्धर्तवो निदः ।।९।।

७. कण्वो घौरः – ऋ. १.३७.१–१५; १.३८.१–१५; १.३९.१–१०

ऋ. १.३७.१–१५

क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम्। कण्वा अभि प्रगायत ।।१।।
य पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः अजायन्त स्वभानवः ।।2।।
इहेव शृण्व एषां कशा हस्तेषु यद्वदान्। नि यामचित्रमृंजते ।।३।।
प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे। देवत्तं ब्रह्म गायत ।।४।।
प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतम्। जम्भे रसस्य वावृधे ।।५।।
को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः। यत्सीमन्तं न धूनुथ ।।६।।
नि वो यामाय मानुषो दध्र उग्राय मन्यवे। जिहीत पर्वतो गिरिः ।।७।।

येषमज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः। भिया यामेषु रेजते ।।८।।
स्थिरं हि जानमेषां वयो मातुर्निरेतवे। यत्सीमनु द्विता शवः ।।९।।
उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत। वाश्रा अभिज्ञु यातवे ।।१०।।
त्यं चिद्घा दीर्घं पृथुं मिहो नपातममृध्रम्। प्र च्यावयन्ति यामभिः ।।११।।
मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन। गिरींरचुच्यवीतन ।।12।।
यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना। शुणोति कश्चिदेषाम् ।।१३।।
प्र यात् शीभमाशुभिः सन्ति कण्वेषु वो दुवः। तत्रो षु मादयाध्वै ।।१४।।
अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम्। विश्वं चिदायुर्जीवसे ।।१५।।

ऋ. १.३८.१–१५

कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः। दधिध्वे वृक्त बर्हिषः ।।१।।
क्व नूनं कद्वो अर्थं गन्ता दिवो न पृथिव्याः। क्व वो गावो न रण्यन्ति ।।2।।
क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता। क्वो३ विश्वानि सौभगा ।।३।।
यद्यूयं पृश्निमातरो मर्तासः स्यातन। स्तोता वो अमृतः स्यात् ।।४।।
मा वो मृगो न यवसे जरिता भूदजोष्यः। पथा यमस्य गादुप ।।५।।
मो षुणः परापरा निर्ऋतिर्दुर्हणा वधीत्। पदीष्ट तृष्णया सह ।।६।।
सत्यं त्वेषा अमवन्तो धन्वंचिदा रुद्रियासः। मिहं कृण्वन्त्यवाताम् ।।७।।
वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति। यदेषां वृष्टिरसर्जि ।।८।।
दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन। यत्पृथिवीं व्युन्दन्ति ।।९।।
अध स्वनान्मरुतां विश्वमा सद्म पार्थिवम्। अरेजन्त प्र मानुषाः ।।१०।।
मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु। यातेमखिद्रयामभिः ।।११।।
स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम्। सुसंस्कृता अभीशवः ।।12।।
अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम्। अग्निं मित्रं न दर्शतम् ।।१३।।
मिमीहि श्लोकमास्ये पर्जन्य इव ततनः। गाय गायत्रमुक्थ्यम् ।।१४।।
वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम्। अस्मे वृद्धा असन्निह ।।१५।।

ऋ. १.३९.१–१०

प्र यदित्था परावतः शेचिर्न मानमस्यथ ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः ।।१।।
स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे ।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ।।2।।
परा ह यत्स्थिरं हथ नरो वर्तयथा गुरु ।
वि याथन वनिनः पृथिव्या व्याशाः पर्वतानाम् ।।३।।
नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः ।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ।।४।।
प्र वेपयन्ति पर्वतान् वि विंचन्ति वनस्पतीन् ।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ।।५।।
उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः ।
आ वो यामाय पृथिवी चिदश्रोदबीभयन्त मानुषाः ।।६।।
आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे ।
गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ।।७।।
युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते ।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ।।८।।
असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।
असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ।।९।।

असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम ।।१०।।

८. **कण्वो घौरः (सार्षेदी. ऋसर्व. १.३७.१०); प्रस्कण्वःकाण्वः (साग्री.सास्वा.) –सा. 221**

उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत। वाश्रा अभिज्ञु यातवे ।।८।।

९. **गृत्समदः शौनकः – ऋ. 2.३०.११; 2.३४.१–१५ –**

ऋ. 2.३०.११

तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ।।११।।

ऋ. 2.३४.१–१५

धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत ।।१।।
द्यावो न स्तृभिश्चितयन्त खादिनो व्य१ भ्रिया न द्युतयन्त वृष्टयः ।
रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि ।।2।।
उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः ।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ।।३।।
पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ।।४।।
इन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पाथिभिर्भ्राजदृष्टयः ।
आ हंसासो न स्वसरराणि गन्तन मधोर्मदाय मरुतः समन्यवः ।।५।।
आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ।।६।।
तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितयद्दिवेदिवे ।
इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ।।७।।
यद्युंजते मरुतो रुक्मवक्षसोऽश्वान्नथेषु भग आ सुदानवः ।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ।।८।।
यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हन्तना वधः ।।९।।
चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।
यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः ।।१०।।
तान्वो महो मरुत एवयाव्नो विष्णोरषेभ्य प्रभृथे हवामहे ।
हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यसन्तः शंस्यं राध ईमहे ।।११।।
ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।
उषा न रामीररुणौरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ।।१2।।
ते क्षोणीभिररुणेभिर्नाजिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमा अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम् ।।१३।।
ताँ इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि ।
त्रितो न यान्पंच होतॄनभिष्टय आववर्तदवारंचक्रियावसे ।।१४।।
यया रध्रं पारयथात्यंहो यया निदो मुंचथ वन्दितारम् ।
अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जिगातु ।।१५।।

१०. **गृत्समदः – अ. 2०.६७.४**

यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिर्यामंछुभ्रासो अंजिषु प्रिया उत ।
आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः ।।४।।

११. गोतमः – अ. २०.१.2; २०.१३.2

अ. २०.१.2

मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः ।।2।।

अ. २०.१३.2

आ वो वहन्तु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः ।
सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो अन्धसः ।।2।।

१2. गोतमो राहूगणः – ऋ. १.८५.१–2; १.८६.१–१०; १.८७.१–६; १.८८.१–६; सा. १५६४

ऋ. १.८५.१–2

प्र ये शम्भन्ते जनयो न सप्तयो यामन् रुद्रस्य सूनवः सुदंससः ।
रोदसी हि मरुतश्चक्रिरे वृधे मदन्ति वीरा विदथेषु घृष्वयः ।।१।।
त उक्षितासो महिमानसाशत दिवि रुद्रासो अधिचक्रिरे सदः ।
अर्चन्तो अर्कं जनयन्त इन्द्रियमधि श्रियो दधिरे पृश्निमातरः ।।2।।

ऋ. १.८६.१–१०

मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः ।।१।।
यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम्। मरुतः शृणुता हवम् ।।2।।
उत वा यस्य वाजिनोऽनु विप्रमतक्षत। स गन्ता गोमति व्रजे ।।३।।
अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु। उक्थं मदश्च शस्यते ।।४।।
अस्य श्रोषन्त्वा भुवो विश्वा यश्चर्षणीरभि। सूरं चित्सस्रुषीरिषः ।।५।।
पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम्। अवोभिश्चर्षणीनाम् ।।६।।
सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः। यस्य प्रयांसि पर्षथ ।।७।।
शशमानस्य वा नरः स्वेदस्य सत्यशवसः। विदा कामस्य वेनतः ।।८।।
यूयं तत्सत्यशवस आविष्कर्त महित्वना। विध्यता विद्युता रक्षः ।।९।।
गूहता गुह्यं तमो वि यात विश्वमत्रिणम्। ज्योतिष्कर्ता यदुश्मसि ।।१०।।

ऋ. १.८७.१–६

प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः ।
जुष्टमासो नृतमासो अंजिभिर्व्यानज्रे कि चिदुस्रा इव स्तृभिः ।।१।।
उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा ।
श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ।।2।।
प्रैषमज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युंजते शुभे ।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ।।३।।
स हि स्वसृत्पृषदश्वो युवा गणो३ऽया ईशानस्तविषीभिरावृतः ।
असि सत्य ऋणायावनेद्योऽस्या धियः प्राविताथा वृषा गणः ।।४।।
पितुः प्रत्नस्य जन्मना वदामसि जिह्वा प्र जिगाति चक्षसा ।
यदीमिन्द्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे ।।५।।
श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ।।६।।

ऋ. १.८८.१–६

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ।।१।।
तेऽरुणेभिर्वरमा पिशंगैः शुभे कं यान्ति रथतूर्भिरश्वैः ।
रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जङ्घनन्त भूम ।।2।।
श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवन्त ऊर्ध्वा ।

युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयन्ते अद्रिम् ।।३।।
अहानि गृध्राः पर्या व आगुरिमां धियं वाकार्यां च देवीम् ।
ब्रह्म कृण्वन्तो गोतमासो अर्कैरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै ।।४।।
एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः ।
पश्यन् हिरण्यचक्रान्योदंष्ट्रान् विधातो वराहून् ।।५।।
एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।
अस्तोभयद् वृथासामनु स्वधां गभस्त्योः ।।६।।

सा. १५६४

शशमानस्य वा नरः स्वेदस्य सत्यशवसः। विदामाकस्य वेनतः ।।१।।

१३. दीर्घतमा – य. ३६.७

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च। सासह्वाँश्चभियुग्वा च विक्षिपः स्वाहा ।।७।।

१४. परमेष्ठी – य. १५.१३

स्वराडस्युदीची दिङ्मरुतस्ते देवा अधिपतयः सोमो हेतीनां प्रतिधर्तैकविंशस्त्वा स्तोमः पृथिव्यां श्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैराजं साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च तै त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ।।१३।।

१५. परुच्छेपो दैवोदासिः – ऋ. १.१३६.८

मो षु वो असमदभि तानि पौंस्या सनाभूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः ।
यद्वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यम्। अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ।।८।।

१६. पुनर्वत्सः काण्वः – ऋ. ८.७.१–३६

प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत्। वि पर्वतेषु राजथ ।।१।।
यदंग तविषीयवो यामं शुभ्रा अचिध्वम्। नि पर्वता अहासत ।।2।।
उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः। धुक्षन्त पिप्युषीमिषम् ।।३।।
वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान्। यद्यामं यान्ति वायुभिः ।।४।।
नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे। महे शुष्माय येमिरे ।।५।।
युष्माँ उ नक्तमूतये युष्मादिन्दवा हवामहे। युष्मान्प्रयत्यध्वरे ।।६।।
उदु त्यं अरुणप्सवश्चित्रा यामेभिरीरते। वाश्रा अधि ष्णुना दिवः ।।७।।
सृजन्ति रश्मिोजसा पन्थां सूर्याय यातवे। ते भानुभिर्वि तस्थिरे ।।८।।
इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः। इमं मे वनता हवम् ।।९।।
त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु। उत्सं कवन्धमुद्रिणम् ।।१०।।
मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे। आ तू न उप गन्तन ।।११।।
यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे। उत प्रचेतसो मदे ।।१2।।
आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम्। इयर्ता मरुतो दिवः ।।१३।।
अधीव यद् गिरीणां यामं शुभ्रा अचिध्वम्। सुवानैर्मन्दध्व इन्दुभिः ।।१४।।
एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः। अदाभ्यस्य मन्मभिः ।।१५।।
ये द्रप्साइव रोदसी धमन्त्यनु वृष्टिभिः। उत्सं दुहन्तो अक्षितम् ।।१६।।
उदु स्वानेभिरीरत् उद्रथैरुदु वायुभिः। उत्स्तोमैः पृश्निमातरः ।।१७।।
येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम्। राये सु तस्य धीमहि ।।१८।।
इमा उ वः सुदानवो घृतं न पिप्युषीरिषः। वर्धान्काण्वस्य मन्मभिः ।।१९।।
क्व नूनं सुदानवो मदथा वृक्तबर्हिषः। ब्रह्मा को वः सपर्यति ।।2०।।

नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः। शर्धाँ ऋतस्य जिन्वथ ।।21।।
समु त्ये महतीरपः सं क्षोणी समु सूर्यम्। सं वज्रं पर्वशो दधुः ।।22।।
वि वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः। चक्राणा वृष्णि पौंस्यम् ।।२३।।
अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम्। अन्विन्द्रं वृत्रतूर्ये ।।२४।।
विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः। शुभ्राः व्यंजन श्रिये ।।२५।।
उशना यत्परावत् उक्ष्णो रन्ध्रमयातन। द्यौर्न चक्रदद्भिया ।।२६।।
आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः। देवास उप गन्तन ।।२७।।
यदेषां पृषती रथे प्रष्टिर्वहति रोहितः। यान्ति शुभ्रा रिणन्नपः ।।२८।।
सुषोमे शर्यणावत्यार्जीके पस्त्यावति। ययुर्निचक्रया नरः ।।२९।।
कदा गच्छाथ मरुत इत्था विप्रं हवमानम्। मार्डीकेभिर्नाधमानम् ।।३०।।
कद्ध नूनं कधप्रियो यदिन्द्रमजहातन। को वः सखित्व ओहते ।।३१।।
सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः। स्तुषे हिरण्यवाशीभिः ।३2।।
ओ षु वृष्णः प्रयज्यूना नव्यसे सुविताय। ववृत्यां चित्रवाजान् ।।३३।।
गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः। पर्वताश्चिन्नि येमिरे ।।३४।।
आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः। धातारः स्तुवते वयः ।।३५।।
अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा। ते भानुभिर्वि तस्थिरे ।।३६।।

१७. प्रजापतिः – य. ३.४४–४५

प्रघासिनो हवामहे मरुतश्च रिशादसः। करम्भेण सजोषसः ।।४४।।
यद् ग्रामे यदरणये यत् सभायां यदिन्द्रिये। यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा ।।४५।।

१८. प्रस्कण्वः काण्वः (साग्री. सास्वा. सार्षेदी.) कण्वो घौरः (ऋसर्व. १.३७.१०) – सा. 221

उदु त्ये सुनवो गिरः काष्ठा यज्ञेष्वत्नत। वाश्रा अभिज्ञु यातवे ।।८।।

१९. बिन्दुः पूतदक्षो वा (ऋसर्व.); बिन्दुः पूतदक्षो वा आंगिरसः (सास्वा.) – ऋ. ८.९४. १–12; सा. १४९; १७४; १७८५–८७

ऋ. ८.९४.१–12

गौर्धयति मरुतां श्रवस्युर्माता मघोनाम्। युक्ता वह्नी रथानाम् ।।१।।
यस्या देवा उपस्थे व्रता विश्वे धारयन्ते। सूर्यामासा दृशे कम् ।।2।।
तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः। मरुतः सोमपीतये ।।३।।
अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना ।।४।।
पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः। त्रिषधस्थस्य जावतः ।।५।।
उतो न्वस्य जोषमाँ इन्द्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति ।।६।।
कदत्विषन्त सूरयस्तिर आप इव स्रिधः। अर्षन्ति पूतदक्षसः ।।७।।
कद्वो अद्य महानां देवानामवो वृणे। त्मना च दस्मवर्चसाम् ।।८।।
आ ये विश्वा पार्थिवानि पप्रथन् रोचना दिवः। मरुतः सोमपीतये ।।९।।
त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे। अस्य सोमस्य पीतये ।।१०।।
त्यान्नु ये वि रोदसी तस्तभुर्मरुतो हुवे। अस्य सोमस्य पीतये ।।११।।
त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे। अस्य सोमस्य पीतये ।।12।।

सा. १४९

गौर्धयति मरुतां श्रवस्युर्माता मघोनाम्। युक्ता वह्नी रथानाम् ।।५।।

सा. १७४

अस्ति सामो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना ।।१०।।

सा. १७८५–१७८७

अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना ।।१।।
पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः। त्रिषधस्थस्य जावतः ।।2।।
उतो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति ।।३।।

२०. ब्रह्म — अ. ५.2६.५; १३.१.३

अ. ५.2६.५

छन्दांसि यज्ञे मरुतः स्वाहा मातेव पुत्रं पिपृतेह युक्ताः ।।५।।

अ. १३.१.३

यूयमुग्रा मरुतः पृश्निमातर इन्द्रेण युजा प्र मृणीत शत्रून् ।
आ वो रोहितः शृणवत् सुदानवस्त्रिषप्तासो मरुतः स्वादुसंमुदः ।।३।।

2१. भरद्वाजः — अ. 2.१2.६

अतीव यो मरुतो मन्यते नो ब्रह्म वा यो निन्दिषत् क्रियमाणम् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषं द्यौरभिसंतपाति ।।६।।

22. भरद्वाजो बार्हस्पत्यः — ऋ. ६.६६.१–११

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम् ।
मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः ।।१।।
ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधन्त ।
अरेण्वो हिरण्यास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् ।।2।।
रुद्रस्य ये मीळ्हुषः सन्ति पुत्रा यांश्चो नु दाधृविर्भरध्यै ।
विदे हि माता महो मही षा सेत्पृश्निःसुभ्वे३ गर्भमाधात् ।।३।।
न य ईषन्ते जनुषोऽया न्व१न्तः सन्तोऽवद्यानि पुनानाः ।
निर्यद् दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ।।४।।
मक्षू न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः ।
न ये स्तौना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान् ।।५।।
त इदुग्राः शवसा धृष्णुषेणा उभे युजन्त रोदसी सुमेके ।
अध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः ।।६।।
अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः ।
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन् ।।७।।
नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः ।।८।।
प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ।।९।।
त्विषीमन्तो अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वो३ नाग्नेः ।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ।।१०।।
तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।
दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ।।११।।

2३. मधुच्छन्दाः — अ. २०.४०.३; २०.६६.१2; २०.७०.३–५

अ. २०.४०.३

आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ।।३।।

अ. २०.६६.१2

आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ।।१2।।

अ. २०.७०.३–५

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा। मन्दू समानवर्चसा ।।३।।
अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति। गणैरिन्द्रस्य काम्यैः ।।४।।

अतः परिज्मन्ना गहि दिवो वा रोचनादधि। समस्मिन्नृंजते गिरः ।।५।।

२४. मधुच्छन्दा वैश्वामित्रः – ऋ. १.६.४; ६; ८; ६; सा. ८५१

ऋ. १.६.४

आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ।।४।।

ऋ. १.६.६

देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः। महामनूषत श्रुतम् ।।६।।

ऋ. १.६.८–६

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति। गणैरिन्द्रस्य काम्यै ।।८।।
अतः परिज्मन्ना गहि दिवो वा रोचनादधि। समस्मिन्नृंजते गिरः ।।६।।

सा. ८५१

आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ।।2।।

२५. मृगारः – अ. ४.2७.१–७

मरुतां मन्वे अधि मे ब्रुवन्तु प्रेमं वाजं वाजसाते अवन्तु ।
आशूनिव सुयमानह्व ऊतये ते नो मुंचन्त्वंहसः ।।१।।
उत्समक्षितं व्यचन्ति ये सदा य आसिंचन्ति रसमोषधीषु ।
पुरो दधे मरुतः पृश्निमातृंस्ते नो मुंचन्त्वंहसः ।।2।।
पयो धेनूनां रसमोषधीनां जवमर्वतां कवयो य इन्वथ ।
शग्मा भवन्तु मरुतो नः स्योनास्ते नो मुंचन्त्वंहसः ।।३।।
अपः समुद्राद् दिवमुद् वहन्ति दिवस्पृथिवीमभि ये सृजन्ति ।
ये अद्भिरीशाना मरुतश्चरन्ति ते नो मुंचन्त्वंहसः ।।४।।
ये कीलालेन तर्पयन्ति ये घृतेन ये वा वयो मेदसा संसृजन्ति ।
ये अद्भिरीशाना मरुतो वर्षयन्ति ते नो मुंचन्त्वंहसः ।।५।।
यदीदिदं मरुतो मारुतेन यदि देवा दैव्येनेदृगार ।
यूयमीशिध्वे वसवस्तस्य निष्कृतेस्ते नो मुंचन्त्वंहसः ।।६।।
तिग्ममनीकं विदितं सहस्वन् मारुतं शर्धः पुतनासूग्रम् ।
स्तौमि मरुतो नाथितो जोहवीमि ते नो मुंचन्त्वंहसः ।।७।।

२६. मेधातिथिः – य. १७.१

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्यऽओषधीभ्यो वनस्पतिभ्योऽअधि सम्भृतं पयः ।
तां नऽइषमूर्ज धत्त मरुतः संरराणाऽअश्मँस्ते क्षुन् मयि तऽऊर्ग्यं द्विष्मस्तं ते शुगृच्छ।।१।।

२७. मेधातिथिः काण्वः – ऋ. १.१५.2

मरुतः पिबत ऋतुना पोत्राद् यज्ञं पुनीतन। यूयं हि ष्ठा सुदानवः ।।2।।

२८. वसिष्ठः – ऋ. ७.५६.१–2५; ७.५७.१–७; ७.५८.१–६; ७.५६.१–११; ७.१०४.१८

ऋ. ७.५६.१–2५

क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः ।।१।।
नकिर्ह्येषां जनूंषि वेद ते अंग विद्रे मिथो जनित्रम् ।।2।।
अभि स्वपूभिर्मिथो वपन्त वातस्वनसः श्येना अस्पृध्रन् ।।३।।
एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ।।४।।
सा विट् सुवीरा मरुद्भिरस्तु सनात्सहन्ती पुष्यन्ती नृम्णम् ।।५।।
यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ।।६।।
उग्रं व ओजः स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान् ।।७।।
शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ।।८।।
सनेम्यस्मद्युयोत दिद्युं मा वो दुर्मतिरिह प्रणङ्नः ।।६।।

प्रिया वो नाम हुवें तुराणामा यत्तृपन्मरुतो वावशानाः ।।१०।।
स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्व१ः शुम्भमानाः ।।११।।
शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।
ऋतेन सत्यमृतसाप आयंछुचिजन्मानः शुचयः पावकाः ।।१2।।
अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा अपशिश्रियाणाः ।
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः ।।१३।।
प्र बुध्न्या व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वम् ।
सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् ।।१४।।
यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो हवीमन् ।
मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभदरावा ।।१५।।
अत्यासो न ये मरुतः स्वंचो यक्षदृशो न शुभयन्त मर्याः ।
ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः ।।१६।।
दशस्यन्तो नो मरुतो मृळन्तु वरिवस्यन्तो रोदसी सुमेके ।
आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वम् ।।१७।।
आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो गृणानः ।
य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः ।।१८।।
इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति ।
इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति ।।१६।।
इमे रध्रं चिन्मरुतो जुनन्ति भृमि चिद्यथा वसवो जुषन्त ।
अप बाधध्वं वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे ।।2०।।
मा वो दात्रान्मरुतो निरराम मा पश्चाद्दध्म रथ्यो विभागे ।
आ नः स्पार्हे भजतना वसव्ये३यदीं सुजातं वृषणो वो अस्ति ।।2१।।
सं यद्धनन्त मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु ।
अध स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः ।।22।।
भूरि चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यन्ते पुरा चित् ।
मरुद्भिरुग्रः पृतनासु साळहा मरुद्भिरित्सनिता वाजमर्वा ।।2३।।
अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता ।
अपो येन सुक्षितये तरेमाध स्वमोको अभि वः स्याम ।।2४।।
तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ।।2५।।

ऋ. ७.५७.१–७

मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति ।
ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः ।।१।।
निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म ।
अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः ।।2।।
नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः ।
आ रोदसी विश्वपिशः पिशानाः समानमंज्यंजते शुभे कम् ।।३।।
ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम ।
मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ।।४।।
कृते चिदत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः ।
प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः ।।५।।
उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हवींषि ।
ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि ।।६।।
आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात ।

ये नस्त्मना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः ।।७।।

ऋ. ७.५८.१–६

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान् ।
उत क्षेदन्ति रोदसी महित्वा नक्षन्ते नाकं निर्ऋतेरवंशात् ।।१।।
जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः ।
प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन्भयते स्वर्दृक् ।।2।।
बृहद्वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः ।
गतो नाध्वा वि तिराति जन्तुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ।।३।।
युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।
युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद्वो अस्तु धूतयो देष्णम् ।।४।।
ताँ आ रुद्रस्य मीळहुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः ।
यत्सस्वर्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणाम् ।।५।।
प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त ।
आराच्चिद् द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ।।६।।

ऋ. ७.५९.१–११

यं त्रायध्व इदमिदं देवासो यं च नयथ ।
तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत ।।१।।
युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः ।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।।2।।
नहि वश्चरमं चन वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ।।३।।
नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः ।
अभि व आवर्त्सुमतिर्नवीयसी तूयं यात पिपीषवः ।।४।।
ओ षु घृष्विराधसो यातनान्धांसि पीतये ।
इमा वो हव्या मरुतो ररे हि कं मोष्व१न्यत्र गन्तन ।।५।।
आ च नो बर्हिः सदताविता च नः स्पार्हाणि दातवे वसु ।
अस्रेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ।।६।।
सस्वश्चिद्धि तन्व१ः शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन् ।
विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदन्तः ।।७।।
यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति ।
द्रुहः पाशान्प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् ।।८।।
सांतपना इदं हविर्मरुतज्जुजुष्टन। युष्माकोती रिशदसः ।।९।।
गृहमेधास आ गत मरुतो माप भूतन। युष्माकोती सुदानवः ।।१०।।
इहेह वः स्वतवसः कवयः सूर्यत्वचः। यज्ञं मरुत आ वृणे ।।११।।

ऋ. ७.१०४.१८

वि तिष्ठध्वं मरुतो विक्ष्वि१च्छत गृभायत रक्षसः सं पिनष्टन।
वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ।।१८।।

2९. वासिष्ठो मैत्रावरुणिः – सा. 2४१; ४३३

सा. 2४१

न हि वश्चरमं च न वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ।।९।।

सा. ४३३

क ईं वयक्ता नरः सनीडा रुद्रस्य मर्या अथा स्वश्वाः ।।७।।

३०. विश्वामित्रो गाथिनः – ऋ. ३.2६.४–६

प्र यन्तु वाजास्तविषीभिरग्नयः शुभे संमिश्लाः पृषतीरयुक्षत ।
बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयन्ति पर्वताँ अदाभ्याः ।।४।।
अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयम् ।
ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः ।।५।।
व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोज ईमहे ।
पृषदश्वासो अनवभ्रराधसो गन्तारो यज्ञं विदथेषु धीराः ।।६।।

३१. शन्तातिः – अ. ६.22.2–३

पयस्वतीः कृणुथाप ओषधीः शिवा यदेजथा मरुतो रुक्मवक्षसः ।
ऊर्जं च तत्र सुमतिं च पिन्वत यत्रा नरो मरुतः सिंचथा मधु ।।2।।
उदप्रुतो मरुतस्ताँ इयर्त वृष्टिर्या विश्वा निवतस्पृणाति ।
एजाति गल्हा कन्येव तुन्नैरुं तुन्दाना पत्येव जाया ।।३।।

३2. शंयुर् बार्हस्पत्यः – ऋ. ६.४८.११; 12; 2०; 21

ऋ. ६.४८.११–12

आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः। सृजध्वमनपस्फुराम् ।।११।।
या शर्धाय मारुताय स्वभानवे श्रवोऽमृतयु धुक्षत।
या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी।12।

ऋ. ६.४८.2०–21

वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता ।
देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः ।।2०।।
सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः ।।21।।

३३. श्यावाश्व आत्रेयः – ऋ. ५.५2.१–१७; ५.५३.१–१६; ५.५४.१–१५; ५.५५.१–१०; ५.५६.१–६; ५.५७.१–८; ५.५८.१–८; ५.६१.१–४; ११–१६; सा. ३५६

ऋ. ५.५2.१–१७

प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः ।
ये अद्रोघमनुष्वधं श्रवो मदन्ति यज्ञियाः ।।१।।
ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया ।
ते यामन्ना धृषद्विनस्त्मना पान्ति शश्वतः ।।2।।
ते स्पन्द्रासो नोक्षणोऽति ष्कन्दन्ति शर्वरीः ।
मरुतामधा महो दिवि क्षमा च मन्महे ।।३।।
मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।
विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ।।४।।
अर्हन्तो ये सुदानवो नरो असामिशवसः ।
प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ।।५।।
आ रुकमैरा युधा नर ऋष्वा ऋष्टीरसृक्षत ।
अन्वेना अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ।।६।।
ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ ।
वृजने वा नदीनां सधस्थे वा माहो दिवः ।।७।।
शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसम् ।
उत स्म ते शुभे नरः प्र स्पन्द्रा युजत त्मना ।।८।।
उत स्म ते परुष्यामूर्णा वसत शुन्ध्यवः ।
उत पव्या रथानामद्रिं भिन्दन्त्योजसा ।।६।।

आपथयो विपथयोऽन्तस्पथा अनुपथाः ।
एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते ।।१०।।
अधा नरो न्योहतेऽधा नियुत ओहते ।
अधा पारावता इति चित्रा रूपाणि दर्श्या ।।११।।
छन्दःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः ।
ते मे के चिन्न तायव ऊमा आसन्दृशि त्विषे ।।१२।।
य ऋष्वा ऋष्टिविद्युतः कवयः सन्ति वेधसः ।
तमृषे मारुतं गणं नमस्या रमया गिरा ।।१३।।
अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणां ।
दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत ।।१४।।
नू मन्वान एषां देवाँ अच्छा न वक्षणा ।
दाना सचेत सूरिभिर्यामश्रुतेभिरञ्जिभिः ।।१५।।
प्र ये मे बन्ध्वेषे गां वोचन्त सूरयः पृश्निं वोचन्त मातरम् ।
अधा पितरमिष्मिणं रुद्रं वोचन्त शिक्वसः ।।१६।।
सप्त मे सप्त शाकिन एकमेका शता ददुः ।
यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ।।१७।।

ऋ. ५.५३.१–१६

को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुताम्। यद्युयुज्रे किलास्यः ।।१।।
एतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ।।2।।
ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे ।
नरो मर्या अरेपस इमान्पश्यन्निति ष्टुहि ।।३।।
ये आञ्जिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु। श्राया रथेषु धन्वसु ।।४।।
युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः। वृष्टी द्यावो यतीरिव ।।५।।
आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ।।६।।
ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा ।
स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तन्त एन्यः ।।७।।
आ यात मरुतो दिव आन्तरिक्षादमादुत। माव स्थात परावतः ।।८।।
मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्निरीरमत् ।
मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ।।९।।
तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम् ।
अनु प्र यन्ति वृष्टयः ।।१०।।
शर्धंशर्धं व एषां व्रातंव्रातं गणगणं सुशस्तिभिः। अनु क्रामेम धीतिभिः ।।११।।
कस्मा अद्य सुजाताय रातहव्याय प्र ययुः। एना यामेन मरुतः ।।१२।।
येन तोकाय तनयाय धान्यं१ बीजं वहध्वे अक्षितम् ।
अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगम् ।।१३।।
अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः ।
वृष्ट्वी शं योराप उस्रि भेषजं स्याम मरुतः सह ।।१४।।
सुदवेः समहासति सुवीरो नरो मरुतः स मर्त्यः। यं त्रायध्वे स्याम ते ।।१५।।
स्तुहि भोजान्त्स्तुवतो अस्य यामनि रणन्गावो न यवसे ।
यतः पूर्वाँ इव सखीरनु ह्वय गिरा गृणीहि कामिनः ।।१६।।

ऋ. ५.५४.१–१५

प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते ।

घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत ।।१।।
प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः ।
सं विद्युता दधति वाशति त्रितः स्वरन्त्यापोऽवना परिज्रयः ।।2।।
विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वतच्युतः ।
अब्दया चिन्मुहुरा ह्रादुनीवृतः स्तनयदमा रभसा उदोजसः ।।३।।
व्य१क्तून् रुद्रा व्यहानि शिक्वसो व्य१न्तरिक्षं वि रजांसि धूतयः ।
वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ।।४।।
तद्वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनम् ।
एता न यामे अगृभीतशोचिषोऽनश्वदां यन्न्ययातना गिरिम् ।।५।।
अभ्राजि शर्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः ।
अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यन्तमनु नेषथा सुगम् ।।६।।
न स जीयते मरुतो न हन्यते न स्रेधयति न व्यथते न रिष्यति ।
नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ।।७।।
नियुत्वन्तो ग्रमजितो यथा नरोऽर्यमणो न मरुतः कबन्धिनः ।
पिन्वन्त्युत्सं यदिनासो अस्वरन्व्युन्दन्ति पृथिवी मध्वो अन्धसा ।।८।।
प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः ।
प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः ।।६।।
यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः ।
न वोऽश्वाः श्रथयन्ताह सिस्रतः सद्यो अस्याध्वनः पारमश्नुथ ।।१०।।
अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः ।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ।।११।।
तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।
समच्यन्त वृजनातित्विषन्त यत्स्वरन्ति घोषं विततमृतायवः ।।१2।।
युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः ।
न यो युच्छति तिष्यो३ यथा दिवो३ स्मे रारन्त मरुतः सहस्रिणम् ।।१३।।
यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रम् ।
यूयमर्वन्तं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम् ।।१४।।
तद्वो यामि द्रविणं सद्य ऊतयो येना स्व१र्ण ततनाम नॄँरभि ।
इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ।।१५।।

ऋ. ५.५५.१–१०

प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः ।
ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत ।।१।।
स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ ।
उतान्तरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत ।।2।।
साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः ।
विरोकिणः सूर्य्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत ।।३।।
अभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणम् ।
उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत ।।४।।
उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ।।५।।
यदश्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यत्काँ अमुग्ध्वम् ।
विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ।।६।।
न पर्वता न नद्यो वरन्त वो यत्राचिध्वं मरुतो गच्छथेदु तत् ।
उत द्यावापृथिवी याथना परि शुभं यातामनु रथ अवृत्सत ।।७।।
यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते ।

विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत ।।८।।
मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यन्तन ।
अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत ।।९।।
यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः ।
जुषध्वं नो हव्यदितिं यजत्रा वयं स्याम पतयो रयीणाम् ।।१०।।

ऋ. ५.५६.१–९

अग्ने शर्धन्तमा गणं पिष्टं रुक्मेभिरंजिभिः ।
विशो अद्य मरुतामव ह्वये दिवश्चिद्रोचनादधि ।।१।।
यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः ।
ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः ।।2।।
मीळहुष्मतीव पृथिवी पराहता मदन्त्येत्यस्मदा ।
ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः ।।३।।
नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः ।
अश्मानं चित्स्वर्यं१ पर्वतं गिरिं प्र च्यावयन्ति यामभिः ।।४।।
उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानाम् ।
मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये ।।५।।
युङ्ग्ध्वं ह्यरुषी रथे युङ्ग्ध्वं रथेषु रोहितः ।
युङ्ग्ध्वं हरी अजिरा धुरि वोळहवे वहिष्ठा धुरि वोळहवे ।।६।।
उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः ।
मा वो यामेषु मरुतश्चिरं करत्प्र तं रथेषु चोदत ।।७।।
रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।
आ यस्मिन्तस्थौ सुरणनि बिभ्रती सचा मरुत्सु रोदसी ।।८।।
तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ।
यस्मिन्त्सुजाता सुभगा महीयते सचा मरुत्सु मीळहुषी ।।९।।

ऋ. ५.५७.१–८

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।
इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ।।१।।
वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषंगिणः ।
स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम् ।।2।।
धुनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया ।
कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम् ।।३।।
वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।
पिशंगाश्व अरुणाश्व अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ।।४।।
पुरुद्रप्सा अंजिमन्तः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः ।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ।।५।।
ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम् ।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ।।६।।
गोमदश्ववद्रथवत्सुवीरं चन्द्रवद्राधो मरुतो ददा नः ।
प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ।।७।।
हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद् गिरयो बृहदुक्षमाणाः ।।८।।

ऋ. ५.५९.१–८

प्र वः स्पळक्रन्त्सुविताय दवनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे ।

उक्षन्ते अश्वान्तरुषन्त आ रजोऽनु स्वं भानुं श्रथयन्ते अर्णवैः ।।१।।
अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ।
दूरेदृशो ये चितयन्त एमभिरन्तर्महे विदथे येतिरे नरः ।।2।।
गवामिव श्रियसे शृंगमुत्तमं सूर्यो न चक्षू रजसो विसर्जने ।
अत्या इव सुभ्व१श्चारवः स्थन मर्या इव श्रियसे चेतथा नरः ।।३।।
को वो महान्ति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या ।
यूयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दावने ।।४।।
अश्वाइवेदरुषासः सबन्धवः शूराइव प्रयुधः प्रोत युयुधुः ।
मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः ।।५।।
ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यामासो महसा नि वावृधुः ।
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ।।६।।
वयो न ये श्रेणीः पप्तुरोजसान्तान्दिवो बृहतः सानुनस्परि ।
अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ।।७।।
मिमातु द्यौरदितिवीतये नः सं दानुचित्रा उषसो यतन्ताम् ।
आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ।।८।।

ऋ. ५.६१.१–४

के ष्ठा नरः श्रेष्ठतमा य एकएक आयय। परमस्याः परावतः ।।१।।
क्व१ वोऽश्वाः क्वा३भीषवः कथं शेक कथा यय। पृष्ठे सदो नसोर्यमः ।।2।।
जघने चोद एषां वि सक्थानि नरो यमुः। पुत्रकृथे न जनयः ।।३।।
परा वीरास एतन मर्यासो भद्रजानयः अग्नितपो यथासथ ।।४।।

ऋ. ५.६१.११–१६

य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु। अत्र श्रवाँसि दधिरे ।।११।।
येषां श्रियाधि रोदसी विभ्राजन्ते रथेष्वा। दिवि रुक्म इवोपरि ।।१2।।
युवा स मारुतो गणस्त्वेषरथो अनेद्यः। शुभंयावाप्रतिष्कुतः ।।१३।।
को वेद नूनमेषां यत्रामदन्ति धूतयः। ऋतजाता अरेपसः ।।१४।।
यूयं मर्तं विपन्यवः प्रणेतार इत्था धिया। श्रोतारो यामहूतिषु ।।१५।।
ते नो वसूनि काम्या पुरुश्चन्द्रा रिशादसः। आ यज्ञियासो ववृत्तन ।।१६।।

सा. ३५६

यदी वहन्त्याशवो भ्राजमाना रथेष्वा। पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते ।।५।।

३४. सप्तर्षयः – य. १७.८०–८४; ८६

य. १७.८०–८४

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च। शुक्रश्चऽऋतपाश्चात्यंहाः ।।८०।।
ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च। मितश्च संमितश्च सभराः ।।८१।।
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च। धर्त्ता च विधर्त्ता च विधारयः ।।८2।।
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च। अन्तिमित्रश्च दूरेऽअमित्रश्च गणः ।।८३।।
ईदृक्षासएतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षासऽएतन ।
मितासश्च सम्मितासो नोऽअद्य सभरसो मरुतो यज्ञेऽअस्मिन् ।।८४।।

य. १७.८६

इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ।
एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ।।८६।।

३५. सोभरिः काण्वः – ऋ. ८.2०.१–2६

आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थाता समन्यवः। स्थिरा चिन्नमयिष्णवः ।।१।।

वीळुपविभिर्मरुत ऋभुक्षण आ रुद्रासः सुदीतिभिः ।
इषा नो अद्या गता पुरुस्पृहो यज्ञमा सोभरीयवः ।।2।।
विद्मा हि रुद्रियाणां शुष्ममुग्रं मरुतां शिमीवताम्। विष्णोरेषस्य मीळहुषाम् ।।३।।
वि द्वीपानि पापतन्तिष्ठद्दुच्छुनोभे युजन्त रोदसी ।
प्र धन्वान्यैरत शुभ्रखादयो यदेजथ स्वभानवः ।।४।।
अच्युता चिद्वो अज्मन्ना नानदति पर्वतासो वनस्पतिः। भूमिर्यामेषु रेजते ।।५।।
अमाय वाे मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत् ।
यत्रा नरो देदिशते तनूष्वा त्वक्षांसि बाह्वोजसः ।।६।।
स्वधामनु श्रियं नरो महि त्वेषा अमवन्तो वृषप्सवः। वहन्ते अह्रुतप्सवः ।।७।।
गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये ।
गोबन्धवः सुजातास इषे भुजे महान्तो नः स्परसे नु ।।८।।
प्रति वो वृषदंजयो वृष्णे शर्धाय मारुताय भरध्वम् । हव्या वृषप्रयाव्णे ।।६।।
वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना ।
आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत ।।१०।।
समानमंज्येषां वि भ्राजन्ते रुक्मासो अधि बाहुषु। दविद्युतत्यृष्टयः ।।११।।
त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे ।
स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः ।।१2।।
येषामर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद्भुजे। वयो न पित्र्यं सहः ।।१३।।
तान्वन्दस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनाम् ।
अराणां न चरमस्तदेषां दाना मह्ना तदेषाम् ।।१४।।
सुभगः स व ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु। यो वा नूनमुतासति ।।१५।।
यस्य वा यूयं प्रति वाजिनो नरः आ हव्या वीतये गथ ।
अभि ष द्युम्नैरुत वाजसातिभिः सुम्ना वा॒धूतयो नशत् ।।१६।।
यथा रुद्रस्य सूनवो दिवो वशन्त्यसुरस्य वेधसः। युवानस्तथेदसत् ।।१७।।
ये चार्हन्ति मरुतः सुदानवः स्मन्मीळहुषश्चरन्ति ये ।
अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वम् ।।१८।।
यून ऊ षु नविष्ठया वृष्णः पावकाँ अभि सोभरे गिरा। गाय गा इव चर्कृषत् ।।१६।।
साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु ।
वृष्णश्चन्द्रान्न सुश्रवस्तमान् गिरा वन्दस्व मरुतो अह ।।20।।
गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः। रिहते ककुभो मिथः ।।2१।।
मर्तश्चिद्वो नृतवो रुक्मवक्षस उप भ्रातृत्वमायति ।
अधि नो गात मरुतः सदा हि व आपित्वमस्ति निध्रुवि ।।22।।
मरुतो मारुतस्य न आ भेषजस्य वहता सुदानवः। यूयं सखायः सप्तयः ।।2३।।
याभिः सिन्धुमवथ याभिस्तूर्वथ याभिर्दशस्यथा क्रिविम् ।
मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः ।।2४।।
यत्सिन्धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुवर्हिषः। यत्पर्वतेषु भेषजम् ।।2५।।
विश्वं पश्यन्तो बिभृथा तनूष्वा तेना नो अधि वोचत ।
क्षमा रपो मरुत आतुरस्य न इष्कर्ता विह्रुतं पुनः ।।2६।।

३६. सौभरिः काण्वः – सा. ४०१; ४०४

सा. ४०१

आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः। दृढां चिद्यमयिष्णवः ।।३।।

सा. ४०४

गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः। रिहते ककुभो मिथः ।।६।।

३७. स्यूमरश्मिर्भार्गवः – ऋ. १०.७७.१–८; १०.७८.१–८

ऋ. १०.७७.१–८

अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मन्तो न यज्ञा विजानुषः ।
सुमारुतं न ब्रह्माणमर्हसे गणमस्तोष्येषां न शोभसे ।।१।।
श्रिये मर्यासो अंजीँरकृण्वत सुमारुतं न पूर्वीरति क्षपः ।
दिवस्पुत्रास एता न येतिर आदित्यासस्ते अक्रा न वावृधुः ।।2।।
प्र ये दिवः पृथिव्या न बर्हणा त्मना रिरिच्रे अभ्रान्न सूर्यः ।
पाजस्वन्तो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः ।।३।।
युष्माकं बुध्ने अपां न यामनि विथुर्यति न मही श्रथर्यति ।
विश्वप्सुर्यज्ञो अर्वागयं सु वः प्रयस्वन्तो न सत्राच आ गत ।।४।।
यूयं धूर्षु प्रयुजो न रश्मिभिर्ज्योतिष्मन्तो न भासा व्युष्टिषु ।
श्येनासो न स्वयशसो रिशदसः प्रवासो न प्रसितासः परिप्रुषः ।।५।।
प्र यद्वहध्वे मरुतः पराकाद्यूयं महः संवरणस्य वस्वः ।
विदानासो वसवो राध्यस्याराच्चिद् द्वेषः सनुतर्युयोत ।।६।।
य उदृचि यज्ञे अध्वरेष्ठा मरुद्भ्यो न मानुषो ददाशत् ।
रेवत्स वयो दधते सुवीरं स देवानामपि गोपीथे अस्तु ।।७।।
ते हि यज्ञेषु यज्ञियास ऊमा आदित्येन नाम्ना शम्भविष्ठाः ।
ते नोऽवन्तु रथतूर्मनीषां महश्च यामन्नध्वरे चकानाः ।।८।।

ऋ. १०.७८.१–८

विप्रासो न मन्मभिः स्वाध्यो देवाव्यो३ न यज्ञैः स्वप्नसः ।
राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः ।।१।।
अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्यऊतयः ।
प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते ।।2।।
वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः ।
वर्मण्वन्तो न योधाः शिमीवन्तः पितॄणां न शंसाः सुरातयः ।।३।।
रथानां न ये१राः सनाभ्यो जिगीवांसो न शूरा अभिद्यवः ।
वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः ।।४।।
अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः ।
आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अंगिरसो न सामभिः ।।५।।
ग्रवाणो न सूरयः सिन्धुमातर आदर्दिरासो अद्रयो न विश्वहा ।
शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्नुत त्विषा ।।६।।
उषसां न केतवोऽध्वरश्रियः शुभंयवो नांजिभिर्व्यश्वितन् ।
सिन्धवो न ययियो भ्राजदृष्टयः परावतो न योजनानि ममिरे ।।७।।
सुभागान्नो देवाः कृणुता सुरत्नानस्मान्त्सतोतॄन्मरुतो वावृधानाः ।
अधि स्तोत्रस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि सन्ति ।।८।।

३८. ऋषि–? – अ. 20.2.१

मरुतः पोत्रात् सुष्टुभः स्वर्कादृतुना सोमं पिबतु ।।१।।

५८६. मरुतः पूषा बृहस्पतिः अग्निश्च

१. ब्रह्म – अ. ७.३३.१

सं मा सिंचन्तु मरुतः सं पूषा सं बृहस्पतिः ।
सं मायमग्निः सिंचतु प्रजया च धनेन च दीर्घमायुः कृणोतु मे ।।१।।

५६०. मरुतः इन्द्रश्च

१. मधुच्छन्दा वैश्वामित्रः – ऋ. १.६.५; ७

ऋ. १.६.५

वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः। अविन्द उस्रिया अनु ।।५।।
इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा। मन्दू समानवर्चसा ।।७।।

५६१. मरुतः (साग्री. सास्वा. ऋसर्व.); रुद्रः (सार्षेदी.)

१. एवयामरुद् ॒आत्रेयः – सा. ४६2

प्र वो माहे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्र यज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ।।६।।

५६2. मरुतां पिता

१. अथर्वा – अ. ५.2४.१2

मरुतां पिता पशूनामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।१2।।

५६३. मरुतो माधवश्च

१. गृत्समदः शौनकः – ऋ. 2.३६.३

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ।।३।।

५६४. मरुतो लिंगोक्ता वा

१. शंयुर् बार्हस्पत्यः – ऋ. ६.४८.१३–१५

भरद्वाजायाव धुक्षत द्विता। धेनुं च विश्वदोहसमिषं च विश्वभोजसम् ।।१३।।
तं व इन्द्र न सुक्रतुं वरुणमिव मायिनम् ।
अर्यमणं न मन्द्रं सृप्रभोजसं विष्णुं न स्तुष आदिशे ।।१४।।
त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता ।
सं सहस्रा करिषच्चर्षणिभ्य आँ आविर्गूळहा वसू करत्सुवेदा नो वसू करत् ।।१५।।

५६५. मरुतो वाग्निश्च

१. श्यावाश्व आत्रेयः – ऋ. ५.६०.१–८

ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्याम् ।।१।।
आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु ।
वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वतश्चित् ।।2।।
पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः ।
यत्क्रीळथ मरुत ऋष्टिमन्त आप इव सध्र्यंचो धवध्वे ।।३।।
वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे ।
श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ।।४।।
अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ।।५।।
यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ ।
अतो नो रुद्रा उत वा न्व१स्याग्ने वित्ताद्धविषो यद्यजाम ।।६।।
अग्निश्च यन्मरुतो विश्ववदेसो दिवो वहध्व उत्तरादधि ष्णुभिः ।
ते मन्दसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते ।।७।।
अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मन्दसानो गणश्रिभिः ।

पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः ।।८।।

५९६ महावीर सेनापतिः

१. भरद्वाजः — य. २९.५१

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाध्मानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान पुमांसं परि पातु विश्वतः ।।५१।।

५९७. मही

१. काण्वः — अ. 2.३१.१

इन्द्रस्य या मही दृषत् क्तिमेर्विश्वस्य तर्हणी। तया पिनष्मि सं क्रिमीन् दृषदा खल्वाँइव ।।१।।

५९८. महेन्द्रः

१. प्रगाथः — य. ३३.५०

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र ऽ इन्द्रज्येष्ठा ऽ अस्माँ2ऽ अवन्तु देवाः ।।५०।।

2. बृहद्दिवः — य. ३३.८०

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञऽउग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ।।८०।।

३. मेधातिथिः — य. ३३.९७

अस्येदिन्द्रो वावृधे वृष्ण्यँ शवो मदे सुतस्य विष्णवि। अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा पूर्वथा। इमाऽउ त्वा। यस्यायम्। अयं सहस्रम्। ऊर्ध्वऽऊ षु णः ।।९७।।

५९९. मायाभेदः

१. पतङ्गः प्राजापत्यः — ऋ. १०.१७७.१—३

पतंगमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः ।
समुद्रे अन्तः कवयो वि चक्षते मरीचीनां पदमिच्छन्ति वेधसः ।।१।।
पतंगो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः ।
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति ।।2।।
अपश्यं गोपामनिपद्यमानसा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ।।३।।

2. पतङ्गः प्राजापत्यः — ऋ. १०.१७७.१—३

पतंगमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः ।
समुद्रे अन्तः कवयो वि चक्षते मरीचीनां पदमिच्छन्ति वेधसः ।।१।।
पतंगो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः ।
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति ।।2।।
अपश्यं गोपामनिपद्यमानसा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ।।३।।

६००. मारुतादयः

१. प्रजापतिः — य. 2४.४; 2५.६

य. 2४.४

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्तऽऐन्द्राग्नाः कृष्णाजिरल्पाजिर्महाजिस्त ऽ उषस्या ।।४।।

य. 2५.६

मरुतां स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीया वायोः

पुच्छमग्नीषोमयोर्भासदौ क्रुंचौ श्रोणिभ्यामिन्द्राबृहस्पती ऽ ऊरुभ्यां मित्रावरुणावल्गाभ्यामाक्रमणं स्थूराभ्यां बलं कुष्ठाभ्याम् ।।६।।

६०१. मारुतपर्जन्यौ

१. अथर्वा – अ. ४.१५.४

गणास्त्वोप गायन्तु मारुताः पर्जन्य घोषिणः पृथक्। सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवीमनु ।।४।।

६02. मासाः

१. प्रजापतिः – य. 22.३१

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहोषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहांहसस्पतये स्वाहा।३।

६०३. मित्रः

१. विश्वामित्रः – य. ११.६2; ६४

य. ११.६2

मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमम् ।।६2।।

य. ११.६४

उत्थाय बृहती भावोदु तिष्ठ ध्रुवा त्वम्। मित्रैतां तऽउखां परिददाम्यभित्याऽ एषा मा भेदि।।६४।

2. विश्वामित्रो गाथिनः – ऋ. ३.५६.१–६

मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् ।
मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ।।१।।
प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ।।2।।
अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः ।
आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम ।।३।।
अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।।४।।
महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः ।
तस्मा एतात्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत ।।५।।
मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमम् ।।६।।
अभि यो महिना दिवं मित्रो बभूव सप्रथाः। अभि श्रवोभिः पृथिवीम् ।।७।।
मित्राय पंच येमिरे जना अभिष्टिशवसे। स देवान्विश्वान्बिभर्ति ।।८।।
मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे। इष इष्टव्रता अकः ।।६।।

३. सिन्धुद्वीपः – य. ११.५३

मित्रः संसृज्य पृथिवीं भूमिं ज्योतिषा सह ।
सृजातं जातवेदसमयक्ष्माय त्वा संसृजामि प्रजाभ्यः ।।५३।।

६०४. मित्रादयः

१. गोतमः – य. 2५.2४

मा नो मित्रो वरुणोऽअर्य्यमायुरिन्द्रऽऋभुक्षा मरुतः परिख्यन् ।
यद्वाजिनो देवजा तस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ।।2४।।

2. प्रजापतिः – य. 2३.३३

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु तवा ।।३३।।

६०५. मित्रादयो मन्त्रोक्ताः

१. **तापसः – य. ६.३३**

मित्रो नवाक्षरेण त्रिवृत्तं स्तोममुदजयत् तमुज्जेषं वरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषं विश्वे देवा द्वादशक्षरेण जगतीमुदजयँस्तामुज्जेषम् ।।३३।।

६०६. मित्रादयो लिंगोक्ताः

१. **आथर्वणः दध्यङ् – य. ३६.६**

शन्नो मित्रः शं वरुणाः शन्नो भवत्वर्य्यमा। शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरु रुक्रमः ।।६।।

2. **दध्यङ् आथर्वणः – य. ३६.६**

शन्नो मित्रः शं वरुणः शन्नो भवन्त्वर्य्यमा ।
शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ।।६।।

३. **दीर्घतमा औचथ्यः – ऋ. १.१६2.१–22**

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ।।१।।
यन्निर्णिजा रेक्णसा पावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङ्जो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ।।2।।
एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ।।३।।
यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग इति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ।।४।।
होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ।।५।।
यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं सम्भरन्त्युतो तेषमभिगूर्तिर्न इन्वतु ।।६।।
उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ।।७।।
यद्वाजिनो दाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये३ तृणं सर्वा ता ते अपि देवेष्वस्तु ।।८।।
यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ।।६।।
यद्बवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधं शृतपाकं पचन्तु ।।१०।।
यत्ते गत्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ।।११।।
ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ।।१2।।
यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामंकाः सूनाः परि भूषन्त्यश्वम् ।।१३।।
निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ।।१४।।
मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।

इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ।।१५।।
यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
सन्दानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ।।१६।।
यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ।।१७।।
चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ।।१८।।
एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः ।
या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ ।।१९।।
मा त्वा तपत्प्रिय आत्मापियन्तं मा स्वधितिस्तन्व१ आ तिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्रण्यसिना मिथू कः ।।20।।
न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ।
हरी ते युंजा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ।।21।।
सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिम् ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वे वनतां हविष्मान् ।।22।।

६०७. मित्रावरुणौ

1. अथर्वा – अ. १.20.2; ५.2४.५; ६.३2.३; ६.९८.१–३

अ. १.20.2

यो अद्य सेन्यो वधोऽघायूनामुदीरते। युवं तं मित्रावरुणावस्मद् यावयतं परि ।।2।।

अ. ५.2४.५

मित्रावरुणौ वृष्ट्या अधिपती तौ मावताम् ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।५।।

अ. ६.३2.३

अभयं मित्रावरुणाविहास्तु नोऽर्चिषात्त्रिणो नुदतं प्रतीचः ।
मा ज्ञातारं मा प्रतिष्ठां विदन्त मिथो विघ्नाना उप यन्तु मृत्युम् ।।३।।

अ. ६.९८.१–३

इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै ।
चर्कृत्य ईड्यो वन्द्यश्चोपसद्यो नमस्यो भवेह ।।१।।
त्वमिन्द्राधिराजः श्रवस्युस्त्वं भूरभिभूतिर्जनानाम् ।
त्वं दैवीर्विश इमा वि राजायुष्मत् क्षत्रमजरं ते अस्तु ।।2।।
प्राच्या दिशस्त्व मिन्द्रासि राजोतोदीच्या दिशो वृत्रहंछत्रुहोसि ।
यत्र यनित स्रोत्यास्तज्जितं ते दक्षिणतो वृषभ एषि हव्यः ।।३।।

2. अर्चनाना आत्रेयः – ऋ. ५.६३.१–७; ५.६४.१–७

ऋ. ५.६३.१–७

ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ।
यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ।।१।।
सम्राजावस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशाः ।
वृष्टिं वा राधो अमृतत्वमीमहे द्यावापृथिवी वि चरन्ति तन्यवः ।।2।।
सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी ।
चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ।।३।।

माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधम् ।
तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा मधुमन्त ईरते ।।४।।
रथं युंजते मरुतः शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु ।
रजांसि चित्रा वि चरन्ति तन्यवो दिवः सम्राजा पयसा न उक्षतम् ।।५।।
वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीम् ।
अभ्रा वसत मरुतः सु मायाया द्यां वर्षयतमरुणापरेपसम् ।।६।।
धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।
ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथम् ।।७।।

ऋ. ५.६४.१–७

वरुणं वो रिशादसमृचा मित्रं हवामहे। परि व्रजेव बाह्वोर्जगन्वांसा स्वर्णरम् ।।१।।
ता बाहवा सुचेतुना प्र यन्तमस्मा अर्चते। शेवं हि जार्यं वां विश्वासु क्षासु जोगुवे ।।2।।
यन्नूनमश्यां गतिं मित्रस्य यायां पथा। अस्य प्रियस्य शर्मण्यहिंसानस्य सश्चिरे ।।३।।
युवाभ्यां मित्रावरुणोपमं धेयामृचा। यद्ध क्षये मघोनां स्तोतॄणां च स्पूर्धसे ।।४।।
आ नो मित्र सुदीतिभिर्वरुणश्च सधस्थ आ। स्वे क्षये मघोनां सखीनां च वृधसे ।।५।।
युवं नो येषु वरुण क्षत्रं बृहच्च बिभृथः। उरु णो वाजसातये कृतं राये स्वस्तये ।।६।।
उच्छन्त्यां मे यजता देवक्षत्रे रुशद्गवि।
सुतं सोमं न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसम्।।७।।

३. उरुचक्रिरर् आत्रेयः – ऋ. ५.६६.१–४; ५.७०.१–४; सा. ६८५–८७

ऋ. ५.६६.१–४

त्री रोचना वरुण त्रीरुँत द्यून्त्रीणि मित्र धारयथो रजांसि ।
वावृधानावमतिं क्षत्रियस्यानु व्रतं रक्षमाणावजुर्यम् ।।१।।
इरावतीर्वरुण धेनवो वां मधुमद्वां सिन्धवो मित्र दुह्रे ।
त्रयस्तस्थुर्वृषभासस्तिसॄणां धिष्णानां रेतोधा वि द्युमन्तः ।।2।।
प्रातर्देवीमदितिं जोहवीमि मध्यन्दिन उदिता सूर्यस्य ।
राये मित्रावरुणा सर्वतातेळे तोकाय तनयाय शं योः ।।३।।
या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य ।
न वां देवा अमृता आ मिनन्ति व्रतानि मित्रावरुणा ध्रुवाणि ।।४।।

ऋ. ५.७०.१–४

पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण। मित्र वंसि वा सुमतिम् ।।१।।
ता वां सम्यगद्रुह्वाणेषमश्याम् धायसे। वयं ते रुद्रा स्याम ।।2।।
पातं नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा। तुर्याम दस्यून्तनूभिः ।।३।।
मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः। मा शेषसा मा तनसा ।।४।।

सा. ६८५–८७

पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण। मित्र वंसि वांसुमतिम् ।।१।।
ता वां सम्यगद्रुह्वाणेषमश्याम धाम च। वयं वां मित्रा स्याम ।।2।।
पातं नो मित्रा पायुभिरुत त्रायेथांसुत्रात्रा। साह्याम दस्यूं तनूभिः ।।३।।

४. कण्वो घौरः – ऋ. १.४३.३

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति। यथा विश्वे सजोषसः ।।३।।

५. गृत्समदः – य. ७.६

अयं वां मित्रावरुणा सुतः सोमऽऋृतावृधा।
ममेदिह श्रुतं हवम्। उपयामगृहीताऽसि मित्रावरुणाभ्यां त्वा ।।६।।

६. गृत्समदः शौनकः – ऋ. 2.४१.४–६; सा. ६१०–१2

ऋ. 2.४१.४–६

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा। ममेदिह श्रुतं हवम् ।।४।।
राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते ।।५।।
ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम् ।।६।।

सा. ६१०–१2

असं परं मित्रावरुणा सुतः सोम ऋतावृधा। ममेदिह श्रुतं हवम् ।।१।।
राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आशाते ।।2।।
ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम् ।।३।।

७. जमदग्निः – य. ३३.८७

ऋधिग्त्थिा स मर्त्यः शशमे देवतातये। यो नूनं मित्रावरुणावभिष्टयऽआचक्रे हव्यदातये ।।८७।।

८. जमदग्निः भार्गवः – ऋ. ८.१०१.१–४

ऋधगित्था स मर्त्यः शशमे देवतातये। यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये ।।१।।
वर्षिष्ठक्षत्रा उरुचक्षसा नरा राजाना दीर्घश्रुत्तमा।
ता बाहुता न दंसना रथर्यतः सकं सूर्यस्य रश्मिभिः।2।।
प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत्। अयः शीर्षा मदेरघुः ।।३।।
न यः संपृच्छे न पुनर्हवीतवे न संवादाय रमते।
तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरुष्यतम्।।४।।

६. त्रसदस्युः – य. ७.१०

राया वयं ससवांमो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपम्फुरन्तीमेष ते योनिर्ऋतायुभ्यां त्वा ।।१०।।

१०. दीर्घतमा औचथ्यः – ऋ. १.१५१.१–६; १.१५2.१–७; १.१५३.१–४

ऋ. १.१५१.१–६

मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ।
अरेजेतां रोदसी पाजसाा गिरा प्रति प्रियं यजतं जनुषामव ।।१।।
यद्ध त्यद्वां पुरुमीळहस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ।
अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ।।2।।
आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ।
यदीमृताय भरथो यदव्रते प्र होत्रया शिम्या वीथो अध्वरम् ।।३।।
प्र सा क्षितिरसुर या महि प्रिया ऋतावानावृतमा घोषथो बृहत् ।
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युंजाथे अपः ।।४।।
मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः ।
स्वरन्ति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव ।।५।।
आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः ।
अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मनमनामिरज्यथः ।।६।।
यो वां यज्ञेः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ।
उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू ।।७।।
युवां यज्ञैः प्रथमा गोभिरंजत ऋतावाना मनसो न प्रयुक्तिषु ।
भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ।।८।।
रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति महिनम् ।
न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम् ।।६।।

ऋ. १.१५2.१–७

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ।।१।।

एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्रः कविशस्त ऋघावान् ।
त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ।।2।।
अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ।।३।।
प्रयन्तमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् ।
अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम ।।४।।
अनश्वे जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः ।
अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणन्तः ।।५।।
आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्त्ससिमन्नूधन् ।
पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ।।६।।
आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम् ।
अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ।।७।।

ऋ. १.१५३.१–४

यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ।
घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति ।।१।।
प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः ।
अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ।।2।।
पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे ।
हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता ।।३।।
उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः ।
उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ।।४।।

११. परुच्छेपो दैवोदासिः – ऋ. १.१३६.१–५; १.१३७.१–३; १.१३६.2

ऋ. १.१३६.१–५

प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्याम्।
ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता। अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ।।१।।
अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः।
द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च। अथा दधाते बृहदुक्थ्यं१ वय उपस्तुत्यं बृहद्वयः।।2।।
ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे ।
ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती। मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः।।३।
अयं मित्राय वरुणाय शन्तमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः ।
तं देवासो जुषेरत विश्वे अद्य सजोषसः। तथा राजाना करथो यदीमह ऋतावाना यदीमहे।।४।।
यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वासं मर्तमंहसः ।
तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम्। उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ।।५।।

ऋ. १.१३७.१–३

सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे ।
आ राजाना दिविस्पृशास्मत्रा गन्तमुप नः ।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ।।१।।
इम आ यातमिन्दवः सोमासो दध्याशिरः सुतासो दध्याशिरः ।
उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ।
सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये ।।2।।
तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः ।
अस्मत्रा गन्तमुप नोऽर्वाञ्चा सोमपीतये ।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ।।३।।

ऋ. १.१३६.2

यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना।
युवोरित्थधि सद्मस्वपश्याम हिरण्ययम्। धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः।।2।।

१2. बाहुवृक्तः आत्रेयः – ऋ. ५.७१.१–३; ५.७2.१–३

ऋ. ५.७१.१–३

आ नो गन्तं रिशादसा वरुण मित्र बर्हणा। उपेमं चारुमध्वरम् ।।१।।
विश्वस्य हि प्रचेतसा वरुण मित्र राजथः। ईशाना पिप्यतं धियः ।।2।।
उप नः सुतमा गतं वरुण मित्र दाशुषः। अस्य सोमस्य पीतये ।।३।।

ऋ. ५.७2.१–३

आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत्। नि बर्हिषि सदतं सोमपीतये ।।१।।
व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना। नि बर्हिषि सदतं सोमपीतये ।।2।।
मित्रश्च नो वरुणश्च जुषेतां यज्ञमिष्टये। नि बर्हिषि सदतां सोमपीतये ।।३।।

१३. ब्रह्म – अ. ६.१०.2३

अपादेति प्रथमा पद्वतीनां कस्तद् वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्या ऋतं पिपर्त्यनृतं नि पाति ।।2३।।

१४. भरद्वाजो बार्हस्पत्यः – ऋ. ६.६७.१–११

विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै ।
सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः ।।१।।
इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छ ।
यन्तं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सुदान् ।।2।।
आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना ।
सं यावप्नस्थो अपसेव जनांछ्रुधीयतश्चिद्यतथो महित्वा ।।३।।
अश्वा न या वाजिना पूतबन्धू ऋता यद् गर्भमदितिर्भरध्यै ।
प्र या महि महान्ता जायमाना घोरा मर्ताय रिपवे नि दीधः ।।४।।
विश्वे यद्वां मंहना मन्दमानाः क्षत्रं देवासो अदधुः सजोषाः ।
परि यद्भूथो रोदसी चिदुर्वी सन्ति स्पशो अदब्धासो अमूराः ।।५।।
ता हि क्षत्रं धारयेथे अनु द्यून् दृंहेथे सानुमुपमादिव द्योः ।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः ।।६।।
ता विग्रं धैथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणन्ति ।
न मृष्यन्ते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरन्ते ।।७।।
ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिर्ऋते भूत् ।
तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः ।।८।।
प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धाम युवधिता मिनन्ति ।
न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ।।९।।
वि यद्वाचं कीस्तासो भरन्ते शंसन्ति के चिन्निविदो मनानाः ।
आद्वां ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा ।।१०।।
अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु ।
अनु यद् गावः स्फुरानृजिप्यं धृष्णुं यद्रणे वृषणं युनजन् ।।११।।

१५. मधुच्छन्दाः – य. ३३.५७

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीं साधन्ता ।।५७।।

१६. मधुच्छन्दा वैश्वामित्रः – ऋ. १.2.७–९; सा. ८४७–८४९

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीं साधन्ता ।।७।।
ऋतेन मित्रावरुणावृतावृधावृतस्पृशा। क्रतुं बृहन्तमाशाथे ।।८।।

कवी नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसम् ।।६।।

सा. ८४७—८४६

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्। धियं धृताचीं साधन्ता ।।१।।
ऋतेन मित्रावरुणावृतावृधावृतस्पृशा। क्रतुं बृहन्तमाशाथे ।।2।।
कवी नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसम् ।।३।।

१७. मृगारः — अ. ४.2६.१—७

मन्वे वां मित्रावरुणावृतावृधौ सचेतसौ द्रुह्वणो या नुदेथे ।
प्र सत्यावानमवथो भरेषु तौ नो मुंचतमंहसः ।।१।।
सचेतसौ द्रुह्मणो यौ नुदेथे प्र सत्यावानमवथो भरेषु ।
यौ गच्छथो नृचक्षसौ बभ्रुणा सुतं तौ नो मुंचतमंहसः ।।2।।
यावंगिरसमवथो यावगस्तिं मित्रावरुणा जमदग्निमत्रिम् ।
यौ कश्यपवथो यौ वसिष्ठं तौ नो मुंचतमंहसः ।।३।।
यौ श्यावाश्वमवथो वध्य्रश्वं मित्रावरुणा पुरुमीढमत्रिम् ।
यौ विमदमवथः सप्तवध्रिं तौ नो मुंचतमंहसः ।।४।।
यौ भरद्वाजमवथो यौ गविष्ठिरं विश्वामित्रं वरुण मित्र कुत्सम् ।
यौ कक्षीवन्तमवथः प्रोत कण्वं तौ नो मुंचतमंहसः ।।५।।
यौ मेधतिथिमवथो यौ त्रिशोकं मित्रावरुणावुशनां काव्यं यौ ।
यौ गोतममवथः प्रोत मुद्गलं तौ नो मुंचतमंहसः ।।६।।
ययो रथः सत्यवर्त्मर्जुरश्मिर्मिथुया चरन्तमभियाति दूषयन् ।
स्तौमि मित्रावरुणौ नाथितो जोहवीमि तौ नो मुंचतमंहसः ।।७।।

१८. मेधातिथिः काण्वः — ऋ. १.१५.६; १.2३.४—६; सा. ७६३—७६५

ऋ. १.१५.६

युवं दक्षं धृतव्रत मित्रावरुण दूळभम्। ऋतुना यज्ञमाशाथे ।।६।।

ऋ. १.2३.४—६

मित्रं वयं हवामहे वरुणं सोमपीतये। जज्ञानां पूतदक्षसा ।।४।।
ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती। ता मित्रावरुणा हुवे ।।५।।
वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। करतां नः सुराधसः ।।६।।

सा. ७६३—७६५

मित्रं वयं हवामहे वरुणं सोमपीतये। या जाता पूतदक्षसा ।।१।।
ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती। ता मित्रावरुणा हुवे ।।2।।
वरुणः प्रविता भुवन्मित्रो विश्वाभिरूतिभिः। कारतां नः सुराधसः ।।३।।

१६. यजत आत्रेयः — ऋ. ५.६७.१—५; ५.६८.१—५; सा. १४६५—१४६७

ऋ. ५.६७.१—५

बळित्था देव निष्कृतमादित्या यजतं बृहत्। वरुण मित्रार्यमन्वर्षिष्ठं क्षत्रमाशाथे ।।१।।
आ यद्योनि हिरण्ययं वरुण मित्र सदथः। धर्तारा चर्षणीनां यन्तं सुम्नं रिशादसा ।।2।।
विश्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा। व्रता पदेव सश्चिरे पान्ति मर्त्यं रिषः ।।३।।
ते हि सत्या ऋतस्पृश ऋतावानो जनेजने। सुनीथासः सुदानवोंऽहोश्चिदुरुचक्रयः ।।४।।
को नु वां मित्रास्तुतो वरुणो वा तनूनाम्। तत्सु वामेषते मतिरत्रिभ्य एषते मतिः ।।५।।

ऋ. ५.६८.१—५

प्र वो मित्राय गायत वरुणाय विपा गिरा। महिक्षत्रावृतं बृहत् ।।१।।
सम्राजा या घृतयोनि मित्रश्चोभा वरुणश्च। देवा देवेषु प्रशस्ता ।।2।।
ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वां क्षत्रं देवेषु ।।३।।
ऋतमृतेन सपन्तेषिरं दक्षमाशाते। अद्रुहा देवौ वर्धेते ।।४।।

वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः। बृहन्तं गर्तमाशाते ।।५।।

सा. १४६५–१४६७

ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वां क्षत्रं देवेषु ।।१।।

ऋतमृतेन सपन्तेषिरं दक्षमाशाते। अद्रुहा देवौ वर्धते ।।2।।

वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः। बृहन्तं गर्तमाशाते ।।३।।

२०. रातहव्य आत्रेयः – ऋ. ५.६५.१–६; ५.६६.१–६

ऋ. ५.६५.१–६

यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः। वरुणो यस्य दर्शतो मित्रो वा वनते गिरः ।।१।।

ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा। ता सत्पती ऋतावृध ऋतावाना जनेजने ।।2।।

ता वामियानोऽवसे पूर्वा उप ब्रुवे सचा। स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने ।।३।।

मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते। मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः ।।४।।

वयं मित्रस्यावसि स्याम सप्रथस्तमे। अनेहसस्त्वोतयः सत्रा वरुणशेषसः ।।५।।

युवं मित्रेमं जनं यतथः सं च नयथः ।

मा मघोनः परि ख्यतं मो अस्माकमृषीणां गोपीथे न उरुष्यतम् ।।६।।

ऋ. ५.६६.१–६

आ चिकितान सुक्रतू देवौ मर्त रिशादसा। बरुणाय ऋतपेशसे दधीत प्रयसे महे ।।१।।

ता हि क्षत्रमविह्रुतं सम्यगसुर्य१माशाते। अध व्रतेव मानुषं स्व१र्ण धायि दर्शतम् ।।2।।

ता वामेषे रथानामुर्वीं गव्यूतिमेषाम्। रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ।।३।।

अधा हि काव्या युवं दक्षस्य पूर्भिरद्भुता। नि केतुना जनानां चिकेथे पूतदक्षसा ।।४।।

तदृतं पृथिवि बृहच्छ्रव एष ऋषीणाम्। ज्रयसानावरं पृथ्वति क्षरन्ति यामभिः ।।५।।

आ यद्वामीयचक्षसा मित्र वयं च सूरयः। व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये ।।६।।

2१. वरुणः – य. १०.१६

हिरण्यरूपाऽउषसो विरोकऽउभाविन्द्राऽउदिथः सूर्य्यश्च।

अरोहतं वरुण मित्र गर्त्तं ततश्चक्षाथामदितिं दितिं च मित्रोऽसि वरुणोऽसि ।।१६।।

22. वसिष्ठः – ऋ. ७.५०.१; ७.६०.2–१2; ७.६१.१–७; ७.६2.४–६; ७.६३.५; ६; ७.६४.१–५; ७.६५.१–५; ७.६६.१–३; १७–१९

ऋ. ७.५०.१

आ मां मित्रावरुणेह रक्षतं कुलाययद्विश्वयन्मा न आ गन् ।

अजकावं दुर्दृशीकं तिरो दधे मा मां पद्येन रपसा विदत्त्सरुः ।।१।।

ऋ. ७.६०.2–१2

एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन् ।

विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन् ।।2।।

अयुक्त सप्त हरितः सधस्थाद्या ईं वहन्ति सूर्यं घृताचीः ।

धामानि मित्रावरुणा युवाकुः सं यो यूथेव जानिमानि चष्टे ।।३।।

उद्वां पृक्षासो मधुमन्तो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः ।

यस्मा आदित्या अध्वनो रदन्ति मित्रो अर्यमा वरुणः सजोषाः ।।४।।

इमे चेतारो अनृतस्य भूरेर्मित्रो अर्यमा वरुणो हि सन्ति ।

इम ऋतस्य वावृधुर्दुरोणे शग्मासः पुत्रा अदितेरदब्धाः ।।५।।

इमे मित्रो वरुणो दूळभासोऽचेतसं चिच्चितयन्ति दक्षैः ।

अपि क्रतुं सचेतसं वतन्तस्तिरश्चिदंहः सुपथा नयन्ति ।।६।।

इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति ।

प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन् ।।७।।

यद् गोपावददितिः शर्म भद्रं मित्रो यच्छन्ति वरुणः सुदासे ।

तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः ।।८।।
अव वेदिं होत्राभिर्यजेत रिपः काश्चिद्वरुणध्रुतः सः ।
परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकम् ।।९।।
सस्वश्चिद्धि समृतिस्त्वेष्येषामपीच्येन सहसा सहन्तै ।
युष्मद्भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः ।।१०।।
यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः ।
सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु ।।११।।
इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ।।१2।।

ऋ. ७.६१.१–७

उद्वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान् ।
अभि यो विश्वा भुवनानि चष्टे सं मन्युं मर्त्येष्वा चिकेत ।।१।।
प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति ।
यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे ।।2।।
प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद् बृहतः सुदान् ।
स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणाा ।।३।।
शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा ।
अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ।।४।।
अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षम् ।
द्रुहः सचन्ते अनृता जनानां न वां निण्यान्यचिते अभूवन् ।।५।।
समु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः ।
प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ।।६।।
इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ।।७।।

ऋ. ७.६2.४–६

द्यावाभूमी आदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे ।
मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम् ।।४।।
प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ।।५।।
नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ।।६।।

ऋ. ७.६३.५–६

यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ।।५।।
नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ।।६।।

ऋ. ७.६४.१–५

दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन् ।
हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त।।१।।
आ राजाना मह ऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक् ।
इळां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जीरदानू ।।2।।
मित्रस्तन्नो वरुणो देवो अर्यः प्र सधिष्ठेभिः पथिभिर्नयन्तु ।

ब्रवद्यथा न आदरिः सुदास इषा मदेम सह देवगोपाः ।।३।।
यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च ।
उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम् ।।४।।
एष स्तोमो वरुणा मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पृरन्धीर्यूयं पात स्वस्तिभिः सदा नः ।।५।।

ऋ. ७.६५.१–५

प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षम् ।
ययोरसुर्य१ मक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु ।।१।।
ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः ।
अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ।।2।।
ता भूरिपाशवनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ।।३।।
आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतिळाभिः ।
प्रतिवामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ।।४।।
एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरन्धीर्यूयं पात स्वस्तिभिः सदा नः ।।५।।

ऋ. ७.६६.१–३

प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः। नमस्वान्तुविजातयोः ।।१।।
या धारयन्त देवाः सुदक्षा दक्षपितरा। असुर्याय प्रमहसा ।।2।।
ता नः स्तिपा तनूपा वरुण जरितॄणाम्। मित्र साधयतं धियः ।।३।।

ऋ. ७.६६.१७–१९

काव्येभिरदाभ्या यातं वरुण द्युमत्। मित्रश्च सोमपीतये ।।१७।।
दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा। पिबतं सोममातुजी ।।१८।।
आ यातं मित्रावरुणा जुषाणावाहुतिं नरा। पातं सोममृतावृधा ।।१९।।

2३. विश्वमना वैयश्वः – ऋ. ८.2५.१–९; १३–2४

ऋ. ८.2५.१–९

ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया। ऋतवाना यजसे पूतदक्षसा ।।१।।
मित्रा तना न रथ्या३ वरुणो यश्च सुक्रतुः। सनात्सुजाता तनया धृतव्रता ।।2।।
ता माता विश्ववेदसासुर्याय प्रमहसा। मही जजानादितिर्ऋतावरी ।।३।।
महान्ता मित्रावरुणा सम्राजा देवावसुरा। ऋतावानावृतमा घोषतो बृहत् ।।४।।
नपाता शवसो महः सूनू दक्षस्य सुक्रतू। सृप्रदानू इषो वास्त्वधि क्षितः ।।५।।
सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः। नभस्वतीरा वां चरन्तु वृष्टयः ।।६।।
अधि या बृहतो दिवो३भि यूथेव पश्यतः। ऋतावाना सम्राजा नमसे हिता ।।७।।
ऋतावाना नि षेदतुः साम्राज्याय सुक्रतु। धृतव्रता क्षत्रिया क्षत्रमाशतुः ।।८।।
अक्ष्णश्चिद्गातुवित्तरानुल्बणेन चक्षसा। नि चिन्मिषन्ता निचिरा नि चिक्यतुः ।।९।।

ऋ. ८.2५.१३–2४

तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यम्। मित्रो यत्पान्ति वरुणो यदर्यमा ।।१३।।
उत नः सिन्धुरपां तन्मरुतस्तदश्विना। इन्द्रो विष्णुर्मीढ्वांसः सजोषसः ।।१४।।
ते हि ष्मा वनुषो नरोऽभिमातिं कयस्य चित्। तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः ।।१५।।
अयमेक इत्था पुरूरु चष्टे वि विश्पतिः। तस्य व्रतान्यनु व्रतान्यनु वश्चरामसि ।।१६।।
अनु पूर्वाण्योक्या साम्राज्यस्य सश्चिम। मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ।।१७।।
परि यो रश्मिना दिवोऽनतान्ममे पृथिव्याः। उभे आ पप्रौ रोदसी महित्वा ।।१८।।
उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः। अग्निर्न शुक्रः समिधान आहुतः ।।१९।।

वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः। ईशे हि पित्वोऽविषस्य दावने ।।20।।
तत्सूर्यं रोदसी उभे दोषा वस्तोरुप ब्रुवे। भोजेष्वस्माँ अभ्युच्चरा सदा ।।21।।
ऋज्रमुक्षण्यायने रजतं हरयाणे। रथं युक्तमसनाम सुषामणि ।।22।।
ता मे अश्व्यानां हरीणां नितोशना। उतो नु कृत्व्यानां नृवाहसा ।।23।।
स्मदभीशू कशावन्ता विप्रा नविष्ठया मती। महो वाजिनावर्वन्ता सचासनम् ।।24।।

२४. विश्वामित्रः – य. 21.८

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ।।८।।

२५. विश्वामित्रो गाथिनः – सा. ६६३–६६४

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ।।1।।
उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः। द्रघिष्ठाभिः शुचिव्रता ।।2।।

२६. विश्वामित्रो गाथिनो जमदग्नि र्वा – ऋ. ३.६2.१६–१८; सा. ६६५

ऋ. ३.६2.१६–१८

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ।।१६।।
उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः। द्राघिष्ठाभिः शुचिव्रता ।।१७।।
गृणाना जमदग्निना योनावृतस्य सीदतम्। पातं सोममृतावृधा ।।१८।।

सा. ६६५

गृणाना जमदग्निना योनावृतस्य सीदतम्।पातं सोममृतावृधा ।।३।।

२७. शकपूतो नार्मेधः – ऋ. १०.१३2.2–७

ता वां मित्रावरुणा धारयत्क्षिती सुषुम्नेषितत्वता यजामसि ।
युवोः क्राणाय सख्यैरभि ष्याम रक्षसः ।।2।।
अधा चिन्नु यद्दिधिषामहे वामभि प्रियं रेक्णः पत्यमानाः ।
दद्वाँ वा यत्पुष्यति रेक्णः सम्वारन्नकिरस्य मघानि ।।३।।
असावन्यो असुर सूयत द्यौस्त्वं विश्वेषां वरुणासि राजा ।
मूर्धा रथस्य चाकन्नैतावतैनसान्तकध्रुक् ।।४।।
अस्मिन्त्स्वे३ तच्छकपूत एनो हिते मित्रे निगतान्हन्ति वीरान् ।
अवोर्वा यद्धात्तनूष्ववः प्रियासु यज्ञियास्ववर्वा ।।५।।
युवोर्हि मातादितिर्विचेतसा द्यौर्न भूमिः पयसा पुपूतनि ।
अव प्रिया दिदिष्टन सूरो निनिक्त रश्मिभिः ।।६।।
युवं ह्यप्नराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदम् ।
ता नः कणूकयन्तीर्नृमेधस्तत्रे अंहसः सुमेधस्तत्रे अंहसः ।।७।।

२८. शम्भूः – अ. 2.2८.2

मित्र एनं वरुणो वा रिशादा जरामृत्युं कृणुतां संविदानौ ।
तदग्निर्होता वयुनानि विद्वान् विश्वा देवानां जनिमा विवक्ति ।।2।।

२९. श्रुतिविद् आत्रेयः – ऋ. ५.६2.१–६

ऋतेन ऋतमपिहितं ध्रुवं सूर्यस्य यत्र विमुचन्त्यश्वन् ।
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम् ।।१।।
तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे ।
विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त ।।2।।
अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः ।
वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ।।३।।
आ वामश्वासः सुयुजो वहन्तु यतरश्मय उप यन्त्ववर्वाक् ।
घृतस्य निर्णिग्नु वर्तते वामुप सिन्धवः प्रदिवि क्षरन्ति ।।४।।
अनु श्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा ।

नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः ।।५।।
अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वन्तः ।
राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ।।६।।
हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य१ श्वाजनीव ।
भद्रे क्षेत्रे निमिता तिल्विनले वा सनेम मध्वो अधिगर्त्यस्य ।।७।।
हिरण्यरूपमुषसो व्युष्टावयः स्थुणमुदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ।।८।।
यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।
तेन नो मित्रावरुणाववविष्टं सिषासन्तो जिगीवांसः स्याम ।।९।।

६०८. मित्रावरुणौ आदित्याश्च

१. जमदग्निः भार्गवः – ऋ. ८.१०१.५

प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो। वरूथ्यं१ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ।।५।।

६०९. मित्रावरुणौ नभस्यश्च

१. गृत्समदः शौनकः – ऋ. 2.३६.६

जुषेथां यज्ञं बोधतं दृवस्य मे सत्तो होता निविदः पूर्व्या अनु ।
अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ।।६।।

६१०. मित्रादयो विश्वेदेवाः

१. अथर्वा

अ. ३.८.१–४

आ यातु मित्र ऋतुभिः कल्पमानः संवेशयन् पृथिवीमुस्रियाभिः।
अथास्मभ्यं वरुणो वायुरग्निर्बृहद् राष्ट्रं संवेश्यंदधातु ।।१।।
धाता रातिः सवितेदं जुषन्तामिन्द्रस्त्वष्टा प्रति हर्यन्तु मे वचः ।
हुवे देवीमदितिं शूरपुत्रां सजातानां मध्यमेष्ठा यथासानि ।।2।।
हुवे सोमं सवितारं नमोभिर्विश्वानादित्याँ अहमुत्तरत्वे ।
अयमग्निर्दीदायाद् दीर्घमेव सजातैरिद्धोऽप्रतिब्रुवद्भिः ।।३।।
इहेदसाथ न परो गमाथेर्यो गोपाः पुष्टपतिर्व आजत् ।
अस्मै कामायोप कामिनीर्विश्वे वो देवा उपसंयन्तु ।।४।।

६११. मृत्युः

१. अथर्वा – अ. ५.2४.१३

मृत्युः प्रजानामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।१३।।

2. अथर्वा (स्वस्त्ययनकामः) – अ. ६.१३.१–३

नमो देववधेभ्यो नमो राजवधेभ्यः। अथो ये विश्यानां वधास्तेभ्यो मृत्यो नमोऽस्तु ते ।।१।।
नमस्ते अधिवाकाय परावाकाय ते नमः। सुमत्यै मृत्यो ते नमो दुर्मत्यै त इदं नमः ।।2।।
नमस्ते यातुधानेभ्यो नमस्ते भेषजेभ्यः। नमस्ते मृत्यो मूलेभ्यो ब्राह्मणेभ्य इदं नमः ।।३।।

३. आयुर्वर्चोबलकामः – अ. ६.६३.३

अयमस्ये द्रुपदे बोधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ।।३।।

४. द्रुह्वणः (आयुर्वर्चोबलकामः) – अ. ६.६३.३

अयमस्ये द्रुपदे बोधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।

यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ।।३।।

५. **भृगुः – अ. १2.2.2१–३३**

परं मृत्यो अनु परेहि पन्थां यस्त एष इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमीहेमे वीरा बहवो भवन्तु ।।2१।।
इमे जीवा वि मृतैराववृत्रन्नभूद् भद्रा देवहूतिर्नो अद्य ।
प्रांचो अगाम नृतये हसाय सुवीरासो विदथमा वदेम ।।22।।
इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।
शतं जीवन्तः शरदः पुरूचीस्तिरो मृत्युं दधतां पर्वतेन ।।2३।।
आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यदि स्थ ।
तान् वस्त्वष्टा सुजनिमा सजोषाः सर्वमायुर्नयतु जीवनाय ।।2४।।
यथाहान्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति साकम् ।
यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम् ।।2५।।
अश्मन्वती रीयते सं रभध्वं प्र तरता सखायः ।
अत्रा जहीत ये असन् दुरेवा अनमीवानुत्तरेमाभि वाजान् ।।2६।।
उत्तिष्ठता प्र तरता सखायोऽश्मन्वती नदी स्यन्दत इयम् ।
अत्रा जहीत ये असन्नशिवाः शिवान्त्स्योनानुत्तरेमाभि वाजान् ।।2७।।
वैश्वदेवीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।
अतिक्रामन्तो दुरिता पदानि शतं हिमाः सर्ववीरा मदेम ।।2८।।
उदीचीनैः पथिभिर्वायुमद्भिरतिक्रामन्तोऽवरान् परेभिः ।
त्रिः सप्त कृत्व ऋषयः परेता मृत्युं प्रत्यौहन् पदयोपनेन ।।2९।।
मृत्योः पदं योपयन्त एत द्राघीय आयुः प्रतरं दधानाः ।
आसीना मृतयुं नुदता सधस्थेऽथ जीवासो विदथमा वदेम ।।३०।।
इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं स्पृशन्ताम् ।
अनश्रवो अनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ।।३१।।
व्याकरोमि हविषाहमेतौ तौ ब्रह्मणा व्य१हं कल्पयामि ।
स्वधां पितृभ्यो अजरां कृणोमि दीर्घेणायुषा समिमान्त्सृजामि ।।३2।।
यो नो अग्निः पितरो हृत्स्व१न्तराविवेशामृतो मर्त्येषु ।
मय्यहं तं परि गृह्णामि देवं मा सो अस्मान् द्विक्षत मा वयं तम् ।।३३।।

६१2. मेखला

१. **अगस्त्यः – अ. ६.१३३.१–५**

य इमां देवो मेखलामाबबन्ध यः संननाह य उ नो युयोज ।
यस्य देवस्य प्रशिषा चरामः स पारमिच्छात् स उ नो वि मुंचात् ।।१।।
आहुतास्यभिहुत ऋषीणामस्यायुधम्। पूर्वा व्रतस्य प्राश्नती वीरघ्नी भव मेखले ।।2।।
मृत्योरहं ब्रह्मचारी यदस्मि निर्याचन् भूतात् पुरुषं यमाय ।
तमहं ब्रह्मणा तपसा श्रमेणानयैनं मेखलया सिनामि ।।३।।
श्रद्धाया दुहिता तपसोऽधि जाता स्वसा ऋषीणां भूतकृतां बभूव ।
सा नो मेखले मतिमा धेहि मेधामथो नो धेहि तप इन्द्रियं च ।।४।।
यां त्वा पूर्वे भूतकृत ऋषयः परिबेधिरे। सा त्वं परि ष्वजस्व मां दीर्घायुत्वाय मेखले ।।५।।

६१३. मेघः

१. **प्रजापतिः – य. ४.३**

महीनां पयोऽसि वर्च्चोदा ऽ असि वर्च्चो मे देहि ।
वृत्रस्यासि कनीनकश्चक्षुर्दा ऽ असि चक्षुर्मे देहि ।।३।।

६१४. मेधातिथिः काण्वः

१. मेधातिथिः काण्वः – ऋ. १.१३.७

नक्तोषासा सुपेशसास्मिन् यज्ञ उप ह्वये। इदं नो बर्हिरासदे।।७।।

2. मेधातिथिः काण्वः – ऋ. १.22.१६; सा. १६७४

ऋ. १.22.१६

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धामभिः ।।१६।।

सा. १६७४

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्या अधि सानवि ।।६।।

६१५. मेधाविनः

१. विश्वेदेवाः – य. १४.2४

अग्नेर्भागोऽसि दीक्षायाऽआधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोमः ।
इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रं स्पृतं पंचदश स्तोमः ।
नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रं स्पृतं सप्तदश स्तोमः ।
मित्रस्य भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वात स्पृतऽएकविंश स्तोमः ।।2४।।

६१६. मेषः

१. शौनकः – अ. ६.१०८.१–३; ५

अ. ६.१०८.१–३

त्वं नो मेघे प्रथमा गोभिरश्वेभिरा गहि। त्वं सूर्यस्य रश्मिभिस्त्वं नो असि यज्ञिया ।।१।।
मेधामहं प्रथमां ब्रह्मण्वतीं ब्रह्मजूतामृषिष्टुताम्। प्रपीतां ब्रह्मचारिभिर्देवानामवसे हुवे ।।2।।
यां मेधामृभवो विदुर्यां मेधामसुरा विदुः। ऋषयो भद्रां मेधां यां विदुस्तां मय्या वेशयामसि।।३।।

अ. ६.१०८.५

मेधां सायं मेधां प्रातर्मेधां मध्यन्दिनं परि। मेधां सूर्यस्य रश्मिभिर्वचसा वेशयामहे ।।५।।

६१७. यक्ष्मघ्नम्

१. विवृहा काश्यपः – ऋ. १०.१६३.१–६

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ।।१।।
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोष्ण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते ।।2।।
आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि ।
यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते ।।३।।
ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं श्रेणिभ्यां भासदाद्भंससो वि वृहामि ते ।।४।।
मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ।।५।।
अंगादंगाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ।।६।।

६१८. यक्ष्मनाशनः

१. ब्रह्म – अ. 2०.९६.६–१०; १७–2३

अ. 2०.९६.६–१०

मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।

ग्राहिर्जग्राह यद्येतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ।।६।।
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थादस्पार्शमेनं शतशारदाय ।।७।।
सहस्राक्षेण शतवीर्येण शतायुषा हविषाहार्षमेनम् ।
इन्द्रो यथैनं शरदो नयात्यति विश्वस्य दुरितस्य पारम् ।।८।।
शतं जीव शरदो वर्धमानः शतं हेमन्तांछतमु वसन्तान् ।
शतं त इन्द्रो अग्निः सविता बृहस्पतिः शतायुषा हविषाहार्षमेनम् ।।९।।
आहार्षमविदं त्वा पुनरागाः पुनर्णवः ।
सर्वांग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ।।१०।।

अ. २०.९६.१७–२३

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।
यक्ष्मं शीर्षण्यं मस्तिष्काजिह्वाया वि वृहामि ते ।।१७।।
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोषण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते ।।१८।।
हृदयात् ते परि क्लोम्नो हलीक्ष्णात् पार्श्वाभ्याम् ।
यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वि वृहामसि ।।१९।।
आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि ।
यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्या वि वृहामि ते ।।२०।।
ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं भसद्यं१ श्रोणिभ्यां भासदं भंससो वि वृहामि ते ।।२१।।
अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमनिभ्यः ।
यक्ष्मं पाणिभ्यामङ्गुलिभ्यो नखेभ्यो वि वृहामि ते ।।२२।।
अंगेअङ्गे लोम्निलोम्नि यस्ते पर्वणिपर्वणि ।
यक्ष्मं त्वचस्यं ते वयं कश्यपस्य वीवर्हेण विष्वंचं वि वृहामसि ।।२३।।

६१९. यक्ष्मनाशनम्

१. अथर्वा – अ. ७.९१.१

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं नः कुणोतु सुवीर्यस्य पतयः स्याम ।।१।।

2. पूरणः – अ. २०.९६.६–१०

मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।
ग्राहिर्जग्राह यद्येतदेनं तस्या इन्द्राग्नी प्र ममुक्तमेनम् ।।६।।
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थादस्पार्शमेनं शतशारदाय ।।७।।
सहस्राक्षेण शतवीर्येण शतायुषा हविषाहार्षमेनम् ।
इन्द्रो यथैनं शरदो नयात्यति विश्वस्य दुरितस्य पारम् ।।८।।
शतं जीव शरदो वर्धमानः शतं हेमन्तांछतमु वसन्तान् ।
शतं त इन्द्रो अग्निः सविता बृहस्पतिः शतायुषा हविषाहार्षमेनम् ।।९।।
आहार्षमविदं त्वा पुनरागाः पुनर्णवः ।
सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ।।१०।।

३. भृग्वंगिरा – अ. ३.७.६–७; १.१२.१–४; ६.2.१–३; ६.९१.१–2

अ. ३.७.६–७

यदासुतेः क्रियमाणायाः क्षेत्रिय त्वा व्यानशे। वेदाहं तस्य भेषजं क्षेत्रियं नाशयामि त्वत् ।।६।।
अपवासे नक्षत्राणामपवास उषसामुत। अपास्मत् सर्वं दुर्भूतमप क्षेत्रियमुच्छतु ।।७।।

अ. १.१2.१–४

जरायुजः प्रथम उस्रियो वृषा वातभ्रजा स्तनयन्नेति वृष्ट्या ।
स नो मृडाति तन्व ऋजुगो रुजन् य एकमोजस्त्रेधा विचक्रमे ।।१।।
अंगेअंगे शोचिषा शिश्रियाणं नमस्यन्तस्त्वा हविषा विधेम ।
अंकान्त्समंकान् हविषा विधेम यो अग्रभीत् पर्वास्या ग्रभीता ।।2।।
मुंच शीर्षक्त्या उत कास एनं परुष्परुराविवेशा यो अस्य ।
यो अभ्रजा वातजा यश्च शुष्मो वनस्पतीन्त्सचतां पर्वतांश्च ।।३।।
शं मे परस्मै गायत्राय शमस्त्ववराय मे ।
शं मे चतुर्भ्यो अंगेभ्यः शमस्तु तन्वे३ मम ।।४।।

अ. ६.६१.१–2

इमं यवमष्टायोगैः षड्योगेभिरचर्कृषुः। तेना ते तन्वो३रपोऽपाचीनमप व्यये ।।१।।
न्य१ग् वातो वाति न्यक् तपति सूर्यः। नीचीनमघ्न्या दुहे न्यग् भवतु ते रपः ।।2।।

६2०. यक्ष्मनाशनोऽग्निः

१. भृग्वंगिरा – अ. १.2५.१–४

यदग्निरापो अदहत् प्रविश्य यत्राकृण्वन् धर्मधृतो नमांसि ।
तत्र त आहुः परमं जनित्रं स नः संविद्वान् परि वृङ्ग्धि तक्मन् ।।१।।
यद्यर्चिर्यदि वासि शोचिः शकल्येषि यदि वा ते जनित्रम् ।
हडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि तक्मन् ।।2।।
यदि शोको यदि वाभिशोको यदि वा राज्ञो वरुणस्यासि पुत्रः ।
हडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि तक्मन् ।।३।।
नमः शीताय तक्मने नमो रूराय शोचिषे कृणोमि ।
यो अन्येद्युरुभयद्युरभ्येति तृतीयकाय नमो अस्तु तक्मने ।।४।।

६2१. यक्ष्मनाशिनी दमपत्त्योः

१. सूर्या सावित्री – ऋ. १०.८५.३१

ये वध्वश्चन्द्र वहतुं यक्ष्मा यन्ति जनादनु। पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ।।३१।।

६22. यक्ष्मविवर्हणम्

१. ब्रह्म – अ. 2.३३.१–७

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ।।१।।
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोषण्य१मंसाभ्यां बाहुभ्यां वि वृहामि ते ।।2।।
हृदयात् ते परि क्लोम्नो हलीक्ष्णात् पार्श्वाभ्याम् ।
यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वि वृहामसि ।।३।।
आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि ।
यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्यां वि वृहामि ते ।।४।।
ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं भसद्यं१ श्रोणिभ्यां भासदं भंससो वि वृहामि ते ।।५।।
अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमानिभ्यः ।
यक्ष्मं पाणिभ्यामङ्गुलिभ्यो नखेभ्यो वि वृहामि ते ।।६।।
अंगेअङ्गे लोम्निलोम्नि यस्ते पर्वणिपर्वणि ।
यक्ष्मं त्वचस्यं ते वयं कश्यपस्य वीवर्हेण विष्वंचं वि वृहामसि ।।७।।

६2३. यजमानः

१. जमदग्निः भार्गवः – य. 2९.१2

यदक्रन्दः प्रथमं जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यं महि जातं तेऽअर्वन् ।।१2।।

2. देववातः – य. ६.४०; १०.१८; १९

य. ६.४०

इमं देवाऽअसपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ।
इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा ।।४०।।

य. १०.१८–१९

इमं देवाऽअसपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय।
इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा ।।१८।।
प्र पर्वतस्य वृषभस्य पृष्ठान्नवश्चरन्ति स्वसिचऽइयानाः। ताऽआववृत्रन्नधरागुदक्ताऽअहिं
बुध्न्यमनु रीयमाणाः। विष्णो र्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ।।१९।।

३. मधुच्छन्दाः – य. १2.६५

यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।
तं ते विष्याम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः। नमो भूत्यै येदं चकार ।।६५।।

४. वत्सः – य. ४.३४

भद्रो मेऽसि प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि ।
मा त्वा परिपरिणो विदन् मा त्वा परिपन्थिनो विदन् मा त्वा वृकाऽअघायवो विदन्। श्येनो भूत्वा
परापत यजमानस्य गृहान् गच्छ तन्नौ सँस्कृतम् ।।३४।।

५. वरुणः – य. १०.८; १०–१४

य. १०.८

क्षत्रस्योल्वमसि क्षत्रस्य जराय्वसि क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसीन्द्रस्य वार्त्रध्नमसि
मित्रस्यासि वरुणस्यासि त्वयायं वृत्र वधेत्। दृवासि रुजासि क्षुमासि। पातैनं प्रांचं पातैनं प्रत्यंचं
पातैनं तिर्यंचं दिग्भ्यः पात ।।८।।

य. १०.१०–१४

अवेष्टा दन्दशूक्राः प्राचीमा रोह गायत्री त्वाऽवतु रथन्तरं साम त्रिवृत्स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम्।१०।
दक्षिणामा रोह त्रिष्टुप् त्वाऽवतु बृहत्साम पंचदश स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम् ।।११।।
प्रतीचीमा रोह जगती त्वाऽवतु वैरूपं साम सप्तदा स्तोमो वर्षा ऋतुर्विड् द्रविणम् ।।१2।।
उदीचीमा रोहानुष्टुप् तवाऽवतु वैराजं सामैकविंश स्तोमः शरदृतुः फलं द्रविणम् ।।१३।।
ऊर्ध्वामा रोह पङ्क्तिस्त्वाऽवतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रिंशौ स्तोमौ हेमन्तशिशिरावृतू वर्चो
द्रविणं प्रत्यस्तं नमुचेः शिरः ।।१४।।

६. शुनः शेपः – य. १०.2८

अभिभूरस्येतास्ते पंच दिशः कल्पन्तां ब्रह्मँस्त्वं ब्रह्मासि सवितासि सत्यप्रसवो वरुणोऽसि
सत्यौजाऽइन्द्रोऽसि विशौजा रुद्रोऽसि सुशेवः । बहुकार श्रेयस्कर भूयस्करेन्द्रस्य वज्रोऽसि तेन
मे रध्य ।।2८।।

७. हैमवर्चिः – य. १९.2०

पशुभिः पशूनाप्नोति पुरोडाशैर्हवींष्या। छन्दोभिः सामिधेनीर्याजयाभिर्वषट्कारान् ।।2०।।

६2४. यजमानर्त्विजः

१. स्वस्त्यात्रेयः – य. 2१.४५

होता यक्षदिन्द्रमृषभस्य हविष आवयदद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो
घसन्नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां
पार्श्वतः श्रोणितः शितामत उत्सादतोऽंगादंगादवत्तानां करदेवमिन्द्रो जुषतां हविर्होतर्यज ।।४५।।

६2५. यज्ञः

१. अग्निः – य. 2७.१३; १७

य. 2७.१३

मध्वा यज्ञं नक्षसे प्रीणानो नराशंसोऽअग्ने। सुकृद्देवः सविता विश्ववारः ।।१३।।

य. 2७.१७

तेऽअस्य योषणे दिव्ये न योनाऽउषासानक्ता। इमं यज्ञमवातामध्वरं नः ।।१७।।

2. अप्रतिरथः – य. १७.५७

वीतं हविः शमितं शमिता यजध्यै तुरीयो यज्ञो यत्र हव्यमेति।
ततो वाकाऽआशिषो नो जुषन्ताम् ।।५७।।

३. आथर्वणः दध्यङ् – य. ३७.४–६; ८

य. ३७.४–६

देव्यो वम्र्यो भूतस्य प्रथमजा मुखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्या ।
मखाय त्वा मखस्य त्वा शीर्ष्णो ।।४।।
इयत्यग्रऽआसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णो ।।५।।
इन्द्रस्यौजः स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखय त्वा शीष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ।।६।।

य. ३७.८

मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णो मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे। मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णो। मखाय त्वा मखस्य त्वा शीष्णे। मखाय त्वा मखस्य त्वाा शीर्ष्णे। ।।८।।

४. और्णवाभः – य. ३.४८–४६

अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः।
अव देवैर्देवकृतमेनोऽ यासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।।४८।।
पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहाऽइषमूर्जं शतक्रतो ।।४६।।

५. कश्यपः – य. ८.६३

आपवस्व हिरण्यवदश्ववत्सोम वीरवत्। वाजं गामन्तमाभर स्वाहा ।।६३।।

६. गालवः – य. १८.५६

इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः। तस्य नऽइष्टस्य प्रीतस्य द्रविणेहागमेः ।।५६।।

७. गोतमः – य. ५.३; १३; 2५.2६; 2८; 2६

य. ५.३

भवतं नः समनसौ सचेतसावरेपसौ ।
मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ।।३।।

य. ५.१३

ध्रुवोऽसि पृथिवी दृंह ध्रुवक्षिदस्यन्तरिक्षं दृंहाच्युतक्षिदसि दिवं दृंहाग्नेः पुरीषमसि ।।१३।।

य. 2५.2६

एष छागः पुरोऽअश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ।।2६।।

य. 2५.2८–2६

होताध्वर्युरावयाऽअग्निमिन्धो ग्रावग्राभऽउत शंस्ता सुविप्रः ।

तेन यज्ञेन स्वरङ्कृतेन स्विष्टेन वक्षणा आ पृणध्वम् ।।2८।।
यूपव्रस्काऽउत ये यूपवाहश्चषालं येऽअश्वयूपाय तक्षिति ।
ये चार्वते पचनंसम्भरन्त्युतो तेषामभिगूर्त्तिर्नऽइन्वतु ।।2९।।

८. **विधृतिः – य. १७.६2**

देवहूर्यज्ञऽआ च वक्षत्सुम्नहूर्यज्ञऽआ च वक्षत्। यज्ञदग्निर्देवो देवाँ2ऽ आ च वक्षत् ।।६2।।

९. **विश्वकर्मा – य. १८.६४–६५**

यद्दत्तं यत्परादानं यत्पूर्त्तं याश्च दक्षिणाः। तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ।।६४।।
यत्र धाराऽअनपेता मधोर्घृतस्य च याः। तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ।।६५।।

१०. **विश्वामित्रः – य. १८.६३**

प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा। ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ।।६३।।

११. **शम्युः – य. 2७.४2**

यज्ञायज्ञा वोऽअग्नये गिरागिरा च दक्षसे। प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम।।४2।।

१2. **हैमवर्चिः – य. १९.१३; १६–१७; १९; 22; 2६–2८; ३०; ३१**

य. १९.१३

दीक्षायै रूपं शष्पाणि प्रायणीयस्य तोक्मानि ।
क्रयस्य रूपं सोमस्य लाजाः सोमांशवो मधु ।।१३।।

य. १९.१६–१७

आसन्दी रूपं राजासन्द्यै वेद्यै कुम्भी सुराधानी। अन्तरऽउत्तरवेद्या रूपं कारोतरो भिषक् ।।१६।।
वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम्। यूपेन यूपऽआप्यते प्रणीतोऽअग्निरग्निा।।१७।।

य. १९.१९

प्रौषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य। प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः ।।१९।।

य. १९.22

धानानांरूपं कुवलं परीवापस्य गोधूमाः। सक्तूनां रूपं बदरमुपवाकाः करम्भस्य ।।22।।

य. १९.2६–2८

अश्विभ्यां प्रातः सवनमिन्द्रेणैन्द्रं माध्यन्दिनम्। वैश्वदेवं सरस्वत्या तृतीयमाप्तं सवनम् ।।2६।।
वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम्।
कुम्भीभ्यामम्भृणौ सुते स्थालीभि सथालीराप्नोति।।2७।।
यजुर्भिराप्यन्ते ग्रहा ग्रहै स्तोमाश्च विष्टुतीः। छन्दोभिरुक्थाशस्त्राणि साम्नावभृथऽआप्यते।।2८।।

य. १९.३०–३१

व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धयां सत्यमाप्यते।।३०।।
एतावद्रूपं यज्ञस्य यद्देवैर्ब्रह्मणा कृतम्। तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणी सुते ।।३१।।

१३. **दध्यङ् आथर्वणः – य. ३७.४–६; ८**

य. ३७.४–६

देव्यो वम्र्यो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ।।४।।
इयत्यग्रऽआसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ।।५।।
इन्द्रस्यौजः स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ।।६।।

य. ३७.८

मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णो। मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे। मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे।

मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे।।८।।

१४. दीर्घतमा – य. ३८.११; १८–22; 2७; 2८

य. ३८.११

दिवि धाऽइमं यज्ञमिमं यज्ञं दिवि धाः। स्वाहाग्नये यज्ञियाय शं यजुर्भ्यः।।११।।

य. ३८.१८–22

या ते घर्म दिव्या शुग्या गायत्र्यां हविर्धाने ।
सा तऽआ प्यायतान्निष्ट्यायतां तस्य ते स्वाहा ।
या ते घर्मान्तरिक्षे शुग्या त्रिष्टुब्भ्याग्नीध्रे ।
सा तऽआ प्यायतान्निष्ट्यायतां तस्यै ते स्वाहा ।
या ते घर्म पृथिव्यां शुग्या जगत्यां सदस्या।
सा तऽआ प्यायतान्निष्ट्यायतां तस्यै ते स्वाहा।।१८।।
क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि ।
विशस्त्वा धर्मणा वयमनु क्रामाम सुविताय नव्यसे ।।१६।।
चतुः स्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः स नः सर्वायुः सप्रथाः।
अप द्वेषोऽअप ह्वरोऽन्यव्रतस्य सश्चिम ।।2०।।
घर्मैतत्ते पुरीषं तेन वर्द्धस्व चा च प्यायस्व ।
वर्द्धिषीमहि च वयमा च प्यासिषीमहि ।।2१।।
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः । सं सूर्य्येण दिद्युतदुदधिर्निधिः ।।22।।

य. ३८.2७–2८

मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः।
घर्मास्त्रिशुग्वि राजति विराजा ज्योतिषा सह ब्रह्मणा तेजसा सह ।।2७।।
पयसो रेतऽआभृतं तस्य दोहमशीमुत्तरामुत्तरां समाम् ।
त्विषः संवृक् क्रत्वे दक्षस्य ते सुषुम्णस्य ते सुषुम्णाग्निहुतः ।
इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमतऽउपहूतऽउपहूतस्य भक्षयामि।।2८।।

१५. दीर्घतमा औतथ्यः – य. ५.22–2३; 2५–2८

य. ५.22–2३

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आददे नार्यसी दमहं रक्षसां ग्रीवाऽअपिकृन्तामि ।
बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचं वद ।।22।।
रक्षोहणं बलगहनं वैष्णवीमिदमहं तं बलगमुत्किरामि यं मे निष्टयो यममात्यो निचखानेदमहं तं बलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहं तं बलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहं तं बलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्यांकिरामि।।2३।।

य. ५.2५–2८

रक्षोहणो वो वलगहनः प्रोक्षाामि वैष्णवान्नक्षोहणो वो बलगहनोऽवनयामि वैष्णवान्नक्षोहणो वो बलगहनोऽवस्तृणामि वैष्णवान्नक्षोहणौ वां बलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां बलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवा स्थ ।।2५।।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आददे नार्यसीदमहं रक्षसां ग्रीवाऽअपिकृन्तामि।
यवोऽसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ।।2६।।
उद्दिवं स्तभानान्तरिक्षं पृण दृंहस्व पृथिव्यां द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्मणा।ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि। ब्रह्म दृंह क्षत्रं दृंहायुर्दृंह प्रजां दृंह ।।2७।।

ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ।
घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ।।2८।।

१६. देवश्रवाः – य. ७.2६

यस्ते द्रप्स स्कन्दति यस्तेऽअंशुर्ग्रावच्युतो धिषणयोरुपस्थात्। अध्वर्य्योर्वा परि
वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कुतं स्वाहा देवानामुत्क्रमणमसि ।।2६।।

१७. देवाः – य. १८.४2

भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणाऽअप्सरस स्तावा नाम ।
स नऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा।।४2।।

१८. परमेष्ठी प्रजापतिः – य. १.2; ७; १४; १५; 2१; 2७–३१; 2.१; 2; ५

य. १.2

वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधा ऽ असि।
परमेण धाम्ना दृंहस्व मा ह्वार्मा ते यज्ञपतिह्र्वार्षीत् ।।2।।

य. १.७

प्रतयुष्टं रक्षः प्रतयुष्टा ऽ अरातयो निष्टप्तं रक्षो निष्टप्ता ऽ अरातयः। उर्वन्तरिक्षमन्वेमि ।।७।।

य. १.१४

शर्मास्यवधूतं रक्षोऽवधूता ऽ अरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेतु ।
आद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु ।।१४।।

य. १.१५

अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्यः
सऽइदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व। हविष्कृदेहि हविष्कृदेहि ।।१५।।

य. १.2१

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सं वपासि समापऽओषधीभिः समोषधयो रसेन।
सं रेवतीर्जगतीभिः पृच्यन्तां सं मधुमतीर्मधुमतीभिः पृच्यन्ताम् ।।2१।।

य. १.2७–३१

गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन
त्वा छन्दसा परिगृह्णामि।
सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च।।2७।।
पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम ।
यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो ऽ अनुदिश्य यजन्ते ।
प्रोक्षणीरासादय द्विषतो वधोऽसि ।।2८।।
प्रत्युष्टं रक्षः प्रत्युष्टा ऽ अरातयो निष्टप्त ं रक्षो निष्टप्ताऽअरातयः।
अनिशतोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै सम्मार्जिम।
प्रत्युष्टं रक्षः प्रत्युष्टा ऽ अरातयो निष्ट्प्तं रक्षो निष्टप्ताऽअरातयः।
अनिशिताऽसि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै सम्मार्ज्मि ।।2६।।
अदित्यै रास्नासि विष्णोर्वेष्पोऽस्यूर्जे त्वाऽदब्धेन त्वा चक्षुषावपश्यामि।
अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे ।।३०।।
सवितुस्त्वा प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
सवितुर्वः प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ।
तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि।।३१।।

य. 2.१–2

कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि बर्हिरसि
स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि ।।१।।

अदित्यै व्युन्दनमसि विष्णो स्तुपोऽस्यूर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यो भुवपतये
स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा ।।2।।

य. 2.५

समिदसि सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै। सवितुर्बाहू स्थ ऽ ऊर्णम्रदसं त्वा
स्तृणामि स्वामस्थं देवेभ्य ऽ आ त्वा वसवो रुद्रा ऽ आदित्याः सदन्तु ।।५।।

१६. प्रजापतिः – य. ४.५; ६; 22.३४; २५.१४; २७

य. ४.५–६

आ वो देवास ऽ ईमहे वामं प्रयत्यध्वरे। आ वो देवास ऽ आशिषो यज्ञियासो हवामहे ।।५।।
स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात् स्वाहा द्यावापृथिवीभ्यां स्वाहा वातादारभे स्वाहा।।६।।

य. 22.३४

एकस्मै स्वाहा द्वाभ्यां स्वाहा शताय स्वाहैकशताय स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा ।।३४।।

य. २५.१४

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽअपरीतास ऽ उद्भिदः ।
देवा नो यथा सदमिद्वृधे ऽ असन्नप्रायुवो रक्षितारो दिवेदिवे ।।१४।।

य. २५.२७

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग ऽ एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ।।२७।।

२०. मधुच्छन्दाः – य. ६.३४

श्वात्रा स्थ वृत्रतुरो राधोगूर्ताऽअमृतस्य पत्नीः ।
ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य पिबत ।।३४।।

२१. वत्सः – य. ४.2४; २६

य. ४.2४

एष ते गायत्रो भागऽइति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भागऽइति मे सोमाय ब्रूतादेष ते जागतोभागऽइति मे सोमाय ब्रूताच्छन्दोनामानां साम्राज्यंगच्छेति मे सोमाय ब्रूतादास्माकोऽसि शुक्रस्ते ग्रह्यो विचितस्त्वा विचिन्वन्तु ।।2४।।

य. ४.२६

शुक्रं त्वा शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन। सग्मे ते गोरस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे सहस्रपोषं पुषेयम् ।।२६।।

22. वत्सारः काश्यपः – य. ७.२०

उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः। पाहि यज्ञं पाहि यज्ञपतिं विष्णुस्त्वामिन्द्रियण
पातु विष्णुं त्वं पाह्यभि सवनानि पाहि ।।2०।।

२३. वसिष्ठः – य. ८.६2; ६.२१

य. ८.६2

यज्ञस्य दोहो विततः पुरुत्रा सोऽअष्टधा दिवमन्वाततान ।
स यज्ञ धुक्ष्व महि मे प्रजायां रायस्पोषं विश्वमायुरशीय स्वाहा ।।६2।।

य. ६.२१

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां
श्रोत्रं यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ।
प्रजापतेः प्रजाऽअभूम स्वर्देवाऽअगन्मामृताऽअभूम ।।२१।।

२४. ऋषि–? – अ. १६.१.१–३ (ऋषि ब्रह्मा)

सं सं स्रवन्तु नद्य१ः सं वाताः सं पतत्रिणः ।
यज्ञमिमं वर्धयता गिरः संस्राव्येण हविषा जुहोमि ।।१।।

इमं होमा यज्ञमवतेमं संस्रावणा उत ।
यज्ञमिमं वर्धयता गिरः संस्राव्येण हविषा जुहोमि ।।2।।
रूपंरूपं वयोवयः संरभ्यैनं परि ष्वजे ।
यज्ञमिमं चतस्रः प्रदिशो वर्धयन्तु संस्राव्येण हविषा जुहोमि ।।३।।

६2६. यज्ञः अग्नि–सवितारौ

१. परमेष्ठी प्रजापतिः परमेष्ठी प्रजापतिः – य. १.22

जनयत्यै त्वा संयौमीदमग्नेरिदमग्नीषोमयोरिषे त्वा घर्मोऽसि विश्वायुरुरुप्रथाऽ उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् अग्निष्टे त्वचं मा हिंसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ।।22।।

६2७. यज्ञपतिः

१. देवश्रवाः – य. ७.2७–2८

प्राणाय मे वर्चोदा वर्चसे पवस्व व्यानाय मे वर्चोदा वर्चसे पवस्वोदानाय मे वर्चोदा वर्चसे पवस्व वाचे मे वर्चोदा वर्चसे पवस्व क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व श्रोत्राय मे वर्चोदा वर्चसे पवस्व चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ।।2७।।
आत्मने मे वर्चोदा वर्चसे पवस्वौजसे मे वर्चोदा वर्चसे पवस्वायुषे मे वर्चोदा वर्चसे पवस्व विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ।।2८।।

६2८. यज्ञपुरुषः

१. वामदेवः – य. १७.६१–६६

चत्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ2ऽ आविवेश ।।६१।।
त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्रऽएकं सूर्यऽएकंजजान वेनादेकं स्वधया निष्टतक्षुः ।।६2।।
एताऽअर्षन्ति हृद्यात्समुद्रा च्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धाराऽअभिचाकशीमि हिरण्ययो वेतसो मध्यऽआसाम् ।।६३।।
सम्यक् स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः ।
एतेऽअर्षन्त्यूर्मयो घृतस्य मृगाऽइव क्षिपणोरीषमाणाः ।।६४।।
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धाराऽअरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ।।६५।।
अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमानासोऽअग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ।।६६।।
कन्याऽइव वहतुमेतवाऽउऽअंज्यंजा नाऽअभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽअभि तत्पवन्ते ।।६७।।
अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ।।६८।।
धामन्ते विश्वं भुवनमाधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे यऽआभृतस्तमश्याम मधुमन्तं तऽऊर्मिम् ।।६६।।

६2६. यज्ञमानः

१. गोतमः – य. 2५.४2

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथऽऋतुः।
या ते गात्राणामृतुथा कृणोमि ता–ता पिण्डानां प्र जुहोम्यग्नौ ।।४2।।

६३०. यमः

१. अथर्वा – अ. १८.१.१–३६; ४३; ४७–५०; ५३–६१; १८.2.१–३; ६–2८; ३०–३३;

३५–६०; १८.३.१–७३; १८.४.१–८०

अ. १८.१.१–३६

ओ चित् सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् ।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ।।१।।
न ते सखा सख्यं वष्ट्येतत् सलक्ष्मा यद् विषुरूपा भवाति ।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ।।2।।
उशन्तिं घा ते अमृतास एतदेकस्य चित् त्यजसं मर्त्यस्य ।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्व१मा विविश्याः ।।३।।
न यत् पुरा चकृमा कद्ध नूनमृतं वदन्तो अनृतं रपेम ।
गन्धर्वो अप्स्वप्या च योषा सा नौ नाभिः परमं जामि तन्नौ ।।४।।
गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः ।
नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ।।५।।
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून् हृत्स्वसो मयोभून् य एषां भृत्यामृणधत् स जीवात् ।।६।।
को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ।
बृहकिन्मत्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ।।७।।
यमस्य मा यम्यं१ काम आगन्त्समाने यानौ सहशेय्याय ।
जायेव पत्ये तन्वं रिरिच्यां वि चिद् वृहेव रथ्येव चक्रा ।।८।।
न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति ।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ।।९।।
रात्रीभिरस्मा अहभिर्दशस्येत् सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ।
दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य विवृहादजामि ।।१०।।
आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ।।११।।
किं भ्रातासद् यदनाथ भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात् ।
काममूता बह्वे३तद् रपामि तन्वा मे तन्वं१ सं पिपृग्धि ।।१2।।
न ते नाथं यम्यत्राहमस्मि न ते तनूं तन्वा३ सं पपृच्याम् ।
अन्येन मत् प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ।।१३।।
न वा उ ते तनूं तन्वा३ सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् ।
असंयदेतन्मनसो हृदो मे भ्राता स्वसुः शयने यच्छयीय ।।१४।।
बतो बतासि यम नैव ते मनो हृदयं चाविदाम ।
अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजातै लिबुजेव वृक्षम् ।।१५।।
अन्यमू षु यम्यन्य उ त्वां परि ष्वजातै लिबुजेव वृक्षम् ।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम्।।१६।।
त्रीणि च्छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम्
आपो वाता ओषधयस्तान्येकस्मिन् भुवन आर्पितानि ।।१७।।
वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः ।
विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजति यज्ञियाँ ऋतून् ।।१८।।
रपद् गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु नो मनः ।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ।।१९।।
सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वति ।
यदीमुशन्तमुशतामनु ऋतुमग्निं होतारं विदथाय जीजनन् ।।2०।।
अध त्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषिरः श्येनो अध्वरे ।
यदी विशो वृणते तदस्ममार्या अग्निं होतारमध धीरजायत ।।2१।।

सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।
विप्रस्य वा यच्छशमान उक्थ्योऽ वाजं ससवाँ उपयासि भूरिभिः।।22।।
उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति ।
विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ।।२३।।
यस्ते अग्ने सुमतिं मर्तो अख्यत् सहसः सूनो अति स प्र शृण्वे ।
इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान् भूषति द्यून् ।।२४।।
श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ।।२५।।
यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद् विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ।।२६।।
अग्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्य उषसो अनु रश्मीननु द्यावापृथिवी आ विवेश ।।२७।।
प्रत्यग्निरुषसामग्रमख्यत् प्रत्यहानि प्रथमो जातवेदाः ।
प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावापृथिवी आ ततान ।।२८।।
द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा ।
देवो यन्मर्तान् यजथाय कृण्वन्त्सीदद्धोता प्रत्यङ् स्वमसुं यन् ।।२९।।
देवो देवान् परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान् ।
धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान्।।३०।।
अर्चामि वा वर्धयापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।
अहा यद् देवा असुनीतिमायन् मध्वा नो अत्र पितरा शिशीताम्।।३१।।
स्वावृग् देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी ।
विश्वे देवा अनु तत् ते यर्जुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ।।३2।।
किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद ।
मित्राश्चिद्धि ष्मा जुहुराणो देवांछलोको न यातामपि वाजो अस्ति।।३३।।
दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद् विषुरूपा भवति ।
यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन् ।।३४।।
यस्मिन् देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।
सूर्ये ज्योतिरदधुर्मास्य१क्तून् परि द्योतनिं चरतो अजस्रा ।।३५।।
यस्मिन् देवा मन्मनि संचरन्त्यपीच्ये३ न वयमस्य विद्म ।
मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ।।३६।।
सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे। स्तुष ऊ षु नृतमाय धृष्णवे ।।३७।।
शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा। मघैर्मघोनो अति शूर दाशसि ।।३८।।
स्तेगो न क्षमत्येषि पृथिवीं मही नो वाता इह वान्तु भूमौ ।
मित्रो नो अत्र वरुणो युज्यमानो अग्निर्वने न व्यसृष्ट शोकम् ।।३९।।

अ. १८.१.४३

सरस्वती या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती ।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानय धेहि ।।४३।।

अ. १८.१.४७–५०

मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
यांश्च देवा वावृधुर्ये च देवांस्ते नोऽवन्तु पितरो हवेषु ।।४७।।
स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्व१स्य पपिवांसमिन्द्र न कश्चन सहत आहवेषु ।।४८।।
परेयिवांसं प्रवतो महीरिति बहुभ्यः पन्थामनुपस्पशानम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत ।।४९।।

यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ ।
यत्रा नः पूर्वे पितरः परेता एना जज्ञानाः पथ्या३ अनु स्वाः ।। ५० ।।

अ. १८.१.५३–६१

त्वष्टा दुहित्रे वहतुं कृणोति तेनेदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ।।५३।।
प्रेहि प्रेहि पथिभिः पूर्याणैर्येना ते पूर्वे पितरः परेताः ।
उभा राजानौ स्वध्या मदन्तौ यमं पश्यासि वरुणं च देवम् ।।५४।।
अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ।।५५।।
उशन्तस्त्वेधीमह्युशन्तः समिधीमहि। उशन्नुशत आ वह पितॄन् हविषे अत्तवे ।।५६।।
द्युमन्तस्त्वेधीमहि द्युमन्तः समिधीमहि। द्युमान् द्युमत आ वह पितॄन् हविषे अत्तवे।।५७।।
अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ।।५८।।
अंगिरोभिर्यज्ञियैरा गहीह यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता तेऽस्मिन् बर्हिष्या निषद्य ।।५९।।
इमं यम प्रस्तरमा हि रोहांगिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्हविषो मादयस्व ।।६०।।
इत एत उदारुहन् दिवस्पृष्ठान्यारुहन्। प्र भूर्जयो यथा पथा द्यामंगिरसो ययुः ।।६१।।

अ. १८.2.१–३

यमाय सोमः पवते यमाय क्रियते हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरकृतः ।।१।।
यमाय मधुमत्तमं जुहोता प्र च तिष्ठत । इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ।।2।।
यमाय घृतवत् पयो राज्ञे हविर्जुहोतन। स नो जीवेष्वा यमेद दीर्घमायुः प्र जीवसे ।।३।।

अ. १८.2.६–2८

त्रिकद्रुकेभिः पवते षडुर्वीरेकमिद् बृहत् ।
त्रिष्टुब् गायत्री छन्दांसि सर्वा ता यम आर्पिता ।।६।।
सूर्यं चक्षुषा गच्छ वातमात्मना दिवं च गच्छ पृथिवीं च धर्मभिः ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ।।७।।
अजो भागस्तपसस्तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः ।
यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ।।८।।
यास्ते शोचयो रंहयो जातवेदो याभिरापृणासि दिवमन्तरिक्षम् ।
अजं यन्तमनु ताः समृण्वतामथेतराभिः शिवतमाभिः शृतं कृधि ।।९।।
अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधावान् ।
आयुर्वसान् उप यातु शेषः सं गच्छतां तन्वा सुवर्चाः ।।१०।।
अति द्रव श्वानौ सारमेयौ चतुरक्षौ शबलौ साधुना पथा ।
अधा पितॄन्त्सुविदत्राँ अपीहि यमेन ये सधमादं मदन्ति ।११।।
यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिषदी नृचक्षसा ।
ताभ्यां राजन् परि धेह्येनं स्वस्त्यस्मा अनमीवं च धेहि ।।१2।।
उरूणसावसुतृपावुदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ।।१३।।
सोम एकेभ्यः पवते घृतमेक उपासते। येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छतात् ।।१४।।
ये चित् पूर्व ऋतसाता ऋतजाता ऋतावृधः ।
ऋषीन् तपस्वतो यम तपोजाँ अपि गच्छतात् ।।१५।।
तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः। तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतात् ।।१६।।
ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः। ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात् ।।१७।।

सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम्। ऋषीन् तपस्वतो यम तपोजाँ अपि गच्छतात् ।।१८।।
स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी। यच्छास्मै शर्म सप्रथाः ।।१६।।
असंबाधे पृथिव्या उरौ लोके नि धीरयस्व।स्वधा याश्चकृषे जीवन् तास्ते सन्तु मधुश्चतुः।।२०।।
ह्वयामि ते मनसा मन इहेमान् गृहाँ उप जुजुषाण एहि ।
सं गच्छस्व पितृभिः सं यमेन स्योनास्त्वा वाता उप वान्तु शग्माः।।२१।।
उत् त्वा वहन्तु मरुत उदवाहा उदप्रुतः। अजेन कृण्वन्तः शीतं वर्षेणोक्षन्तु बालिति ।।22।।
उदह्वमायुरायुषे क्रत्वे दक्षाय जीवसे। स्वान् गच्छतु ते मनो अधा पितॄँरुप द्रव ।।२३।।
मा ते मनो मासोर्माङ्गानां मा रसस्य ते। मा ते हास्त तन्व१ः किं चनेह ।।२४।।
मा त्वा वृक्षः सं बाधिष्ट मा देवी पृथिवी मही। लोकं पितुषु वित्त्वैधस्व यमराजसु ।।२५।।
यत् ते अङ्गमतिहितं पराचैरपानः प्राणो य उ वा ते परेतः ।
तत् ते स्रगत्य पितरः सनीडा घासाद् घसं पुनरा वेशयन्तु ।।२६।।
अपेमं जीवा अरुधन् गृहेभ्यस्तं निर्वहत परि ग्रामादितः ।
मृत्युर्यमस्यासीद् दूतः प्रचेता असून् पितृभ्यो गमयां चकार ।।२७।।
ये दस्यवः पितृषु प्रविष्टा ज्ञातिमुखा आहुतादश्चरन्ति ।
पुरापुरो निपुरो ये भरन्त्यग्निष्टानस्मात् प्र धमाति यज्ञात् ।।२८।।

अ. १८.2.३०—३३

यां ते धेनुं निपृणामि यमु ते क्षीर ओदनम्। तेना जनस्यामो भर्ता योऽत्रासदजीवनः ।।३०।।
अश्वावतीं प्र तर या सुशेवार्क्षाकं वा प्रतरं नवीयः ।
यस्त्वा जघान वध्यः सो अस्तु मा सो अन्यद् विदत भागधेयम् ।।३१।।
यमः परोऽवरो विवस्वान् ततः परं नाति पश्यामि किं चन ।
यमे अध्वरो अधि मे निवष्टो भुवो विवस्वानन्वाततान ।।३2।।
अपागूहन्नमृतां मर्त्येभ्यः कृत्वा सवर्णामदधुर्विवस्वते ।
उताश्विनावभरद् यत् तदासीदजहादु द्वा मिथुना सरण्यूः ।।३३।।

अ. १८.2.३५—६०

ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।
त्वं तान् वेत्थ यदि ते जातवेदः स्वधया यज्ञं स्वधितिं जुषन्ताम्।।३५।।
शं तप माति तपो अग्ने मा तन्वं१ तपः। वनेषु शुष्मो अस्तु ते पृथिव्यामस्तु यद्धरः।।३६।।
ददाम्यस्मा अवसानमेतद् य एष आगन् मम चेदभूदिह ।
यमश्चिकित्वान् प्रत्येतदाह ममैष राय उप तिष्ठतामिह ।।३७।।
इमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ।।३८।।
प्रेमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ।।३६।।
अपेमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ।।४०।।
वी३मां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा।।४१।।
निरिमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ।।४2।।
उदिमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ।।४३।।
समिमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ।।४४।।
अमासि मात्रां स्वरगामायुष्मान् भूयासम्। यथापरं न मासातै शते शरत्सु नो पुरा ।।४५।।
प्राणो अपानो व्यान् आयुश्चक्षुद्दशये सूर्याय। अपरिपरेण पथा यमराज्ञः पितॄन् गच्छ।।४६।।
ये अग्रवः शशमानाः परेयुर्हित्वा द्वेषांस्यनपत्यवन्तः ।
ते द्यामुदित्याविदन्त लोकं नाकस्य पृष्ठे अधि दीध्यानाः ।।४७।।
उदन्वती द्यौरवमा पीलुमतीति मध्यमा। तृतीया ह प्रद्यौरिति यस्यां पितर आसते ।।४८।।
ये नः पितुः पितरो ये पितामहा य आविविशुरुर्व१न्तरिक्षम् ।
य आक्षियन्ति पृथिवीमुत द्यां तेभ्यः पितृभ्यो नमसा विधेम ।।४६।।

इदमिद् वा उ नापरं दिवि पश्यसि सूर्यम्। माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ।।५०।।
इदमिद् वा उ नापरं जरस्यन्यदितोऽपरम्। जाया पतिमिव वासासाभ्ये नं भूम ऊर्णुहि ।।५१।।
अभि त्वोर्णोमि पृथिव्या मातुर्वस्त्रोण भद्रया। जीवेषु भद्रं तन्मयि स्वधा पितृषु सा त्वयि ।।५2।।
अग्नीषोमा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्वि लोकम् ।
उप प्रेष्यन्तं पूषणं यो वहात्यंजोयानैः पथिभिस्तत्र गच्छतम् ।।५३।।
पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परिं ददत् पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ।।५४।।
आयुर्विश्वायुः परि पातु त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र त ईयुस्तत्र त्वा देवः सविता दधातु ।।५५।।
इमौ युनज्मि ते वह्नी असुनीताय वोढवे। ताभ्यां यमस्य सादनं समितीश्चाव गच्छतात् ।।५६।।
एतत् त्वा वासः प्रथमं न्वागन्नपैतदूह यदिहाबिभः पुरा ।
इष्टापूर्तमनुसंक्राम विद्वान् यत्र ते दत्तं बहुधा विबन्धुषु ।।५७।।
अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व मेदसा पीवसा च ।
नेत् त्वा धृष्णुर्हरसा जर्हृषाणो दधृग् विधक्षन् परीङ्ख्यातै ।।५८।।
दण्डं हस्तादाददानो गतासोः सह श्रोत्रेण वर्चसा बलेन ।
अत्रैव त्वमिह वयं सुवीरा विश्वा मृधो अभिमातीर्जयेम ।।५६।।
धनुर्हस्तादाददानो मृतस्य सह क्षत्रेण वर्चसा बलेन ।
समागृभाय वसु भूरि पुष्टमर्वाङ् त्वमेह्युप जीवलोकम् ।।६०।।

अ. १८.३.१–७३

इयं नारी पतिलोकं वृणाना नि पद्यत उप त्वा मर्त्य प्रेतम् ।
धर्मं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि ।।१।।
उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ।।2।।
अपश्यं युवतिं नीयमानां जीवां मृतेभ्यः परिणीयमानाम् ।
अन्धेन यत् तमसा प्रावृतासीत् प्राक्तो अपाचीमनयं तदेनाम् ।।३।।
प्रजानत्यध्न्ये जीवलोकं देवानां पन्थामनुसंचरन्ती ।
अयं ते गोपतिस्तं जुषस्व स्वर्गं लोकमधि रोहयैनम् ।।४।।
उप द्यामुप वेतसमवत्तरो नदीनाम्। अग्ने पित्तमपामसि। ।।५।।
यं त्वमग्ने समदहस्तमु निर्वापया पुनः। क्याम्बूरत्र रोहतु शाण्डदूर्वा व्यल्कशा ।।६।।
इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्वा३ चारुरेधि प्रियो देवानां परमे सधस्थे ।।७।।
उत्तिष्ठ प्रेहि प्र द्रवौकः कृणुष्व सलिले सधस्थे ।
तत्र त्वं पितृभिः संविदानः सं सोमेन मदस्व सं स्वधाभिः ।।८।।
प्र च्यवस्व तन्वं१ सं भरस्व मा ते गात्रा वि हायि मो शरीरम् ।
मनो निविष्टमनुसंविशस्व यत्र भूमेर्जुषसे तत्र गच्छ ।।६।।
वर्चसा मां पितरः सोम्यासो अंजन्तु देवा मधुना घृतेन ।
चक्षुषे मा प्रतरं तारयन्तो जरसे मा जरदष्टिं वर्धन्तु ।।१०।।
वर्चसा मां समनक्त्वग्निर्मेधां मे विष्णुर्न्यनक्त्वासन् ।
रयिं मे विश्वे नि यच्छन्तु देवाः स्योना मापः पवनैः पुनन्तु ।।११।।
मित्रावरुणा परि मामधातामादित्या मा स्वरवो वर्धयन्तु ।
वर्चो म इन्द्रो न्यनक्तु हस्तयोर्जरदष्टिं मा सविता कृणोतु ।।१2।।
यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत ।।१३।।
परा यात पितर आ च यातायं वो यज्ञो मधुना समक्तः ।

दत्तो अस्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं दधात ।।१४।।
कण्वः कक्षीवान् पुरुमीढो अगस्त्यः श्यावाश्वः सोभर्यर्चनानाः ।
विश्वामित्रोऽयं जमदग्निरत्रिरवन्तु नः कश्यपो वामदेवः ।।१५।।
विश्वामित्र जमदग्ने वसिष्ठ भरद्वाज गोतम वामदेव ।
शर्दिर्नो अत्रिरग्रभीन्नमोभिः सुसंशासः पितरो मृडता नः ।।१६।।
कस्ये मृजाना अति यन्ति रिप्रमायुर्दधानाः प्रतरं नवीयः ।
आप्यायमानाः प्रजया धनेनाध स्याम सुरभयो गृहेषु ।।१७।।
अंजते व्यंजते समंजते ऋतुं रिहन्ति मधुनाभ्यंजते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृह्णते।।१८।।
यद् वो मुद्रं पितरः सोम्यं च तेनो सचध्वं स्वयशसो हि भूत।
ते अर्वाणः कवय आ शृणोत सुविदत्रा विदथे हूयमानाः ।।१९।।
ये अत्रयो अंगिरसो नवग्वा इष्टावन्तो रातिषाचो दधानाः ।
दक्षिणावन्तः सुकृतो य उ स्थासद्यास्मिन् वर्हिषि मादयध्वम् ।।20।।
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशशानाः ।
शुचीदयन् दीध्यत उक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ।।21।।
सुकर्माणः सुरुचो देवयन्तो अयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं वावृधन्त इन्द्रमुर्वीं गव्यां परिषदं नो अक्रन् ।।22।।
आ यूथेव क्षुमति पश्वो अख्यद् देवानां जनिमान्त्युग्रः ।
मर्तासश्चिदुर्वशीरकृप्रन् वृधे चिदर्य उपरस्यायोः ।।2३।।
अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
विश्वं तद् भद्रं यदवन्ति देवा बृहद् वदेम विदथे सुवीराः ।।2४।।
इन्द्रो मा मरुत्वान् प्राच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।2५।।
धाता मा निर्ऋत्या दक्षिणाया दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।2६।।
अदितिर्मादित्यै प्रतीच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।2७।।
सोमो मा विश्वैर्देवैरुदीच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।2८।।
धर्ता ह त्वा धरुणौ धारयाता ऊर्ध्वं भानुं सविता द्याामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।2९।।
प्राच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।३०।।
दक्षिणायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।३१।।
प्रतीच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युतां पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजमहे ये देवानां हुतभागा इह स्थ ।।३2।।
उदीच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।३३।।
ध्रुवायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।३४।।
ऊर्ध्वायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।३५।।
धर्तासि धरुणोऽसि वंसगोऽसि ।।३६।।

उदपूरसि मधुपूरसि वातपूरसि ।।३७।।
इतश्च मामुतश्चावतां यमेइव यतमाने यदैतम्।
प्र वां भरन् मानुषा देवयन्तो आ सीदतां स्वमु लोकं विदाने ।।३८।।
स्वासस्थे भवतमिन्दवे नो युजे वां ब्रह्म पूर्व्यं नमोभिः ।
वि श्लोक एति पथ्येव सूरिः शृण्वन्तु विश्वे अमृतास एतत् ।।३९।।
त्रीणि पदानि रूपो अन्वरोहच्चतुष्पदीमन्वैतद् व्रतेन ।
अक्षरेण प्रति मिमीते अर्कमृतस्य नाभावभि सं पुनाति ।।४०।।
देवेभ्यः कमवृणीत मृत्यु प्रजायै किममृतं नावृणीत ।
बृहस्पतिर्यज्ञमतनुत ऋषिः प्रियां यमस्तन्व१मा रिरेच ।।४१।।
त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ।।४2।।
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ।।४३।।
अग्निष्वात्ताः पितर एह गच्छत सदः सदः सदत सुप्रणीतयः ।
अत्तो हवींषि प्रयतानि बर्हिषि रयिं च नः सर्ववीरं दधात ।।४४।।
उपहूता नः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ।।४५।।
ये नः पितुः पितरो ये पितामहा अनूजिहरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ।।४६।।
ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
आग्ने याहि सहस्रं देववन्दैः सत्यैः कविभिर्ऋषिभिर्घर्मसद्भिः ।।४७।।
ये सत्यासो हविरदो हविष्पा इन्द्रेणदेवैः सरथं तुरेण ।
आग्ने याहि सुविदत्रेभिरर्वाङ् परैः पूर्वैर्ऋषिभिर्घर्मसद्भिः ।।४८।।
अप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदाः पृथिवी दक्षिणावत एषा त्वा पातु प्रपथे पुरस्तात् ।।४९।।
उच्छ्वंचस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपसर्पणा ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ।।५०।।
उच्छ्वंचमाना पृथिवी तु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतः स्योना विश्वाहास्मै शरणाः सन्त्वत्र ।।५१।।
उत्ते स्तभ्नामि पृथिवीं त्वत् परीमं लोगं निदधन्मो अहं रिषम् ।
एतां स्थूणां पितरो धारयन्ति ते तत्र यमः सादना ते कृणोतु ।।५2।।
इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।
अयं यश्चमसो देवपानस्तस्मिन् देवा अमृता मादयन्ताम् ।।५३।।
अथर्वा पूर्णं चमसं यमिन्द्रायाबिभर्वाजिनीवते ।
तस्मिन् कृणोति सुकृतस्य भक्षं तस्मिन्निन्दुः पवते विश्वदानीम्।।५४।।
यत् ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ।
अग्निष्टद् विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ।।५५।।
पयस्वतीरोषधयः पयस्वन्मामकं पयः ।
अपां पयसो यत् पयस्तेन मा सह शुम्भतु ।।५६।।
इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं स्पृशन्ताम् ।
अनश्रवो अनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ।।५७।।
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वावद्यं पुनरस्तमेहि सं गच्छतां तन्वा सुवर्चाः ।।५८।।
ये नः पितुः पितरो ये पितामहा य आविविशुरुर्व१न्तरिक्षम् ।

तेभ्यः स्वराडसुनीतिर्नो अद्य यथावशं तन्वः कल्पयाति ।।५६।।
शं ते नीहारो भवतु शं ते प्रुष्वाव शीयताम् ।
शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।
मण्डूक्य१प्सु शं भुव इमं स्व१ग्निं शमय ।।६०।।
विवस्वान् नो अभयं कृणोतु यः सुत्रामा जीरदानुः सुदानुः ।
इहेमे वीरा बहवो भवन्तु गोमदश्ववन्मय्यस्तु पुष्टम् ।।६१।।
विवस्वान् नो अमृतत्वे दधातु परैतु मृत्युरमृतं न ऐतु ।
इमान् रक्षतु पुरुषाना जरिम्णो मो ष्वेषामसवो यमं गुः ।।६2।।
यो दध्रे अन्तरिक्षे न मह्ना पितॄणां कविः प्रभतिर्मतीनाम् ।
तमर्चत विश्वमित्रा हाविर्भिः स नो यमः प्रतरं जीवसे धात् ।।६३।।
आ रोहत दिवमुत्तमामृषयो मा बिभीतन् ।
सोमपाः सोमपायिन इदं वः क्रियते हविरगन्म ज्योतिरुत्तमम् ।।६४।।
प्र केतुना बृहता भत्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिन्दतादुपमामुदानडपामुपस्थे महिषो ववर्ध ।।६५।।
नाके सुपर्णमुप यत् पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ।।६६।।
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि ।।६७।।
अपूपापिहितान् कुम्भान् यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ।।६८।।
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तु विभ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ।।६९।।
पुनर्देहि वनस्पते य एष निहितस्त्वयि ।
यथा यमस्य सादन आसातै विदथा वदन् ।।७०।।
आ रभस्व जातवेदस्तेजस्वद्धरो अस्तु ते ।
शरीरामस्य सं दहाथैनं धेहि सुकृतामु लोके ।।७१।।
ये ते पूर्वे परागता अपरे पितरश्च ये ।
तेभ्यो घृतस्य कुल्यैतु शतधारा व्युन्दती ।।७2।।
एतदा रोह वय उन्मृजानः स्वा इह बृहदु दीदयन्ते ।
अभि प्रेहि मध्यतो माप हास्थाः पितॄणां लोकं प्रथमो यो अत्र ।।७३।।

अ. १८.४.१–८०

आ रोहत जनित्रीं जातवेदसः पितृयाणैः सं व आ रोहयामि ।
अवाड्ढव्येषितो हव्यवाह ईजानं युक्ताः सुकृतां धत्त लोके।।१।।
देवा यज्ञमृतवः कल्पयन्ति हविः पुरोडाशं स्रुचो यज्ञायुधानि ।
तेभिर्याहि पथिभिर्देवयानैर्यैरीजानाः स्वर्गं यन्ति लोकम् ।।2।।
ऋतस्य पन्थामनु पश्य साध्वंगिरसः सुकृतो येन यन्ति ।
तेभिर्याहि पथिभिः स्वर्गं यत्रादित्या मधु भक्षयन्ति तृतीये नाके अधि वि श्रयस्व ।।३।।
त्रयः सुपर्ण उपरस्य मायू नाकस्य पृष्ठे अधि विष्टपि श्रिताः ।
स्वर्गा लोका अमृतेन विष्ठा इषमूर्जं यजमानाय दुह्राम् ।।४।।
जुहूर्दाधार द्यामुपभृदन्तरिक्षं ध्रुवा दाधार पृथिवीं प्रतिष्ठाम् ।
प्रतीमां लोका घृतपृष्ठाः स्वर्गाः कामंकामं यजमानाय दुह्राम् ।।५।।
ध्रुव आ रोह पृथिवीं विश्वभोजसमन्तरिक्षमुपभृदा क्रमस्व ।
जुहु द्यां गच्छ यजमानेन साकं स्रुवेण वत्सेन दिशः प्रपीनाः सर्वा धुक्ष्वाह्णीयमानः ।।६।।
तीर्थैस्तरन्ति प्रवतो महीरिति यज्ञकृतः सुकृतो येन यन्ति ।

अत्रादधुर्यजमानाय लोकं दिशो भूतानि यदकल्पयन्त ।।७।।
अंगिरसामयनं पूर्वो अग्निरादित्यानामयनं गार्हपत्यो दक्षिणानामयनं दक्षिणाग्निः ।
माहिमानमग्नेर्विहितस्य ब्रह्मणा समंगः सर्व उप याहि शग्मः।।८।।
पूर्वो अग्निष्ट्वा तपतु शं पुरस्ताच्छं पश्चात् तपतु गार्हपत्यः ।
दक्षिणाग्निष्टे तपतु शर्म वर्मोत्तरतो मध्यतो अन्तरिक्षाद् दिशोदिशो अग्ने परि पाहि घोरात्।।६।।
यूयमग्ने शंतमाभिस्तनूभिरीजानमभि लोकं स्वर्गम् ।
अश्वा भूत्वा पृष्टिवाहो वहाथ यत्र देवैः सधमादं मदन्ति ।।१०।।
शमग्ने पश्चात तप शं पुरस्ताच्छमुत्तराच्छमधरात् तपैनम् ।
एकस्त्रेधा विहितो जातवेदः सम्यगेनं धेहि सुकृतामु लोके ।।११।।
शमग्नयः समिद्धा आ रभन्तां प्राजापत्यं मेध्यं जातवेदसः ।
शृतं कृण्वन्त इह माव चिक्षिपन् ।।१2।।
यज्ञ एति विततः कल्पमान ईजानमभि लोकं स्वर्गम् ।
तमग्नयः सर्वहुतं जुषन्तां प्राजापत्यं मेध्यं जातवेदसः। शृतं कृण्वन्त इह माव चिक्षिपन् ।।१३।।
ईजानश्चितमारुक्षदग्निं नाकस्य पृष्ठाद् दिवमुत्पतिष्यन् ।
तस्मै प्र भाति नभसो ज्योतिषीमान्त्स्वर्गः पन्थाः सुकृते देवयानः ।।१४।।
अग्निर्होताध्वर्युष्टे बृहस्पतिरिन्द्रो ब्रह्मा दक्षिणतस्ते अस्तु ।
हुतोऽयं संस्थितो यज्ञ एति यत्र पूर्वमयनं हुतानाम् ।।१५।।
अपूपवान् क्षीरवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ।।१६।।
अपूपवान् दधिवांश्चरुरेह सीदतु।
लोककृत पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ।।१७।।
अपूपवान् द्रप्सवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ।।१८।।
अपूपवान् घृतवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।१६।।
अपूपवान् मांसवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।2०।।
अपूपवानन्नवांश्चरुरेह सीदतू। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ।।2१।।
अपूपवान् मधुमांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।22।।
अपूपवान् रसवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।2३।।
अपूपवानपवांश्चरुरेह सीदतु। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ।।2४।।
अपूपापिहितान् कुम्भान् यांस्ते देवा अधारयन्। ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः।2५।।
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तूद्भ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ।।2६।।
अक्षितिं भूयसीम् ।।2७।।
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ।।2८।।
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते रयिम् ।
ये पृणन्ति प्र च यच्छन्ति सर्वदा ते दुह्रते दक्षिणां सप्तमातरम् ।।2६।।
कोशं दुहन्ति कलशं चतुर्बिलमिडां धेनुं मधुमतीं स्वस्तये ।
ऊर्जं मदन्तीमदितिं जनेष्वग्ने मा हिंसीः परमे व्योमन् ।।३०।।

एतत् ते देवः सविता वासो ददाति भर्तवे। तत्त्वं यमस्य राज्ये वसानस्तार्प्यंचर ।।३१।।
धाना धेनुरभवद् वत्सो अस्यास्तिलोऽभवत्। तां वै यमस्य राज्ये अक्षितामुप जीवति ।।३2।।
एतास्ते असौ धेनवः कामदुघा भवन्तु ।
एनीः श्येनीः सरूपा विरूपास्तिलवत्सा उप तिष्ठन्तु त्वात्र ।।३३।।
एनीर्धाना हरिणीः श्येनीरस्य कृष्णा धाना रोहिणीर्धेनवस्ते ।
तिलवत्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः ।।३४।।
वैश्वानरे हविरिदं जुहोमि साहस्रं शतधारमुत्सम् ।
स सबिभर्ति पितरं पितामहान् प्रपितामहान् बिभर्ति पिन्वमानः ।।३५।।
सहस्रधारं शतधारमुत्समक्षितं व्यच्यमानं सलिलस्य पृष्ठे ।
ऊर्जं दुहानमनपस्फुरन्तमुपासते पितरः स्वधाभिः ।।३६।।
इदं कसाम्बु चयनेन चितं तत् सजाता अव पश्यतेत ।
मर्त्योऽयममृतत्वमेति तस्मै गृहान् कृणुत यावत्सबन्धु ।।३७।।
इहैवैधि धनसनिरिहचित्त इहक्रतुः। इहैधि वीर्यवत्तरो वयोधा अपराहतः ।।३८।।
पुत्रं पौत्रमभितर्पयन्तीरापो मधुमतीरिमाः ।
स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयांस्तर्पयन्तु ।।३९।।
आपो अग्निं प्र हिणुत पितॄँरुपेमं यज्ञं पितरो मे जुषन्ताम् ।
आसीनामूर्जमुप ये सचन्ते ते नोा रयिं सर्ववीरं नि यच्छान् ।।४०।।
समिन्धते अमर्त्यं हव्यवाहं घृतप्रियम्। स वेद निहितान् निधीन् पितॄन् परावतो गतान् ।।४१।।
यं ते मन्थं यमोदनं यन्मांसं निपृणामि ते। ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ।।४2।।
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तूद्भ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ।।४३।।
इदं पूर्वमपरं नियानं येना ते पूर्वे पितरः परेताः ।
पुरोगवा ये अभिशाची अस्य ते त्वा वहन्ति सुकृतामु लोकम् ।।४४।।
सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात् ।।४५।।
सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः ।
आसद्यास्मिन् बर्हिषि मादयध्वमनमीवा इष आ धेह्यस्मे ।।४६।।
सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती ।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानाय धेहि ।।४७।।
पृथिवीं त्वा पृथिव्यामा वेशयामि देवो नो धाता प्र तिरात्यायुः ।
परापरैता वसुविद् वो अस्त्वधा मृताः पितुषु सं भवन्तु ।।४८।।
आ प्र च्यवेथामप तन्मृजेथां यद् वामभिभा अत्रोचुः ।
अस्मादेतमघ्न्यौ तद् वशीयो दातुः पितृष्विहभोजनौ मम ।।४९।।
एयमगन् दक्षिणा भद्रतो नो अनेन दत्ता सुदुघा वयोधाः ।
यौवने जीवानुपपृंचती जरा पितृभ्य उपसंपराणयादिमान् ।।५०।।
इदं पितृभ्यः प्र भरामि बर्हिर्जीवं देवेभ्य उत्तरं स्तृणामि ।
तदा रोह पुरुष मेध्यो भवन् प्रति त्वा जानन्तु पितरः परेतम् ।।५१।।
एदं बर्हिरसदो मेध्योऽभूः प्रति त्वा जानन्तु पितरः परेतम् ।
यथापरु तन्वं१ सं भरस्व गात्राणि ते ब्रह्मणा कल्पयामि ।।५2।।
पर्णो राजापिधानं चरूणामूर्जो बलं सह ओजो न आगन् ।
आयुर्जीवेभ्यो विदधद् दीर्घायुत्वाय शतशारदाय ।।५३।।
ऊर्जो भागो य इमं जजानाश्मान्नानामाधिपत्यं जगाम ।
तमर्चत विश्वामित्रा हविर्भिः स नो यमः प्रतरं जीवसे धात् ।।५४।।
यथा यमाय हर्म्यमवपन् पंच मानवाः। एवा वपामि हर्म्यं यथा मे भूरयोऽसत ।।५५।।

इदं हिरण्यं बिभृहि यत्ते पिताबिभः पुरा। स्वर्गं यतः पितुर्हस्तं निर्मृड्ढि दक्षिणम् ।।५६।।
ये च जीवा ये च मृता ये जाता ये च यज्ञियाः ।
तेभ्यो घृतस्य कुल्यैतु मधुधारा व्युन्दती ।।५७।।
वृषा मतीनां पवते विचक्षणः सूरो अह्नां प्रतरीतोषसां दिवः ।
प्राणः सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्दिमाविशन्मनीषया ।।५८।।
त्वेषस्ते धूम ऊर्णोतु दिवि षंछुक्र आततः। सूरो न हि द्युता त्वं कृपा पावक रोचसे ।।५९।।
प्र वा एतीन्दुरिन्द्रस्य निष्कृतिं सखा सख्युर्न प्र मिनाति संगिरः ।
मर्य इस योषाः समर्षसे सोमः कलशे शतयामना पथा ।।६०।।
अक्षन्नमीमदन्त ह्यव प्रियाँ अधूषत। अस्तोषत स्वभानवो विप्रा यविष्ठा ईमहे ।।६१।।
आ यात पितरः सोम्यासो गम्भीरे पथिभिः पितृयाणैः ।
आयुरस्मभ्यं दधतः प्रजां च रायश्च पौषैरभि नः सचध्वम् ।।६2।।
परा यात पितरः सोम्यासो गम्भीरैः पथिभिः पूर्याणैः ।
अधा मासि पुनरा यात नो गृहान् हविरत्तुं सुप्रजसः सुवीराः ।।६३।।
यद् वो अग्निरजहादेकमंगं पितृलोकं गमयंजातवेदाः ।
तद् व एतत् पुनरा प्याययामि सांगाः स्वर्गे पितरो मादयध्वम् ।।६४।।
अभूद् दूतः प्रहितो जातवेदाः सायं न्यह्न उपवन्द्यो नृभिः ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्निद्धि त्वं देव प्रयता हवींषि ।।६५।।
असौ हा इह ते मनः ककुत्सलमिव जामयः। अभ्येनं भूम ऊर्णुहि ।।६६।।
शुम्भन्तां लोकाः पितृषदनाः पितृषदने त्वा लोक आ सादयामि ।।६७।।
ये३स्माकं पितरस्तेषां बर्हिरसि ।।६८।।
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अधा वयमादित्य व्रते तवानागसो अदितये स्याम ।।६९।।
प्रास्मत् पाशान् वरुण मुंच सर्वान् यैः समामे बध्यते यैर्व्यामे ।
अधा जीवेम शरदं शतानि त्वया राजन् गुपिता रक्षमाणाः ।।७०।।
अग्नये कव्यवाहनाय स्वधा नमः ।।७१।।
सोमाय पितृमते स्वधा नमः ।।७2।।
पितृभ्यः सोमवद्भ्यः स्वधा नमः ।।७३।।
यमाय पितृमते स्वधा नमः ।।७४।।
एतत् ते प्रततामह स्वधा ये च त्वामनु ।।७५।।
एतत् ततामह स्वधा ये च त्वामनु ।।७६।।
एतत् ते तत स्वधा ।।७७।।
स्वधा पितृभ्यः पृथिविषद्भ्य ।।७८।।
स्वधा पितृभ्यो अन्तरिक्षसद्भ्यः ।।७९।।
स्वधा पितृभ्यो दिविषद्भ्यः ।।८०।।

2. आयुर्वर्चोबलकामः – अ. ६.६३.2

नमोऽस्तु ते निर्ऋते निग्मतेजोऽयस्मयान् वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ।।2।।

३. कुमारो यामायनः – ऋ. १०.१३५.१–७

यस्मिन्वृक्षे सुपलाशे देवैः सम्पिबते यमः। अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ।।१।।
पुराणाँ अनुवेनन्तं चरन्तं पापयामुया। असूयन्नभ्यचाकशं तस्मा अस्पृहयं पुनः ।।2।।
यं कुमार नवं रथमचक्रं मनसाकृणोः। एकेषं विश्वतः प्रांचमपश्यन्नधि तिष्ठसि ।।३।।
यं कुमार प्रावर्तयो रथं विप्रेभ्यस्परि। तं सामानु प्रावर्तत समितो नाव्याहितम् ।।४।।
कः कुमारमजनयद्रथं को निरवर्तयत्। कः स्वित्तदद्य नो ब्रूयादनुदेयी यथाभवत् ।।५।।

यथाभवदनुदेयी ततो अग्रमजायत। पुरस्ताद् बुध्न आततः पश्चनिरयणं कृतम् ।।६।।
इदं यमस्य सादनं देवमानं यदुच्यते। इयमस्य धम्यते नाळीरयं गीर्भिः परिष्कृतः ।।७।।

४. **द्रुह्वणः (आयुर्वर्चोबलकामः) – अ. ६.६३.2**

नमोऽस्तु ते निर्ऋते निग्मतेजोऽयस्मयान् वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ।।2।।

५. **भृग्वंगिरा – अ. १.१४.१–४**

भगमस्या वर्च आदिष्यधि वृक्षादिव स्रजम्। महाबुध्नइव पर्वतो ज्योक् पितृष्वास्ताम् ।।१।।
एषा ते राजन् कन्या वधूर्नि धूयतां यम। सा मातुर्बध्यतां गृहेऽथो भ्रातुरथो पितुः ।।2।।
एषा ते कुलपा राजन् तामु ते परि दद्मसि। ज्योक् पितृष्वासाता आ शीर्ष्णः समोप्यात् ।।३।।
असितस्य ते ब्रह्मणा कश्यपस्य गयस्य च। अन्तः कोशमिव जामयोऽपि नह्यामि ते भगम्।।४।।

६. **यमः – ऋ. १०.१४.१–५; १०.१४.१३–१६**

ऋ. १०.१४.१–५

परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ।।१।।
यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या३ अनु स्वाः ।।2।।
मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
याँश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति ।।३।।
इमं यम प्रस्तरमा हि सीदांगिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्हविषा मादयस्व ।।४।।
अंगिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिष्या निषद्य ।।५।।

ऋ. १०.१४.१३–१६

यमाया सोमं सुनुत यमाय जुहुता हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ।।१३।।
यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत। स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे ।।१४।।
यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन। इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ।।१५।।
त्रिकदुकेभिः पतति षळुर्वीरेकमिद् बृहत्। त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आहिता ।।१६।।

७. **सङ्कसुकः – य. ३५.७**

परं मृतयोऽअनु परेहि पन्थां यस्तेऽअन्यऽइतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ।।७।।

६३१. यमः निर्ऋतिः

१. **भृगुः – अ. ६.2७.१–३; ६.2८.१–३; ६.2६.१–३**

अ. ६.2७.१–३

देवाः कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ।।१।।
शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहं नः ।
अग्निर्हि विप्रो जुषातं हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ।।2।।
हेतिः पक्षिणी न दभात्यस्मानाष्ट्री पदं कृणुते अग्निधाने ।
शिवो गोभ्य उत पुरुषेभ्यो नो अस्तु मा नो देवा इह हिंसीत् कपोतः ।।३।।

अ. ६.2८.१–३

ऋचा कपो नुदत प्रणोदमिषं मदन्त परि गां नयामः ।
सं लोभयन्तो दुरिता पदानि हित्वा न ऊर्जं प्र पदात् पथिष्ठः ।।१।।

परीमेऽग्निमर्षत परीमे गामनेषत ।
देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ।।2।।
यः प्रथमः प्रवतमाससाद बहुभ्यः पन्थामनुपस्पशानः ।
योऽस्येशे द्विपदो यश्चतुष्पदस्तस्मै यमाय नमो अस्तु मृत्यवे ।।३।।

अ. ६.2९.१–३

अम♥न् हेतिः पतत्रिणी न्येतु यदुलूको वदति मोघमेतत् ।
यद् वा कपोतः पदमग्नौ कृणोति ।।१।।
यौ ते दूतौ निर्ऋत इदमेतोऽप्रहितौ प्रहितौ वा गृह नः ।
कपोतोलूकाभ्यामपदं तदस्तु ।।2।।
अवैरहत्यायेदमा पपत्यात् सुवीरताया इदमा ससद्यात् ।
पराङेव परा वद पराचीमनु संवतम् यथा यमस्य त्वा गृहेऽरसं
प्रतिचाकाशानाभूकं प्रतिचाकशान्।।३।।

६३2. यमादयो मन्त्रोक्ताः

१. शन्तातिः – अ. ६.९३.१–३

यमो मृत्युरघमारो निर्ऋथो बभ्रुः शर्वोऽस्ता नीलशिखण्डः ।
देवजनाः सेनयोत्तस्थिवांसस्ते अस्माकं परि वृंजन्तु वीरान् ।।१।।
मनसा होमैर्हरसा घृतेन शर्वायास्त्र उत राज्ञे भवाय ।
नमस्येभ्यो नम एभ्यः कृणोम्यन्यत्रास्मदघविषा नयन्तु ।।2।।
त्रायध्वं नो अघविषाभ्यो वधाद् विश्वे देवा मरुतो विश्ववेदसः
अग्नीषोमा वरुणः पूतदक्षा वातापर्जन्ययोः सुमतौ स्याम ।।३।

६३३. यमसादनम् ब्रह्म

१. भरद्वाजः – अ. 2.१2.७

सप्त प्राणानष्टौ मन्यस्तांस्ते वृश्चामि ब्रह्मणा। अया यमस्य सादनमग्निदूतो अरङ्कृतः ।।७।।

६३४. यमिनी

१. ब्रह्म – अ. ३.2८.१–६

एकैकयैषा सृष्ट्या सं बभूव यत्र गा असृजन्त भूतकृतो विश्वरूपाः ।
यत्र विजायते यमिन्यपर्तुः सा पशून् क्षिणाति रिफती रुशती ।।१।।
एषा पशून्त्सं क्षिणाति क्रव्याद् भूत्वा व्यद्वरी ।
उतैनां ब्रह्मणे दद्यात् तथा स्योना शिवा स्यात् ।।2।।
शिवा भव पुरुषेभ्यो गोभ्यो अश्वेभ्यः शिवा ।
शिवास्मै सर्वस्मै क्षेत्राय शिवा न इहैधि ।।३।।
इह पुष्टिरिह रस इह सहस्रसातमा भव ।
पशून् यमिनि पोषय ।।४।।
यत्रा सुहार्दः सुकृतो मदन्ति विहाय रोगं तन्व१ः स्वायाः ।
तं लोकं यमिन्यभिसंबभूव सा नो मा हिंसीत् पुरुषान पशूंश्च ।।५।।
यत्रा सुहार्दां सुकृतामग्निहोत्रहुतां यत्र लोकः ।
तं लोकं यमिन्यभिसंबभूव सा नो मा हिंसीत् पुरुषान् पशूंश्च ।।६।।

६३५. यातूधान्यः

१. चातनः – अ. १.2८.३–४

मा शशाप शपनेन याघं मूरमादधे ।
या रसस्य जातमारेभे तोकमत्तु सा ।।३।।

पुत्रमत्तु यातुधानीः स्वसारमुत नप्त्यम् ।
अधा मिथो विकेश्यो३ वि घ्नता यातुधान्यो३ वि तृह्यन्मराय्यः ।।४।।

६३६. युद्धभूमिब्रह्मणस्पतिर् अदितिश्च (लिङ्गोक्ता संग्रामाशिषः)

१. पायुर् भरद्वाजः – ऋ. ६.७५.१६–१९

अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।
गच्छामित्रन्प्र पद्यस्व मामीषं कं चनोच्छिषः ।।१६।।
यत्र बाणाः संपतन्ति कुमारा विशिखा इव ।
तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ।।१७।।
मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ।।१८।।
यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ।।१९।।

६३७. योगी

१. गोतमः – य. ७.६

स्वाङ्कृतोऽसि विश्वेभ्यऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव
सूर्य्याय देवेभ्यस्त्वा मरीचिपेभ्यऽउदानाय त्वा ।।६।।

६३८. योद्धा

१. अप्रतिरथः – य. १७.४६

प्रेता जयता नरऽइन्द्रो वः शर्म्म यच्छतु। उग्रा वः सन्तु बाहवो ऽनाधृष्या यथासथ ।।४६।।

६३९. योनिः

१. ब्रह्म – अ. ३.2३.१–६

येन वेहद् बभूविथ नाशयामसि तत् त्वत् ।
इदं तदन्यत्र त्वदप दूरे नि दध्मसि ।।१।।
आ ते योनिं गर्भ एतु पुमान् बाण इवेषुधिम् ।
आ वीरोऽत्र जायतां पुत्रस्ते दशमास्यः ।।2।।
पुमांसं पुत्रं जनय तं पुमाननु जायताम् ।
भवासि पुत्राणां माता जातानां जनयाश्च यान् ।।३।।
यानि भद्राणि बीजान्यृषभा जनयन्ति च ।
तैस्त्वं पुत्रं विन्दस्व सा प्रसूर्धेनुका भव ।।४।।
कृणोमि मे प्राजापत्यमा योनिं गर्भ एतु ते ।
विन्दस्व त्वं पुत्रं नारि यस्तुभ्यं शमसच्छमु तस्मै त्वं भव ।।५।।
यासां द्यौष्पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव ।
तास्त्वा पुत्रविद्याय दैवीः प्रावन्त्वोषधयः ।।६।।

६४०. योनिः गर्भः पृथिव्यादयः

१. ब्रह्म – अ. ५.2५.१–१३

पर्वतात् दिवो योनेरंगादंगात् समाभृतम्। शेपो गर्भस्य रेतोधाः सरौ पर्णमिवा दधत् ।।१।।
यथेयं पृथिवी मही भूतानां गर्भमादधे। एवा दधामि ते गर्भं तस्मै त्वामवसे हुवे ।।2।।
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनोभा धत्तां पुष्करस्रजा ।।३।।
गर्भं ते मित्रावरुणौ गर्भं देवा बृहस्पतिः। गर्भं त इन्द्रश्चग्निश्च गर्भं धाता दधातु ते ।।४।।
विष्णुर्योनि कल्पयतु त्वष्टा रूपाणि पिंशतु। आ सिंचतु प्रजापतिर्धाता गर्भं दधातु ते ।।५।।
यद् वेद राजा वरुणो यद् वा देवी सरस्वती। यदिन्द्रो वृत्रहा वेद तद् गर्भकरणं पिब ।।६।।

गर्भो अस्योषधीनां गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्य सो अग्ने गर्भमेह धाः ।।७।।
अधि स्कन्द वीरयस्व गर्भमा धेहि योनयाम्। वृषासि वृष्ण्यावन् प्रजायै त्वा नयामसि ।।८।।
वि जिहीष्व बार्हत्सामे गर्भस्ते योनिमा शयाम्। अदुष्टे देवाः पुत्रं सोमपा अभयाविनम्।।९।।
धातः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ।।१०।।
त्वष्टः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ।।११।।
सवितः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ।।12।।
प्रजापते श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ।।१३।।

६४१. योषितो धमन्यश्च

१. ब्रह्म – अ. १.१७.१–४

अमूर्या यन्ति योषितो हिरा लोहितवाससः। अभ्रातरइव जामयस्तिष्ठन्तु हतवर्चसः ।।१।।
तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ मध्यमे। कनिष्ठिका च तिष्ठति तिष्ठादिद् धमर्निमही ।।2।।
शतस्य धमनीनां सहस्रस्य हिराणाम्। अस्थुरिन्मध्यमा इमाः साकमन्ता अरंसत ।।३।।
परि वः सिकतावती धनूर्बृहत्यक्रमीत्। तिष्ठतेलयता सु कम् ।।४।।

६४2. रक्षोघ्नः

१. देववातः – य. ६.३८–३९

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
उपांशोर्वीर्य्येण जुहोमि हतं रक्षः स्वाहा रक्षसां त्वा वधायावधिष्म रक्षोऽवधिष्मामुमसौ हतः ।।३८।।
सविता त्वा सवानां सुवतामग्निर्गृहपतीनां सोमो वनस्पतीनाम् ।
बृहस्पतिर्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम्।।३९।।

६४३. रक्षोहाऽग्निः

१. वामदेवो गौतमः – ऋ. ४.४.१–१५

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रुणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ।।१।।
तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतंगानसंदितो वि सृज विष्वगुल्काः ।।2।।
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ।।३।।
अदग्ने तिष्ठप्रत्या तनुष्व न्य१मित्राँ ओषतात्तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ।।४।।
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ।।५।।
स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ।।६।।
सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ।।७।।
अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः ।
स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ।।८।।
इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांस्मनु द्यून् ।
क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ।।९।।
यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ।।१०।।
महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।

त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ।।११।।
अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठा ।
ते पायवः सध्र्यंचो निषद्याग्ने तव नः पान्त्वमूर ।।१2।।
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ।।१३।।
त्वया वयं सधन्य१स्त्वोतास्तव प्रणीत्यश्याम वाजान् ।
उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ।।१४।।
अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्य१ स्मान्द्रुहो निदो मित्रमहो अवद्यात् ।।१५।।

६४४. रथः

१. गर्गः – ऋ. ६.४७.2६–2८

वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ।।2६।।
दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज ।।2७।।
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ।।2८।।

2. पायुर् भरद्वाजः – ऋ. ६.७५.८

रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म।
तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ।।८।।

६४५. रथगोपा

१. पायुर् भरद्वाजः – ऋ. ६.७५.६

स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ।।६।।

६४६. रथांगानि

१. विश्वामित्रो गाथिनः – ऋ. ३.५३.१७–2०

स्थिरौ गावौ भवतां वीळुरक्षो मेषा हि वर्हि मा युगं वि शारि ।
इन्द्रः पातल्ये ददतां शरीतोरिष्टनेमे अभि नः सचस्व ।।१७।।
बलं धेहि तनूषु नो बलमिन्द्रानुळत्सु नः ।
बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ।।१८।।
अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिंशपायाम् ।
अक्ष वीळो वीळित वीळयस्व मा यामादस्मादव जीहिपो नः ।।१६।।
अयमस्मान्वनस्पतिर्मा च हा मा च रीरिषत् ।
स्वस्त्या गृहेभ्य आवसा आ विमोचनात् ।।2०।।

६४७. रथवीतिर्दाल्भ्यः

१. श्यावाश्व आत्रेयः – ऋ. ५.६१.१७–१६

एतं मे स्तोममूर्म्ये दार्भ्याय परा वह। गिरो देवि रथीरिव ।।१७।।
उत मे वोचतादिति सुतसोमे रथवीतौ। न कामो अप वेति मे ।।१८।।
एष क्षेति रथवीतिर्मघवा गोमतीरनु। पर्वतेष्वपश्रितः ।।१६।।

६४८. रश्मयः

१. पायुर् भरद्वाजः – ऋ. ६.७५.६

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ।।६।।

६४९. राका

१. अथर्वा – अ. ७.४८.१–2

राकामहं सुहवा सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ।।१।।
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रापोषं सुभगे रराणा ।।2।।

2. गृत्समदः शौनकः – ऋ. 2.३2.४–५

राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ।।४।।
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ।।५।।

६५०. राजप्रजाः

१. प्रजापतिः – य. 2३.2०; 22; 2३; ३१

य. 2३.2०

ता ऽ उभौ चतुरः पदः संप्रसारयाव स्वर्गे लोके प्रोर्णुवाथां बृषा वाजी रेतोधा रेतो दधातु।।2०।।

य. 2३.22–2३

यकासकौ शकुन्तिकाहलगिति वंचति ।
आहन्ति गभे पसो निगल्गलीति धारका ।।22।
यकोऽसकौ शकुन्तक ऽ आहलगिति वंचति ।
विवक्षतऽइव ते मुखमध्वर्यो मा नस्त्वमभि भाषथाः ।।2३।।

य. 2३.३१

यद्धरिणो यवमत्ति न पुष्टं बहु मन्यते। शूद्रो यदर्यायै जारो न पोषमनु मन्यते ।।३१।।

६५१. राजयक्ष्मघ्नम्

१. यक्ष्मनाशनः प्राजापत्यः – ऋ. १०.१६१.१–५

मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।
ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ।।१।।
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय ।।2।।
सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् ।
शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम् ।।३।।
शतं जीव शरदो वर्धमानः शतं हेमन्तांछतमु वसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ।।४।।
आहार्षं त्वाविद त्वा पुनरागाः पुनर्नव ।
सर्वांग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ।।५।।

६५2. राजा

१. प्रजापतिः – य. 2०.७; 2३.३०; ३2; ४३; ४४

य. 2०.७

बाहू मे बलमिन्द्रियं हस्तौ मे कर्म वीर्यम्। आत्मा क्षत्रमुरो मम ।।७।।

य. 2३.३०

यद्धरिणो यवमत्ति न पुष्टं पशु मन्यते। शूद्रा यदर्यजारानपोषाय धनाययित ।।३०।।

य. 23.32

दधिक्राव्णो ऽ अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण ऽ आयूंषि तारिषत् ।।32।।

य. 23.43–44

द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते। सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया ।।४३।।
शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः। शमस्थभ्यो मज्जभ्यः शम्वस्तु तन्वै तव ।।४४।।

६५३. राजादयो गृहपतयः

१. प्रस्कण्वः – य. ८.४०

अदृश्रमस्य केतवो वि रश्मयो जनाँ2ऽअनु। भ्राजन्तो अग्नयो यथा ।
उपयामगृहीतोऽसि सूर्य्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजाय ।
सूर्य्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् ।।४०।।

2. वैखानसः – य. ८.३८

अग्ने पवस्व स्वपाऽअस्मे वर्चः सुवीर्य्यम्। दधद्रयिं मयि पोष ।
उपयामगृहीतोऽस्यग्नये त्वा र्चसऽएष ते योनिरग्नये त्वा वर्चसे ।
अग्ने वर्चस्विन्वर्चस्वाँस्त्वं देवेष्वसि वर्चस्वानह मनुष्येषु भूयासम् ।।३८।।

६५४. राजादयो गृहस्थाः

१. वैखानसः – य. ८.३६

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रेऽअवेपयः।
सोममिन्द्र चमू सुतम्।उपयामगृहीतोऽसीन्द्राय त्वौजसऽएष ते यानिरिन्द्राय त्वौजसे।
इन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासम्।।३६।।

६५५. राजेश्वरौ

१. नारायणः – य. ३०.१४–22

मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारं शोकायाभिसर्त्तारं क्षेमाय विमोक्तारमुत्कूल–
निकूलेभ्यस्त्रिष्ठिन वपुषे मानस्कृतं शीलायांजनीकारीं निर्ऋत्यै कोशकारीं यमायासूम् ।।१४।।
यमाय यमसूमथर्वभ्योऽवतोकां संवत्सराय पर्यायिणीं
परिवत्सरायाविजातामिदावत्सरयातीत्वरीमिद्वन्त्सराया तिष्कद्वरीं वत्सराय विजर्जरां
संवत्सराय पलिक्रीमृभुभ्योऽजिनसन्धं साध्येभ्यश्चर्मम्नम् ।।१५।।
सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशान्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलं पाराय मार्गारमवाराय
केवर्त्तं तीर्थेभ्यऽआन्दं विषमेभ्यो मैनालं स्वनेभ्यः पर्णकं गुहाभ्यः किरातं सानुभ्यो जम्भकं पर्वतेभ्यः
किम्पूरुषम् ।।१६।।
बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्वादोषाय ग्लाविनं विश्वेभ्यो भूतेभ्यः
सिध्मलं भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं व्यृद्धयाऽअपगल्भं संशराय प्रच्छिदम् ।।१७।।
अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुं
मृत्यवे गोव्यच्छमन्तकाय गोघातं क्षुधे यो गां विकृन्तन्तं भिक्षमाणऽउप तिष्ठति दुष्कृताय
चरकाचार्यं पाप्मने सैलगम ।।१८।।
प्रतिश्रुत्कायाऽअर्तनं घोषय भषमन्ताय बहुवादिनमनन्ताय मूकँ शब्दायाडम्बराघातं महसे
वीणावादंक्रोशाय तूणवध्ममवरस्पराय शङ्खध्मं वनाय वनपमन्यतोरण्याय दावपम् ।।१६।।
नर्माय पुँश्चलूं हसाय कारिं यादसे शाबल्यां ग्रामण्यं गणकमभिक्रोशकं तान्महसे वीणावादं
पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ।।20।।
अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वंशनर्तिनं दिवे खलतिं सूर्याय

हर्यक्षं नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलासमह्णे शुक्लं पिंगाक्षं रात्र्यै कृष्णं पिंगाक्षम् ।।21।।
अथैतानष्टौ विरूपाना लभतेऽतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं चातिशुकलं चातिकृष्णं चातिकुल्वं चातिलोमशं च। अशूद्राऽअब्राह्मणास्ते प्राजापत्याः। मागधः पुँश्चली कितवः क्लीबोऽशूद्राऽअब्राह्मणास्ते प्राजापत्याः ।।22।।

६५६. राजधर्मराजादयः

१. बृहस्पतिः – य. ६.४

ग्रहाऽऊर्जाहुतयो व्यन्तो विप्राय मतिम्। तेषां विशिप्रियाणां वोऽहमिषमूर्जं
समग्रभमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।
स्मपृचौ स्थः सं मा भद्रेण पृङ्क्तं विपृचौ स्थो वि मा पाप्मना पृङ्क्तम् ।।४।।

६५७. राज्ञः स्तुतिः

१. अभीवर्तः – ऋ. १०.१७४.१–५

अभीवर्तेन हविषा येनेन्द्रो अभिवावृते। तेनास्मान्ब्रह्मणस्पतेऽभि राष्ट्राय वर्तय ।।१।।
अभिवृत्य सपत्नानभि या नो अरातयः अभिपृतन्यन्तं तिष्ठाभि यो न इरस्यति ।।2।।
अभि त्वा देवः सविताभि सोमो अवीवृतत्। अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ।।३।।
येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः। इदं तदक्रि देवा असपत्नः किलाभुवम् ।।४।।
असपत्नः सपत्नहाभिराष्ट्रो विषासहिः। यथाहमेषां भूतानां विराजानि जनस्य च ।।५।।

2. ध्रुवः – ऋ. १०.१७३.१–६

आ त्वाहार्षमन्तरेधि ध्रुवास्तिष्ठाविचाचलिः। विशस्त्वा सर्वा वांछन्तु मा त्वद्राष्ट्रमधि भ्रशत् ।।१।।
इहैवैधि माप च्योष्ठाः पर्वतइवाविचाचलिः। इन्द्रइवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ।।2।।
इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा। तस्मै सोमो अधि ब्रवत्तस्मा उ ब्रह्मणस्पतिः ।।३।।
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ।।४।।
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः। ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।।५।।
ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि। अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत् ।।६।।

६५८. राज्यभिषेक आपः

१. अथर्वांगिरा – अ. ४.८.१–७

भूतो भूतेषु पय आ दधाति स भूतानामधिपतिर्बभूव ।
तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनु मन्यतामिदम् ।।१।।
अभि प्रेहि माप वेन उग्रश्चेत्ता सपत्नहा। आ तिष्ठ मित्रवर्धन तुभ्यं देवा अधि ब्रवन् ।।2।।
अतिष्ठन्तं परि विश्वे अभूषञ्छ्रियं वसानश्चरति स्वरोचिः ।
महत् तद् वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ।।३।।
व्याघ्रो अधि वैयाघ्रे वि क्रमस्व दिशो महीः। विशस्त्वा सर्वा वांछन्त्वापो दिव्याः पयस्वतीः ।।४।।
या आपो दिव्याः पयसा मदन्त्यन्तरिक्ष उत वा पृथिव्याम् ।
तासां त्वा सर्वासापामभि षिंचामि वर्चसा ।।५।।
अभि त्वा वर्चसासिचन्नापो दिव्याः पयस्वतीः। यथासो मित्रवर्धनस्तथा त्वा सविता करत् ।।६।।
एना व्याघ्रं परिषस्वजानाः सिहं हिन्वन्ति महते सौभाग्य ।
समुद्रं न सुभुवस्तस्थिवांसं मर्मृज्यन्ते द्वीपिनमप्स्व१न्तः।।७।।

६५९. रात्रस्तवः

१. कुशिकः सौभरो रात्रिर्वा भारद्वाजी – ऋ. १०.१२७.१–८

रात्री व्यख्यदायती पुरुत्रा देव्य१ क्षभिः। विश्वा अधि श्रियोऽधित ।।१।।
ओर्वप्रा अमर्त्या निवतो देव्यु१ द्वतः। ज्योतिषा बाधते तमः ।।2।।
निरु स्वसारमस्कृतोषसं देव्यायती। अपेदु हासते तमः ।।३।।

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि। वृक्षे न वसतिं वयः।।४।।
नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः। नि श्येनासश्चिदर्थिनः ।।५।।
यावया वृक्यं१वृकं यवय स्तेनमूर्म्ये। अथा नाः सुतरा भव ।।६।।
उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित। उष ऋणेव यातय ।।७।।
उप ते गाइवाकरं वृणीष्व दुहितर्दिवः। रात्रि स्तोमं न जिग्युषे ।।८।।

६६०. रात्रिः

१. कुत्सः – य. ३४.32

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः ।
दिवः सदांसि बृहती वि तिष्ठसऽआ त्वेषं वर्त्तते तमः ।।32।।

2. गोपथः – अ. १६.४७.१–६; १६.४८.१–६; १६.४६.१–१०; १६.५०.१–७

अ. १६.४७.१–६

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः ।
दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ।।१।।
न यस्याः पारं ददृशे न योयुवद् विश्वमस्यां नि विशते यदेजति ।
अरिष्टासस्त उर्वि तमस्वति रात्रि पारमशीमहि भद्रे पारमशीमहि ।।2।।
ये ते रात्रि नृचक्षसो दृष्टारो नवतिर्नव। अशीतिः सन्त्यष्टा उतो ते सप्त सप्ततिः ।।३।।
षष्टिश्च षट् च रेवति पंचाशत् पंच सुम्नयि ।
चत्वारश्चत्वारिंशच्च त्रयस्त्रिंशच्च वाजिनि ।।४।।
द्वौ च ते विंशतिश्च ते रात्र्येकादशावमाः। तेभिर्नो अद्य पायुभिर्नु पाहि दुहितर्दिवः ।।५।।
रक्षा माकिर्नो अघशंस ईशत मा नो दुःशंस ईशत ।
मा नो अद्य गवां स्तेनो मवीनां वृक ईशत ।।६।।
माश्वानां भद्रे तस्करो मा नृणां यातुधान्यः। परमेभिः पाथिभि स्तेनो धावतु तस्करः ।
परेण दत्वती रज्जुः परेणाघायुरर्षतु ।।७।।
अध रात्रि तृष्टधूममशीर्षाणमहिं कृणु हनू वृकस्य जम्भयास्तेन तं द्रुपदे जहि ।।८।।
त्वयि रात्रि वसामसि स्वपिष्यामसि जागृहि। गोभ्यो नः शर्म यच्छाश्वेभ्यः पुरुषेभ्यः ।।६।।

अ. १६.४८.१–६

अथो यानि च यस्मा ह यानि चान्तः परीणहि । तानि ते परि दद्मसि ।।१।।
रात्रि मातरुषसे नः परि देहि । उषा नो अह्ने परि ददात्वहस्तुभ्यं विभावरि ।।2।।
यत् किं चेदं पतयति यत् किं चेदं सरीसृपम्।
यत् किं च पर्वतायासत्वं तस्मात् त्वं रात्रि पाहि नः।।३।।
सा पश्चात् पाहि सा पुरः सोत्तरादधरादुत ।
गोपाय नो विभावरि स्तोतारस्त इह स्मसि ।।४।।
ये रात्रिमनुतिष्ठन्ति ये च भूतेषु जाग्रति ।
पशून ये सर्वान् रक्षन्ति ते न आत्मसु जाग्रति ते नः पशुषु जाग्रति।।५।।
वेद वै रात्रि ते नाम घृताची नाम वा असि ।
तां त्वा भरद्वाजो वेद सा नो वित्तेऽधि जागृति।।६।।

अ. १६.४६.१–१०

इषिरा योषा युवतिर्दमूना रात्री देवस्य सवितुर्भगस्य ।
अश्वक्षभा सुहवा संभृतश्रीरा पप्रौ द्यावापृथिवी महित्वा ।।१।।
अति विश्वान्यरुहद् गम्भीरो वर्षिष्ठमरुहन्त श्रविष्ठाः ।
उशती रात्र्यनु सा भ्रदाभि तिष्ठते मित्रइव स्वधाभिः ।।2।।
वर्ये वन्दे सुभगे सुजात आजगन् रात्रि सुमना इह स्याम् ।

अस्मांस्त्रायस्व नर्याणि जाता अथो यानि गव्यानि पुष्ट्या ।।३।।
सिंहस्य रात्र्युशती पींषस्य व्याघ्रस्य द्वीपिनो वर्च आ ददे ।
अश्वस्य ब्रध्नं पुरुषस्य मायुं पुरु रूपाणि कृणुषे विभाती ।।४।।
शिवां रात्रिमनुसूर्यं च हिमस्य माता सुहवा नो अस्तु ।
अस्य स्तोमस्य सुभगे नि बोध येन त्वा वन्दे विश्वासु दिक्षु ।।५।।
स्तोमस्य नो विभावरि रात्रि राजेव जोषसे ।
असाम सर्ववीरा भवाम सर्ववेदसो व्युच्छन्तीरनूषसः ।।६।।
शम्या ह नाम दधिषे मम दिप्सन्ति ये धना ।
रात्रीहि तानसुतपा य स्तेनो न विद्यते यत् पुनर्न विद्यते ।।७।।
भद्रासि रात्रि चमसो न विष्टो विष्वङ् गोरूपं युवतिर्बिभर्षि ।
चक्षुष्मती मे उशती वपूंषि प्रति त्वं दिव्या न क्षाममुक्थाः ।।८।।
यो अद्य स्तेन आयत्यघायुर्मर्त्यो रिपुः। रात्री तस्य प्रतीत्य प्र ग्रीवाः प्र शिरो हनत् ।।९।।
प्र पादौ यथायति प्र हस्तौ न यथशिषत् ।
यो मलिम्लुरुपायति स संपिष्टो अपायति ।
अपायति स्वपायति शुष्के स्थाणावपायति ।।१०।।

अ. १९.५०.१–७

अध रात्रि तृष्टधूममशीर्षाणमहिं कृणु। अक्षौ वृकस्य निर्जह्यास्तेन तं द्रुपदे जहि ।।१।।
ये ते रात्र्यनड्वाहस्तीक्ष्णशृंगाः स्वाशवः। तेभिर्नो अद्य पारयाति दुर्गाणि विश्वहा ।।2।।
रात्रिंरात्रिमरिष्यन्तस्तरेम तन्वा वयम्। गम्भीरमप्लवाइव न तरेयुररातयः ।।३।।
यथा शाम्याकः प्रपतन्नपवान् नानुविद्यते। एवा रात्रि प्र पातय यो अस्माँ अभ्यघायति ।।४।।
अप स्तेनं वासो गोअजमुत तस्करम्। अथो यो अर्वतः शिरोऽभिधाय निनीषति ।।५।।
यदद्या रात्रि सुभगे विभजन्त्ययो वसु। यदेतदस्मान् भोजय यथोदन्यानुपायसि ।।६।।
उषसे नः परि देहि सर्वान् रात्र्यनागसः। उषा नो अह्ने आ भजादहस्तुभ्यं विभावरि ।।७।।

३. वामदेवो गौतमः – सा. ६०८

आ प्रागाद्भद्रा युवतिरह्नः केतून्त्समीर्त्सति। अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री ।।७।।

६६१. रुद्रः

१. अथर्वा – अ. ६.९०.१–३; ७.८७.१; १५.५.१–१६; १८.१.४०

अ. ६.९०.१–३

या ते रुद्र इषुमास्यदङ्गेभ्यो हृदयाय च। इदं तामद्य त्वद् वयं विषूचीं वि वृहमसि ।।१।।
यास्ते शतं धमनयोऽङ्गान्यनु विष्ठिताः। तासां ते सर्वासां वयं निर्विषाणि ह्वयामसि ।।2।।
नमस्ते रुद्रास्यते नमः प्रतिहितायै। नमो विसृज्यमानायै नमो निपतितायै ।।३।।

अ. ७.८७.१

यो अग्नौ रुद्रा यो अप्स्व१न्तर्य ओषधीर्वीरुध आविवेश ।
य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमो अस्त्वग्नये ।।१।।

अ. १५.५.१–१६

तस्मै प्राच्या दिशो अन्तर्देशाद् भवमिष्वासमनुष्ठातारमकुर्वन् ।।१।।
भव एनमिष्वासः प्राच्या दिशो अन्तर्देशादनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः ।।2।।
नास्य पशून् न समानान् हिनस्ति य एवं वेद ।।३।।
तस्मै दक्षिणाया दिशो अन्तर्देशाच्छर्वमिष्वासमनुष्ठातारमकुर्वन् ।।४।।
शर्वएनमिष्वासो दक्षिणाया दिशो अन्तर्देशादनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः। नास्य पशून् न समानान् हिनस्ति य एवं वेद ।।५।।
तस्मै प्रतीच्या दिशो अन्तर्देशात् पशुपतिमिष्वासमनुष्ठातारमकुर्वन ।।६।।

पशुपतिरेनमिष्वासः प्रतीच्या दिशो अन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः।
नास्य पशून् न समानान् हिनस्ति य एवं वेद ।।७।।
तस्मा उदीच्या दिशो अन्तर्देशादुग्रं देवमिष्वासमनुष्ठातारमकुर्वन् ।।८।।
उग्र एनं देव इष्वास उदीच्या दिशो अन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः।
नास्य पशून् न समानान् हिनस्ति य एवं वेद ।।९।।
तस्मै ध्रुवाया दिशो अन्तर्देशाद् रुद्रमिष्वासमनुष्ठातारमकुर्वन् ।।१०।।
रुद्र एनमिष्वासो ध्रुवाया दिशो अन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः।
नास्य पशून् न समानान् हिनस्ति य एवं वेद ।।११।।
तस्मा ऊर्ध्वाया दिशो अन्तर्देशान्महादेवमिष्वासमनुष्ठातारमकुर्वन् ।।१2।।
महादेव एनमिष्वास ऊर्ध्वाया दिशो अन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः।
नास्य पशून् न संमानान् हिंस्ति य एवं वेद ।।१३।।
तस्मै सर्वेभ्यो अन्तर्देशेभ्य ईशानमिष्वासमनुष्ठातारमकुर्वन् ।।१४।।
ईशान एनमिष्वासः सर्वेभ्यो अन्तर्देशेभ्योऽनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशनः ।।१५।।
नास्य पशून न समानान् हिनस्ति य एवं वेद ।।१६।।

अ. १८.१.४०

स्तुहि श्रुतं गर्तसदं जनानां राजानं भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यमस्मत् ते नि वपन्तु सेन्यम् ।।४०।।

2. कण्वो घौरः – ऋ. १.४३.१–2; १.४३.४–६

ऋ. १.४३.१–2

मद्रुद्राय प्रचेतसे मीळहुष्टमाय त्व्यसे। वोचेम शन्तमं हृदे ।।१।।
यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियम्।।2।।

ऋ. १.४३.४–६

गाथपतिं भेधपतिं रुद्रं जलाषभेषजम्। तच्छंयोः सुम्नमीमहे ।।४।।
यः शुक्र इव सूर्यो हिरण्यमिव रोचते। श्रेष्ठो देवानां वसुः ।।५।।
शं नः करत्र्यवते सुगं मेषाय मेष्ये। नृभ्यो नारिभ्यो गवे ।।६।।

३. कपिंजलः – अ. 2.2७.६

रुद्र जलाषभेषज नीलशिखण्ड कर्मकृत्। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ।।६।।

४. कुत्स आंगिरसः – ऋ. १.११४.१–११

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसदद्विपदेचतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ।।१।।
मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ।।2।।
अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ।।३।।
त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ।।४।।
दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म छर्दिरस्मभ्यं यंसत् ।।५।।
इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ।।६।।
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।।७।।
मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।।८।।
उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हि ते सुमति मृळयत्तमाथा वयमव इत्ते वृणीमहे ।।९।।
आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ।।१०।।
अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।११।।

५. गृत्समदः शौनकः – ऋ. 2.३३.१–१५

आ ते पिर्तमरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ।।१।।
त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्य१स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ।।2।।
श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीति रपसो युयोधि ।।३।।
मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ।।४।।
हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ।।५।।
उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ।।६।।
क्वप स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ।।७।।
प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ।।८।।
स्थिरोभिरंगैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ।।९।।
अर्हन्बिभर्षि सायकानि धन्बार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ।।१०।।
स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ।।११।।
कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ।।१2।।
या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ।।१३।।
परि णो हेती रुद्रस्य वृज्याः त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ।।१४।।
एवा बभ्रो वृषण चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ।।१५।।

६. चातनः – अ. ६.३2.2

रुद्रो वो ग्रीवा अशरैत् पिशाचाः पृष्टीर्वोऽपि शृणातु यातुधानाः।
वीरुद् वो विश्वतोवीर्या यमेन समजीगमत् ।।2।।

७. नारायणः – य. ३.६2–६३

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।

यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम् ।।६2।।
शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हिंसीः।
निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय ।।६३।।

८. परमेष्ठी – य. १६.४

शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यधा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ।।४।।

६. परमेष्ठी वा कुत्सः – य. १६.१–३

नमस्ते रुद्र मन्यव ऽ उतो त ऽ इषवे नमः। बाहुभ्यामुत ते नमः ।।१।।
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि।।2।।
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ।।३।।

१०. प्रजापतिः – य. १६.६–१४

असौ यस्ताम्रो ऽ अरुण ऽ उत बभ्रुः सुमंगलः ।
ये चैनं रुद्रा ऽ अभितो दिक्षु श्रिताः सहस्रशोऽवैषां हेड ऽ ईमहे ।।६।।
असौ योऽवसर्पति नीलग्रीबो विलोहितः।
उतैनं गोपा ऽ अदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ।।७।।
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये ऽ अस्य सत्वानोऽहं तेभ्योऽकरं नमः ।।८।।
प्रमुंच धन्वनस्त्वमुभयोरात्न्योर्ज्याम्। याश्च ते हस्त ऽ इषवः ऽ परा ता भगवो वप ।।६।।
विज्यं धनुः कपर्द्दिनो विशल्यो बाणावां2 ऽउत ।
अनेशन्नस्य या ऽ इषव ऽ आभुरस्य निषङ्गधिः ।।१०।।
वा ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज ।।११।।
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य ऽ इषुधिस्तवारे ऽ अस्मन्निधेहि तम् ।।१2।।
अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे। निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ।।१३।।
नमस्त ऽ आयुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।।१४।।

११. बन्धुः – य. ३.५७–५६

एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहा ।
एष ते रुद्र भागऽआखुस्ते पशुः ।।५७।।
अव रुद्रमदीमह्यव देवं त्र्यम्बकम् ।
यथा नो वस्यसस्करद्यथा नः श्रेयस्करद्यथा नो व्यवसाययात् ।।५८।।
भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम्। सुखं मेषाय मेष्यै ।।५६।

१2. बृहदुक्थो वामदेवः – य. 2८.४

होता यक्षद् बर्हिषीन्द्रं निषद्वरं वृषभं नर्यापसम् ।
वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्यज ।।४।।

१३. ब्रह्म – अ. १.१६.३; ६.५५.2–३

अ. १.१६.३

यो नः स्वो यो अरणः सजात उ त निष्ट्यो यो अस्माँ अभिदासति ।
रुद्रः शरव्य यैतान् ममामित्रान् वि विध्यतु ।।३।।

अ. ६.५५.2–३

ग्रीष्मो हेमन्तः शिशिरो वसन्तः शरद् वर्षाः स्विते नो दधात ।
आ नो गोषु भजता प्रजायां निवात इद् वः शरणे स्याम ।।2।।
इदावत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ।।३।।

१४. वसिष्ठः – ऋ. ७.४६.१–४; ७.५६.१2; य. ३.६०; ६१

ऋ. ७.४६.१–४

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।
अषाळहाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ।।१।।
स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।
अवन्नवन्ती रुप नो दुरश्चरानमीवो रुद्र जासु नो भव ।।2।।
या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ।।३।।
मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ।।४।।

ऋ. ७.५६.१2

त्रयम्बकं यजामहे सुगन्धि पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।।१2।।

य. ३.६०–६१

त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ।
त्र्यम्बकं यजामहे सुगन्धि पतिवेदनम्। उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ।।६०।।
एतत्ते रुद्रावसं तेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकावसः
कृत्तिवासाऽअहिंसन्नः शिवोऽतीहि।।६१।।

१५. शन्तातिः – अ. ६.५६.2–३; ६.५७.१–३

अ. ६.५६.2–३

नमोऽस्त्वसिताय नमस्तिरश्चिराजये। स्वजाय बभ्रवे नमो नमो देवजनेभ्यः ।।2।।
सं ते हन्मि दता दतः समु ते हन्वा हनू। सं ते जिह्वया जिह्वां सम्वास्नाह आस्यम्।।३।।

अ. ६.५७.१–३

इदमिद् वा उ भेषजमिदं रुद्रस्य भेषजम्। येनेषुमेकतेजनां शतशल्यामपब्रवत् ।।१।।
जालाषेणाभि षिंजत जालाषेणोप सिंचत। जालाषमुग्रं भेषजं तेन नो मृड जीवसे ।।2।।
शं च नो मयश्च नो मा च नः किं चनाममत् ।
क्षमा रपो विश्वं नो अस्तु भेषजं सर्वं नो अस्तु भेषजम ।।३।।

१६. सिन्धुद्वीपः – य. ११.५४

रुद्राः संसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे। तेषां भानुरजस्रऽइच्छुक्रो देवेषु रोचते ।।५४।।

६६2. रुद्रः गणः

१. अथर्वा – अ. ५.६.३–४

सहस्रधार एव ते समस्वरन् दिवो नाके मधुजिह्वा असश्चतः ।
तस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवे ।।३।।
पर्यू षु प्र धन्वा वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तदध्यर्णवेनेयसे सनिस्रसो नामासि त्रयोदशो मास इन्द्रस्य गृहः ।।४।।

६६३. रुद्राः

१. कुत्सः – य. १६.१५–१७; १६; 2६; १६.१८; 20–2८; ३०–३३; ३५–३६

य. १६.१५–१७

मा नो महान्तमुत मा नोऽअर्भकं मा नऽउक्षन्तमुत मा नऽउक्षितम्।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।।१५।।
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः। मा नो वीरान् रुद्र भामिनोवर्धीर्हविष्मन्तः सदमित त्वा हवामहे ।।१६।।
नमो हिरण्यबाहवे सेनान्ये दिशां च पत्तये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमःशष्पिंजराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः।।१७।।

य. १६.१६

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे वाणि जाय कक्षाणां पतये नमो नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः ।।१६।।

य. १६.२६

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ।।२६।।

य. १६.१८

नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतयो नमो नमः सूतायाहन्त्यै वनानां पतये नमः ।।१८।।

य. १६.२०–२८

नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिनऽआव्याधिनीनां पतये नमो नमो निषंगिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारणयानां पतये नमः।।२०।।

नमो वंचते परिवंचते स्तायूनां पतये नमो नमो निषंगिणऽइषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यो विकृन्तानां पतये नमः।।२१।।

नमऽउष्णीषिणे गिरिचराय कुलुंचानां पतये नमो रमऽषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमऽ आयच्छद्भ्यो स्यद्भ्यश्च वो नमः ।।22।।

नमो विसृजद्भ्ये विद्धयद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्यऽअसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भयश्च वो नमः ।।२३।।

नमः सभाभ्यः समापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम ऽआव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम ऽउगणाभ्यस्तृंहतीभ्यश्च वो नमः ।।२४।।

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ।।२५।।

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यांऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः ।।२६।।

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुजिष्ठेभ्यश्च वो नमो नमः शवनिभ्यो मृगयुभ्यश्च वो नमः ।।२७।।

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकणठाय च ।।२८।।

य. ३०–३३

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीर्यसे च नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ।।३०।।

नमऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ।।३१।।

नमो ज्येष्ठ्राय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ।।३2।।

नमः सोभ्याय च प्रतिसर्य्याय च नमो याभ्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नमऽउर्वर्याय च खल्याय च ।।३३।।

य. ३५–३६

नमो बिल्मिने च कवचिने च नमो विर्मिणे च वरूथिने च नमः श्रुताय च श्रुसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ।।३५।।

नमो धृष्णवे च प्रमृशाय च नमो निषंगिणे चेषुधिमते च नमस्तीक्षणेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ।।३६।।

नमः सुत्याय च पथ्याय च नमः काठ्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ।।३७।।

नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेध्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ।।३८।।
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ।।३९।।

2. परमेष्ठी – य. १५.११

विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पंचदशस्त्वा स्तोमः पृथिव्यां श्रयतु प्र उगमुक्थमव्यथायै स्तभ्नातु बृहत्साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ।।११।।

३. परमेष्ठी प्रजापतिर्वा देवाः – य. १६.४०–६६

नमः शंगवे च पशुपतये च नम ऽ उग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रेच हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ।।४०।।
नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च।।४१।।
नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ।।४2।।
नमः सिकत्याय च प्रवाह्याय च नमः किंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नम ऽ इरिण्याय च प्रपथ्याय च ।।४३।।
नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्याय च नमः काट्याय च गह्वरेष्ठाय च ।।४४।।
नमः शुष्क्याय च हरित्याय च नमः पांसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नम ऽ ऊर्व्याय च सूर्व्याय च ।।४५।।
नमः पर्णाय च पर्णशदाय च नम ऽ उद्गुरमाणाय चभिघ्नते च नम ऽ आखिदते च प्रखिदते च नम ऽ इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानां हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम ऽ आनिर्हतेभ्यः ।।४६।।
द्रापे ऽ अन्धसस्पते दरिद्र नीललोहित। आसां प्रजानामेषां पशूनां मा भेर्मा रोङ् मो च नः कि ंचनाममत् ।।४७।।
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे ऽ अस्मिन्ननातुरम् ।।४८।।
या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ।।४९।।
परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ।।५०।।
मीढुष्टम् शिवतम शिवो नः सुमना भव। परमे वृक्ष ऽ आयुधं निधाय कृत्तिं वसान ऽ आ चर पिनाकम्बिभ्रदा गहि ।।५१।।
विकिरिद्र विलोहित नमस्ते ऽ अस्तु भगवः ।
यास्ते सहस्रं हेतयोऽन्यमस्मन्नि वपन्तु ताः ।।५2।।
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ।।५३।।
असंख्याता सहस्राणि ये रुद्रा ऽ अधि भूम्याम् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।५४।।
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा ऽ अधि ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।५५।।

नीलग्रीवाः शितिकण्ठा दिवं रुद्रा ऽ उपश्रिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।५६।।
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।५७।।
ये वृक्षेषु शष्पिंजरा नीलग्रीवा विलोहिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।५८।।
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।५९।।
ये पथां पथिरक्षय ऽ ऐलबृदा ऽ आ युर्युधः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।६०।।
ये तीर्थानि प्रचरन्ति सृकाहस्ता निषंगिणः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।६१।।
येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।६2।।
य ऽ एतावन्तश्च भूयांसश्च दिशो रुद्रा वितस्थिरे ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।६३।।
नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो ऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जग्भे दध्मः ।।६४।।
नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात ऽ इषवः ।
तेभ्यो दश प्रचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।
तेभ्यो नमो ऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।६५।।
नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीर्चीर्दशोर्ध्वाः ।
तेभ्यो नमो ऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च
नो द्वष्टि तमेषां जम्भे दध्म ।।६६।।

४. **प्रजापतिः – य. १६.३४**

नमो वन्याय च कक्षयाय च नमः श्रवाय च प्रतिश्रवाय च नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ।।३४।।

५. **स्वस्त्यात्रेयः – य. 2१.2३**

वसन्तेनऽऋतुना देवा वसवस्त्रिवृता स्तुताः। रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ।।2३।।

६६४. रुद्रादयः

१. **दीर्घतमा – य. ३८.१६**

स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः। अहः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा। रात्रिः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा ।
मधु हुतमिन्द्रतमेऽअग्नावश्याम ते देव घर्म नमस्तेऽअस्तु मा मा हिंसीः।।१६।।

६६५. रेतः

१. **प्रजापतिः – अ. ६.११.१–2**

शमीमश्वत्थ आरूढस्तत्र पुंसुवनं कृतम्। तद् वै पुत्रस्य वेदनं तत् स्त्रीष्वा भरामसि ।।१।।
पुंसि वै रेतो भवति तत् स्त्रियामनु षिच्यते। तद् वै पुत्रस्य वेदनं तत् प्रजापतिरब्रवीत् ।।2।।

६६६. रोदसी द्युनिशौ वा

१. प्रजापतिर् वैश्वामित्रो वाच्यो वा – ऋ. ३.५५.१५

पदे इव निहिते दस्मे अन्तस्तयोरन्यद् गुह्यमाविरन्यत् ।
सध्रीचीना पथ्या३ सो विषूची महद्देवानामसुरत्वमेकम् ।।१५।।

६६७. रोदसी

१. प्रजापतिर् वैश्वामित्रो वाच्यो वा – ऋ. ३.५५.१२–१४

माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची ।
ऋतस्य ते सदसीळे अन्तर्महद्देवानामसुरत्वमेकम् ।।१2।।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ।
ऋतस्य सा पयसापिन्वतेळा महद्देवानामसुरत्वमेकम् ।।१३।।
पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा ।
ऋतस्य सद्म वि चरामि विद्वान्महद्देवानामसुरत्वमेकम् ।।१४।।

६६८. रोहिणी वनस्पतिः

१. ऋभुः – अ. ४.१2.१–७

रोहण्यसि रोहण्यस्थ्नश्छिन्नस्य रोहणी। रोहयेदमरुन्धति ।।१।।
यत् ते रिष्टं यत् ते द्युत्तमस्ति पेष्ट्रं त आत्मनि।
धाता तद् भद्रया पुनः सं दधत् परुषा परुः।।2।।
सं ते मज्जा मज्ज्ञा भवतु समु परुष परुः। सं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु ।।३।।
मज्जा मज्ज्ञा सं धीयतां चर्मणा चर्म रोहतु। असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु ।।४।।
लोम लोम्ना सं कल्पया त्वचा सं कल्पया त्वचम्। असृक् ते अस्थि रोहतु च्छिन्नं सं धेह्योषधे।।५।
स उत् तिष्ठ प्रेहि प्र द्रव रथः सुचक्रः सुपविः सुनाभिः प्रति तिष्ठोर्ध्वः ।।६।।
यदि कर्तं पतित्वा संशश्रे यदि वाश्मा प्रहृतो जघान। ऋभू रथस्येवांगानि सं दधत् परुषा परुः।।७।

६६९. लिंगोक्ता

१. प्रजापतिः – य. 2०.१७; 22.22; 2६

य. 2०.१७

यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।
यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि ।।१७।।

य. 22.22

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्रीं धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णु रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे–निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।।22।।

य. 22.2६

पृथिव्यै स्वहान्तरिक्षाय स्वाहा दिवे स्वहा सूर्य्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिग्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा 2६।।

2. वसिष्ठः – ऋ. ७.४१.१; ७.४४.१–५

ऋ. ७.४१.१

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रवरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ।।१।।

ऋ. ७.४४.१–५

दधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमूतये हुवे ।
इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान्द्यावापृथिवी अपः स्वः ।।१।।
दधिक्रामु नमसा बोधयन्त उदीराणा यज्ञमुपप्रयन्तः ।
इळां देवीं बर्हिषि सादयन्तोऽश्विना विप्रा सुहवा हुवेम ।।2।।
दधिक्रावाणं बुबुधानो अग्निमुप ब्रुव उषसं सूर्यं गाम् ।
ब्रध्नं मंश्चतोर्वरुणस्य बभ्रुं ते विश्वास्मद् दुरिता यावयन्तु ।।३।।
दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन् ।
संविदान उषसा सूर्येणादित्येभिर्वसुभिरंगिरोभिः ।।४।।
आ नो दधिक्राः पथ्यामनक्त्वृतस्य पन्थामन्वेतवा उ ।
शृणोतु नो दैव्यं शर्धो अग्निः शृण्वन्तु विश्वे महिषा अमूराः ।।५।।

३. **शकपूतो नार्मेधः – ऋ. १०.१३2.१**

ईजानमिद् द्यौर्गूर्तावसुरीजानं भूमिरभि प्रभूषणि। ईजानं देवावश्विनावभि सुम्नैरवर्धताम् ।।१।।

६७०. लिंगोक्ता (गर्भार्थ आशीः)

१. **त्वष्टा गर्भकर्ता विष्णुर् वा प्राजापत्यः – ऋ. १०.१८४.१–३**

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आ सिंचतु प्रजापतिर्धाता गर्भं दधातु ते ।।१।।
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा ।।2।।
हिरण्ययी अरणी यं निर्मन्थतो अश्विना। तं ते गर्भं हवामहे दशमे मासि सूतवे ।।३।।

६७१. लिंगोक्ता (साग्री.सास्वा.) द्यावापृथिवी इन्द्राबृहस्पतीभगश्च (सार्षेदी.)

१. **वामदेवो गौतमः – सा. ६११**

यशो मा द्यावापृथिवी यशो मेन्द्रबृहस्पती ।
यशो भगस्य विन्दतु यशो मा प्रतिमुच्यताम् ।
यशस्वया३स्याः संसदोऽहं प्रवहिता स्याम् ।।१०।।

६७2. लिंगोक्ताः

१. **आथर्वणः दध्यङ् – य. ३६.११**

अहानि शं भवन्तु नः शं रात्रीः प्रति धीयताम्। शन्नऽइन्द्राग्नी भवतामवोभिः शन्नऽइन्द्रावरुणा रातहव्या। शन्नऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंयोः ।।११।।

2. **ऋजिष्वा – य. ३४.५३**

उत नोऽहिर्बुध्न्यः शृणोत्वज ऽएकपात्पृथिवी समुद्रः ।
विश्वे देवाऽऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ताऽअवन्तु ।।५३।।

३. **कुमारहारितः – य. १2.७2**

कामं कामदुघे धृक्ष्व मित्राय वरुणाय च। इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्यऽओषधीभ्यः ।।७2।।

४. **गृत्समदः शौनकः – ऋ. 2.३2.८**

या गुंगूर्या सिनीवाली या राका या सरस्वती। इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये ।।८।।

५. **दध्यङ् आथर्वणः – य. ३६.११**

अहानि शं भवन्तु नः शं रात्रीः प्रति धीयताम्। शन्नऽइन्द्राग्नी भवतामवोभिः शन्नऽइन्द्रावरुणा रातहव्या। शन्नऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंयोः ।।११।।

६. **पायुर् भरद्वाजः – ऋ. ६.७५.१०.**

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरिताद् ऋतावृधो रक्षा माकिर्नो अघशंस ईशत ।।१०।।

७. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः – ऋ. १०.५६.७

पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम् ।
पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः ।।७।।

८. विश्वामित्रो जमदग्नी – ऋ. १०.१६७.३

सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि ।
तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयम् ।।३।।

९. विश्वेदेवाः – य. ३४.४६

ये नः सपत्नाऽअप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्राऽआदित्याऽउपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ।।४६।।

१०. स्वस्त्यात्रेयः – य. 21.६०; ६१

सूपस्थाऽअद्य देवो वनस्पतिरभवदश्विभ्यां छागेन सरस्वत्यै मेषेणेन्द्राय ऽऋषभेणाक्षँस्तान् मेदस्तःप्रति पचतागृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा सुरासोमान् ।।६०।।
त्वामद्यऽऋषऽआर्षेयऽऋषीणां नपादवृणीतायं यजमानो बहुभ्यऽआ संगतेभ्यऽएष मे देवेषु वसु वार्यायक्ष्यतऽइति ता या देवा देव दानान्यदुस्तान्यस्माऽआ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ।।६१।।

६७३. लिंगोक्ता पितरो वा

१. यमः – ऋ. १०.१४.७–९

प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणं च देवम्।।७।।
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः ।।८।।
अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ।।९।।

६७४. लिंगोक्ता ब्रध्न

१. ब्रह्म – अ. ७.22.१–2

अयं सहस्रमा नो दृशे कवीनां मतिर्ज्योतिर्विधर्मणि ।।१।।
ब्रध्नः समीचीरुषसः समैरयन्। अरेपसः सचेतसः स्वसरे मन्युमत्तमाश्चिते गोः ।।2।।

६७५. लोपामुद्रा (सास्वा.); दम्पत्ती (अजमेर)

१. लोपामुद्रा–अगस्त्यौ (सास्वा.) रति (अजमेर) – ऋ. १.१७९.१–2

पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः ।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ।।१।।
ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि ।
ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः ।।2।।

६७६. वज्रः

१. शुक्रः – अ. ६.१३४.१–३; ६.१३५.१–३

अ. ६.१३४.१–३

अयं वज्रस्तर्पयतामृतस्यावास्य राष्ट्रमप हन्तु जीवितम् ।
शृणातु ग्रीवाः प्र शृणातूष्णिहा वृत्रस्येव शचीपतिः ।।१।।
अधरोऽधर उत्तरेभ्यो गूढः पृथिव्या मोत्सृपत्। वज्रेणावहतः शयाम् ।।2।।
यो जिनाति तमन्विच्छ यो जिनाति तमिज्जहि। जिनतो वज्र त्वं सीमन्तमन्वंचमनु पातय ।।३।।

अ. ६.१३५.१–३

यदश्नामि बलं कुर्व इत्थं वज्रमा ददे । स्कन्धानमुष्य शातयन् वृत्रस्येव शचीपतिः ।।१।।
यत् पिबामि सं पिबामि समुद्रइव संपिबः। प्राणानमुष्य संपाय सं पिबामो अमुं वयम् ।।2।।
यद् गिरामि सं गिरामि समुद्रइव संगिरः। प्राणानमुष्य संगीर्य सं गिरामो अमुं वयम्।।३।।

६७७. वधूवासः संस्पर्शनिन्दा

१. सूर्या सावित्री – ऋ. १०.८५.2६; ३०

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्व्या जाया विशते पतिम् ।।2६।।
अश्रीरा तनूर्भवति रुशती पापयामुया। पतिर्यद्वध्वो३ वाससा स्वमंगमभिधित्सते।।३०।।

६७८. वधूवास संस्पर्शमोचनम्

१. सावित्री सूर्या – अ. १४.१.2५; 2७

अ. १४.१.2५

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्वा जाया विशते पतिम् ।।2५।।

अ. १४.१.2७

अश्लीला तनूर्भवति रुशती पापयामुया। पतिर्यद् वध्वो३ वाससः स्वपमंगमभ्यूर्णुते ।।2७।।

६७९. वनस्पतिः

१. अथर्वा – अ. ६.१2५.१–३; ६.१३८.१–५; ६.१३९.१–५; ७.५६.2

अ. ६.१2५.१–३

वनस्पते वीड्व ङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ।।१।।
दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ।
अपामोज्मानं परि गोभिराभृतमिन्द्रस्य वज्रं हविषा रथं यज ।।2।।
इन्द्रस्यौजो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
स इमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ।।३।।

अ. ६.१३८.१–५

त्वं वीरुधां श्रेष्ठतमाभिश्रुतास्योषधे । इमं मे अद्य पूरुषं क्लीबमोपशिनं कृधि ।।१।।
क्लीब कृध्योपशिनमथो कुरीरिणं कृधि। अथास्येन्द्रो ग्रावभ्यामुभे भिनत्त्वाण्ड्यौ ।।2।।
क्लीब क्लीबं त्वाकरं वध्रे वध्रिं त्वाकरमरसारसं त्वाकरम् ।
कुरीरमस्य शीर्षाणि कुम्बं चाधिनिदध्मसि ।।३।।
ये ते नाड्यौ देवकृते ययोस्तिष्ठति वृष्ण्यम् ।
ते ते भिनद्मि शम्ययामुष्या अधि मुष्कयोः ।।४।।
यथा नडं कशिपुने स्त्रियो भिन्दन्त्यश्मना। एवा भिनद्मि ते शेपोऽमुष्या अधि मुष्कयोः ।।५।।

अ. ६.१३९.१–५

न्यस्तिका रुरोहिथ सुभागंकरणी मम। शतं तव प्रतानास्त्रायस्त्रिंशन्नितानाः ।
तया सहस्रपर्ण्या हृदयं शोषयामि ते ।।१।।
शुष्यतु मयि ते हृदयमथो शुष्यत्वास्यम् ।
अथो नि शुष्य मां कामेनाथो शुष्कास्या चर ।।2।।
संवननी समुष्पला बभ्रु कल्याणि सं नुद ।
अमूं च मां चे सं नुद समानं हृदयं कृधि ।।३।।
यथोदकमपपुषोऽपशुष्यत्यास्य म् । एवा नि शुष्य मां कामेनाथो शुष्कास्या चर ।।४।।
यथा नकुलो विच्छिन्नं संदधात्यहिं पुनः। एवा कामस्य विच्छिन्नं सं धेहि वीर्यावति।।५।।

अ. ७.५६.2

इयं वीरुन्मधुजाता मधुश्चुन्मधुला मधूः। सा विह्रुतस्य भेषज्यथो मशकजम्भनी ।।2।।

2. अथर्वा (यक्ष्मनाशन कामः) – अ. ६.८५.१–३

वरणो वारयाता अयं देवो वनस्पतिः। यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् ।।१।।

इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च। देवानां सर्वेषां वाचा यक्ष्मं ते वारयामहे ।।2।।
यथा वृत्र इमा आपस्तस्तम्भ विश्वधा यतीः। एवा ते अग्निना यक्ष्मं वैश्वानरेण वारये ।।३।।

३. उद्दालकः – अ. ६.१५.१–३

उत्तमो अस्योषधीनां तव वृक्षा उपस्तयः। उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभिदासति ।।१।।
सबन्धुश्चासबन्धुश्च यो अस्माँ अभिदासति। तेषां सा वृक्षाणामिवाहं भूयासमुत्तमः ।।2।।
यथा सोम ओषधीनामुत्तमो हविषां कृतः। तलाशा वृक्षाणामिवाहं भूयासमुत्तमः ।।३।।

४. गरुत्मान् – अ. ४.७.१–७; ६.१००.१–३

अ. ४.७.१–७

वारिदं वारयातै वरणावत्यामधि। तत्रामृतस्यासिक्तं तेना ते वारये विषम् ।।१।।
अरसं प्राच्यं विषमरसं यदुदीच्यम्। अथेदमधराच्यं करम्भेण वि कल्पते ।।2।।
करम्भं कृत्वा तिर्यं पीबस्पाकमुदारथिम्। क्षुधा किल त्वा दुष्टनो जक्षिवान्त्स न रूरुपः ।।३।।
वि ते मदं मदावति शरमिव पातयामसि। प्र त्वा चरुमिव येषन्तं वचसा ासथपयामसि ।।४।।
परि ग्राममिवाचितं वचसवा स्थापयामसि। तिष्ठा वृक्षइव स्थाम्नयभ्रिखाते न रूरुपः ।।५।।
पवस्तैस्वा पर्यक्रीणन् दूर्शेभिरजिनैरुत। प्रक्रीरसि त्वमोषधेऽभ्रिखाते न रूरुपः ।।६।।
अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे।
वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे।।७।।

अ. ६.१००.१–३

देव अदुः सूर्यो अदाद् द्यौरदात् पृथिव्यदात्। तिस्रः सरस्वतीरदुः सचिता विषदूषणम् ।।१।।
यद् वो देवा उपजीका असिंचन् धन्वन्युदकम्। तेन देवप्रसूतेनेदं दूषयता विषम् ।।2।।
असुराणां दुहितासि सा देवानामसि स्वसा। दिवस्पृथिव्याः संभूता सा चकर्थारसं विषम् ।।३।।

५. दीर्घतमा औचथ्यः – ऋ. १.१४2.११

अवसुजन्नुप त्मना देवान्यक्षि वनस्पते। अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ।।११।।

६. भृगुः – अ. ३.2४.१–७

पयस्वतीरोषधयः पयस्वन्मामकं वचः । अथो पयस्वतीनामा भरेऽहं सहस्रशः ।।१।।
वेदाहं पयस्वन्तं चकार धान्यं बहु ।
सम्भृत्वा नाम यो देवस्तं वयं हवामहे योयो अयज्वनो गृहे ।।2।।
इमा याः पंच प्रदिशो मानवीः पंच कृष्टयः ।
वृष्टे शापं नदीरिवेह स्फातिं समावहान् ।।३।।
उदुतसं शतधारं सहस्रधारमक्षितम् । एवास्माकेदं धान्यं सहस्रधारमक्षितम् ।।४।।
शतहस्त समाहर सहस्रहस्त सं किर ।
कृतस्य कार्यस्य चेह स्फातिं समावह ।।५।।
तिस्रो मात्रा गन्धर्वाणां चतस्रो गृहपत्न्याः ।
तासां या स्फातिमत्तमा तया त्वाभि मृशामसि ।।६।।
उपोहश्च समूहश्च क्षत्तारौ ते प्रजापते। ताविहा वहतां स्फातिं बहुं भूमानमक्षितम् ।।७।।

७. भृग्वंगिरा – अ. 2.६.१–५; ६.६६.१–2

अ. 2.६.१–५

दशवृक्ष मुंचेमं रक्षसो ग्राह्या अधि यैनं जग्राह पर्वसु।
अथो एनं वनस्पते जीवानां लोकमुन्नय।।१।।
आगादुदगादयं जीवानां व्रातमप्यगात्। अभूदु पुत्राणां पिता नृणां च भगवत्तमः ।।2।।
अधीतीरध्यगादयमधि जीवपुरा अगन्। शतं ह्यस्य भिषजः सहस्रमुत वीरुधः ।।३।।
देवास्ते चीतिमविदन् ब्रह्माण उत वीरुधः। चीतिं ते विश्वे देवा अविदन् भ्रम्यामधि ।।४।।
यश्चकार स निष्करत् स एव सुभिषक्तमः। स एव तुभ्यं भेषजानि कृणवद् भिषजा शुचिः।।५।।

अ. ६.६६.१–2

यो ओषधयः सोमराज्ञीर्बह्वीः शतविचक्षणाः। बृहस्पति प्रसूतास्ता नो मुंचन्त्वंहसः ।।१।।
मुंचन्तु मा शपथ्या३दथो वरुण्यादुत। अथो यमस्य पड्वीशाद् विश्वस्माद् देव किल्बिषात्।।2।।

८. **मेधातिथिः काण्वः – ऋ. १.१३.११**

अव सृजा वनस्पते देव देवेभ्यो हविः। प्र दातुरस्तु चेतनम् ।।११।।

९. **शुक्रः – अ. ५.१४.१–१३**

सुपर्णस्त्वान्वविन्दत् सूकरस्त्वाखनन्नसा ।
दिप्सौषधे त्वं दिप्सन्तमव कृत्याकृतं जहि ।।१।।
अव जहि यातुधानानव कृत्याकृतं जहि ।
अथो यो अस्मान् दिप्सति तमु त्वं जह्योषधे ।।2।।
रिश्यस्येव परीशासं परिकृत्य परि त्वचः ।
कृतयां कृतयाकृते देवा निष्कमिव प्रति मुंचत ।।३।।
पुनः कृत्यां कृतयाकृते हस्तगृह्य परा णय ।
समक्षमस्मा आ धेहि यथा कृत्याकृतं हनत् ।।४।।
कृत्याः सन्तु कृत्याकृते शपथः शपथीयते ।
सुखो रथइव वर्ततां कृत्या कृत्याकृतं पुनः ।।५।।
यदि स्त्री यदि वा पुमान् कृत्यां चकार पाप्मने ।
तामु तस्मै नयामस्यश्वमिवाश्वाभिधान्या ।।६।।
यदि वासि देवकृता यदि वा पुरुषैः कृता ।
तां त्वा पुनर्णयामसीन्द्रेण सयुजा वयम् ।।७।।
अग्ने पृतनाषाट् पृतनाः सहस्व । पुनः कृत्यां कृत्याकृते प्रतिहरणेन हरामसि ।।८।।
कृतव्यधनि विध्य तं यश्चकार तमिज्जहि ।
न त्वामचक्रुषे वयं वधाय सं शिशीमहि ।।९।।
पुत्रइव पितरं गच्छ स्वजइवाभिष्ठितो दश ।
बन्धमिवावक्रामी गच्छ कृत्ये कृत्याकृतं पुनः ।।१०।।
उदेणीव वारण्यभिस्कन्दं मृगीव । कृत्याकर्तारमृच्छतु ।।११।।
इष्वा ऋजीयः पततु द्यावापृथिवी तं प्रति ।
सा तं मृगमिव गृह्णातु कृत्या कृत्याकृतं पुनः ।।१2।।
अग्निरिवैतु प्रतिकूलमनुकूलमिवोदकम् ।
सुखो रथइव वर्ततां कृत्या कृत्याकृतं पुनः ।।१३।।

६८०. वनस्पतिः (आसुरी)

१. **अथर्वा – अ. ७.३८.१–५**

इदं खनामि भेषजं मांपश्यमभिरोरुदम्। परायतो निवर्तनमायतः प्रतिनन्दनम् ।।१।।
येना निचक्र आसुरीन्द्रं देवेभ्यस्परि। तेना नि कुर्वे त्वामहं यथा तेऽसानि सुप्रिया ।।2।।
प्रतीची सोममसि प्रतीच्युत सूर्यम्। प्रतीची विश्वान् देवान् तां त्वाच्छावदामसि ।।३।।
अहं वदामि नेत् त्वं सभायामह त्वं वद। ममेदसस्त्वं केवलो नान्यासां कीर्तयाश्चन ।।४।।
यदि वासि तिरोजनं यदि वा नद्यस्तिरः। इयं ह मह्यं त्वामोषधिर्बदध्वेव न्यानयत्।।५।।

६८१. वनस्पतिः (उच्छुष्मोषधि)

१. **अथर्वा – अ. ४.४.१–2**

यां त्वा गन्धर्वो अखनद् व३णाय मृतभ्रजे। तां त्वा वयं खनामस्योषधिं शेपर्हषणीम् ।।१।।
उदुषा उदु सूर्य उदिदं मामकं वचः। उदेजतु प्रजापतिर्वृषा शुष्मेण वाजिना ।।2।।

६८2. वनस्पतिः (कुष्ठ)

१. **भृग्वंगिरा – अ. ६.९५.१–३**

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि। तत्रामृतस्य चक्षणं देवाः कृष्ठमवन्वत ।।१।।
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि। तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ।।2।।
गर्भो अस्योषधीनां गर्भो हिमवतामुत। गर्भो विश्वस्य भूतस्येमं मे अगदं कृधि ।।३।।

६८३. वनस्पतिः फालमणिः

१. बृहस्पतिः – अ. १०.६.१–2; ४–३४

अ. १०.६.१–2

अरातीयोर्भ्रातृव्यस्य दुर्हार्दो द्विषतः शिरः। अपि वृश्चाम्योजसा ।।१।।
वर्म मह्यमयं मणिः फालाज्जातः करिष्यति। पूर्णो मन्थेन मागमद् रसेन सह वर्चसा ।।2।।

अ. १०.६.४–३४

हिरण्यस्रगयं मणिः श्रद्धां यज्ञं महो दधत्। गृहे वसतु नोऽतिथिः ।।४।।
तस्मै घृतं सुरां मध्वन्नमन्नं क्षदामहे ।
स नः पितेव पुत्रेभ्यःश्रेयः श्रेयश्चिकित्सतु भूयोभूयः श्वःश्वो देवेभ्यो मणिरेत्य ।।५।।
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चतुतमुग्रं खदिरमोजसे ।
तमग्निः प्रत्यमुंचत सो अस्मै दुह आज्यं भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।६।।
यमबध्नाद् बृहस्पतिर्मणि फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तमिन्द्रः प्रत्यमुंचतौजसे वीर्याय कम् ।
सो अस्मै बलमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।७।।
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं सोमः प्रत्यमुंचत महे श्रोत्राय चक्षसे ।
सो अस्मै वर्च इद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।८।।
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं सूर्यः प्रत्यमुंचत तेनेमा अजयद् दिशः ।
सो अस्मै भूतिमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।६।।
यमबध्नाद् बृहस्पतिर्मणि फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं विभ्रच्चन्द्रमा मणिमसुराणां पुरोऽजयद् दानवानां हिरण्ययीः ।
सो अस्मै श्रियमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।१०।।
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे ।
सो अस्मै वाजिनं दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।११।।
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तेनेमां मणिना कृषिमश्विसनावभि रक्षतः ।
स भिषग्भ्यां महो दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।१2।।
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तं बिभ्रत् सविता मणिं तेनेदमजयत् स्वः ।
सो अस्मै सूनृतां दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।१३।।
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तमापो बिभतीर्मणिं सदा धवन्त्यक्षिताः ।
स आभ्योऽमृतमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।१४।।
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तं राजा वरुणो मणिं प्रत्यमुंचत शंभुवम् ।
सो अस्मै सत्यमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।१५।।
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तं देवा बिभ्रतो मणिं सर्वाँल्लोकान् युधाजयन् ।
स एभ्यो जितिमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।१६।।
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तमिमं देवता मणिं प्रत्यमुंचन्त शंभुवम् ।
स आभ्यो विश्वमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ।।१७।।
ऋतवस्तमबध्नतार्तवास्तमबध्नत। संवत्सरस्तं बद्ध्वा सर्वं भूतं वि रक्षति ।।१८।।
अन्तर्देशा अबध्नत प्रदिशस्तमबध्नत। प्रजापतिसृष्टो मणिर्द्विषतो मेऽधराँ अकः ।।१६।।
अथर्वाणो अबध्नताथर्वणा अबध्नत ।
तैर्मेदिनो अंगिरसो दस्यूनां बिभिदुः पुरस्तेन त्वं द्विषतो जहि ।।2०।।

तं धाता प्रत्यमुंचत स भूतं व्यकल्पयत्। तेन त्वं द्विषतो जहि ।।21।।
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम्। स मायं मणिरागमद् रसेन सह वर्चसा ।।22।।
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् सह गोभिरजाविभरन्नेन प्रजया सह ।।2३।।
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् सह व्रीहियवाभ्यां महसा भूत्या सह ।।2४।।
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमन्मधोर्घृतस्य धारया कीलालेन मणिः सह ।।2५।।
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिमागमदूर्जया पयसा सह द्रविणेन श्रिया सह ।।2६।।
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् तेजसा त्विष्या सह यशसा कीर्त्यासह ।।2७।।
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम्। स मायं मणिरागमत् सर्वाभिर्भूतिभिः सह ।।2८।।
तामिमं देवता मणिं मह्यं ददतु पुष्टये। अभिभुं क्षत्रवर्धनं सपत्नदम्भनं मणिम् ।।2९।।
ब्रह्मणा तेजसा सह प्रति मुंचामि मे शिवम्। असपत्नः सपत्नहा सप्त्नान् मेऽधराँ अकः ।।३०।।
उत्तरं द्विषतो मामयं मणिष्कृणोतु देवजाः ।
यस्य लोका इमे त्रयः पयो दुग्धमुपासते। स मायमधि रोहतु मणिः श्रैष्ठ्याय मूर्धतः ।।३१।।
यं देवाः पितरो मनुष्या अपजीवन्ति सर्वदा। स मायमधि रोहतु मणिः श्रैष्ठ्याय मूर्धतः ।।३2।।
यथा बीजमुर्वरायां कृष्टे फालेन रोहति। एवा मयिं प्रजा पशवोऽन्नमन्नं वि रोहतु ।।३३।।
यस्मै त्वा यज्ञवर्धन मणे प्रत्यमुंचं शिवम्। तं त्वं शतदक्षिण मणे श्रैष्ठ्याय जिन्वतात् ।।३४।।

६८४. वनस्पतिः (दूर्वा)

१. अथर्वा – अ. 2.७.१–५

अघद्विष्टा देवजाता वीरुच्छपथयोपनी ।
आपो मलमिव प्राणैक्षीत् सर्वान् मच्छपथाँ अधि ।।१।।
यश्च सापत्नः शपथो जाम्याः शपथश्च यः ।
ब्रह्मा यन्मन्युतः शपात् सर्वं तन्नो अधस्पदम् ।।2।।
दिवो मूलमवततं पृथिव्या अध्युत्ततम् ।
तेन सहस्रकाण्डेन परि णः पाहि विश्वतः ।।३।।
परि मां परि मे प्रजां परि णः पाहि यद् धनम् ।
अरातिर्नो मा तारीन्मा नस्तारिषुरभिमातयः ।।४।।
शप्तारमेतु शपथो यः सुहार्त् तेन नः सह ।
चक्षुर्मन्त्रस्य दुर्हार्दः पृष्टीरपि शृणीमसि ।।५।।

६८५. वनस्पतिः यक्ष्मनाशनम्

१. भृग्वंगिरा – अ. ६.१2७.१–३

विद्रधस्य बलासस्य लोहितस्य वनस्पते। विसल्पकस्योषधे मोच्छिषः पिशितं चन ।।१।।
यौ ते बलास तिष्ठतः कक्षे मुष्कावपश्रितौ। वेदाहं तस्य भेषजं चीपुद्रुरभिचक्षणम् ।।2।।
यो अंगयो यः कर्ण्यो यो अक्ष्योर्विसल्पकः ।
वि वृहामो विसल्पकं विद्रधं हृदयामयम्। परा तमज्ञातं यक्ष्ममधरांचं सुवामसि ।।३।।

६८६. वनस्पतयः (रामाकृष्णा असिवनी च)

१. अथर्वा – अ. १.2३.१–४

नक्तंजातास्योषधे रामे कृष्णे असिक्नि च। इदं रजनि रजय किलासं पलितं च यत् ।।१।।
किलासं च पलितं च निरितो नाशया पृषत् ।
आ त्वा स्वो विशतां वर्णः परा शुक्लानि पातय ।।2।।

अस‍ितं ते प्रलयनमास्थानमसितं तव। असिक्न्यस्योषधे निरितो नाशया पृषत् ।।३।।
अस्थिजस्य किलासस्य तनूजस्य च यत् त्वचि।
दूष्या कृतस्य ब्रह्मणा लक्ष्म श्वेतमनीनशम्।।४।।

६८७. वनस्पतिः (वरणमणिः)

१. अथर्वा – अ. १०.३.१–२५

अयं मे वरणो मणिः सपत्नक्षयणो वृषा ।
तेना रभस्व त्वं शत्रून् प्र मृणीहि दुरस्यतः ।।१।।
प्रैणांछृणीहि प्र मृणा रभस्व मणिस्ते अस्तु पुरएता पुरस्तात् ।
अवारयन्त वरणेन देवा अभ्याचारमसुराणां श्वः श्वः ।।2।।
अयं मणिर्वरणो विश्वभेषजः सहस्राक्षो हरितो हिरण्ययः ।
स ते शत्रूनधरान् पादयाति पूर्वस्तान् दभ्नुहि ये त्वा द्विषन्ति ।।३।।
अयं ते कृत्यां विततां पौरुषेयादयं भयात् ।
अयं त्वा सर्वस्मात् पापाद् वरणो वारयिष्यते ।।४।।
वरणो वारयाता अयं देवो वनस्पतिः ।
यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् ।।५।।
स्वप्नं सुप्त्वा यदि पश्यासि पापं मृगः सृतिं यदि धावादजुष्टाम् ।
परिक्षवाच्छकुनेः पापवादादयं मणिर्वरणो वारयिष्यते ।।६।।
अरात्यास्त्वा निर्ऋत्या अभिचारादथो भयात् ।
मृत्योरोजीयसो वधाद् वरणो वारयिष्यते ।।७।।
यन्मे माता यन्मे पिता भ्रातरो यच्च मे स्वा यदेनश्चकृमा वयम् ।
ततो नो वारयिष्यतेऽयं देवो वनस्पतिः ।।८।।
वरणेन प्रव्यथिता भ्रातृव्या मे सबन्धवः ।
असूर्तं रजो अप्यगुस्ते यन्त्वधमं तमः ।।६।।
अरिष्टोऽहमरिष्टगुरायुष्मान्त्सर्वपूरुषः। तं मायं वरणो मणिः परिं पातु दिशोदिशः ।।१०।।
अयं मे वरण उरसि राजा देवो वनस्पतिः ।
स मे शत्रून् वि बाधतामिन्द्रो दस्यूनिवासुरान् ।।११।।
इमं बिभर्मि वरणमायुष्मांछतशारदः । स मे राष्ट्रं च क्षत्रं च पशूनोजश्च मे दधत् ।।१2।।
यथा वातो वनस्पतीन् वृक्षान् भनक्त्योजसा ।
एवा सपत्नान् मे भङ्ग्धि पूर्वांजाताँ उतापरान् वरणस्त्वाभि रक्षतु ।।१३।।
यथा वातश्चाग्निश्च वृक्षान् प्सातो वनस्पतीन् ।
एवा सपत्नान् मे प्साहि पूर्वांजाताँ उतापरान् वरणस्त्वाभि रक्षतु ।।१४।।
यथा वातेन प्रक्षीणा वृक्षाः शेरे न्यर्पिताः ।
एवा सपत्नांस्त्वं मम प्र क्षिणीहि न्य र्पय पूर्वांजाताँ उतापरान् वरणस्त्वाभि रक्षतु ।।१५।।
तास्त्वं प्र च्छिन्द्धि वरण पुरा दिष्टात् पुरायुषः ।
य एनं पशुषु दिप्सन्ति ये चास्य राष्ट्रदिप्सवः ।।१६।।
यथा सूर्यो अतिभाति यथास्मिन् तेज आहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ।।१७।।
यथा यशश्चन्द्रमस्यादित्ये च नृचक्षसि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ।।१८।।
यथा यशः पृथिव्यां यथास्मिंजातवेदसि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ।।१६।।
यथा यशः कन्यायां यथास्मिन्त्संभृते रथे ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ।।2०।।

यथा यशः सोमपीथे मधुपर्के यथा यशः ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ।।२१।।
यथा यशोऽग्निहोत्रे वषट्कारे यथा यशः ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ।।22।।
यथा यशो यजमाने यथास्मिन् यज्ञ आहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ।।2३।।
यथा यशः प्रजापतौ यथास्मिन् परमेष्ठिनि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ।।2४।।
यथा देवेष्वमृतं यथैषु सत्यमाहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा।।2५।।

६८८. वनस्पतिः (वाणपर्णी)

१. अथर्वा – अ. ३.१८.१–६

इमां खनाम्योषधिं वीरुधां बलवत्तमाम्। यया सपत्नीं बाधते यया संविन्दते पतिम् ।।१।।
उत्तानपर्णे सुभगे देवजूते सहस्वति। सपत्नीं मे परा णुद पतिं मे केवलं कृधि ।।2।।
नहि ते नाम जग्राह नो अस्मिन् रमसे पतौ। परामेव परावतं सपत्नीं गमयामसि ।।३।।
उत्तराहमुत्तर उत्तरेदुत्तराभ्यः। अधः सपत्नी या ममाधरा साधाराभ्यः ।।४।।
अहमस्मि सहमानाथो त्वमसि सासहिः। उभे सहस्वती भूत्वा सपत्नीं मे सहावहै ।।५।।
अभि तेऽधां सहमानामुप तेऽधां सहीयसीम् ।
मामनु प्र ते मनो वत्सं गौरिव धावतु पथा वारिव धावतु ।।६।।

६८९. वयः

१. कपिंजलः – अ. ७.६६.१

असदन् गावः सदनेऽपप्तद् वसतिं वयः। आस्थाने पर्वता अस्थुः स्थाम्नि वृक्कावतिष्ठिपम्।।१।।

६९०. वर्म

१. पायुर् भरद्वाजः – ऋ. ६.७५.१

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ।।१।।

६९१. वर्म–सोम–वरुणाः

१. पायुर् भरद्वाजः – सा. १८७०; १८७2

सा. १८७०

मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ।।१।।

सा. १८७2

यो नः स्वोऽरणो यश्च निष्ठ्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म मामान्तरं शर्म वर्म ममान्तरम् ।।३।।

६९2. वरुण–मित्र–अर्यमणः

१. कण्वो घौरः – ऋ. १.४१.१–३; १.४१.७–९

ऋ. १.४१.१–३

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा। नू चित्स दभ्यते जनः ।।१।।
यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः। अरिष्टः सर्व एधते ।।2।।
वि दुर्गा विद्विषः पुरो घ्नन्ति राजान एषाम्। नयन्ति दुरिता तिरः ।।३।।

ऋ. १.४१.७–९

कथा राधाम सखायः स्तोमं मित्रस्यार्यम्णः। महि प्सरो वरुणस्य ।।७।।
मा वो घ्नन्त मा शपन्तं प्रति वोचेदेवयन्तम्। सुम्नैरिद्व आ विवासे ।।८।।
चतुरद्दिदमानाद्बिभीयादा निधातोः। न दुरुक्ताय स्पृहयेत् ।।९।।

६६३. वरुणः

१. अग्निवरुणसोमानांइनिहवः – ऋ. १०.१२४.५; ७; ८

ऋ. १०.१२४.५

निर्माया उ त्ये असुरा अभवन्त्वं च मा वरुण कामयासे ।
ऋतेन राजन्ननृतं विविंचन्मम राष्ट्रस्याधिपत्यमेहि।।५।।

ऋ. १०.१२४.७–८

कविः कवित्वा दिवि रूपमासजदप्रभूति वरुणो निरपः सृजत् ।
क्षेमं कृण्वाना जनयो न सिन्धवस्ता अस्य वर्णं शुचयो भरिभ्रति ।।७।।
ता अस्य ज्येष्ठमिन्द्रियं सचन्ते ता ईमा क्षेति स्वधया मदन्तीः ।
ता ईं विशो न राजानं वृणानां बीभत्सुवो अप वृत्रादतिष्ठन् ।।८।।

2. अत्रिर् भौमः – ऋ. ५.८५.१–८

प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय ।
वि यो जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय ।।1।।
वनेषु वय१न्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु ।
हृत्सु क्रतुं वरुणो अप्सव१ग्निं दिवि सूर्यमदधात्सोममद्रौ ।।2।।
नीचीनबारं वरुणः कबन्धं प्र ससर्ज रोदसी अन्तरिक्षम् ।
तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनति भूम ।।३।।
उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित् ।
समभ्रेण वसत पर्वतासस्तविषीयन्तः श्रययन्त वीराः ।।४।।
इमामू ष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचम् ।
मानेनेव तस्थिवाँ अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण ।।५।।
इमामू नु कवितमस्य मायां मही देवस्य नकिरा दधर्ष ।
एकं यदुद्ना न पृणन्त्येनीरासिंचन्तीरवनयः समुद्रम् ।।६।।
अर्यम्यं वरुण मित्र्यं वा सखायं वा सदमिद् भ्रातरं वा ।
वेशं वा नित्यं वरुणारणं वा यत्सीमागश्चकृमा शिश्रथस्तत् ।।७।।
कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म ।
सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ।।८।।

३. अथर्वा – अ. १.१०.2–४; १.20.३; ४.१५.१2; ५.११.१–११; ५.2४.४

अ. १.१०.2–४

नमस्ते राजन् वरुणास्तु मन्यवे विश्वं ह्युग्र निचिकेषि द्रुग्धम् ।
सहस्रमन्यान् प्र सुवामि साकं शतं जीवाति शरदस्तवायम् ।।2।।
यदुवक्थानृतं जिह्वया वृजिनं बहु । राज्ञस्त्वा सत्यधर्मणो मुंचामि वरुणादहम् ।।३।।
मुंचामि त्वा वैश्वानरादर्णवान् महतस्परि। सजातानुग्रेहा वद ब्रह्म चाप चिकीहि नः।।४।।

अ. १.2०.३

इतश्च यदमुतश्च वधं वरुण यावय। वि महच्छर्म यच्छ वरीयो यावया वधम् ।।३।।

अ. ४.१५.१2

अपो निषिंचन्नसुरः पिता नः श्वसन्तु गर्गरा अपां वरुणाव नीचीरपः सृज।
वदन्तु पृश्निबाहवो मण्डूका इरिणानु ।।१2।।

अ. ५.११.१–११

कथं महे असुरायाब्रवीरिह कथं पित्रे हरये त्वेषनृम्णः ।

पृश्निं वरुण दक्षिणां ददावान् पुनर्मघ त्वं मनसाचिकित्सीः ।।१।।
न कामेन पुनर्मघो भवामि सं चक्षे कं पृश्निमेतामुपाजे ।
केन नु त्वमथर्वन् काव्येन केन जातेनासि जातवेदाः ।।2।।
सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातवेदाः ।
न मे दासो नार्यो महित्वा व्रतं मीमाय यदहं धरिष्ये ।।३।।
न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन् ।
त्वं ता विश्वा भुवनानि वेत्थ स चिन्नु त्वज्जनो मायी बिभाय ।।४।।
त्वं ह्य१ङ्ग वरुण स्वधवान् विश्वा वेत्थ जनिमा सुप्रणीते ।
किं रजस एना परो अन्यदस्त्येना किं परेणावरममुर ।।५।।
एकं रजस एना परा अन्यदस्त्येना पर एकेन दुर्णशं चिदर्वाक् ।
तत् ते विद्वान् वरुण प्र ब्रवीम्यधोवचसः पणयो भवन्तु नीचैर्दासा उप सर्पन्तु भूमिम् ।।६।।
त्वं ह्य१ङ्ग वरुण ब्रवीषि पुनर्मघेष्ववद्यानि भूरि ।
मो षु पर्णीँरभ्ये३तावतो भून्मा त्वा वोचन्नराधसं जनासः ।।७।।
मा मा वोचन्नराधसं जनासः पुनस्ते पृश्निं जरितर्ददामि ।
स्तोत्रं मे विश्वमा याहि शचीभिरन्तर्विश्वासु मानुषीषु दिक्षु ।।८।।
आ ते स्तोत्राण्युद्यतानि यन्त्वन्तर्विश्वासु मानुषीषु दिक्षु ।
देहि नु मे यन्मे अदत्तो असि युज्यो मे सप्तपदः सखासि ।।९।।
समा नौ बन्धुर्वरुण समा जा वेदाहं तद्यन्नावेषा समा जा ।
ददामि तद् यत् ते अदत्तो अस्मि युज्यस्ते सप्तपदः सखास्मि ।।१०।।
देवो देवाय गृणते वयोधा विप्रो विप्राय स्तुवते सुमेधाः ।
अजीजनो हि वरुण स्वधावन्नथर्वाणं पितरं देवबन्धुम् ।
तस्मा उ राधः कृणुहि सुप्रशस्तं सखा नो असि परमं च बन्धुः ।।११।।

अ. ५.2४.४

वरुणोऽपामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां
प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।४।।

४. कूर्मः गार्त्समदः गृत्समदो वा — ऋ. 2.2८.१–११

इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु मह्ना ।
अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ।।१।।
तब व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।
उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून् ।।2।।
तव स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः ।
यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय देवाः ।।३।।
प्र सीमादित्यो असृजद्विधर्ताँ ऋतं सिन्धवो वरुणस्य यन्ति ।
न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन् ।।४।।
वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ।।५।।
अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय ।
दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ।।६।।
मा नो वधैर्वरुण ये त इष्टावेनः कृण्वन्तमसुर भ्रीणन्ति ।
मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ।।७।।
नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम ।
त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि ।।८।।
पर ऋणा सावीरध मत्कृतानि आ नो जीवान्वरुण तासु शाधि ।।९।।

यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह ।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ।।१०।।
माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयामदव स्थां बृहद्वदेम विदथे सुवीराः ।।११।।

५. गोतमः – य. १३.३१

वीन्त्समुद्रान्त्समसृपत् स्वर्गानपां पतिर्वृषभऽइष्टकानाम् ।
पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ।।३१।।

६. दीर्घतमा – य. ६.22

मापो मौषधीर्हिंसीर्धाम्नो धाम्नो राजँस्ततो वरुण नो मुंच ।
यदाहुरघ्न्याऽ इति वरुणेति शपामहे ततो वरुण नो मुंच ।
सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।।22।।

७. नाभाकः काण्वः – ऋ. ८.४१.१–१०; ८.४2.१–३

ऋ. ८.४१.१–१०

अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा विदुष्टरेभ्यः ।
यो धीता मानुषाणां पश्वो गाइव रक्षति नभन्तामन्यके समे ।।१।।
तमू षु समना गिरा पितॄणां च मन्मभिः ।
नाभकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे ।।2।।
स क्षपः परि षस्वजे न्यु2स्रो मायया दधे स विश्वं परि दर्शतः ।
तस्य वेनीरनु व्रतमुषस्तिस्रो अवर्धयन्नभन्तामन्यके समे ।।३।।
यः ककुभे निधारयः पृथिव्यामधि दर्शतः ।
स माता पूर्व्यं पदं तद्वरुणस्य सप्त्यं स हि गोपा इवेर्यो नभन्तामन्यके समे ।।४।।
यो धर्ता भुवनानां य उस्राणामपीच्या३ वेद नामानि गुह्या ।
स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभन्तामन्यके समे ।।५।।
यस्मिन् विश्वानि काव्या चक्रे नाभिरिव श्रिता ।
त्रितं जूती सपर्यत व्रजे गावो न संयुजे युजे अश्वां अयुक्षत नभन्तामन्यके समे ।।६।।
य आस्वत्क आशये विश्वा जातान्येषाम् ।
परि धामानि मर्मृशद्वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभन्तामन्यके समे ।।७।।
स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यजुर्दधे ।
स माया अर्चिना पदास्तृणान्नाकमारुहन्नभन्तामन्यके समे ।।८।।
यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः ।
त्रिरुतराणि पप्रतुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभन्तामन्यके समे ।।६।।
यः श्वेताँ अधिनिर्णिजश्चक्रे कृष्णाँ अनु व्रता ।
स धाम पूर्व्यं ममे यः स्कम्भेन वि रोदसी अजो न द्यामधारयन्नभन्तामन्यके समे ।।१०।।

ऋ. ८.४2.१–३

अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः ।
असीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ।।१।।
एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।
स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थे ।।2।।
इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ।।३।।

८. प्रजापतिः – य. 2०.१८

यदापोऽअध्न्याऽ इति वरुणेति शषामहे ततो वरुण नो मुंच। अवभृथ निचुम्पुण निचेरुरसि
निचुम्पुणः। अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुरव्णो देव रिषस्पाहि ।।१८।।

९. प्रियमेध आंगिरसः (साग्री. –३५४३६०); प्रियमेधः (ऋसर्व.) – ऋ. ८.६६.११[2]; १2

ऋ. ८.६६.११[2]

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत ।
वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ।।११।।

ऋ. ८.६६.१2

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ।।१2।।

१०. भृगुः – अ. १६.४४.८–६

बह्वी३दं राजन् वरुणानृतमाह पुरुषः। तस्मात् सहस्रवीर्य मुंच नः पर्यंहसः ।।८।।
यदापो अघ्न्या इति वरुणेति यदूचिम। तस्मात् सहस्रवीर्य मुंच नः पर्यंहसः ।।६।।

११. वत्सः – य. ४.३०–३१

अदित्यास्त्वगस्यादित्यै सदऽआसीद। अस्तभ्नाद् द्यां वृषभोऽअन्तरिक्षममिमीत वरिमाणम्पृथिव्याः।
आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ।।३०।।
वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयऽ उस्रियासु ।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्य्यमदधात् सोमद्रौ ।।३१।।

१2. वरुणः – य. १०.७

सधमादो द्युम्निनीरापऽएताऽअनाधृष्टाऽअपस्यो वसानाः ।
पस्त्यासु चक्रे वरुणः सधस्थमपां शिशुर्मातृतमास्वन्तः ।।७।।

१३. वसिष्ठः – ऋ. ७.८६.१–८; ७.८७.१–७; ७.८८.१–७; ७.८६.१–५

ऋ. ७.८६.१–८

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ।।१।।
उत स्वया तन्वा३ सं वदे तत्कदा न्व१न्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ।।2।।
पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम् ।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ।।३।।
किमाग आस वरुण ज्येष्ठं यत्सतोतारं जिघांससि सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयाम् ।।४।।
अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः ।
अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ।।५।।
न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ।।६।।
अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ।।७।।
अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ।।८।।

ऋ. ७.८७.१–७

रदत्पथा वरुणः सूर्याया प्रार्णांसि समुद्रिया नदीनाम् ।
सर्गो न सृष्टो अर्वतीर्ऋतायंचकार महीरवनीरहभ्यः ।।१।।
आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान् ।
अन्तर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि ।।2।।
परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यन्ति रोदसी सुमेके ।
ऋतावानः कव्यो यज्ञधीराः प्रचेतसो य इषयन्त मन्म ।।३।।

उवाच मे वरुणो मेधिराय त्रिः सप्त नामाध्न्या बिभर्ति ।
विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन् ।।४।।
तिस्रो द्यावो निहिता अन्तरस्मिन्तिस्रो भूमीरुपराः षड्विधानाः ।
गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेंख हिरण्ययं शुभे कम्।।५।।
अव सिन्धुं वरुणो द्यौरिव स्थाद् द्रप्सो न श्वेतो मृगस्तुविष्मान् ।
गम्भीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य राजा ।।६।।
यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः ।
अनु व्रतान्यदितेर्ऋधन्तो यूयं पात स्वस्तिभिः सदा नः ।।७।।

ऋ. ७.८८.१–७

प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळहुषे भरस्व ।
य ईमर्वांचं करते यजत्रं सहस्रामघं वृषणं बृहन्तम् ।।१।।
अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि ।
स्व१र्यदश्मन्नधिपा उ अन्धोऽभि मा वपुर्दृशये निनीयात् ।।2।।
आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प्र प्रेंख ईंखयावहै शुभे कम् ।।३।।
वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः ।।४।।
क्व१ त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ।
बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ।।५।।
य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि कृणवत्सखा ते ।
मा त एनस्वन्तो यक्षिन् भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम् ।।६।।
ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्य१स्मत् पाशं वरुणो मुमोचत् ।
अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिः सदा नः ।।७।।

ऋ. ७.८९.१–५

मो षु वरुण मृन्मयं गृहं राजन्नहं गमम्। मृळा सुक्षत्र मृळय ।।१।।
यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः। मृळा सुक्षत्र मृळय ।।2।।
क्रत्वः समह दीनता प्रतीपं जगमा शुचे। मृळा सुक्षत्र मृळय ।।३।।
अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम्। मृळा सुक्षत्र मृळय ।।४।।
यत्कि चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या३ श्चरामसि।
अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ।।५।।

१४. वृहद्दिवोऽथर्वा – अ. ५.१.१–६; ५.2.१–६

अ. ५.१.१–६

ऋधङ्मन्त्रो योनिं य आबभूवामृतासुर्वर्धमानः सुजन्मा ।
अदब्धासुर्भ्राजमानोऽहेव त्रितो धर्ता दाधार त्रीणि ।।१।।
आ ये धर्माणि प्रथमः ससाद ततो वपूंषि कृणुषे पुरूणि ।
धास्युर्योनिं प्रथम आ विवेशा यो वाचमनुदितां चिकेत ।।2।।
यस्ते शोकाय तन्वं रिरेच क्षरद्धिरण्यं शुचयोऽनु स्वाः ।
अत्रा दधेते अमृतानि नामास्मे वस्त्राणि विश एरयन्ताम् ।।३।।
प्र यदेते प्रतरं पूर्व्यं गुः सदःसद आतिष्ठन्तो अजुर्यम् ।
कविः शुष्स्य मातरा रिहाणे जाम्यै धुर्यं पतिमेरयेथाम् ।।४।।
तदू षु ते महत् पृथुज्मन् नमः कविः काव्येना कृणोमि ।
यत् सम्यंचावभियन्तावभि क्षामत्रा मही रोधचक्रे वावृधेते ।।५।।
सप्त मर्यादाः कवयस्ततक्षुस्तासामिदेकामभ्यंहुरो गात् आयोर्ह स्कम्भ उपमस्य

नीडे पथां विसर्गे धरुणेषु तस्थौ ।।६।।
उतामृतासुर्व्रत एमि कृण्वन्नसुरात्मा तन्वं१स्तत् सुमदगुः ।
उत वा शक्रो रत्नं दधात्यूर्जया वा यत् सचते हविर्दाः ।।७।।
उत पुत्रः पितरं क्षत्रमीडे ज्येष्ठं मर्यादमह्वयन्त्स्वस्तये ।
दर्शन् नु ता वरुण यास्ते विष्ठा आवर्व्रततः कृणवो वपूंषि ।।८।।
अर्धमर्धेन पयसा पृणक्ष्यर्धेन शुष्म वर्धसे अमुर ।
अविवृधाम् शग्मियं सखायं वरुणं पुत्रमदित्या इषिरम् ।
कविशस्तान्यस्मै वपूंष्यवोचाम रोदसी सत्यवाचा ।।९।।

ऋ. ५.2.१–९

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यदेनं मदन्ति विश्व ऊमाः ।।१।।
वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अवयनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ।।2।।
त्वे क्रतुमपि पृंचन्ति भूरि द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ।।३।।
यदि चिन्नु त्वा धना जयन्तं रणेरणे अनुमदन्ति विप्राः ।
ओजीयः शुष्मिन्त्स्थिरमा तनुष्व मा त्वा दभन् दुरेवासः कशोकाः ।।४।।
त्वया वयं शाशद्महे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि त आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ।।५।।
नि तद् दधिषेऽवरे परे च यस्मिन्नाविथावसा दुरोणे ।
आ स्थापयत मातरं जिगत्नुमत इन्वत कर्वराणि भूरि ।।६।।
स्तुष्व वर्ष्मन् पुरुवर्त्मानं समृभ्वाणमिनतममाप्त्यमाप्त्यानाम् ।
आ दर्शति शवसा भूर्योजाः प्र सक्षति प्रतिमानं पृथिव्याः ।।७।।
इमा ब्रह्म बृहद्दिवः कृणवदिन्द्राय शूषमग्रियः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजा तुरश्चिद् विश्वमर्णवत् तपस्वान् ।।८।।
एवा महान् बृहद्दिवो अथर्वावोचत् स्वां तन्व१मिन्द्रमेव ।
स्वसारौ मातरिभ्वरी अरिप्रे हिन्वन्ति चैने शवसा वर्धयन्ति च ।।९।।

१५. शन्तातिः – अ. ६.५१.३

यत् किं चेदं वरुणं दैव्ये जनेऽभिद्रोहं मनुष्याइश्चरन्ति।
अचित्त्या चेत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ।।३।।

१६. शुनः शेपः – अ. ७.८३.१–४; य. १०.2७; १2.१2; 2१.१–2

अ. ७.८३.१–४

अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः ।
ततो धृतव्रतो राजा सर्वा धामानि मुंचतु ।।१।।
धाम्नोधाम्नो राजन्नितो वरुण मुंच नः ।
यदापो अघ्न्या इति वरुणेति यदूचिम ततो वरुण मुंच नः ।।2।।
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अधा वयमादित्य व्रते तवानागसो अदितये स्याम ।।३।।
प्रास्मत् पाशान् वरुण मुंच सर्वान् य उत्तमा अधमा वारुणा ये ।
दुःष्वप्न्यं दुरितं निः ष्वास्मदथ गच्छेम सुकृतस्य लोकम् ।।४।।

य. १०.2७

निषसाद धृतव्रतो वरुणः पस्त्यास्वा। साम्राज्याय सुक्रतुः ।।2७।।

य. १2.१2

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।

अथा वयमादित्य व्रते त्वानागसोऽअदितये स्याम ।।१2।।

य. 2१.१–2

इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके ।।१।।
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा नऽआयुः प्र मोषीः ।।2।।

१७. शुनःशेप आजीगर्तिः – ऋ. १.2५.१–2१; सा. १५८५

ऋ. १.2५.१–2१

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्। मिनीमसि द्यवि–द्यवि ।।१।।
मा नो वधाय हत्नवे जिहीळानस्य रीरधः। मा हृणानस्य मन्यवे ।।2।।
वि मृळीकाय ते मनो रथीरश्वं न संदितम्। गीर्भिर्वरुण सीमहि ।।३।।
परा हि मे विमन्यवः पतन्ति वस्यइष्टये। वयो न वसतीरुप ।।४।।
कदा क्षत्रश्रियं नरमा वरुणं करामहे। मृळीकायोरुचक्षसम् ।।५।।
तदित्समानमाशाते वेनन्ता न प्र युच्छतः। धृतव्रताय दाशुषे ।।६।।
वेदा यो वीनां पदमन्तरिक्षेण पतताम्। वेद नावः समुद्रियः ।।७।।
वेद मासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते ।।८।।
वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः। वेदा ये अध्यासते ।।९।।
नि षसाद धृतव्रतो वरुणः पस्त्या३स्वा। साम्राज्याय सुक्रतुः ।।१०।।
अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति। कृतानि या च कर्त्वा ।।११।।
स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत्। प्र ण आयूंषि तारिषत् ।।१2।।
बिभ्रद् द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम्। परि स्पशो नि षेदिरे ।।१३।।
न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम्। न देवमभिमातयः ।।१४।।
उत यो मानुषेष्वा यशश्चक्रे असाम्या। अस्माकमुदरेष्वा ।।१५।।
परा मे यन्ति धीतयो गावो न गव्यूतीरनु। इच्छन्तीरुरुचक्षसम् ।।१६।।
सं नु वोचावहै पुनर्यतो मे मध्वाभृतम्। होतेव क्षदसे प्रियम् ।।१७।।
दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि। एता जुषत मे गिरः ।।१८।।
इमं मे वरुण श्रुधी हवमद्या च मृळय। त्वामवस्युरा चके ।।१९।।
त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि। स यामनि प्रति श्रुधि ।।2०।।
उदुत्तमं ममुग्धि नो वि पाशं मध्यमं चृत। अवाधमानि जीवसे ।।2१।।

सा. १५८५

इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके ।।१।।

१८. शुनःशेप आजीगर्ति कृत्रिमो देवरातो वैश्वामित्रो वा (साग्री. सास्वा.) शुनःशेप आजगर्ति कृत्रिमो देवरातो वैश्वामित्रः (ऋसर्व.) शुनःशेपः(सार्षेदी.) – ऋ.१. 2४.६–१५; सा. ५८६

ऋ. १.2४.६–१५

नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः ।
नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभवम् ।।६।।
अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः ।।७।।
उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ।।८।।
शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।
बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्र ममुग्ध्यस्मत् ।।९।।
अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः ।

अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ।।१०।।
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोधयुरुशंस मा न आयुः प्र मोषीः ।।११।।
तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ वि चष्टे ।
शुनःशेपो यमह्वद् गृभीतः सो अस्मान् राजा वरुणो मुमोक्तु ।।१2।।
शुनःशेपो ह्यह्वद् गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।
अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् ।।१३।।
अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि ।।१४।।
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ।।१५।।

सा. ५८६

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथादित्य व्रते वयं तवानागसो अदितये स्याम ।।४।।

१६. शङ्खः – य. १६.८१

तदस्य रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः ।।८१।।

६६४. वरुणः अग्निः इन्द्रश्च

१. चातनः – अ. १.१६.2

सीसायाध्याह वरुणः सीसायाग्निरुपावति। सीसं म इन्द्रः प्रायच्छत् तदंग यातुचातनम् ।।2।।

६६५. वरुणः सत्यानृतान्त्रीक्षणम्

१. ब्रह्म – अ. ४.१६.१–६

बृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति ।
य स्तायन्मन्यते चरन्त्सर्वं देवा इदं विदुः ।।१।।
यस्तिष्ठति चरति यश्च वंचति यो निलायं चरति यः प्रतंकम् ।
द्वौ संनिषद्य यन्मन्त्रयेते रजा तद् वेद वरुणस्तृतीयः ।।2।।
उतेयं भूमिर्वरुणस्य राज्ञ उतासौ द्यौर्बृहती दूरेअन्ता ।
उतो समुद्रौ वरुणस्य कुक्षी उतास्मिन्नल्प उदके निलीनः ।।३।।
उत यो द्यामतिसर्पात् परस्तान्न स मुच्यातै वरुणस्य राज्ञः ।
दिव स्पशः प्र चरन्तीदमस्य सहस्राक्षा अति पश्यन्ति भूमिम् ।।४।।
सर्वं तद् राजा वरुणो वि चष्टे यदन्तरा रोदसी यत् परस्तात् ।
संख्याता अस्य निमिषो जनानामक्षानिव श्वघ्नी नि मिनोति तानि ।।५।।
ये ते पाशा वरुण सप्तसप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः ।
छिनन्तु सर्वे अनृतं वदन्तं यः सत्यवाद्यति तं सृजन्तु ।।६।।
शतेन पाशैरभि धेहि वरुणैनं मा ते मोच्यनृतवाङ् नृचक्षः ।
आस्तां जाल्म उदरं स्रंसयित्वा कोशइवाबन्धः परिकृत्यमानः ।।७।।
यः समाम्यो३ वरुणो यो व्याम्यो३ यः संदेश्यो३ वरुणो यो विदेश्यः ।
यो दैवो वरुणो यश्च मानुषः ।।८।।
तैस्त्वा सर्वैरभि ष्यामि पाशेरसावामुष्यायणामुष्याः पुत्र। तानु ते सर्वानुसंदिशामि ।।६।।

६६६. वरुणादयः

१. अथर्वा – अ. ६.७३.१–३

एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु ।

अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः ।।१।।
यो वः शुष्मो हृदयेष्वन्तराकूतिर्या वो मनसि प्रविष्टा ।
तान्त्सीवयामि हविषा घृतेन मयि सजाता रमतिर्वो अस्तु ।।2।।
इहैव स्त माप याताध्यस्मत् पूषा परस्तादपथ्र वः कृणोतु ।
वास्तोष्पतिरनु वो जोहवीतु मयि सजाता रमतिर्वो अस्तु ।।३।।

६६७. वरुणाः

१. मेधातिथिः – य. ३३.४६

वरुणः प्राविता भुवन्मित्रो विश्वभिरूतिभिः। कारतां नः सुराधसः ।।४६।।

६६८. वरुणौ

१. वसिष्ठः – य. ३३.७१

गावऽउपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ।।७१।।

६६९. वरोः सौषामणस्य दानस्तुतिः

१. विश्वमना वैयश्वः – ऋ. ८.2४.2८–३०

यथा वरो सुषाम्णे सनिभ्य आवहो रयिम्। व्यश्वेभ्यः सुभगे वाजिनीवति ।।2८।।
आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः। स्थूरं च राधः शतवत्सहस्रवत् ।।2९।।
यत्त्वा पृच्छादीजानः कुहया कुहयाकृते। एषो अपश्रितो वलो गोमतीमव तिष्ठति।।३०।।

७००. वर्षर्तुः

१. परमेष्ठी – य. १५.१७

अयं पश्चद्विश्वव्यचास्तस्य रथप्रोतश्चसमरथश्च सेनानीग्रामण्यौ। प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ व्याघ्रा हेतिः सर्पाः प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।१७।।

७०१. वशा

१. कश्यपः – अ. १०.१०.१–३४; 12.४.१–५३

अ. १०.१०.१–३४

नमस्ते जायमानायै जाताय उत ते नमः ।
बालेभ्यः शफेभ्यो रूपायाघ्न्ये ते नमः ।।१।।
यो विद्यात् सप्त प्रवतः सप्त विद्यात् परावतः ।
शिरो यज्ञस्य यो विद्यात् स वशां ग्रति गृह्णीयात् ।।2।।
वेदाहं सप्त प्रवतः सप्त वेद परावतः ।
शिरो यज्ञस्याहं वेद सोमं चास्यां विचक्षणम् ।।३।।
यया द्यौर्यया पृथिवी ययापो गुपिता इमाः ।
वशां सहस्रधारां ब्रह्मणाच्छावदामसि ।।४।।
शतं कंसाः शतं दोग्धारः शतं गोप्तारो अधि पृष्ठे अस्याः ।
ये देवास्तस्यां प्राणन्ति ते वशां विदुरेकधा ।।५।।
यज्ञपदीराक्षीरा स्वधाप्राणा महीलुका ।
वशा पर्जन्यपत्नी देवाँ अप्येति ब्रह्मणा ।।६।।
अनु त्वाग्निः प्राविशदनु सोमो वशे त्वा ।
ऊधस्ते भद्रे पर्जन्यो विद्युतस्ते स्तना वशे ।।७।।
अपस्त्वं धुक्षे प्रथमा उर्वरा अपरा वशे ।
तृतीयं राष्ट्रं धुक्षेऽन्नं क्षीरं वशे त्वम् ।।८।।
यदादित्यैर्हूयमानोपातिष्ठ ऋतावरि ।
इन्द्रः सहस्रपात्रन्त्सोमं त्वापाययद् वशे ।।९।।

यदनूचीन्द्रमैरात् त्व ऋषभोऽह्वयत् ।
तस्मात् ते वृत्रहा पयः क्षीरं क्रुद्धोऽहरद् वशे ।।१०।।
यत् ते क्रुद्धो धनपतिरा क्षीरमहरद् वशे ।
इदं तदद्य नाकस्त्रिषु पात्रेषु रक्षति ।।११।।
त्रिषु पात्रेषु तं सोममा देव्यहरद् वशा ।
अथर्वा यत्र दीक्षितो बर्हिष्यास्त हिरण्यये ।।12।।
सं हि सोमेनागत समु सर्वेण पद्वता ।
वशा समुद्रमध्यष्ठाद् गन्धर्वैः कलिभिः सह ।।१३।।
सं हि वातेनागत समु सर्वैः पतत्रिभिः ।
वशा समुद्रे प्रानृत्यदृचः सामानि बिभ्रती ।।१४।।
सं हि सूर्येणागत समु सर्वेण चक्षुषा ।
वशा समुद्रमत्यख्यद् भद्रा ज्योतींषि बिभ्रती ।।१५।।
अभीवृता हिरण्येन यदतिष्ठ ऋतावरि ।
अश्वः समुद्रो भूत्वाध्यस्कन्दद् वशे त्वा ।।१६।।
तद् भद्राः समगच्छन्त वशा देष्ट्र्यथो स्वधा ।
अथर्वा यत्र दीक्षितो बर्हिष्यास्त हिरण्यये ।।१७।।
वशा माता राजन्यस्य वशा माता स्वधे तव ।
वशाया यज्ञ आयुधं ततश्चित्तमजायत ।।१८।।
ऊर्ध्वो बिन्दुरुदचरद् ब्रह्मणः ककुदादधि ।
ततस्त्वं जज्ञिषे वशे ततो होताजायत ।।१९।।
आस्नस्ते गाथा अभवन्नुष्णिहाभ्यो बलं वशे ।
पाजस्याज्जज्ञे यज्ञ स्तनेभ्यो रश्मयस्त्व ।।20।।
ईर्माभ्यामयनं जातं सक्थिभ्यां च वशे तव ।
आन्त्रेभ्यो जज्ञिरे अत्रा उदरादधि वीरुधः ।।21।।
यदुदरं वरुणस्यानुप्राविशथा वशे ।
ततस्त्वा ब्रह्मोदह्वयत् स हि नेत्रमवेत् तव ।।22।।
सर्वे गर्भादवेपन्त जायमानादसूस्वः ।
ससूव हि तामाहुर्वशेति ब्रह्मभिः क्लृप्तः स ह्यस्या बन्धुः ।।2३।।
युध एकः सं सृजति यो अस्या एक इद् वशी ।
तरांसि यज्ञा अभवन् तरसां चक्षुरभवद् वशा ।।2४।।
वशा यज्ञं प्रत्यगृह्णाद् वशा सूर्यमधारयत् ।
वशायामन्तरविशदोदनो ब्रह्मणा सह ।।2५।।
वशामेवामृतमाहुर्वशां मृतयुमुपासते ।
वशेदं सर्वमभवद् देवा मनुष्या३ असुराः पितर ऋषयः ।।2६।।
य एवं विद्यात् स वशां प्रति गृह्णीयात् ।
तथा हि यज्ञः सर्वपाद् दुहे दात्रेऽनपस्फुरन् ।।2७।।
तिस्रो जिह्वा वरुणस्यान्तर्दीद्यत्यासनि ।
तासां या मध्ये राजति सा वशा दुष्प्रतिग्रहा ।।2८।।
चतुर्धा रेतो अभवद् वशायाः ।
अपस्तुरीयममृतं तुरीयं यज्ञस्तुरीयं पशवस्तुरीयम् ।।2९।।
वशा द्यौर्वशा पृथिवी वशा विष्णुः प्रजापतिः ।
वशाया दुग्धमपिबन्त्साध्या वसवश्च ये ।।३०।।
वशाया दुग्धं पीत्वा साध्या वसवश्च ये ।
ते वै ब्रध्नस्य विष्टपि पयो अस्या उपासते ।।३१।।

सोममेनामेके दुह्रे घृतमेक उपासते ।
य एवं विदुषे वशां ददुस्ते गतास्त्रिदिवं दिवः ।।३2।।
ब्राह्मणेभ्यो वशा दत्त्वा सर्वाँल्लोकान्त्समश्नुते ।
ऋतंह्यस्यामार्पितमपि ब्रह्माथो तपः ।।३३।।
वशां देवा उप जीवन्ति वशां मनुष्या उत ।
वशेदं सर्वमभवद् यावत् सूर्यो विपश्यति ।।३४।।

अ. १2.४.१–५३

ददामीत्येव ब्रूयादनु चैनामभुत्सत ।
वशां ब्रह्मभ्यो याचद्भ्यस्तत् प्रजावदपत्यवत् ।।१।।
प्रजया स वि क्रीणीते पशुभिश्चोप दस्यति ।
य आर्षेभ्यो याचद्भ्यो देवानां गां न दित्सति ।।2।।
कूटयास्य सं शीर्यन्ते श्लोणया काटमर्दति ।
बण्डया दह्यन्ते गृहाः काणया दीयते स्वम् ।।३।।
विलोहितो अधिष्ठानाच्छक्नो विन्दति गोपतिम् ।
तथा वशायाः संविद्यं दुरदभ्ना ह्यु१च्यसे ।।४।।
पदोरस्या अधिष्ठानाद् विक्लिन्दुर्नाम विन्दति ।
अनामनात् सं शीर्यन्ते या मुखेनोपजिघ्रति ।।५।।
यो अस्याः कर्णवास्कुनोत्या स देवेषु वृश्चते ।
लक्ष्म कुर्व इति मन्यते कनीयः कृणुते स्वम् ।।६।।
यदस्याः कस्मै चिद् भोगाय बालान् कश्चित् प्रकृन्तति ।
ततः किशोरा म्रियन्ते वत्सांश्च घातुको वृकः ।।७।।
यदस्या गोपतौ सत्या लोम ध्वाङ्क्षो अजीहिडत् ।
ततः कुमारा म्रियन्ते यक्ष्मो विन्दत्यनामनात् ।।८।।
यदस्याः पल्पूलनं शकृद दासी समस्यति ।
ततोऽपरूपं जायते तस्मादव्येष्यदेनसः ।।६।।
जायमानाभि जायते देवान्तसब्राह्मणान् वशा ।
तस्माद् ब्रह्मभ्यो देयैषा तदाहुः स्वस्य गोपनम् ।।१०।।
य एनां वनिमायन्ति तेषां देवकृता वशा ।
ब्रह्मज्येयं तदब्रुवन् य एनां निप्रियायते ।।११।।
य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति ।
आ स देवेषु वृश्चते ब्राह्मणानां च मन्यवे ।।१2।।
यो अस्य स्याद् वशाभोगो अन्यामिच्छेत तर्हि सः ।
हिंस्ते अदत्ता पुरुषं याचितां च न दित्सति ।।१३।।
यथा शेवधिर्निहितो ब्राह्मणानां तथा वशा ।
तमेतदच्छायन्ति यस्मिन् कस्मिश्च जायते ।।१४।।
स्वमेतदच्छायन्ति यद् वशां ब्राह्मणा अभि ।
यथैनानन्यस्मिन् जिनीयादेवास्या निरोधनम् ।।१५।।
चरेदेवा त्रैहायणादविज्ञातगदा सती ।
वशां च विद्यान्नारद ब्राह्मणास्तर्ह्येष्याः ।।१६।।
य एनामवशामाह देवानां निहितं निधिम् ।
उभौ तस्मै भवाशर्वौ परिक्रम्येषुमस्यतः ।।१७।।
यो अस्या ऊधो न वेदाथो अस्या स्तनानुत ।
उभयेनैवास्मै दुहे दातुं चेदशकद् वशाम् ।।१८।।
दुरदभ्नैनमा शये याचितां च न दित्सति ।

नास्मै कामाः समृध्यन्ते यामदत्वा चिकीर्षति ।।१९।।
देवावशामयाचन् मुखं कृत्वा ब्राह्मणम् ।
तेषां सर्वेषामददद्धेडं न्येति मानुषः ।।20।।
हेडं पशूनां न्येति ब्राह्मणेभ्योऽददद् वशाम् ।
देवानां निहितं भागं मर्त्यश्चेन्निप्रियायते ।।21।।
यदन्ये शतं याचेयुर्ब्राह्मणा गोपतिं वशाम् ।
अथैनां देवा अब्रुवन्नेवं ह विदुषो वशा ।।22।।
य एवं विदुषेऽदत्त्वाथान्येभ्यो ददद् वशाम् ।
दुर्गा तस्मा अधिष्ठाने पृथिवी सहदेवता ।।2३।।
देवा वशमयाचन् यस्मिन्नग्रे अजायत ।
तामेतां विद्यान्नारदः सह दैवैरुदाजत ।।2४।।
अनपत्यमल्पपशुं वशा कृणोति पूरुषम् ।
ब्राह्मणैश्च याचितामथैनां निप्रियायते ।।2५।।
अग्नीषोमाभ्यां कामाय मित्राय वरुणाय च ।
तेभ्यो याचन्ति ब्राह्मणास्तेष्वा वृश्चतेऽददत् ।।2६।।
यावदस्या गोपतिर्नोपशृणुयादृचः स्वयम् ।
चरेदस्य तावद् गोषु नास्य श्रुत्वा गृहे वसेत् ।।2७।।
यो अस्या ऋच उपश्रुत्याथ गोष्वचीचरत् ।
आयुश्च तस्य भूतिं च देवा वृश्चन्ति हीडिताः ।।2८।।
वशा चरन्ती बहुधा देवानां निहितो निधिः ।
आविष्कृणुष्व रूपाणि यदा स्थाम जिघांसति ।।2९।।
आविरात्मानं कृणुते यदा स्थाम जिघांसति ।
अथो ह ब्रह्मभ्यो वशा याच्याय कृणुते मनः ।।३०।।
मनसा सं कल्पयति तद् देवाँ अपि गच्छति ।
ततो ह ब्रह्माणो वशामुपप्रयन्ति याचितुम् ।।३१।।
स्वधाकारेण पितृभ्यो यज्ञेन देवताभ्यः ।
दानेन राजन्यो वशाया मातुर्हेडं न गच्छति ।।३2।।
वशा माता राजन्यस्य तथा संभूतमग्रशः ।
तस्या आहुरनर्पणं यद् ब्रह्मभ्यः प्रदीयते ।।३३।।
यथाज्यं प्रगृहीतमालुम्पेत् स्रुचो अग्नये ।
एवा ह ब्रह्मभ्यो वशामग्नय आ वृश्चतेऽददत् ।।३४।।
पुरोडाशवत्सा सुदुघा लोकेऽसमा उप तिष्ठति ।
सास्मै सर्वान् कामान् वशा प्रददुषे दुहे ।।३५।।
सर्वान् कामान् यमराज्ये वशा प्रददुषे दुहे ।
अथहुर्नारकं लोकं निरुन्धानस्य याचिताम् ।।३६।।
प्रवीयमाना चरति क्रुद्धा गोपतये वशा ।
वेहतं मा मन्यमानो मृत्योः पाशेषु बध्यताम् ।।३७।।
यो वेहतं मन्यमानोऽमा च पचते वशाम् ।
अप्यस्य पुत्रान् पोत्रांश्च याचयते बृहस्पतिः ।।३८।।
महदेषाव तपति चरन्ती गोषु गौरपि ।
अथो ह गोपतये वशाद दुषे विषं दुहे ।।३९।।
प्रियं पशूनां भवति यद् ब्रह्मभ्यः प्रदीयते ।
अथो वशायास्तत् प्रियं यद् देवत्रा हविः स्यात् ।।४०।।
या वशा उदकल्पयन् देवा यज्ञादुदेत्य ।

तासां विलिप्त्यं भीमामुदाकुरुत नारदः ।।४१।।
तो देवा अमीमांसन्त वशेया३मवशेति ।
तामब्रवीन्नारद एषा वशानां वशतमेति ।।४2।।
कति नु वशा नारद यास्त्वं वेत्थ मनुष्यजाः ।
तास्त्वा पृच्छामि विद्वांसं कस्या नाश्नीयादब्राह्मणः ।।४३।।
विलिप्त्या बृहस्पते या च सूतवशा वशा ।
तस्या नाश्नीयादब्राह्मणो य आशंसेत् भूत्याम् ।।४४।।
नमस्ते अस्तु नारदानुष्ठु विदुषे वशा ।
कतमासां भीमतमा यामदत्त्वा पराभवेत् ।।४५।।
विलिप्ती या बृहस्पतेऽथो सूतवशा वशा ।
तस्या नाश्नीयादब्राह्मणो य आशंसेत भूत्याम् ।।४६।।
त्रीणि वै वशाजातानि विलिप्ती सूतवशा वशा ।
ताः प्र यच्छेद् ब्रह्मभ्यः सोऽनाव्रस्कः प्रजापतौ ।
एतद् वो ब्राह्मणा हविरिति मन्वीत याचितः ।
वशां चेदेनं याचेयुर्या भीमाददुषो गृहे ।
देवा वशां पर्यवदन् न नोऽदादिति हीडिताः ।
एताभिर्ऋग्भिर्भेदं तस्माद् वै स पराभवत् ।।४६।।
उतैनां भेदो नाददाद् वशामिन्द्रेण याचितः ।
तस्मात् तं देवा आगसोऽपवृश्चन्नहमुत्तरे ।।५०।।
ये वशाया अदानाय वदन्ति परिरापिणः ।
इन्द्रस्य मन्यवे जाल्मा आ वृश्चन्ते अचित्त्या ।।५१।।
ये गापतिं पराणीयाथाहुर्मा ददा इति ।
रुद्रस्यास्तां ते हेतिं परि यन्त्यचित्तया ।।५2।।
यदि हुतां यद्यहुताममा च पचते वशाम् ।
देवान्त्सब्राह्मणानृत्वा जिह्मो लोकान्निर्ऋच्छति ।।५३।।

७०2. वसन्तर्तुः

१. परमेष्ठी – य. १५.१५

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ। पुंजिकस्थला च क्रतुस्थला चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।१५।।

७०३. वसन्तादयः

१. प्रजापतिः – य. 2४.११; 20

य. 2४.११

धूमान वसन्तायालभते श्वेतान् ग्रीष्माय कृष्णान् वर्षाभ्योऽरुणांछरदे पृषतो हेमन्ताय पिशङ्गांछिशिराय ।११।

य. 2४.2०

वसन्ताय कपिंजलानालभते ग्रीष्माय कलविङ्कान् वर्षाभ्यस्तित्तिरींछरदे वर्त्तिका हेमन्ताय ककरांछिशिराय विककरान् ।।2०।।

७०४. वसवः

१. परमेष्ठी – य. १५.१०

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत् त्वा स्तोमः पृथिव्यां श्रयत्वाज्यमुक्थमव्यथायै स्तभ्नातु रथन्तरं साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु

दिवोमात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ।।१०।।

७०५. वसुरुद्रादित्य विश्वेदेवाः

१. सिन्धुद्वीपः – य. ११.५८

वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाऽगिरस्वद् ध्रुवासि पृथिव्यसि धारया मयि प्रजां रायस्पोषं गौपत्यं सुवीर्य्यं सजातान्यजमानाय रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाऽगिरस्वद् ध्रुवास्यन्तरिक्षमसिधारया मयि प्रजां रायस्पोषं गौपत्यं सुवीर्य्यं सजातान्यजमानायाऽऽदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाऽगिरस्वद् ध्रुवासि द्यौरसि धारया मयि प्रजां रायस्पोषं गौपत्यं सुवीर्य्यं सजातान्यजमानाय विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाऽगिरस्वद् ध्रुवासि दिशोऽसि धारया मयि प्रजां रायस्पोषं गौपत्यं सुवीर्य्यं सजातान्यजमानाय ।।५८।।

७०६. वस्वादयः

१. अथर्वा – अ. १.६.१; 2

अस्मिन् वसु वसवो धारयन्त्विन्द्रः पूषा वरुणो मित्रो अग्निः ।
इममादित्या उत विश्वे च देवा उत्तरस्मिंज्योतिषि धारयन्तु ।।१।।
अस्य देवाः प्रदिशि जयोतिरस्तु सूर्यो अग्निरुत वा हिरण्यम् ।
सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम् ।।2।।

2. प्रजापतिः – य. 22.३०

असवे स्वाहा वसवे स्वाहा विभुवे स्वहा विवस्वते स्वाहा गाणश्रिये स्वाहा गणपतये स्वाहाभिवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा संसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मालिम्लुचाय स्वाहा दिवा पतये स्वाहा ।।३०।।

७०७. वस्वादयोमन्त्रोक्ताः

१. सिन्धुद्वीपः – य. ११.६०

वसवस्त्वा धूपयन्तु गायत्रेण छन्दसांगिरस्वद् रुद्रास्तवा धूपयन्तु त्रैष्टुभेन छन्दसांगिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसांगिरस्वद् विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसांगिरस्वदिन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु ।।६०।।

७०८. वस्वादयो मन्त्रोक्ताः

१. तापसः – य. ६.३४

वसवस्त्रयोदशाक्षरेण त्रयोदशंस्तोममुदजयँस्तमुज्जेषंरुद्राश्चतुर्दशाक्षरेण चतुर्दशंस्तोममुदजयँम्तमुज्जेषम्। आदित्याः पंचदशाक्षरेण पंचदशंस्तोममुदजयँस्तमुज्जेषमदितिः षोडशाक्षरेण षोडशंस्तोममुदजयत्तमुज्जेषं प्रजापतिः सप्तदशाक्षरेण सप्तदशंस्तोममुदजयत्तमुज्जेषम् ।।३४।।

७०९. वस्वादयो लिंगोक्ता

१. विश्वामित्रः – य. ११.६५

सववस्त्वाऽऽछृन्दन्तु गायत्रेण छन्दसाऽगिरस्वद्रुद्रास्वत्वाऽऽछृन्दन्तु त्रैष्टुभेन छन्दसाऽगिरस्वदादित्यास्त्वाऽऽछृन्दन्तु जागतेन छन्दसाऽगिरस्वद्विश्वे त्वा देवा वैश्वानरा आछृन्दन्त्वानुष्टुभेन छन्दसाऽगिरस्वत् ।।६५।।

2. विश्वेदेवाः – य. १४.2५

वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुष्पात् स्पृतं चतुर्विंश स्तोमः। आदित्यानां भगोऽसि मरुतामाधिपत्यं गर्भाः स्पृताः पंचविंश स्तोमः। आदित्यै भागोऽसि पूष्णऽआधिपत्यमोज स्पृतंत्रिणवस्तोमः। देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्य समीचीर्दिश स्पृताश्चतुष्टोम

स्तोमः ।।२५।।

७१०. वसिष्ठः

१. **वसिष्ठः – ऋ. ७.१०४.२३**

मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात् पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ।।२३।।

७११. वह्निः

१. **अग्निः – य. २७.१४**

अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा ।
अग्निं स्रुचोऽअध्वरेषु प्रयत्सु ।।१४।।

७१२. वाक्

१. **अथर्वा – अ. १६.२.१–६**

निर्दुरर्मण्य ऊर्जा मधुमती वाक् ।।१।।
मधुमती स्थ मधुमतीं वाचमुदेयम् ।।२।।
उपहूतो मे गोपा उपहूतो गोपीथः ।।३।।
सुश्रुतौ कर्णौ भद्रश्रुतौ कर्णौ भद्रं श्लोकं श्रूयासम् ।।४।।
सुश्रुतिश्च मोपश्रुतिश्च मा हासिष्टां सौपर्णं चक्षुरजस्रं जयोतिः ।।५।।
ऋषीणां प्रस्तरोऽसि नमोऽस्तु दैवाय प्रस्तराय ।।६।।

२. **गोतमः – य. ५.१०–१२**

सिंह्यसि सपत्नसाही देवेभ्यः कल्पस्व सिंह्यसि सपत्नसाही देवेभ्यः शुन्धस्व सिंह्यसि सपत्नसाहीदेवेभ्यः शुम्भस्व ।।१०।।
इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातुविश्वकर्मा त्वादित्यैरुत्तरतः पात्विदमहं तप्तं वार्बहिर्धा यज्ञान्निः सृजामि ।।११।।
सिंह्यसि स्वाहा सिंह्यस्यादित्यवनिः स्वाहा सिंह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा सिंह्यसि सुप्रजावनीरायस्पोषवनिः स्वाहा सिंह्यस्यावह देवान्यजमानाय स्वाहा भूतेभ्यस्त्वा ।।१२।।

३. **दीर्घतमा – य. ३८.५**

यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः ।
यन विश्वा पुष्यसि वार्य्याणि सरस्वति तमिह धातवेऽकः। उर्वन्तरिक्षमन्वेमि ।।५।।

४. **दीर्घतमा औचथ्यः – ऋ. १.१६४.४२; ४५**

ऋ. १.१६४.४२

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ।।४२।।

ऋ. १.१६४.४५

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयन्ति तुरीयं वाचो मनुष्या वदन्ति ।।४५।।

५. **नेमो भार्गवः – ऋ. ८.१००.१०; ८.१००.११**

ऋ. ८.१००.१०

यद्वाग् वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्जं दुदुहे पयाँसि क्व स्विदस्याः परमं जगाम ।।१०।।

ऋ. ८.१००.११

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ।।११।।

६. **प्रस्कण्वः – अ. ७.४३.१**

शिवास्त एका अशिवास्त एकाः सर्वा बिभर्षि सुमनस्यमानः ।
तिस्रो वाचो निहिता अन्तरस्मिन् तासामेका वि पपातानु घोषम् ।।१।।

७. **विश्वामित्रो गाथिनः – ऋ. ३.५३.१५–१६**

ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता ।
आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम् ।।१५।।
ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पांचजन्यासु कृष्टिषुः ।
सा पक्ष्या३ नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः ।।१६।।

७१३. वागादि मन्त्रोक्ताः

१. **ब्रह्म – अ. १९.६०.१–2**

वाङ्म आसन्नसोः प्राणश्चक्षुरक्ष्णोः श्रोत्रं कर्णयोः ।
अपलिताः केशा अशोणा दन्ता बहु बाह्वोर्बलम् ।।१।।
ऊर्वोरोजो जंघयोर्जवः पादयोः प्रतिष्ठा। अरिष्टानि मे सर्वात्मानिभृष्टः ।।2।।

७१४. वाग्

१. **जमदग्निः – य. 2९.३३**

आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ।।३३।।

७१५. वागादयो लिंगोक्ताः

१. **दीर्घतमा – य. ३९.३**

वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा ।
चक्षुषे स्वाहा चक्षुषे स्वहा। श्रोत्राय स्वाहा श्रोत्राय स्वाहा ।।३।।

७१६. वागाम्भृणी

१. **वागाम्भृणी – ऋ. १०.१2५.१–८**

अहं रुद्रेभिर्वसुभिश्चराम्यमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ।।१।।
अहं सोमसाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये३यजमानाय सुन्वते ।।2।।
अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ।।३।।
मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रधि श्रुत श्रद्धिवं ते वदामि ।।४।।
अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।।५।।
अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्त्वा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ।।६।।
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वेन्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ।।७।।
अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ।।८।।

७१७. वाग्विद्युतः

१. **वत्सः – य. ४.१८–2३**

तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा ।
शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ।।१८।।

चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतः शीर्ष्णी ।
सा नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीतां पूषाऽध्वनस्पात्विन्द्रायाध्यक्षाय ।।१८।।
अनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः ।
सा देवि देवमच्छेहीन्द्राय सोमं रुद्रस्त्वावर्त्तयतु स्वस्ति सोमसखा पुनरेहि ।।२०।।
वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि।
बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो वसुभिराचके ।।२१।।
अदित्यास्त्वा मूर्द्धन्नाजिघर्म्मि देवयजने पृथिव्याऽइडायास्पदमसि घृतवत् स्वाहा ।
अस्मे रमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वयं रायस्पोषेण वियौष्म तोतो रायः ।।22।।
समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा।
मा मऽआयुः प्रमोषीर्मोऽअहं तव वीरं विदेय तव देवि सन्दृशि ।।२३।।

७१८. वाचस्पतिः

१. अथर्वा – अ. १.१.१–४

ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे ।।१।।
पनरेहिं वाचस्पते देवेन मनसा सह ।
वसोष्पते नि रमय मय्येवास्तु मयिं श्रुतम् ।।2।।
इहैवाभि वि तनूभे आर्त्नीइव ज्यया ।
वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम् ।।३।।
उपहूतो वाचस्पीतरुपास्मान् वाचपतिह्र्वयताम् ।
सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि ।।४।।

७१९. वाजादयः

१. प्रजापतिः – य. 22.३2

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा स्वः स्वाहा मूर्ध्ने स्वाहा व्यश्नुविने स्वाहान्त्याय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतेय स्वाहा।३2।

७२०. वाजिनः

१. ऋण त्रसदस्यू – सा. ४३५

आविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम्। स्वर्गां अर्वन्तो जयत ।।६।।

2. वसिष्ठः – ऋ. ७.३८.७–८

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ।।७।।
वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ।।८।।

३. वामदेवः (सा. अजमेर) ऋण त्रसदस्य (सास्वा.) – सा. ४३५

आविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम्। स्वर्गां अर्वन्तो जयत ।।६।।

७२१. वाजिनीवान् ऋषभः

१. बादरायणिः – अ. ४.३८.५–७

सूर्यस्य रश्मीननु याः संचरन्ति मरीचीर्वांया अनुसंचरन्ति ।
यासामृषभो दूरतो वाजिनीवान्त्सद्यः सर्वान् लोकान् पर्यैति रक्षन् ।
स न ऐतु होममिमं जुषाणो३न्तरिक्षेण सह वाजिनीवान् ।।५।।

अन्तरिक्षेण सह वाजिनीवन् कर्की वत्सामिह रक्ष वाजिन् ।
इमे ते स्तोका बहुला एह्यर्वाङियं ते कर्कीह ते मनोऽस्तु ।।६।।
अन्तरिक्षेण सह वाजिनीवन् कर्की वत्सामिह रक्ष वाजिन् ।
अयं घासो अयं व्रज इह वत्सां नि बध्नीमः। यथानाम व ईश्महे स्वाहा ।।७।।

७22. वाजी

१. **अथर्वा – अ. ६.९2.१–३**

वातरंहा भव वाजिन् युज्यमान इन्द्रस्य याहि प्रसवे मनोजवाः ।
युंजन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा पत्सु जवं दधातु ।।१।।
जवस्ते अर्वन् निहितो गुहा यः श्येने वात उत यो चरत् परीत्तः ।
तेन त्वं वाजिन् बलवान् बलेनाजिं जय समने पारयिष्णुः ।।2।।
तनूष्टे वाजिन् तन्वंभ्नयन्ती वाममस्मभ्यं धावतु शर्म तुभ्यम् ।
अह्रुतो महो धरुणाय देवो दिवीव जयोतिः स्वमा मिमीयात् ।।३।।

2. **गोपथः – अ. १६.२५.१**

अश्रान्तस्य त्वा मनसा युनज्मि प्रथमस्य च। उत्कूलमुद्वहो भवोदुह्म प्रति धावतात् ।।१।।

३. **नाभानेदिष्टः – य. ११.१2**

प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु संवतम् ।
दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित् ।।१2।।

७2३. वाजीः

१. **कुश्रिः – य. ११.१३**

युंजाथां रासभं युवमस्मिन् यामे वृषण्वसू। अग्निं भरन्तमस्मयुम् ।।१३।।

७2४. वाण्यः

१. **सरस्वती – य. 2८.३१**

होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीबृहतीर्महीः पतिमिन्द्रं वयोधसम्।
विराजं छन्दऽइहेन्द्रियं धेनुं गां न वयो दधद्व्यन्त्वाज्यस्य होतर्यज ।३१।।

७2५. वातः

१. **अथर्वा – अ. ४.१५.१६**

महान्तं कोषमुदचाभि षिंच सविद्युतं भवतु वातु वातः ।
तन्वतां यज्ञं बहुधा विसृष्टा आनन्दिनीरोषधयो भवन्तु ।।१६।।

2. **दीर्घतमा – य. ३८.७**

समुद्राय त्वा वाताय स्वहा सरिराय त्वा वाताय स्वाहा ।
अनाधृष्याय त्वा वाताय स्वाहा। अप्रतिधृष्याय त्वा वाताय स्वहा ।
अवस्यवे त्वा वाताय स्वाहा। अशिमिदाय त्वा वाताय स्वाहा ।।७।।

३. **देवाः – य. १८.४१**

इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽअप्सरसऽऊर्जो नाम ।
स नऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ।।४१।।

४. **मेधातिथिः – य. ६.११–१2; १४–१५**

य. ६.११–१2

घृतेनाक्तौ पशूँस्त्रायेथां रेवति यजमाने प्रियं धा आ विश ।
उरोरन्तरिक्षात्सजूर्देवेन वातेनास्य हविषस्त्मना यज समस्य तन्वा भव ।
वर्षो वर्षीयासि यज्ञे यज्ञपतिं धाः स्वाहा देवेभ्यो देवेभ्यः स्वाहा ।।११।।
महिर्भूर्मा पृदाकुर्नमस्त आतानानर्वा प्रेहि। घृतस्य कुल्या उप ऋतस्य पथ्या अनु ।।१2।।

य. ६.१४–१५

वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्राँस्ते शुन्धामि ।।१४।।
मनस्त आ प्यायतां वाक्त आ प्यायतां प्राणस्त आ प्यायतां चक्षुस्त आ प्यायतां श्रोत्रं त आ प्यायताम्। यत्ते क्रूरं यदास्थितं तत्तं आ प्यायतां निष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः। ओषधे त्रायस्व स्वधिते मैनं हिंसीः ।।१५।।

७२६. वातादयः

१. आथर्वणः दध्यङ् – य. ३६.१०

शन्नो वातः पवतां शन्नस्तपतु सूर्य्यः। शन्नः कनिक्रदद्देवः पर्जन्योऽअभि वर्षतु ।।१०।।

2. दध्यङ् आथर्वणः – य. ३६.१०

शन्नो वातः पवतां शन्नम्तपतु सूर्य्यः। शन्न कनिक्रदद्देवः पर्जन्योऽअभि वर्षतु ।।१०।।

३. प्रजापतिः – य. 22.2६

वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ।।2६।।

७2७. वादयितारो वीराः

१. भरद्वाजः – य. 2६.५६–५७

आ क्रन्दयः बलमोजो नऽआधा निष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुनाऽइतऽइन्द्रस्य मुष्टिरसि वीडयस्व ।।५६।।
आमूरज प्रत्यावर्त्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ।।५७।।

७2८. वानस्पत्यो दुन्दुभिः

१. ब्रह्म – अ. ५.2०.१–१2; ५.2१.१–६

अ. ५.2०.१–१2

उच्चैर्घोषो दुन्दुभिः सत्वनायन् वानस्पत्यः संभृत उस्रियाभिः ।
वाचं क्षुणुवानो दमयन्त्सपत्नान्त्सिंह इव जेष्यन्नभि तंस्तनीहि ।।१।।
सिंह इवास्तानीद् द्रुवयो विबद्धोऽभिक्रन्दन्नृषभो वासितामिव ।
वृषा त्वं वध्रयस्ते सपत्ना ऐन्द्रस्ते शुष्मो अभिमातिषाहः ।।2।।
वृषेव यूथे सहसा विदानो गव्यन्नभि रुव संधनाजित् ।
शुचा विध्य हृदयं परेषां हित्वा ग्रामान् प्रच्युता यन्तु शत्रवः ।।३।।
संजयन् पृतना ऊर्ध्वमायुर्गृह्या गृह्णानो बहुधा वि चक्ष्व ।
दैवीं वाचं दुन्दुभ आ गुरस्व वेधाः शत्रूणामुप भरस्व वेदः ।।४।।
दुन्दुभेर्वाचं प्रयतां वदन्तीमाशृण्वती नाथिता घोषबुद्धा ।
नारी पुत्रं धावतु हस्तगृह्यामित्री भीता समरे वधानाम् ।।५।।
पूर्वो दुन्दुभे प्र वदासि वाचं भूम्याः पृष्ठे वद रोचमानः ।
अमित्रसेनामभिजंजभानो द्युमद् वद दुन्दुभे सूनृतावत् ।।६।।
अन्तरेमे नभसी घोषो अस्तु पृथक् ते ध्वनयो यन्तु शीभम् ।
अभि क्रन्द स्तनयोत्पिपानः श्लोककृन्मित्रतूर्याय स्वर्धी ।।७।।
धीभिः कृतः प्र वदाति वाचमुद्धर्षय सत्वनामायुधानि ।
इन्द्रमेदी सत्वनो नि ह्वयस्व मित्रैरमित्राँ अव जङ्घनीहि ।।८।।

संक्रन्दनः प्रवदो धृष्णुषेणः प्रवेदकृद् बहुधा ग्रामघोषी ।
श्रेयो वन्वानो वयुनानि विद्वान् कीर्ति बहुभ्यो वि हर द्विराजे ।।९।।
श्रेयःकेतो वसुजित् सहीयान्त्संग्रामजित् संशितो ब्रह्मणासि ।
अंशूनिव ग्रावाधिषवणे अद्रिर्गव्यन् दुन्दुभेऽधि नृत्य वेदः ।।१०।।
शत्रूषाण्नीषाडभिमातिषाहो गवेषणः सहमान उद्भित ।
वाग्वीव मन्त्रं प्र भरस्व ववाचं सांग्रामजित्यायेषमुद् वदेह ।।११।।
अच्युतच्युत् समदो गमिष्ठो मृधो जेता पुरएतायोध्यः ।
इन्द्रेण गुप्तो विदथा निचिक्यद्धृद्योतनो द्विषतां याहि शीभम् ।।१2।।

अ. ५.2१.१–९

विहृदयं वैमनस्यं वदामित्रेषु दुन्दुभे ।
विद्वेषं कश्मशं भयममित्रेषु नि दध्मस्यवैनान् दुन्दुभे जहि ।।१।।
उद्वेपमाना मनसा चक्षुषा हृदयेन च। धवन्तु बिभ्यतोऽमित्राः प्रत्रासेनाज्ये हुते ।।2।।
वानस्पत्यः संभृत उस्रियाभिर्विश्वगोत्र्यः ।
प्रत्रासममित्रेभ्यो वदाज्येनाभिघारितः ।।३।।
यथा मृगाः संविजन्त आरण्याः पुरुषादधि ।
एवा त्वं दुन्दुभेऽमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय ।।४।।
यथा वृकादजावयो धावन्ति बहु बिभ्यतीः ।
एवा त्वं दुन्दुभेऽमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय ।।५।।
यथा श्येनात् पतत्रिणः संविजन्त अहर्दिवि सिंहस्य स्तनथोर्यथा ।
एवा त्वं दुन्दुभेऽमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय ।।६।।
परामित्रान् दुन्दुभिना हरिणस्याजिनेन च ।
सर्वे देवा अतित्रसन् ये संग्रामस्येशते। ।।७।।
यैरिन्द्रः प्रक्रीडते पद्घोषैश्छायया सह। तैरमित्रास्त्रसन्तु नोऽमीर येयन्त्यनीकशः ।।८।।
ज्याघोषा दुन्दुभयोऽभि क्रोशन्तु या दिशः। सेनाः पराजिता यतीरमित्राणामनीकशः ।९।।

७2९. वायवः

१. जमदग्निः भार्गवः – य. 2९.22

तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वातऽइव ध्रजीमान् ।
तव शृंगाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ।।22।।

७३०. वायवन्तरिक्षे

१. अंगिराः – अ. ४.३९.३–४

अन्तरिक्षे वायवे समनमन्त्स आर्ध्नोत् ।
यथान्तरिक्षे वायवे समनमन्नेवा मह्यं संनमः सं नमन्तु।।३।।
अन्तरिक्षं धेनुस्तस्या वायुर्वत्सः । सा मे वायुना वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजा पोषं रयिं स्वाहा ।।४।।

७३१. वायुसवितारौ

१. मृगारः – अ. ४.2५.१–७

वायोः सवितुर्विदथानि मन्महे यावात्मन्वद् विशथो यौ च रक्षथः ।
यौ विश्वस्य परिभू बभूवथुस्तौ नो मुंचतमंहसः ।।१।।
ययोः सङ्ख्याता वरिमा पार्थिवानि याभ्यां रजो युपितमन्तरिक्षे ।
ययोः प्रायं नान्वानशे कश्चन तौ नो मुंचतमंहसः ।।2।।
तव व्रते नि विशन्ते जनासस्त्वय्युदिते प्रेरते चित्रभानो ।

युवं वायो सविता च भुवनानि रक्षथस्तौ मुंचतमंहसः ।।३।।
अपेतो वायो सविता च दुष्कृतमप रक्षांसि शिमिदां च सेधतम् ।
सं ह्यृ३र्जया सृजथः सं बलेन तौ नो मुंचतमंहसः ।।४।।
रयिं मे पोषं सवितोत वायुस्तनू दक्षमा सुवतां सुशेवम् ।
अयक्ष्मतातिं मह इह धत्त तौ नो मुंचतमंहसः ।।५।।
प्र सुमतिं सवितवार्य ऊतये महस्वन्तं मत्सरं मादयाथः ।
अर्वाग् वामस्य प्रवतो नि यच्छतं तौ नो मुंचतमंहसः ।।६।।
उप श्रेष्ठा न आशिषो देवयोर्धामन्नस्थिरन् ।
स्तौमि देवं सवितारं च वायुं तौ नो मुंचतमंहसः ।।७।।

७३२. वायु सवितारौ

१. आदित्या देवा वा – य. ३५.५

सविता ते शरीराणि मातुरुरुपस्थऽआ वपतु। तस्मै पृथिवी शं भव ।।५।।

७३३. वायुः

१. अग्निः – य. 2७.१५

स यक्षदस्य महिमानमग्नेः सऽई मन्द्रा सुप्रयसः। वसुश्चेतिष्ठो वसुधातमश्च ।।१५।।

2. अंगिरसः – य. 2७.३४

तव वायवृतस्पते त्वष्टुर्जामातरद्भुत। अवांस्या वृणीमहे ।।३४।।

३. अजमीढः – य. 2७.३१

वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः ।।३१।।

४. अथर्वा – अ. 2.2०.१–५; 2.३४.४; ५.2४.८

अ. 2.2०.१–५

वायो यत् ते तपस्तेन तं प्रति तप यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।१।।
वायो यत् ते हरस्तेन तं प्रति हर यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।2।।
वायो यत् तेऽर्चिस्तेन तं प्रत्यर्च यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।३।।
वायो यत् ते शोचिस्तेन तं प्रति शोच यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।४।।
वायो यत् ते तेजस्तेन तमतेजसं कृणु यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।५।।

अ. 2.३४.४

ये ग्राम्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः ।
वायुष्टानग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया संरराणः ।।४।।

अ. ५.2४.८

वायुरन्तरिक्षस्याधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।८।।

५. अथर्वा (ब्रह्मवर्चस् कामः) – अ. ७.४.१

एकया च दशभिश्चा सुहुते द्वाभ्यामिष्टये विशत्या च ।
तिसृभिश्च वहसे त्रिंशता च वियुग्भिर्वाय इह ता वि मुंच ।।१।।

६. अनिलो वातायनः – ऋ. १०.१६८.१–४

वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः ।
दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव रेणुमस्यन् ।।१।।
संप्रेरते अनु वातस्य विष्ठा एनं गच्छन्ति समनं न योषाः ।
ताभिः संयुक्सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य राजा ।।2।।
अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः ।

अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव ।।३।।
आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ।।४।।

७. उलो वातायनः – ऋ. १०.१८६.१–३; सा. १८४०–४२

ऋ. १०.१८६.१–३

वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्र ण आयूँषि तारिषत् ।।१।।
उत वात पितासि न उत भ्रातोत नः सखा। स नो जीवातवे कृधि ।।2।।
यददो वात ते गृहे३ मृतस्य निधिर्हितः। ततो नो देहि जीवसे ।।३।।

सा. १८४०–१८४2

वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्र न आयूंषि तरिषत् ।।१।।
उत वात पितासि न उत भ्रातोत नः सखा। स नो जीवातवे कृधि ।।2।।
यददो वात ते गृहे३ऽमृतं निहितं गुहा। तस्य नो धेहि जीवसे ।।३।।

८. ऋजिष्वा – य. ३३.५५

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ।।५५।।

९. गृत्समदः – य. 2७.2९

नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते। गन्तासि सुन्वतो गृहम्।।2९।।

य. 2७.३2–३३

वायो ये ते सहस्रिणो रथासस्तोभिरा गहि। नियुत्वान्त्सोमपीतये ।।३2।।
एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशती च ।
तिसृभिश्च वहसे त्रिंशता नियुद्भिर्वायविह ता वि मुंच ।।३३।।

१०. गृत्समदः शौनकः – ऋ. 2.४१.१–2; सा. ६००

ऋ. 2.४१.१–2

वायो ये ते सहस्रिणो रथासस्तेभिरा गहि। नियुत्वान्त्सोमपीतये ।।१।।
नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते। गन्तामि सुन्वतो गृहम् ।।2।।

सा. ६००

नियुत्वान्वायवा गह्ययं शुक्रो अयायिते। गन्तासि सुन्वतो गृहम् ।।६।।

११. गोतमः – य. 2५.१७

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद् ग्रावाणाः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।।१७।।

१2. जमदग्निः – य. ३३.८५

आ नो यज्ञं दिविस्पृशं वायो याहि सुम्नमभिः ।
अन्तः पवित्रऽउपरि श्रीणानोऽयं शुक्रोऽअयामि ते ।।८५।।

१३. जमदग्निः भार्गवः – ऋ. ८.१०१.९–१०

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्र उपरि श्रीणानो३यं शुक्रो अयामि ते ।।९।।
वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ।
अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम् ।।१०।।

१४. दीर्घतमा – य. ३८.९

यमाय त्वांगिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे ।।९।।

१५. परुच्छेपो दैवोदासिः – ऋ. १.१३४.१–६; १.१३५.१–६

ऋ. १.१३४.१–६

आ त्वा जुवो रारहाणा अभि प्रयो वायो वहन्त्विह पूर्वपीतये सोमस्य पूर्वपीतये ।
ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती।
नियुत्वता रथेना याहि दावने वायो मखस्य दावने।।१।।
मन्दन्तु त्वा मन्दिनो वायविन्दवोऽस्मत्क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः ।
यद्ध क्राणा इरध्यै दक्षं सचन्त ऊतयः। सधीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः।।2।।
वायुर्युङ्क्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळहवे वहिष्ठा धुरि वोळहवे ।
प्र बोधया पुरन्धि जार आ ससतीमिव। प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ।।३।।
तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु ।
तुभ्यं धेनुः सवर्दुधा विश्वा वसूनि दोहते। अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ।।४।।
तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्यपामिषन्त भुर्वणि ।
त्वां त्सारी दसमानो भगमीट्टे तक्ववीये।
त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा।।५।।
त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि ।
उतो विहुत्मतीनां विशां ववर्जुषीणाम्। विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरम्।।६।।

ऋ. १.१३५.१–९

स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते ।
तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे।
प्र ते सुतासो मधुमन्तो अस्थिरन्मदाय क्रत्वे अस्थिरन् ।।१।।
तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रा वसानो अर्षति ।
तवायं भाग आयुषु सोमो देवेषु हूयते। वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ।।2।।
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि वीतये वायो हव्यानि वीतये ।
तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा। अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ।।३।।
आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये ।
पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम्। वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम्।४।
आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त वाजिनमाशुमत्यं न वाजिनम् ।
तेषां पिबतमस्मयू आ ना गन्तमिहोत्या। इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ।।५।।
इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ।
एते वामभ्यसृक्षत तिरः पवित्रमाशवः। युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ।।६।।
अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम् ।
वि सूनुता ददृशे रीयते घृतमा पूर्णया नियुता याथो अध्वरमिन्द्रश्च याथो अध्वरम् ।।७।।
अत्राह तद्वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठन्त जायवोऽस्मे ते सन्तु जायवः ।
साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यन्ति धेनवो नाप दस्यन्ति धेनवः ।।८।।
इमे ये ते सु वायो बाह्वोजसोऽन्तर्नदी ते पतयन्त्युक्षणो महि स्राधन्त उक्षणः ।
धन्वंचिद्ये अनाशवो जीराश्चिदगिरौकसः। सूर्यस्येव रश्मयो दुर्नियन्त्वो हस्तयोर्दुर्नियन्त्वः।।९।।

१६. पुरुमीढः – य. 27.३०

वायो शुक्रो ऽ अयामि ते मध्वो ऽ अग्रं दिविष्टिषु ।
आ योहि सोमपीतये स्पार्हो देव नियुत्वता ।।३०।।

१७. प्रजापतिः – य. 20.१५

यदि दिवा यदि नक्तमेनांसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वन्मुंचत्वंहसः ।।१५।।

१८. मधुच्छन्दा वैश्वामित्रः – ऋ. १.2.१–३

वायवा याहि दर्शतेमे सोमा अरंकृताः। तेषां पाहि श्रुधी हवम् ।।१।।
वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः। सुतसोमा अहर्विदः ।।2।।
वायो तव प्रपृंचती धेना जिगाति दाशुषे। उरूची सोमपीतये ।।३।।

१६. मेधातिथिः काण्वः – ऋ. १.2३.१

तीव्राः सोमास आ गह्याशीर्वन्तः सुता इमे। वायो तान्प्रस्थितान्पिब ।।१।।

2०. वशोऽश्व्यः – ऋ. ८.४६.2५–2८; ३2

ऋ. ८.४६.2५–2८

आ नो वायो महे तने याहि मखाय पाजसे ।
वयं हि ते चकृमा भूरि दावने सद्यश्चिन्महि दावने ।।2५।।
यो अश्वेभिर्वहते वस्त उस्रास्त्रिः सप्त सप्तीनाम् ।
एभिः सोमेभिः सोमसुद्भिः सोमपा दानाय शुक्रपूतपाः ।।2६।।
यो म इमं चिदुत्मनामन्दच्चित्रं दावने ।
अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः ।।2७।।
उचथ्ये३ वपुर्षि यः स्वराळुत वायो घृतस्नाः ।
अश्वेषितं रजेषितं शुनेषितं प्राज्म तदिदं नु तत् ।।2८।।
शतं दासे बल्बूथे विप्रस्तरुक्ष आ ददे।
ते ते वायविमे जना मदन्तीन्द्रगोपा मदन्ति देवगोपाः ।।३2।।

2१. वसिष्ठः – ऋ. ७.६०.१–४; ७.६१.१; ३; ७.६2.१; ३–५; य. ७.७; 2७.2३; 2४; 2७; 2८; ३५; ३३.४४; ७०

ऋ. ७.६०.१–४

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ।।१।।
ईशानाय प्रहुतिं यस्त आनट्छुचिं सोमं शुचिपास्तुभ्यं वायो ।
कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य ।।2।।
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ।।३।।
उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः ।
गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः ।।४।।

ऋ. ७.६१.१

कुविदंगः नमसा ये वृधासः पुरा देवा अनवद्यास आसन्।
ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण ।।१।।

ऋ. ७.६१.३

पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ।।३।।

ऋ. ७.६2.१

आ वीयो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्व पेयम् ।।१।।

ऋ. ७.६2.३–५

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभेजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ।।३।।
ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ।।४।।
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ।।५।।

य. ७.७

आ वायो भूष शुचिपाऽउप नः सहस्रं ते नियुतो विश्ववार ।
उपो तेऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा ।।७।।

य. २७.२३–२४

पीवोऽअन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ।।२३।।
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुं नियुतः सश्चत स्वाऽउत श्वेतं वसुधितिं निरेके ।।२४।।

य. २७.२७–२८

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ।।२७।।
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम्।
वायोऽअस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ।।२८।।

य. २७.३५

अभि त्वा शूर नोनुमोऽदुग्धाऽइव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ।।३५।।

य. ३३.४४

प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिटऽइयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ।।४४।।

य. ३३.७०

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ।।७०।।

22. वामदेवो गौतमः – ऋ. ४.४७.१; ४.४८.१–५; सा. १६२८

ऋ. ४.४७.१

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियुत्वता ।।१।।

ऋ. ४.४८.१–५

विहि होत्रा अवीता विपो न रायो अर्यः। वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ।।१।।
निर्युवाणो अशस्तीर्नियुत्वाँ इन्द्रसारथिः। वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ।।2।।
अनु कृष्णे वसुधिति येमाते विश्वपेशसा। वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ।।३।।
वहन्तु त्वा मनोयुजो युक्तासो नवतिर्नव। वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ।।४।।
वायो शतं हरीणां युवस्य पोष्याणाम्। उत वा ते सहस्रिणो रथ आ यातु पाजसा ।।५।।

सा. १६२८

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियुत्वता ।।६।।

2३. विश्वकर्मा – य. १४.१2

विश्वकर्मा तवा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमन्तरिक्षं यच्छान्तरिक्षं दृंहान्तरिक्षं
माहिंसीः। विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
वायुष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयांगिरस्वद् ध्रुवा सीद ।।१2।।

2४. विश्वमना वैयश्व व्यश्वो वा आंगिरसः – ऋ. ८.2६.2०–2५

युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।
आन्नो वायो मधु पिबास्माकं सवना गहि ।।2०।।
तव वायवृतस्पते त्वष्टुर्जामारद्भुत। अवांस्या वृणीमहे ।।2१।।
त्वष्टुर्जामातरं वयमीशानं राय ईमहे। सुतावन्तो वायुं द्युम्ना जनासः ।।22।।
वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यम्। वहस्व महः पृथुपक्षसा रथे ।।2३।।
त्वां हि सुप्सरस्तमं नृषदनेषु हूमहे। ग्रावाणं नाश्वपृष्ठं मंहना ।।2४।।

स त्वं नो देव मनसा वायो मन्दानो अग्रियः। कृधि वाजाँ अपो धियः ।।2५।।

२५. **विश्वामित्रः — अ. ६.१४2.१–३**

उच्छ्रयस्व बहुर्भव स्वेन महसा यव। मृणीहि विश्वा पात्राणि मा त्वा दिव्याशनिर्वधीत् ।।१।।
आशृण्वन्तं यवं देवं यत्र त्वाच्छावदामसि। तदुच्छ्रयस्व द्यौरिव समुद्रइवैध्यक्षितः ।।2।।
अक्षितास्त उपसदोऽक्षिताः सन्तु राशयः। पृणन्तो अक्षिताः सन्त्वत्तारः सन्त्वक्षिताः ।।३।।

२६. **विश्वेदेवाः — य. १४.१४**

विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्ठमतीम्। विश्वस्मै प्राणायापानाय व्यानाय विश्वं योतिर्यच्छ। वायुष्टेऽधिपतिस्तया देवतयांगिरस्वद् ध्रुवा सीद ।।१४।।

२७. **शन्तातिः — अ. ६.१०.2**

प्राणायान्तरिक्षाय वयोभ्यो वायवेऽधिपतये स्वहा ।।2।।

२८. **शम्युः — य. २७.४४**

ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्वविता भुवद्वृधऽउत त्राता तनूनाम् ।।४४।।

२९. **सिन्धुद्वीपः — य. ११.३९**

सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम् ।
यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम् ।।३९।।

७३४. वायुः त्वष्टा

१. **वसिष्ठः — अ. ३.20.१०**

गोसनिं वाचमुदेयं वर्चसा माभ्युदिहि। आ रुन्धां सर्वतो वायुस्त्वष्टा पोषं दधातु मे ।।१०।।

७३५. वायुः प्रजापतिः

१. **अथर्वा — अ. 2.३४.४**

ये ग्राम्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः ।
वायुष्टानग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया संरराणः ।।४।।

७३६. वाय्वादयः

१. **प्रजापतिः — य. 2३.८**

वसवस्त्वांजन्तु गायत्रेण छन्दसा रुद्रास्त्वांजन्तु त्रैष्टुभेन छन्दसादित्यास्त्वांजन्तु जागतेन छन्दसा। भूर्भुवः स्वर्लाजी३ंछाची३न्यव्ये गव्यऽएतदन्नमत्त देवाऽएतदन्नमद्धि प्रजापते।।८।।

७३७. वासः

१. **अथर्वा — अ. ७.३७.१**

अक्ष्यौ नौ मधुसंकाशे अनीकं नौ समंजनम् ।
अन्तः कृणुष्व मां हृदि मन इन्नौ सहासति ।।१।।

७३८. वासिष्ठो मैत्रावरुणिः

१. **वासिष्ठो मैत्रावरुणिः — सा.१३2; १५६; 2३३; 2३८; 2५६; 2७०; 2८०; 2८४; 2८५; 2९३; ३०६; ३१०; ३१३; ३१४; ३१८; ३2८; ३३०; ३९८; ५८७; ७१६–७१८; ७३४–७३६; ८६७–८६८; ९८०–९८१; १४५६–१४५७; १६७५–१६७६; १९८2–१९८३; १७९३–१८००**

सा. १३2

वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन्। विद्धी त्वा ३ स्य नो वसो ।।८।।

सा. १५६

प्र व इन्द्राय मादनं हर्यश्वाय गायत। सखायः सोमपाव ने ।।2।।

सा. 2३३

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ।।१।।

सा. 2३८

तरणिरित्सिषासति वाजं पुरन्ध्या युजा। आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम्।।६।।

सा. 2५६

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ।।७।।

सा. 2७०

तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते ।।८।।

सा. 2८०

कस्मिन्द्र त्वा वसवा मर्त्यो दधर्षति ।
श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ।।८।।

सा. 2८४2८५

मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि ।।2।।
सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ।।३।।

सा. 2६३

इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ।।१।।

सा. ३०६–३१०

अभीषतस्तदा भरेन्द्र ज्यायः कनीयसः। पुरूवसुर्हि मघवन्बभूविथ भरेभरे च हव्यः ।।७।।
यदिन्द्र यावतस्त्वमेतावदहमीशीय। स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम् ।।८।।

सा. ३१३–३१४

असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
बोधमसि त्वा हर्यश्व यज्ञैर्बोधा न स्तोममन्धसो मदेषु ।।१।।
योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।
असो यथा नोऽविता वृधश्चिद्ददो वसूनि ममदश्च सोमैः ।।2।।

सा. ३१८

इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता श्रवसश्च काम आ गोमति व्रजे भजा त्वं नः ।।६।।

सा. ३2८

प्र वो महे महे वृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्। विशः पूर्वी प्र चर चर्षणिप्राः ।।६।।

सा. ३३०

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचांसि ।।८।।

सा. ३६८

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः। सोतुर्बाहुभ्यां सुयतो नार्वा ।।८।।

सा. ५८७

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमा विश्वरूपं यदस्य ।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक् ।।2।।

सा. ७१६–७१८

प्र व इन्द्राय मादनं हर्यश्वाय गायत। सखायः सोमपाव्ने ।।१।।

शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः। यकृमा सत्यराधसे ।।2।।
त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्ययुर्वसो ।।३।।

सा. ७३४–७३६

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम्। अनाभयिन्नरिमा ते ।।१।।
नृभिर्धौतः सुतो अश्नैरव्या वारैः परिपूतः। अश्वो न निक्तो नदीषु ।।2।।
तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः। इन्द्र त्वास्मिन्त्सधमादे ।।३।।

सा. ८६७–८६८

तरणिरित्सिषासति वाजं पुरंध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ।।१।।
न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तं रयिर्नशत् ।
सुशक्तिरिन्मघवन् तुभ्यं मावते देष्णं यत्पार्ये दिवि ।।2।।

सा. ६८०–६८१

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ।।१।।
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ।।2।।

सा. १४५६–१४५७

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ।।१।।
मा नो अज्ञाता वृजना दुराध्यो३ माशिवासोऽव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ।।2।।

सा. १६७५–१६७६

मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि ।।१।।
इमे हि ते ब्रह्मकृतः सु ते सचा मधौ न मक्ष आसते ।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ।।2।।

सा. १६८2–१६८३

कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति ।
श्रद्धा इत् ते मघवन् पार्ये दिवि वाजी वाजं सिषासति ।।१।।
मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।
तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ।।2।।

सा. १७६३–१८००

प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्।
विशः पूर्वीः प्र चर चर्षणिप्राः ।।१।।
उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः ।
तस्य व्रतानि न मिनन्ति धीराः ।।2।।
इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
हर्यश्वाय बर्हया समापीन् ।।३।।
यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम् ।।४।।
शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता च न ।।५।।
श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।
कृष्वा दुवांस्यन्तमा सचेमा ।।१।।

न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
सदा ते नाम स्वयशो विवक्मि ।।2।।
भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् ।
मारे अस्मन्मघवं ज्योक्कः ।।३।।

७३६. वास्तुरग्निः

१. आसुरिः – य. ३.४१

गृहा मा बिभीत मा वेपध्वमूर्ज्जं बिभ्रतऽ एमसि ।
ऊर्ज्जं बिभ्रद्व सुमनाः सुमेधा गुहानैमि मनसा मोदमानः ।।४१।।

2. शम्युः – य. ३.४2

येषामद्ध्येति प्रसवन् येषु सौमनसो बहुः। गृहानुपह्वयामहे ते नो जानन्तु जानतः ।।४2।।

७४०. वास्तुपतिः

१. शंयुर् बार्हस्पत्यः – य. ३.४३

उपहूताऽइह गावऽउपहूताऽअजावयः। अथोऽअन्नस्य कीलालऽउपहूतो गृहेषु नः।
क्षेमाय वः शान्त्यै प्रपद्ये शिवं शग्मं शंयोः शंयोः ।।४३।।

७४१. वास्तोष्पतिः

१. ब्रह्म – अ. ५.६.१–८; ५.१०.१–८

अ. ५.६.१–८

दिवे स्वाहा ।।१।।
पृथिव्यै स्वाहा ।।2।।
अन्तरिक्षाय स्वाहा ।।३।।
अन्तरिक्षाय स्वाहा ।।४।।
दिवे स्वाहा ।।५।।
पृथिव्यै स्वाहा ।।६।।
सूर्यो मे चक्षुर्वातः प्राणो३न्तरिक्षमात्मा पृथिवी शरीरम् ।
अस्तृतो नामाहमयमस्मि स आत्मानं नि दधे द्यावापृथिवीभ्यां गोपीथाय ।।७।।
उदायुरुद् बलमुत् कृतमुत् कृत्यामुन्मनीषामुदिन्द्रियम् ।
आयुष्कृदायुष्पत्नी स्वधावन्तौ गोपा मे स्तं गोपायतं मा ।
आत्मसदौ मे स्तं मा मा हिंसिष्टम् ।।८।।

अ. ५.१०.१–८

अश्मवर्म मेऽसि यो मा प्राच्या दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ।।१।।
अश्मवर्म मेऽसि यो मा दक्षिणाया दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ।।2।।
अश्मवर्म मेऽसि यो मा प्रतीच्या दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ।।३।।
अश्मवर्म मेऽसि यो मोदीच्या दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ।।४।।
अश्मवर्म मेऽसि यो मा ध्रुवाया दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ।।५।।
अश्मवर्म मेऽसि यो मोर्ध्वाया दिशोऽघायुरभिदासात्। एतत् स ऋच्छात् ।।६।।
अश्मवर्म मेऽसि यो मा दिशामन्तर्देशेभ्योऽघायुरभिदासात्। एतत् स ऋच्छात् ।।७।।
बृहता मन उप ह्वये मातरिश्वना प्राणापानौ ।
सूर्याच्चक्षुरन्तरिक्षाच्छ्रोत्रं पृथिव्याः शरीरम्। सरस्वत्या वाचमुप ह्वयामहे मनोयुजा ।।८।।

2. वसिष्ठः – ऋ. ७.५४.१–३; ७.५५.१

ऋ. ७.५४.१–३

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ।
यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ।।१।।

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ।।2।।
वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या ।
पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ।।३।।

ऋ. ७.५५.१

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः ।।१।।

७४2. व्रातयः (अध्यातमम्)

१. अथर्वा – अ. १५.१.१–८; १५.2.१–2८; १५.३.१–११; १५.४.१–१८; १५.६.१–2६; १५.७.१–५; १५.८.१–३; १५.९.१–३; १५.१०.१–११; १५.११.१–११; १५.१2.१–११; १५.१३.१–१४; १५.१४.१–24; १५.१५.१–९; १५.१६.१–७; १५.१७.१–१०; १५.१८.१–५

अ. १५.१.१–८

व्रात्य आसीदीयमान एव स प्रजापतिं समैरयत्। ।।१।।
स प्रजापतिः सुवर्णमात्मन्नपश्यत तत् प्राजनयत् ।।2।।
तदेकमभवत् तल्ललाममभवत् तन्महदभवत् तज्जयेष्ठमभवत् तद् ब्रह्माभवत् तत् तपोऽभवत् तत् सत्यमभवत् तेन प्राजायत ।।३।।
सोऽवर्धत स महानभवत् स महादेवोऽभवत् ।।४।।
स देवानाामीशां पर्यैत् स ईशानोऽभवत् ।।५।।
स एकव्रात्योऽभवत् स धनुरादत्त तदेवेन्द्रधनुः ।।६।।
नीलमस्योदरं लोहितं पृष्ठम् ।।७।।

अ. १५.2.१–2८

नीलेनैवाप्रियं भ्रातृव्यं प्रोर्णोति लोहितेन द्विषन्तं विध्यतीति ब्रह्मवादिनो वदन्ति।।८।।
स उदतिष्ठत् स प्राचीं दिशमनु व्यचलत्। ।।१।।
तं बृहच्च रथन्तरं चादित्याश्च विश्वे च देवा अनुव्यचलन् ।।2।।
बृहते च वै स रथन्तराय चादित्येभ्यश्च विश्वेभ्यश्च देवेभ्य आ वृश्चते य एवं
विद्वांसं व्रात्यमुपवदति ।।३।।
बृहतश्च वै स रथन्तरस्य चादित्यानां च विश्वेषां च देवानां प्रियं धाम
भवति तस्य प्राच्यां दिशि ।।४।।
श्रद्धा पुंश्चली मित्रो मागधो विज्ञानं वासोऽहरुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः।।५।
भूतं च भविष्यच्च परिष्कन्दौ मनो विपथम् ।।६।।
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः।।७।।
कीर्तिश्च यशश्च पुरः सरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद।।८।।
स उदतिष्ठत् स दक्षिणां दिशमनु व्यचलत् ।।९।।
तं यज्ञायज्ञियं च वामदेव्यं च यज्ञश्च यजमानश्च पशवश्चानुव्यचलन् ।।१०।।
यज्ञायज्ञियाय च वै स वामदेव्याय च यज्ञाय च यजमानाय च
पशुभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ।।११।।
यज्ञायज्ञियस्य च वै स वामदेव्यस्य च यज्ञस्य च यजमानस्य च
पशूनां च प्रियं धाम भवति तस्य दक्षिणायां दिशि ।।१2।।
उषाः पुंश्चली मन्त्रो मागधो विज्ञानं वासोऽहरुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः।।१३।
अमावास्या च पौर्णमासी च परिष्कन्दौ मनो विपथम् ।
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः ।
कीर्तिश्च यशश्च पुरः सरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ।।१४।।
स उदतिष्ठत् स प्रतीचीं दिशमनु व्यचलत् ।।१५।।

तं वैरूपं च वैराजं चापश्च वरुणश्च राजानुव्यचलन् ।।१६।।
वैरूपाय च वै स वैराजाय चाद्भ्यश्च वरुणाय च राज्ञ
आ वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ।।१७।।
वैरूपस्य च वै स वैराजस्य चापां च वरुणस्य च
राज्ञः प्रियं धाम भवति तस्य प्रतीच्यां दिशि ।।१८।।
इरा पुंश्चली हसो मागधो विज्ञानं वासोऽहरुष्णीषं
रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ।।१६।।
अहश्च रात्री च परिष्कन्दौ मनो विपथम् ।
मातरिश्चा च पवमानश्च विपथवाहौ वातः सारथीरेष्मा प्रतोदः ।
कीर्तिश्च यशश्च पुरःसरावैन कीतिर्गच्छत्या यशो गच्छति य एवं वेद।।२०।।
स उदतिष्ठत् स उदीचीं दिशमनु व्यचलत् ।।२१।।
तं श्यैतं च नौधसं च सप्तर्षयश्च सोमश्च राजानुव्यचलन्।।22।।
श्यैताय च वै स नौधसाय च सप्तर्षिभ्यश्च सोमाय
च राज्ञ आ वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ।।२३।।
श्यैतस्य च वै स नौधसस्य च सप्तर्षीणां च सोमस्य च
राज्ञः प्रियं धाम भवति तस्योदीच्यां दिशि ।।२४।।
विद्युत् पुंश्चली स्तनयित्नुर्मागधो विज्ञानं वासोऽहरुष्णीषं रात्री
केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ।।२५।।
श्रुतं च विश्रुतं च परिष्कन्दौ मनो विपथम् ।।२६।।
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः।।२७।।
कीर्तिश्च यशश्च पुरःसरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ।।२८।।

अ. १५.३.१–११

स संवत्सरमूर्ध्वोऽतिष्ठत् तं देवा अब्रुवन् व्रात्य किं नु तिष्ठसीति।।१।।
सोऽब्रवीदासन्दीं मे सं भरन्त्विति ।।2।।
तस्मै व्रात्यायासन्दीं समभरन् ।।३।।
तस्या ग्रीष्मश्च वसन्तश्च द्वौ पादावास्तां शरच्च वर्षाश्च द्वौ ।।४।।
बृहच्च रथन्तरं चानूच्ये३ आस्तां यज्ञायज्ञियं च वामदेव्यं च तिरश्च्ये ।।५।।
ऋचः प्रांचस्तन्तवो यजूंषि तिर्यंचः ।।६।।
वेद आस्तरणं ब्रह्मोपबर्हणम् ।।७।।
सामासाद उद्गीथोऽपश्रयः ।।८।।
तामासन्दीं व्रात्य आरोहत् ।।६।।
तस्य देवजनाः परिष्कन्दा आसन्त्संकल्पाः
प्रहाय्या३ विश्वानि भूतान्युपसदः ।।१०।।
विश्वान्येवास्य भूतान्युपसदो भवन्ति य एवं वेद ।।११।।

अ. १५.४.१–१८

तस्मै प्राच्या दिशः ।।१।।
वासन्तौ मासौ गोप्तारावकुर्वन् बृहच्च रथन्तरं चानुष्ठातारौ ।।2।।
वासन्तावेनं मासौ प्राच्या दिशो गोपायतो बृहच्च रथन्तरं चानु तिष्ठतो य एवं वेद ।।३।।
तस्मै दक्षिणाया दिशः ।।४।।
ग्रैष्मौ मासौ गोप्तारावकुर्वन् यज्ञायज्ञियं च वामदेव्यं चानुठातारौ ।।५।।
ग्रैष्मावेनं मासौ दक्षिणाया दिशो गोपायतो यज्ञायज्ञियं च वामदेव्यं चानु तिष्ठतो य एवं वेद।।६।
तस्मै प्रतीच्या दिशः ।।७।।
वार्षिकौ मासौ गोप्तारावकुर्वन् वैरूपं च वैराजं चानुष्ठातारौ ।।८।।
वार्षिकावेनं मासौ प्रतीच्या दिशो गोपायतो वैरूपं च वैराजं चानु तिष्ठतो य एवं वेद ।।६।।

तस्मा उदीच्या दिशः ।।१०।।
शरदौ मासौ गोप्तारावकुर्वंछ्यैतं च नौधसं चानुष्ठातारौ ।।११।।
शारदावेनं मासावुदीच्या दिशो गोपायतः श्यैतं च नौधसं चानु तिष्ठतो य एवं वेद ।।१2।।
तस्मै ध्रुवाया दिशः ।।१३।।
हैमनौ मासौ गोप्तारावकुर्वन् भमिं चाग्निं चानुष्ठातारौ ।।१४।।
हेमनावेनं मासौ ध्रुवाया दिशो गोपायतो भूमिश्चाग्निश्चानु तिष्ठतो य एवं वेद ।।१५।।
तस्मा ऊर्ध्वाया दिशः ।।१६।।
शैशिरौ मासौ गोप्तारावकुर्वन् दिवं चादित्यं चानुष्ठातारौ ।।१७।।
शैशिरावेनं मासावूर्ध्वाया दिशो गोपायतो द्यौश्चादित्यश्चानु तिष्ठतो य एवं वेद ।।१८।।

अ. १५.६.१–2६

स ध्रुवां दिशमनु व्यचलत् ।।१।।
तं भूमिश्चाग्निश्चौषधयश्च वनस्पत्यश्च वानस्पत्यश्च वीरुधश्चानुव्यचलन् ।।2।।
भूमेश्च वै सो३ग्नेश्चौषधीनां च वनस्पतीनां च वानस्पत्यानां च वीरुधां च
प्रियं धाम भवति य एवंवेद ।।३।।
स ऊर्ध्वां दिशमनु व्यचलत् ।।४।।
तमृतं च सत्यं च सूर्यश्च चन्द्रश्च नक्षत्राणि चानुव्यचलन् ।।५।।
ऋतस्य च वै स सत्यस्य च सूर्यस्य च चन्द्रस्य च नक्षत्राणां च प्रियं धाम भवति य एवं वेद ।।६।।
स उत्तमां दिशमनु व्यचलत् ।।७।।
तमृचश्च सामानि च यजूंषि च ब्रह्म चानुव्यचलन् ।।८।।
ऋचां च वै स साम्नां च यजुषां च ब्रह्मणश्च प्रियं धाम भवति य एवं वेद ।।६।।
स बृहतीं दिशमनु व्यचलत् ।।१०।।
तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन् ।।११।।
इतिहासस्य च वै स पुराणस्य च गाथानां च नाराशंसीनां च प्रियं धाम भवति य एवं वेद।।१2।।
स परमां दिशमनु व्यचलत् ।।१३।।
तमाहवनीयश्च गार्हपत्यश्च दक्षिणाग्निश्च यज्ञश्च यजमानश्च पशवश्चानुव्यचलन् ।।१४।।
आहवनीयस्य च वै स गार्हपत्यस्य च दक्षिणाग्नेश्च यज्ञस्य च यजमानस्य च पशूनां च प्रियं धाम भवति य एवं वेद ।।१५।।
सोऽनादिष्टां दिशमनु व्यचलत् ।।१६।।
तमृतवश्चार्तवाश्च लोकाश्च लौकयाश्च मासाश्चार्धमासाश्चाहोरात्रे चानुव्यचलन् ।।१७।।
ऋतूनां च वै स आर्तवानां च लोकानां च लौक्यानां च मासानां
चार्धमासानां चाहोरात्रयोश्च प्रियं धाम भवति य एवं वेद ।।१८।।
सोऽनावृत्तां दिशमनु व्यचलत् ततो नावर्त्स्यन्नमन्यत ।।१६।।
तं दितिश्चादितिश्चेडा चेन्द्राणी चानुव्यचलन् ।।2०।।
दितेश्च वै सोऽदितेश्चेडायाश्चेन्द्राण्याश्च प्रियं धाम भवति य एवं वेद ।।2१।।
स दिशोऽनु व्यचलत् तं विराडनु व्यचलत् सर्वे च देवाः सर्वाश्च देवताः ।।22।।
विराजश्च वै स सर्वेषां च देवानां सर्वासां च देवातानां प्रियं धाम भवति य एवं वेद।।2३।।
स सर्वानन्तर्देशाननु व्यचलत् ।।2४।।
तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चानुव्यचलन् ।।2५।।
प्रजापतेश्च वै स परमेष्ठिनश्च पितुश्च पितामहस्य च प्रियं धाम भवति य एवं वेद।।2६।।

अ. १५.७.१–५

स महिमा सद्रुर्भूत्वान्तं पृथिव्या अगच्छत् स समुद्रोऽभवत् ।।१।।
तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चापश्च श्रद्धा च वर्षं भूत्वानुव्यवर्तयन्त ।।2।।
ऐनमापो गच्छत्यैनं श्रद्धा गच्छन्त्यैनं वर्षं गच्छति य एवं वेद ।।३।।

तं श्रद्धा च यज्ञश्च लोकश्चान्नं चान्नाद्यं च भूत्वाभिपर्यावर्तन्त ।।४।।
ऐनं श्रद्धा गच्छत्यैनं यज्ञो गच्छत्यैनं लोको गच्छत्यैनमन्नं गच्छत्यैनमन्नाद्यं
गच्छति य एवं वेद।।५।।

अ. १५.८.१–३

सोऽरज्यत ततो राजन्योऽजायत ।।१।।
स विशः सबन्धूनन्नमन्नाद्यमभ्युदतिष्ठत् ।।2।।
विशां च वै स सबन्धूनां चान्नस्य चान्नाद्यस्य च प्रियं धाम भवति य एवं वेद।।३।।

अ. १५.६.१–३

स विशोऽनु व्यचलत् ।।१।।
तं सभा च समितिश्च सेना च सुरा चानुव्यचलन् ।।2।।
सभायाश्च वै स समितेश्च सेनायाश्च सुरायाश्च प्रियं धाम भवति य एवं वेद।।३।।

अ. १५.१०.१–११

तद् यस्यैवं विद्वान् व्रात्यो राज्ञोऽतिथिर्गृहानागच्छेत् ।।१।।
श्रेयांसमेनमात्मनो मानयेत् तथा क्षत्राय ना वृश्चते तथा राष्ट्राय ना वृश्चते।।2।।
अतो वै ब्रह्म च क्षत्रं चोदतिष्ठतां ते अब्रूतां कं प्र विशावेति ।।३।।
अतो वै बृहस्पतिमेव ब्रह्म प्र विशत्विन्द्रं क्षत्रं तथा वा इति ।।४।।
अतो वै बृहस्पतिमेव ब्रह्म प्राविशदिन्द्रं क्षत्रम् ।।५।।
इयं वा उ पृथिवी बृहस्पतिर्द्यौरेवेन्द्रः ।।६।।
अयं वा उ अग्निर्ब्रह्मासावादित्यः क्षत्रम् ।।७।।
ऐनं ब्रह्म गच्छति ब्रह्मवर्चसी भवति ।।८।।
यः पृथिवीं बृहस्पतिमग्निं ब्रह्म वेद ।।६।।
ऐनमिन्द्रियं गच्छतीन्द्रियवान् भवति ।।१०।।
य आदित्यं क्षत्रं दिवमिन्द्रं वेद ।।११।।

अ. १५.११.१–११

तद् यस्यैवं विद्वान् व्रात्योऽतिथिर्गृहानागच्छेत् ।।१।।
स्वयमेनमभ्युदेत्य ब्रूयाद् व्रात्य क्वाऽवात्सीर्व्रात्योकदं व्रात्य तर्पयन्तु व्रात्य यथा ते प्रियं तथास्तु
व्रात्य यथा ते वशस्तथास्तु व्रात्य यथा ते निकमस्तथास्त्विति ।।2।।
यदेनमाह व्रात्य क्वाऽवात्सीरिति पथ एव तेन देवयानानव रुन्द्धे ।।३।।
यदेनमाह व्रात्योदकमित्यय एव तेनाव रुन्द्धे ।।४।।
यदेनमाह व्रात्य तर्पयन्त्विति प्राणमेव तेन वर्षीयांसं कुरुते ।।५।।
यदेनमाह व्रात्य यथा ते प्रियं तथास्त्विति प्रियमेव तेनाव रुन्द्धे ।।६।।
ऐनं प्रियं गच्छति प्रियः प्रियस्य भवति य एवं वेद ।।७।।
यदेनमाह व्रात्य यथा ते वशस्तथास्त्विति वशमेव तेनाव रुन्द्धे ।।८।।
ऐनं वशो गच्छति वशी वशिनां भवति य एवं वेद ।।६।।
यदेनमाह व्रात्य यथा ते निकामस्तथास्त्विति निकाममेव तेनाव रुन्द्धे ।।१०।।
ऐनं निकामो गच्छति निकामे निकामस्य भवति य एवं वेद ।।११।।

अ. १५.१2.१–११

तद् यस्यैवं विद्वान् व्रात्य उद्धृतेष्वग्निष्वधिश्रितेऽग्निहोत्रेऽतिथिर्गृहानागच्छेत् ।।१।।
स्वयमेनमभ्युदेत्य ब्रूयाद् व्रात्याति सृज होष्यामीति ।।2।।
स चातिसृजेज्जुहुयान्न चातिसृजेन्न जुहुयात् ।।३।।
स य एवं विदुषा व्रात्येनातिसृष्ठो जुहोति ।।४।।
प्र पितृयाणं पन्थां जानाति प्र देवयानम् ।।५।।
न देवेष्वा वृश्चते हुतमस्य भवति ।।६।।
पर्यस्यास्मिँल्लोक आयतनं शिष्यते य एवं विदुषा व्रात्येनातिसृष्टो जुहोति ।।७।।

अथ य एवं विदुषा व्रात्येनानतिसृष्टो जुहोति ।।८।।
न पितृयाणं पन्थां जानाति न देवयानम् ।।६।।
आ देवेषु वृश्चते अहुतमस्य भवति ।।१०।।
नास्यास्मिँल्लोक आयतनं शिष्यते य एवं विदुषा व्रात्येनानतिसृष्टो जुहोति ।।११।।

अ. १५.१३.१–१४

तद् यस्यैवं विद्वान् व्रात्य एकां रात्रिमितिथिर्गृहे वसति ।।१।।
ये पृथिव्यां पुण्या लोकास्तानेव तेनाव रुन्द्धे ।।2।।
तद् यस्यैवं विद्वान् व्रात्यो द्वितीयां रात्रिमतिथिर्गृहे वसति ।।३।।
येऽन्तरिक्षे पुण्या लोकास्तानेव तेनाव रुन्द्धे ।।४।।
तद् यस्यैवं विद्वान् व्रात्यस्तृतीयां रात्रिमतिथिर्गृहे वसति ।।५।।
ये दिवि पुण्या लोकास्तानेव तेनाव रुन्द्धे ।।६।।
तद् यस्यैवं विद्वान् व्रात्यश्चतुर्थीं रात्रिमतिथिर्गृहे वसति ।।७।।
ये पुण्यानां पुण्या लोकास्तानेव तेनाव रुन्द्धे ।।८।।
तद् यस्यैवं विद्वान् व्रात्योऽपरिमिता रात्रीरतिथिर्गृहे वसति ।।६।।
य एवापरिमिताः पुण्या लोकास्तानेव तेनाव रुन्द्धे ।।१०।।
अथ यस्याव्रात्यो व्रात्यब्रुवो नामबिभ्रत्यतिथिर्गृहानागच्छेत्।।११।।
कर्षेदेनं न चैनं कर्षेत् ।।१2।।
अस्यै देवताया उदकं याचामीमां देवतां वासय इमामिमां देवता परि
वेवेष्मीत्येनं परि वेविष्यात्।१३।।
तस्यामेवास्य तद् देवतायां हुतं भवति य एवं वेद ।।१४।।

अ. १५.१४.१–2४

स यत् प्राचीं दिशमनु व्यचलन्मारुतं शर्धो भूत्वानुव्यचलन्मनोऽन्नादं कृतवा ।।१।।
मनसान्नादेनान्नमत्ति य एवं वेद ।2।।
स यद् दक्षिणां दिशमनु व्यचलदिन्द्रो भूत्वानुव्यचलद् बलमन्नादं कृत्वा ।।३।।
बलेनान्नादेनान्नमत्ति य एवं वेद ।।४।।
स यत् प्रतीचीं दिशमनु व्यचलद् वरुणो राजा भूत्वानुव्यचलदपोऽन्नादीः कृत्वा ।।५।।
अद्भिरन्नादीभिरन्नमत्ति य एवं वेद ।।६।।
स यदुदीचीं दिशमनु व्यचलत् सोमो राजा भूत्वानुव्यचलत् सप्तर्षिभिर्हुत आहुतिमन्नादीं कृत्वा।।७।।
आहुत्यान्नाद्यन्नमत्ति य एवं वेद ।।८।।
स यद् ध्रुवां दिशमनु व्यचलद् विष्णुर्भूत्वानुव्यचलद् विराजमन्नादीं कृत्वा ।।६।।
विराजान्नाद्यन्नमत्ति य एवं वेद ।।१०।।
स यत् पशूननु व्यचलद् रुद्रो भूत्वानुव्यचलदोषधीरन्नादीः कृत्वा ।।११।।
ओषधीभिरन्नादीभिरन्नमत्ति य एवं वेद ।।१2।।
स यत् पितॄननु व्यचलद् यमो राजा भूत्वानुव्यचलत् स्वधाकारमन्नादं कृत्वा ।।१३।।
स्वधाकारेणान्नादेनामत्ति य एवं वेद ।।१४।।
स यन्मनुष्या३ननु व्यचलदग्निर्भूत्वानुव्यचलत् स्वाहाकारमन्नादं कृत्वा ।।१५।।
स्वाहाकारेणान्नादेनान्नमत्ति य एवं वेद ।।१६।।
स यदूर्ध्वां दिशमनु व्यचलद् बृहस्पतिर्भूत्वानुव्यचलद् वषट्कारमन्नादं कृत्वा ।।१७।।
वषट्कारेणान्नादेनान्नमत्ति य एवं वेद ।।१८।।
स यद् देवाननु व्यचलदीशानो भूत्वानुव्यचलन्मन्युमन्नादं कृत्वा ।।१६।।
मन्युनान्नादेनान्नमत्ति य एवं वेद ।।2०।।
स यत् प्रजा अनु व्यचलत् प्रजापतिर्भूत्वानुव्यचलत् प्राणमन्नादं कृत्वा ।।2१।।

प्राणेनान्नादेनान्नमत्ति य एवं वेद ।।22।।
स यत् सर्वानन्तर्देशाननु व्यचलत् परमेष्ठी भूत्वानुव्यचलद् ब्रह्मन्नादं कृत्वा ।।2३।।
ब्रह्मणान्नादेनान्नमत्ति य एवं वेद ।।2४।।

अ. १५.१५.१–६

तस्य व्रात्यस्य ।।१।।
सप्त प्राणाः सप्तापानाः सप्त व्यानाः ।।2।।
तस्य व्रात्यस्य। योऽस्य प्रथमः प्राण ऊर्ध्वो नामायं सो अग्निः ।।३।।
तस्य व्रात्यस्य। योऽस्य द्वितीयः प्राणः प्रौढो नामासौ स आदित्यः ।।४।।
तस्य व्रात्यस्य। योऽऽस्य तृतीयः प्राणो३भ्यूढो नामसौ स चन्द्रमाः ।।५।।
तस्य व्रात्यस्य। योऽस्य चतुर्थः प्राणो विभूर्नामायं स पवमानः ।।६।।
तस्य व्रात्यस्य। योऽस्य पंचमः प्राणो योनिर्नाम ता इमा आपः ।।७।।
तस्य व्रात्यस्य। योऽस्य षष्ठः प्राणः प्रियो नाम त इमे पशवः ।।८।।
तस्य व्रात्यस्य। योऽस्य सप्तमः प्राणोऽपरिमितो नाम ता इमाः प्रजाः ।।९।।

अ. १५.१६.१–७

तस्य व्रात्यस्य। योऽस्य प्रथमोऽपानः सा पौर्णमासी ।।१।।
तस्य व्रात्यस्य। योऽस्य द्वितीयोऽपानः साष्टका ।।2।।
तस्य व्रात्यस्य। योऽस्य तृतीयोऽपानः सामावास्या ।।३।।
तस्य व्रात्यस्य। योऽस्य चतुर्थोऽपान्ः सा श्रद्धा ।।४।।
तस्य व्रात्यस्य। योऽस्य पंचमोऽपानः सा दीक्षा ।।५।।
तस्य व्रात्यस्य। योऽस्य षष्ठोऽपानः स यज्ञः ।।६।।
तस्य व्रात्यस्य। योऽस्य सप्तमोऽपानस्ता इमा दक्षिणाः।।७।।

अ. १५.१७.१–१०

तस्य व्रात्यस्य। योऽस्य प्रथमो व्यानः सेयं भूमिः ।।१।।
तस्य व्रात्यस्य। योऽस्य द्वितीयो व्यानस्तदन्तरिक्षम् ।।2।।
तस्य व्रात्यस्य। योऽस्य तृतीयो व्यानः सा द्यौः ।।३।।
तस्य व्रात्यस्य। योऽस्य चतुर्थो व्यानस्तानि नक्षत्राणि ।।४।।
तस्य व्रात्यस्य। योऽस्य पंचमो व्यानस्त ऋतवः ।।५।।
तस्य व्रात्यस्य। योऽस्य षष्ठो व्यानस्त आर्तवाः ।।६।।
तस्य व्रात्यस्य। योऽस्य सप्तमो व्यानः स संवत्सरः ।।७।।
तस्य व्रात्यस्य। समानमर्थं परि यन्ति देवाः संवत्सरं वा एतद्दतवोऽनुपरियन्ति व्रात्यं च।।८।।
तस्य व्रात्यस्य। यदादित्यमभिसंविशन्त्यमावामयां चैव तत् पौर्णमासीं च ।।९।।
तस्य व्रात्यस्य। एकं तदेषाममृतत्वमित्याहुतिरेव ।।१०।।

अ. १५.१८.१–५

तस्य व्रात्यस्य ।।१।।
यदस्य दक्षिणमक्ष्यसौ स आदित्यो यदस्य सव्यमक्ष्यसौ स चन्द्रमाः ।।2।।
योऽस्य दक्षिणः कर्णोऽयं सो अग्निर्योऽस्य सव्यः कर्णोऽयं स पवमानः ।।३।।
अहोरात्रे नासिके दितिश्चादितिश्च शीर्षकपाले संवत्सरः शिरः।।४।।
अह्ना प्रत्यङ् व्रात्यो रात्र्या प्राङ् नमो व्रात्याय ।।५।।

७४३. विचृतौतारके

१. भृग्वंगिरा – अ. ३.७.४

अमू ये दिवि सुभगे विचृतौ नाम तारके। वि क्षेत्रियस्य मुंचतामधमं पाशमुत्तमम् ।।४।।

७४४. विदुषी

१. परमेष्ठी – य. १५.५८

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम्।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ।
सूर्यस्तेऽधिपतिस्तया देवतयाऽंगिरस्वद् ध्रुवा सीद ।।५८।।

2. **वसिष्ठः — य. १५.६३**

आयोष्ट्वा सदने सादयाम्यवतश्छायायां समुद्रस्य हृदये रश्मीवतीं
भास्वतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षम् ।।६३।।

३. **विश्वेदेवाः — य. १४.21–22**

मूर्द्धासि राड् ध्रुवासि धरुणा धर्त्र्यसि धरणी ।
आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ।।21।।
यन्त्री राड् यन्त्र्यसि यमनी ध्रुवासि धरित्री ।
इषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा ।।22।।

७४५. विद्युत्

१. **गोतमः — य. ५.५**

आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वनऽओजिष्ठाय ।
अनाधृष्टमस्यनाधृष्यं देवानामोजोऽनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्यमंजसा
सत्यमुपगेषं स्विते मा धाः ।।५।।

2. **भृग्वंगिरा — अ. १.१३.१–४**

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते अस्त्वश्मने येना दूडाशे अस्यसि ।।१।।
नमस्ते प्रवतो नपाद् यतस्तपः समूहसि ।
मृडया नस्तनूभ्यो मयस्तोकेभ्यस्कृधि ।।2।।
प्रवतो नपान्नम एवास्तु तुभ्यं नमस्ते हेतये तपुषे च कृण्मः ।
विद्म ते धाम परमं गुहा यत् समुद्रे अन्तर्निहितासि नाभिः ।।३।।
यां त्वा देवा असृजन्त विश्व इषुं कृण्वाना असनाय धृष्णुम् ।
सा नो मृड विदथे गृणाना तस्यै ते नमो अस्तु देवि ।।४।।

७४६. विद्युतौ

१. **परमेष्ठी प्रजापतिः — य. १.2४**

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददेऽध्वरकृतं देवेभ्य इन्द्रस्य
बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा द्विषतो वधः ।।2४।।

७४७. विद्युदादयः

१. **प्रजापतिः — य. 2३.१2**

द्यौरासीत्पूर्वचित्तिरश्वऽआसीद् बृहद्वयः। आविरासीत्पिलिप्पिला रात्रिरासी त्पिशंगिला ।।१2।।

७४८. विद्वद्राजानौ

१. **श्रीकामः — य. ३2.१६**

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नु ताम्। मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ।।१६।।

७४९. विद्वान्

१. **आथर्वणः दध्यङ् — य. ३७.९; १३**

य. ३७.९

अश्वस्य त्वा वृष्णः शक्रा धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।
अश्वम्य त्वा वृष्णाः शक्रा धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।
अश्वस्य त्वा वृष्णः शक्रा धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय

त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ।।६।।

य. ३७.१३

स्वाहा मरुद्भिः परि श्रीयस्व दिवः सं स्पृशस्पाहि। मधु मधु मधु ।।१३।।

2. गृत्समदः – य. 2६.2४

अमेच नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मदस्व जुजुषणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ।।2४।।

३. गोतमः – य. 2५.४८

तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।
स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः समस्मात् ।।४८।।

४. जमदग्निः – य. 2९.2५–27

समिद्धोऽअद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ।।2५।।
तनूनपात्पथऽऋतस्य यानान्मध्वा समंजन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः ।।2६।।
नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयोधियन्धाः स्वदन्ति देवाऽउभयानि हव्या ।।2७।।

५. दक्षः – य. ३३.७2

काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे। रिशदसा सधस्थऽआ ।।७2।।

६. दध्यङ् आथर्वणः – य. ३७.९; १३

य. ३७.९

अश्वस्य तवा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे ।।६।।

य. ३७.१३

स्वाहा मरुद्भिः परि श्रीयस्व दिवः सं स्पृशस्पाहि। मधु मधु मधु ।।१३।।

७. नारायणः – य. ३०.९–12

सन्धये जारं गेहायोपपतिमार्त्यै परिवित्तं निर्ऋत्यै परिविविदानमराद्ध्याऽएदिधिषुः पतिं निष्कृत्यै पेशस्कारीं संज्ञानाय समरकारीं प्रकामोद्यायोपसदं वर्णायानुरुधं बलायोपदाम् ।।९।।
उत्सादेभ्यः कुब्जं प्रमदे वामनं द्वार्भ्यः स्रामं स्वप्नायान्धमधर्माय बधिरं पवित्राय भिषजं प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षायाऽअभिप्रश्निनं मर्यादायै प्रश्नविवाकम् ।।१०।।
अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं तेजसेऽजपालमिरायै कीनाशं कीलालाय सुराकारं भद्राय गृहपं श्रेयसे वित्तधमाध्यक्षयायानुक्षत्तारम् ।।११।।
भायै दार्वाहारं प्राभायाऽअग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारं सर्वेभ्यो लोकेभ्यऽउपसेक्तारमवऽऋत्यै वधायोपमन्थितारं मेधाय वासः पल्पूलीं प्र कामाय रजयित्रीम् ।।12।।

८. पावकाग्निः – य. 12.१०७; ११०

य. 12.१०७

पावकवर्चाः शुक्रवर्चा ऽ अनूनवर्चा ऽ उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी ऽ उभे ।।१०७।।

य. 12.११०

इष्कर्त्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिम् ।।११०।।

९. **प्रजापतिः – य. 2३.१५**

स्वयं वाजिस्ँतन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व। महिमा तेऽन्येन न सन्नशे ।।१५।।

१०. **प्रस्कण्वः – य. ३३.३३**

दैव्यावध्वर्यूऽआ गतं रथेन सूर्यत्वचा। मध्वा यज्ञं समंजाथे। तं प्रत्नथा। अयं वेनः।
चित्रं देवानाम् ।।३३।।

११ **भरद्वाजः – य. 2९.३८**

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्त्तु ।।३८।।

१2. **मधुच्छन्दा: – य. १५.६५**

सहस्रस्य प्रमासि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि साहस्रोऽसि सहस्राय त्वा ।।६५।।

१३. **महीयवः – य. 2६.१८**

एना विश्वान्यर्यऽआ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे ।।१८।।

१४. **मेधातिथिः – य. 2६.2०–2१; 2३**

य. 2६.2०–2१

अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारं सोमपीतये ।।2०।।
अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि ।।2१।।

य. 2६.2३

तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि ।
अस्मिन् यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ।।2३।।

१५. **वत्सः – य. ४.2७; 2६.१५**

य. ४.2७

मित्रो नऽएहि सुमित्रधऽइन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तं स्योनः स्योनम् ।
स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्नक्षध्वं मा वो दभन्।।2७।।

य. 2६.१५

उपह्वरे गिरीणां संगमे च नदीनाम्। धिया विप्रोऽअजायत ।।१५।।

१६. **विश्वामित्रः – य. ३३.७५**

आ रोदसीऽअपृणदा स्वर्महज्जातं यदेनमपसोऽअधारयन् ।
सोऽअध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ।।७५।।

१७. **स्वयम्भुर् ब्रह्म – य. ३2.९**

प्र तद्वोचेदमृतं नु विद्वान् गन्धर्वो धाम विभृतं गुहा सत् ।
त्रीणि पदानि निहिता गुहा स्य यस्तानि वेद स पितुः पितासत् ।।९।।

१८. **स्वस्त्यात्रेयः – य. 22.2१**

विश्वो देवस्य नेतुर्मर्त्तो वुरीत सख्यम्। विश्वो रायऽइषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ।।2१।।

१९. **हिरण्यगर्भः – य. १2.१०५**

इषमूर्जमहमितऽआदमृतस्य योनिं महिषस्य धाराम् ।
आ मा गोषु विशत्वा तनूषु जहामि सेदिमनिराममीवाम् ।।१०५।।

2०. **हैमवर्चिः – य. १९.2४**

आ श्रावयेति स्तोत्रियाः प्रतयाश्रावोऽअनुरूपः। यजेति धाय्यारूपं प्रागाथा ये यजामहाः ।।2४।।

७५०. विद्वांसः

१. आथर्वणः दध्यङ् – य. ३७.१०

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा। मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ।।१०।।

2. कक्षीवान (दैर्धतमसः औशिजः) – ऋ. १.१2६.१–७

अमन्दान्त्सतोमान्प्र भरे मनीषा सिन्धावधि क्षियतो भावयस्य ।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ।।१।।
शतं राज्ञो राधमानस्य निष्कांछतमश्वान्प्रयतान्सद्य आदम् ।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ।।2।।
उप मा श्यावाः स्वनयेन दत्ता बधूमन्तो दश रथासो अस्थुः ।
षष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नाम् ।।३।।
चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति ।
मदच्युतः कृशनावतो अत्यान्कक्षीवन्त उदमृक्षन्त पज्राः ।।४।।
पूर्वामनु प्रयतिमाददे वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः ।
सुबन्धवो ये विश्या इव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः ।।५।।
आगधिता परिगधिता या कशीकेव जंगहे ।
ददाति मह्यं यादुरी याशूनां भोज्या शता ।।६।।
उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ।
सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ।।७।।

३. गोतमः – य. ७.३; 2५.2५; ३०; ३७; ३६

य. ७.३

स्वाङ्कृतोऽसि विश्वेभ्यऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्य्याय
देवेभ्यस्त्वा मरीचिपेभ्यो देवांशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भंगेन हतोऽसौ फट्
प्राणाय त्वा व्यानाय त्वा ।।३।।

य. 2५.2५

यन्निर्णिजा रेक्णसा पावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूपऽइन्द्रापूष्णो प्रियमप्येति पाथः ।।2५।।

य. 2५.३०

उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशाऽउप वीतपृष्ठः ।
अन्वेनं विप्राऽऋषयो मदन्ति देवानां पुष्टे पुष्टे चकृमा सुबन्धुम् ।।३०।।

य. 2५.३७

मा त्वाग्निर्ध्वनयीद् धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्त्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ।।३७।।

य. 2५.३६

यदश्वाय वासऽउपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
सन्दानमर्वन्तं पड्वीशं प्रिया देवेष्वा यामयन्ति ।।३६।।

४. जमदग्निः – य. 2६.३2; ३६

य. 2६.३2

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ।।३2।।

य. 2६.३६

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवा नामभवत्पुरोगाः ।

अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ।।३६।।

५. दध्यङ् आथर्वणः – य. ३७.१०

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा। मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ।।१०।।

६. दीर्घतमा – य. ६.६

परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं यजमानं रायो मनुष्याणाम् ।
दिवः सूनुरस्येष ते पृथिव्याँल्लोकऽआरण्यस्ते पशुः ।।६।।

७. नारायणः – य. ३०.७–८

तपसे कौलालं मायायै कर्मारं रूपाय मणिकारं शुभे वपं शरव्यायाऽइषुकारं हेत्यै धनुष्कारं कर्मणे ज्याकारं दिष्टाय रज्जुसर्जं मृत्यवे मृगयुमन्तकाय श्वनिनम् ।।७।।

नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं प्रयुग्भ्यऽउन्मत्तं सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यतायाऽअकितवं पिशाचेभ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारीम् ।।८।।

८. परमेष्ठी – य. १५.४–७

एवश्छन्दो वरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः सिन्धुश्छन्द समुद्रश्छन्दः सरिरं छन्दः ककुप्छन्दस्त्रिककुप्छन्दः काव्यं छन्दो अङ्कुपं छन्दोऽक्षरपंक्तिश्छन्दः पदपंक्तिश्छन्दो विष्टारपंक्तिश्छन्दः क्षुरो भ्रजश्छन्दः ।।४।।

आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरंछन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः संस्तुप्छन्दोऽनुष्टुप्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्धाश्छन्दो विशालं छन्दश्छदिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दो अङ्काङ्क छन्दः ।।५।।

रश्मिना सत्याय सत्यं जिन्व प्रेतिना धर्मणा धर्मं जिन्वान्वित्या दिवा दिवं जिन्व सन्धिनाऽन्तरिक्षेणान्तरिक्षं जिन्व प्रतिधिना पृथिव्या पृथिवीं जिन्व विष्टम्भेन वृष्ट्या वृष्टिं जिन्व प्रव्याऽह्नाऽहर्जिन्वानुया रात्र्या रात्रीं जिन्वो शिजा वसुभ्यो वसूंजिन्व प्रकेतेनादित्येभ्य आदित्यांजिन्व ।।६।।

तन्तुना रायस्पोषेण रायस्पोषं जिन्व संसर्पेण श्रुताय श्रुतं जिन्वैडेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व वयोधसाधीतेनाधीतं जिन्वाभिजिता तेजसा तेजो जिन्व ।।७।।

९. प्रजापतिः – य. 2३.2९;३३; 2५.१५; 2७.2१

य. 2३.2९

यद्देवासो ललामगुं प्र विष्टीमिनमाविषुः। सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभुवो यथा ।।2९।।

य. 2३.३३

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ।।३३।।

य. 2५.१५

देवानां भद्रा सुमति ऋर्जूयतो देवानां रातिरभि नो निवर्त्तताम् ।
देवानां सख्यमुपसेदिमा वयं देवा नऽआयुः प्रतिरन्तु जीवसे ।।१५।।

य. 2७.2१

वनस्पतेऽव सृजा रराणस्त्मना देवेषु। अग्निर्हव्यं शमिता सूदयाति ।।2१।।

१०. भरद्वाजः – य. 2९.५८

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेवऽऐन्द्रोऽरुणो मारुतः कल्माषऽऐन्द्राग्नः सं हितोऽधोरामः सावित्रो वारुणः कृष्णऽएकशितिपात्पेत्वः ।।५८।।

११. मधुच्छन्दाः – य. २९.३७

केतुं कृण्वन्नकेतवे पेशो मर्याऽअपेशसे। समुषद्भिरजायथाः ।।३७।।

१२. मुद्गलः – य. २६.१६

अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः ।
अनु द्विपदानु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ।।१६।।

१३. मेधातिथिः – य. ५.१५

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे स्वाहा ।।१५।।

१४. यज्ञपुरुषः – य. 22.2

इमामगृभ्णान् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या ।
सा नो अस्मिन्त्सुत आ बभूव ऋतस्य सामन्त्सरमारपन्ती ।।2।।

१५. रोमशा ब्रह्मवादिनी – ऋ. १.१२६.७

उपोप मे परा मृश मा मे दभ्राणि मन्यथाः। सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ।।७।।

१६. वसिष्ठः – य. ३३.१४

त्वेऽअग्ने स्वाहुत प्रियासः सन्तु सूरयः। यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ।।१४।।

१७. विश्वामित्रः – य. ३३.७–८

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन् घृतैरस्तृणन् बर्हिरस्माऽआदिद्धोतारं न्यसादयन्त ।।७।।
मूर्द्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् ।
कविं सम्राजमतिथिजनानामासन्ना पात्रं जनयन्त देवाः ।।८।।

१८. विश्वेदेवाः – य. १४.१०

अनड्वान् वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दस्त्र्यविर्वयस्त्रिष्टुप् छन्दो दित्यवाड् वयो विराट् छन्दः पंचाविर्वयो गायत्री छन्दस्त्रिवत्सो वयऽउष्णिक् छन्दस्तुर्य्यवाड् वयोऽनुष्टुप् छनदः।।१०।।

१९. वैखानसः – य. १९.३९

पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।३९।।

२०. स्वस्त्यात्रेयः – य. २१.१३–१६

तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती। उष्णिहा छन्दऽइन्द्रियं दित्यवाड् गौर्वयो दधुः ।।१३।।
इडाभिरग्निरीड्यः सोमो देवोऽअमर्त्यः। अनुष्टुप् छन्दऽइन्द्रियं पंचाविर्गौर्वयो दधुः ।।१४।।
सुबर्हिरग्निः पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः। बृहती छन्दऽइन्द्रियं त्रिवत्सो गौर्वयो दधुः ।।१५।।
दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः। पंक्तिश्छन्दऽइहेन्द्रियं तुर्य्यवाड् गौर्वयो दधुः ।।१६।

२१. हैमवर्चिः – य. १९.१२

देवा यज्ञमतन्वत भेषजं भिषजाश्विना। वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः ।।१२।।

७५१. विद्वान्सः

१. भावयव्यः कक्षिवान्–(ऋ. १.१२६.१–५); रोमशा ब्रह्मवादिनी (ऋ. १.१२६.७) – ऋ. १.१२६.६

आगधिता परिगधिता या कशीकेव जंगहे। ददाति मह्यं यादुरी याशूनां भोज्या शता ।।६।।

७५2. विभिन्दोर् दानस्तुतिः

१. मेधातिथिः – ऋ. ८.2.४१–४2

शिक्षा विभिन्दो अस्मै चत्वार्ययुता ददत्। अष्टा परः सहस्रा ।।४१।।
उत सु त्ये पयोवृधा माकी रणस्य नप्त्या। जनित्वनाय मामहे ।।४2।।

७५३. विराजादयः

१. प्रजापतिः – य. २४.१३

पष्ठवाहो विराजऽउक्षाणो बृहत्याऽऋषभाः ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे ।।१३।।

७५४. विराट्

१. **अथर्वाचार्यः – अ. ८.१०(१).१–१३; ८.१०(2).१–१०; ८.१०(३).१–८; ८.१०(४).१–१६; ८.१०(५).१–१६; ८.१०(६).१–४**

अ. ८.१०(१).१–१३

विराड् वा इदमग्र आसीत् तस्या जातायाः सर्वमबिभेदियमेवेदं भविष्यतीति ।।१।।
सोदक्रामत् सा गार्हपत्ये न्यक्रामत् ।।2।।
गृहमेधी गृहपतिर्भवति य एवं वेद ।।३।।
सोदक्रामत् साहवनीये न्यक्रामत् ।।४।।
यन्त्यस्य देवा देवहूतिं प्रियो देवानां भवति य एवं वेद ।।५।।
सोदक्रामत् सा दक्षिणाग्नौ न्यक्रामत् ।।६।।
यज्ञर्तो दक्षिणीयो वासतेयो भवति य एवं वेद ।।७।।
सोदक्रामत् सा सभायां न्यक्रामत् ।।८।।
यन्तयस्य सभा सभ्यो भवति य एंव वेद ।।६।।
सोदक्रामत् सा समितौ न्यक्रामत् ।।१०।।
यन्त्यस्य समितिं सामित्यो भवति य एवं वेद ।।११।।
सोदक्रामत् सामन्त्रणे न्यक्रामत् ।।१2।।
यन्त्यस्यामन्त्रणमामन्त्रणीयो भवति य एवं वेद ।।१३।।

अ. ८.१०(2).१–१०

सोदक्रामत् सान्तरिक्षे चतुर्धा विक्रान्तातिष्ठत् ।।१।।
तां देवमनुष्या अब्रुवान्नियमेव तद् वेद यदुभय उपजीवेमेमामुप ह्वयामहा इति ।।2।।
तामुपाह्वयन्त ।।३।।
ऊर्ज एहि स्वध एहि सूनृत एहीरावत्येहीति ।।४।।
तस्या इन्द्रो वत्स आसीद् गायत्र्य भिधान्यभ्रमूधः ।।५।।
बृहच्च रथन्तरं च द्वौ स्तनावास्तां यज्ञायज्ञियं च वामदेव्यं च द्वौ ।।६।।
ओषधीरेव रथन्तरेण देवा अदुह्रन् व्यचो बृहता ।।७।।
अपो वामदेव्येन यज्ञं यज्ञायज्ञियेन ।।८।।
ओषधीरेवास्मै रथंतरं दुहे व्यचो बृहत् ।।६।।
अपो वामदेव्यं यज्ञं यज्ञायज्ञियं य एवं वेद ।।१०।।

अ. ८.१०(३).१–८

सोदक्रामत् सा वनस्पतीनागच्छत् तां वनस्पतयोऽघ्नत सा संवत्सरे सम्भवत् ।।१।।
तस्माद् वनस्पतीनां संवत्सरे वृक्णमपि रोहति वृश्चतेऽस्याप्रियो भ्रातृव्यो य एवं वेद ।।2।।
सोदक्रामत् सा पितॄनागच्छत् तां पितरोऽघ्नत सा मासि समभवत् ।।३।।
तस्मात् पितृभ्यो मास्युपमास्यं ददति प्र पितृयाणं पन्थां जानाति य एवं वेद ।।४।।
सोदक्रामत् सा देवानागच्छत् तां देवा अघ्नत सार्धमासे समभवत् ।।५।।
तस्माद् देवेभ्योऽर्धमासे वषट् कुर्बन्ति प्र देवयानं पन्थां जानाति य एवं वेद ।।६।।
सोदक्रामत् सा मनुष्या३नागच्छत् तां मनुष्या अघ्नत सा सद्यः समभवत् ।।७।।
तस्मान्मनुष्येभ्य उभयद्युरुप हरन्त्युपास्य गृहे हरन्ति य एवं वेद ।।८।।

अ. ८.१०(४).१–१६

सोदक्रामत् सासुरानागच्छत् तामसुरा उपाह्वयन्त माय एहीति ।।१।।
तस्या विरोचनः प्राह्रादिर्वत्स आसीदयस्पात्रं पात्रम् ।।2।।
तां द्विमूर्धात्र्व्योऽधोक् तां मायामेवाधोक् ।।३।।

तां मायामसुरा उप जीवन्त्युपजीवनीयो भवति य एवं वेद ।।४।।
सोदक्रामत् सा पितृनागच्छत् तां पितर उपाह्वयन्त स्वध एहीति ।।५।।
तस्या यमो राजा वत्स आसीद् रजतपात्रं पात्रम् ।।६।।
तामन्तको मार्त्यवोऽधोक् तां स्वधामेवाधोक् ।।७।।
तां स्वधां पितर उप जीवन्त्यु पजीवनीयो भवति य एवं वेद ।।८।।
सोदक्रामत् सा मनुष्या३नागच्छत् तां मनुष्या३ उपाह्वयन्तेरावत्येहीति ।।९।।
तस्या मनुर्वैवस्वतो वत्स आसीत् पृथिवी पात्रम् ।।१०।।
तां पृथी वैन्योऽधोक् तां कृषिं च सस्यं चाधोक् ।।११।।
ते कृषिं च सस्यं च मनुष्या३ उप जीवन्ति कृष्टराधिरुपजीवनीयो भवति य एवं वेद ।।12।।
सोदक्रामत् सा सप्तऋषीनागच्छत् तां सप्तऋषय उपाह्वयन्त ब्रह्मण्वत्येहीति ।।१३।।
तस्याः सोमो राजा वत्स आसीच्छन्दः पात्रम् ।।१४।।
तां बृहस्पतिरांगिरसोऽधोक् तां ब्रह्म च तपश्चाधोक् ।।१५।।
तद् ब्रह्म च तपश्च सप्तऋषय उप जीवन्ति ब्रह्मवर्चस्युपजीवनीयो भवति य एवं वेद।।१६।।

अ. ८.१०(५).१–१६

सोदक्रामत् सा देवानागच्छत् तां देवा उपाह्वयन्तोर्ज एहीति ।।१।।
तस्या इन्द्रो वत्स आसीच्चमसः पात्रम् ।।2।।
तां देवः सविताधोक् तामूर्जामेवाधोक् ।।३।।
तमूर्जां देवा उप जीवन्त्युपजीवनीयो भवति य एवं वेद ।।४।।
सोदक्रामत् सा गन्धर्वाप्सरस आगच्छत् तां गन्धर्वाप्सरस उपाह्वयन्त पुण्यगन्ध एहीति ।।५।।
तस्याश्चित्ररथः सौर्यवर्चसो वत्स आसीत् पुष्करपर्णं पात्रम् ।।६।।
तां वसुरुचिः सौर्यवर्चसोऽधोक् तां पुण्यमेव गन्धमधोक् ।।७।।
तं पुण्यं गन्धं गन्धर्वाप्सरस उप जीवन्ति पुण्यगन्धिरुपजीवनीयो भवति य एवं वेद ।।८।।
सोदक्रामत् सेतरजनानागच्छत् तामितरजना उपाह्वयन्त तिरोध एहीति ।।९।।
तस्याः कुबेरो वैश्रवणो वत्स आसीदामपात्रं पात्रम् ।।१०।।
तां रजतनाभिः कारबेरकोऽधोक् तां तिरोधामेवाधोक् ।।११।।
तां तिरोधमितरजना उप जीवन्ति तिरो धत्ते सर्वं पाप्मानमुपजीवनीयो भवति य एवं वेद ।।12।।
सोदक्रमात् सा सर्पानागच्छत् तां सर्पा उपाह्वयन्त विषवत्येहीति ।।१३।।
तस्यास्तक्षको वैशालेयो वत्स आसीदलाबुपात्रं पात्रम् ।।१४।।
तां धृतराष्ट्रएरावतोधोक् तां विषमेवाधोक् ।।१५।।
तद् विषं सर्पा उप जीवन्त्युपजीवनीयो भवति य एवं वेद ।।१६।।

अ. ८.१०(६).१–४

तद् यस्मा एव विदुषेऽलाबुनाभिषिंचेत् प्रतयाहन्यात् ।।१।।
न च प्रत्याहन्यान्मनसा त्वा प्रत्याहन्मीति प्रत्याहन्यात् ।।2।।
यत् प्रतयाहन्ति विषमेव तत् प्रत्याहन्ति ।।३।।
विषमेवास्याप्रियं भ्रातृव्यमनुविषिच्यते य एवं वेद ।।४।।

७५५. विवस्वान्

१. जाटिकायनः – अ. ६.११६.१–३

यद् यामं चक्रुर्निखनन्तो अग्रे कार्षीवणा अन्नविदो न विद्यया ।
वैवस्वते राजनि तज्जुहोम्यथ यज्ञियं मधुमदस्तु नोऽन्नम् ।।१।।
वैवस्वतः कृणवद् भागधेयं मधुभागो मधुना सं सृजाति ।
मातुर्यदेन इषितं न आगन् यद् वा पितापराद्धो जिहीडे ।।2।।
यदीदं मातुर्यदि वा पितुर्नः परि भ्रातुः पुत्राच्चेतस एन आगन् ।
यावन्तो अस्मान् पितरः सचन्ते तेषां सर्वेषां शिवो अस्तु मन्युः ।।३।।

७५६. विवाहः

१. सावित्री सूर्या – अ. १४.१.६–22

चित्तिरा उपबर्हणं चक्षुरा अभ्यंजनम् ।
द्यौर्भूमिः कोश आसीद् यदयात् सूर्या पतिम् ।।६।।
रैभ्यासीदनुदेयी नाराशंसी न्योचना ।
सूर्याया भद्रमिद् वासो गाथयैति परिष्कृता ।।७।।
स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः ।
सूर्याया अश्विना वराग्निरासीत् पुरोगवः ।।८।।
सोमो वधूयुरभवदश्विनास्तामुभा वरा ।
सूर्यां यत् पत्ये शंसन्तीं मनसा सवितादात् ।।९।।
मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः ।
शुक्रावनड्वाहावास्तां यदयात् सूर्या पतिम् ।।१०।।
ऋक्सामाभ्यामभिहितौ गावौ ते सामनावैताम् ।
श्रोत्रे ते चक्रे आस्तां दिवि पन्थाश्चराचरः ।।११।।
शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।
अनो मनस्मयं सूर्यारोहात् प्रयती पतिम् ।।१2।।
सूर्याया वहतुः प्रागात् सविता यमवासृजत् ।
मधासु हन्यन्ते गावः फलगुनीषु व्युह्यते ।।१३।।
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
क्वैकं चक्रं वामासीत् क्वदेष्ट्राय तस्थथुः ।।१४।।
यदयातं शुभस्पती वरेयं सूर्यामुप ।
विश्वे देवा अनु तद्वामजानन् पुत्रः पितरमवृणीत पूषा ।।१५।।
द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।
अथैकं चक्रं यत् गुहा तदद्धातय इद् विदुः ।।१६।।
अर्यमणं यजामहे सुबन्धुं पतिवेदनम् ।
उर्वारुकमिव बन्धनात् प्रेतौ मुंचामि नामुतः ।।१७।।
प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करम् ।
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ।।१८।।
प्र त्वा मुंचामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवाः ।
ऋतस्य योनौ सुकृतस्य लोके स्योनं ते अस्तु सहसंभलायै ।।१९।।
भगस्त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथासो वशिना त्वं विदथमा वदासि ।।2०।।
इह प्रियं प्रजायै ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ सं स्पृशस्वाथ जिर्विर्विदथमा वदासि ।।2१।।
इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वस्तकौ ।।22।।

७५७. विवाहमन्त्राः आशीः प्रायाः

१. सूर्या सावित्री – ऋ. १०.८५.2०–2८

सुकिशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ।।2०।।
उदीर्ष्वातः पतिवती ह्ये३ षा विश्वावसुं नमसा गीर्भिरीळे ।
अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ।।2१।।
उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा ।
अन्यामिच्छ प्रफर्व्यं१ सं जायां पत्या सृज ।।22।।
अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।

समर्यमा सं भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः ।।2३।।
प्र त्वा मुंचामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टा त्वा सह पत्या दधामि ।।2४।।
प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करम् ।
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ।।2५।।
पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ।।2६।।
इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथमा वदाथः ।।2७।।
नीललोहितं भवति कृत्यासक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ।।2८।।

७५८. विवाह मन्त्राशिषः

१. सावित्री सूर्या – अ. १४.१.2६; 2८–६४

अ. १४.१.2६

नीललोहितं भवति कृत्यासक्तिर्व्यज्यते। एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ।।2६।।

अ. १४.१.2८–६४

आशसनं विशसनमथो अधिविकर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शुम्भति ।।2८।।
तृष्टमेतत् कटुकमपाष्ठवद् विषवन्नैतदत्तवे ।
सूर्यां यो ब्रह्मा वेद स इद् वाधूयमर्हति ।।2६।।
स इत् तत् स्योनं हरति ब्रह्मा वासः सुमंगलम् ।
प्रायश्चित्तिं यो अध्येति येन जाया न रिष्यति ।।३०।।
युवं भगं सं भरतं समृद्धमृतं वदन्तावृतोद्येषु ।
ब्रह्मणस्पते पतिमस्यै रोचय चारु संभलो वदतु वाचमेताम् ।।३१।।
इहेदसाथ न परो गमाथेमं गावः प्रजया वर्धयाथ ।
शुभं यतीरुस्रियाः सोमवर्चसो विश्वे देवाः क्रन्निह वो मनांसि ।।३2।।
इमं गावः प्रजया सं विशाथायं देवानां न मिनाति भागम् ।
अस्मै वः पूषा मरुतश्च सर्वे अस्मै वो धाता सविता सुवाति ।।३३।।
अनृक्षरा ऋजवः सन्तु पन्थानो येभिः सखायो यन्ति नो वरेयम् ।
सं भगेन समर्यम्णा सं धाता सृजतु वर्चसा ।।३४।।
यच्च वर्चो अक्षेषु सुरायां च यदाहितम् ।
यद् गोष्वश्विना वर्चस्तेनेमां वर्चसावतम् ।।३५।।
येन महानघ्न्या जघन्मश्विना येन वा सुरा ।
येनाक्षा अभ्यषिच्यन्त तेनेमां वर्चसावतम् ।।३६।।
यो अनिध्मो दीदयदप्स्वऽन्तर्यं विप्रास ईडते अध्वरेषु ।
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्यावान् ।।३७।।
इदमहं रुशन्तं ग्राभं तनूदूषिमपोहामि ।
यो भद्रो रोचनस्तमुदचामि ।।३८।।
आस्यै ब्राह्मणाः स्नपनी र्हरन्त्ववीरघ्नीरुदजन्त्वापः ।
अर्यम्णो अग्निं पर्येतु पूषन् प्रतीक्षन्ते श्वशुरो देवरश्च ।।३६।।
शं ते हिरण्यं शमु सन्त्वापः शं मेथिर्भवतु शं युगस्य तर्द्म ।
शं त आपः शतपवित्रा भवन्तु शमु पत्या तन्वं१ सं स्पृशस्व ।।४०।।
खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।
अपालामिन्द्र त्रिष्पूत्वाकृणोः सूर्यत्वचम् ।।४१।।

आशासाना सौमनसं प्रजां सौभाग्यं रयिम् ।
पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम् ।।४2।।
यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा ।
एवा त्वं सम्राज्ञयेधि पत्युरस्तं परेत्य ।।४३।।
सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु ।
ननान्दुः सम्राज्ञ्येधि सम्राज्ञ्युत श्वश्रवाः ।।४४।।
आ अकृन्तन्नवयन् याश्च तत्निरे या देवीरन्ताँ अभितोऽददन्त ।
तास्त्वा जरसे सं व्ययन्त्वायुष्मतीदं परि धत्स्व वासः ।।४५।।
जीवं रुदन्ति वि नयन्त्यध्वरं दीर्घामनु प्रसितिं दीध्युर्नरः ।
वामं पितृभ्यो य इदं समीरिरे मयः पतिभ्यो जनये परिष्वजे ।।४६।।
स्योनं ध्रुवं प्रजायै धारयामि तेऽश्मानं देव्याः पृथिव्या उपस्थे ।
तमा तिष्ठानुमाद्या सुवर्चा दीर्घं त आयुः सविता कृणोतु ।।४७।।
येनाग्निरस्या भूम्या हस्तं जग्राह दक्षिणम् ।
तेन गृह्णामि ते हस्तं मा व्यथिष्ठा मया सह प्रजया च धनेन च ।।४८।।
देवस्ते सविता हस्तं गृह्णातु सोमो राजा सुप्रजसं कृणोतु ।
अग्निः सुभगां जातवेदाः पत्ये पत्नीं जरदष्टिं कृणोतु ।।४६।।
गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ।।५०।।
भगस्ते हस्तमग्रहीत् सविता हस्तमग्रहीत् ।
पत्नी त्वमसि धर्मणाहं गृहपतिस्तव ।।५१।।
ममेयमस्तु पोष्या मह्यं त्वादाद् बृहस्पतिः ।
मया पत्या प्रजावति सं जीव शरदः शतम् ।।५2।।
त्वष्टा वासो व्यदधाच्छुभे कं बृहस्पतेः प्रशिषा कवीनाम् ।
तेनेमां नारी सविता भगश्च सूर्यामिव परि धत्तां प्रजया ।।५३।।
इन्द्राग्नी द्यावापृथिवी मातरिश्वा मित्रावरुणा भगो अश्विनोभा ।
बृहस्पतिर्मरुतो ब्रह्म सोम इमां नारीं प्रजया वर्धयन्तु ।।५४।।
बृहस्पतिः प्रथमः सूर्यायाः शीर्षे केशाँ अकल्पयत् ।
तेनेमामश्विना नारीं पत्ये सं शोभयामसि ।।५५।।
इदं तद्रूपं यदवस्त योषा जायां जिज्ञासे मनसा चरन्ताम् ।
तामन्वर्तिष्ये सखिभिर्नवग्वैः क इमान् विद्वान् वि चचर्त पाशान् ।।५६।।
अहं वि ष्यामि मयि रूपमस्या वेददित् पश्यन् मनसः कुलायम् ।
न स्तेयमद्मि मनसोदमुच्ये स्वयं श्रथ्नानो वरुणस्य पाशान् ।।५७।।
प्र त्वा मुंचामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवाः ।
उरुं लोकं सुगमत्र पन्थां कृणोमि तुभ्यं सहपत्न्यै वधु ।।५८।।
उद्यच्छध्वमप रक्षो हनाथेमां नारीं सुकृते दधात ।
धाता विपश्चित् पतिमस्यै विवेद भगो राजा पुर एतु प्रजानन् ।।५६।।
भगस्ततक्ष चतुरः पादान् भगस्ततक्ष चत्वार्युष्पलानि ।
त्वष्टा पिपेश मध्यतोऽनु वर्ध्रान्तसा नो अस्तु सुमंगली ।।६०।।
सुकिंशुकं वहतुं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पतिभ्यो वहतुं कृणु त्वम् ।।६१।।
अभ्रातृघ्नीं वरुणापशुघ्नीं बृहस्पते ।
इन्द्रापतिघ्नीं पुत्रिणीमास्मभ्यं सवितर्वह ।।६2।।
मा हिसिष्टं कुमार्यं१ स्थूणे देवकृते पथि ।
शालाया देव्या द्वारं स्योनं कृण्मो वधूपथम् ।।६३।।

ब्रह्मापरं युज्यतां ब्रह्म पूर्वं ब्रह्न्ततो मध्यतो ब्रह्म सर्वतः ।
अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके वि राज ।।६४।।

७५६. विश्वकर्मा

१. अंगिराः – अ. 2.३५.१–५

ये भक्षयन्तो न वसून्यानृधुर्यानग्नयो अन्वतप्यन्त धिष्ण्याः ।
या तेषामवया दुरिष्टिः सिवष्टिं नस्तां कृणवद् विश्वकमा ।।१।।
यज्ञपतिमृषय एनसाहुर्निर्भक्तं प्रजा अनुतप्यमानम् ।
मथव्यान्त्स्तोकानप यान् रराध सं नष्टेभिः सृजतु विश्वकर्मा ।।2।।
अदान्यान्त्सोमपान मन्यमानो यज्ञस्य विद्वान्त्समये न धीरः ।
यदेनश्चकृवान् बद्ध एष तं विश्वकर्मन् प्र मुंचा स्वस्तये ।।३।।
घोरा ऋषयो नमो अस्त्वेभ्यश्चक्षुर्यदेषां मनसश्च सत्यम् ।
बृहस्पतये महिष द्युमन्नमो विश्वकर्मन् नमस्ते पाह्य१स्मान् ।।४।।
यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रोण मनसा जुहोमि ।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः ।।५।।

2. देवाः – य. १८.४३

प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यऽऋक्सामान्यप्सरसऽएष्टयो नाम ।
स नऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ।।४३।।

३. भुवनपुत्रो विश्वकर्मा – य. १७.१७–३2

यऽइमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
स ं आशिषा द्रविणामिच्छमानः प्रथमच्छदवराँ2ऽ आविवेश ।।१७।।
किं स्विदासीदधिष्ठानमारम्भणं कतमत् स्वित्कथासीत् ।
यतो भूमि जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ।।१८।।
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देवऽएकः ।।१६।।
किं स्विद्वनं कऽउ स वृक्षऽआस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ।।20।।
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ।।2१।।
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवा सूरिरस्तु ।।22।।
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजेऽअद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ।।2३।।
विश्वकर्मन् हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ।।2४।।
चक्षुषः पिता मनसा हि धीरो घृतमेनेऽअजनन्नम्नमाने ।
यदेदन्ताऽअददृहन्त पूर्वऽआदिद् द्यावापृथिवीऽअप्रथेताम् ।।2५।।
विश्वकर्म्मा विमनाऽआद्विहाया धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् परऽएकमाहुः ।।2६।।
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधाऽएकऽएत तं सम्प्रश्नं भुवना यन्त्यन्या ।।2७।।
तऽआयजन्त द्रविणं समस्माऽऋषयः पूर्वे जरितारो न भूना ।
असूर्त्ते सूर्त्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ।।2८।।
परो दिवा परऽएना पृथिव्या परो देवेभिरसुरैर्य्यदस्ति ।

कं स्विद् गर्भं प्रथमं दध्रऽआपो यत्र देवाः समपश्यन्त पूर्वे ।।२६।।
तमिद् गर्भं प्रथमं दध्रऽआपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यास्मिन्विश्वानि भुवनानि तस्थुः ।।३०।।
न तं विदाथ यऽइमा जजानान्यद्युष्मा कमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृपऽउक्थशासश्चरन्ति ।।३१।।
विश्वकर्मा ह्यजनिष्ट देवऽआदिद् गन्धर्वोऽअभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा ।।३२।।

४. **भृगुः – अ. ६.१22.१–५**

एतं भागं परि ददामि विद्वान् विश्वकर्मन् प्रथमजा ऋतस्य ।
अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनु सं तरेम ।।१।।
ततं तन्तुमन्वेके तरन्ति येषां दत्तं पित्र्यमायनेन ।
अबन्ध्वेके ददतः प्रयच्छन्तो दातुं चेच्छिक्षान्तस स्वर्ग एव ।।2।।
अन्वारेभथामनुसंरभेथामेतं लोकं श्रद्दधानाः सचन्ते ।
यद् वां पक्वं परिविष्टमग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम् ।।३।।
यज्ञं यन्तं मनसा बृहन्तमन्वारोहामि तपसा सयोनिः ।
उपहूता अग्ने जरसः परस्तात् तृतीये नाके सधमादं मदेम ।।४।।
शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदमभिषिंचामि वोऽहमिन्द्रो मरुत्वान्त्स ददातु तन्मे ।।५।।

५. **वसिष्ठः – य. १७.७८**

चित्तिं जुहोमि मनसा घृतेन यथा देवाऽइहागमन्वीतिहोत्राऽऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहा दाभ्यं हविः ।।७८।।

६. **विश्वकर्मा भौवनः – ऋ. १०.८१.१–७; १०.८2.१–७; सा. १५८६; य. १७.१७–३2**

ऋ. १०.८१.१–७

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश ।।१।।
किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
यतो भूमि जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ।।2।।
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ।।३।।
किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ।।४।।
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ।।५।।
विश्वकर्मन हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ।।६।।
वाचस्पति विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ।।७।।

ऋ. १०.८2.१–७

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नमन्माने ।
यदेदन्ता अददृहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम् ।।१।।
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन्पर एकमाहुः ।।2।।
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।

यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या ।।३।।
त आयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ।।४।।
परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे ।।५।।
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ।।६।।
न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रवृता जल्प्या चासुतृप उक्थशासश्चरन्ति ।।७।।

सा. १५८६

विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वां३ स्वा हि ते ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ।।१।।

य. १७.१७–३2

यऽइमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
स ॑ आशिषा द्रविणामिच्छमानः प्रथमच्छदवराँ2ऽ आविवेश ।।१७।।
किं स्विदासीदधिष्ठानमारम्भणं कतमत् स्वित्कथासीत् ।
यतो भूमि जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ।।१८।।
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देवऽएकः ।।१६।।
किं स्विद्वनं कऽउ स वृक्षऽआस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ।।2०।।
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ।।2१।।
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवा सूरिरस्तु ।।22।।
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजेऽअद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ।।2३।।
विश्वकर्मन् हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ।।2४।।
चक्षुषः पिता मनसा हि धीरो घृतमेनेऽअजनन्नम्नमाने ।
यदेदन्ताऽअददृहन्त पूर्वऽआदिद् द्यावापृथिवीऽअप्रथेताम् ।।2५।।
विश्वकर्म्मा विमनाऽआद्विहाया धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् परऽएकमाहुः ।।2६।।
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधाऽएकऽएत तं सम्प्रश्नं भुवना यन्त्यन्या ।।2७।।
तऽआयजन्त द्रविणं समस्माऽऋषयः पूर्वे जरितारो न भूना ।
असूर्त्ते सूर्त्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ।।2८।।
परो दिवा परऽएना पृथिव्या परो देवेभिरसुरैर्य्यदस्ति ।
कं स्विद् गर्भं प्रथमं दध्रऽआपो यत्र देवाः समपश्यन्त पूर्वे ।।2६।।
तमिद् गर्भं प्रथमं दध्रऽआपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यास्मिन्विश्वानि भुवनानि तस्थुः ।।३०।।
न तं विदाथ यऽइमा जजानान्यद्युष्मा कमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृपऽउक्थशासश्चरन्ति ।।३१।।
विश्वकर्मा ह्यजनिष्ट देवऽआदिद् गन्धर्वोऽअभवद् द्वितीयः ।

तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा ।।३2।।

७६०. विश्वकर्मा अग्निर् वा

१. देवश्रव–देववातौ – य. १८.६2

येन वहसि सहस्रं येनाग्ने सर्ववेदसम्। तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ।।६2।।

७६१. विश्वकर्मेन्द्रः

१. शाषःशासः – य. ८.४६; ४७

विश्वकर्म्मन् हविषा वर्द्धनेन त्रातार मिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत्। उपयामगृहीतोऽसीन्द्राय त्वा
विश्वकर्म्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्म्मणे ।।४६।।
उपयामगृहीतोऽस्यग्नये त्वा गायत्रच्छन्दसं गृह्णामीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि
विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णाम्युनुष्टुप्तेऽभिगरः ।।४७।।

७६2. विश्वजित्

१. शन्तातिः – अ. ६.१०७.१–४

विश्वजित् त्रायमाणायै मा परि देहि ।
त्रायमाणे द्विपांच सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ।।१।।
त्रायमाणे विश्वजिते मा परि देहि ।
विश्वजिद् द्विपाच्च सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ।।2।।
विश्वजित् कल्याण्यै मा परि देहि ।
कल्याणि द्विपांच सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ।।३।।
कल्याणि सर्वविदे मा परि देहि ।
सर्वविद् द्विपाच्च सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ।।४।।

७६३. विश्वम्भरः

१. ब्रह्म – अ. 2.१६.५

विश्वम्भर विश्वेन मा भरसा पाहि स्वाहा ।।५।।

७६४. विश्वानि भुवनानि

१. वसिष्ठः – अ. ३.2०.८

वाजस्य नु प्रसवे सं बभूविमेमा च विश्वा भुवनान्यन्तः ।
उतादित्सन्तं दापयतु प्रजानन् रयिं च नः र्सवीरं नि यच्छ ।।८।।

७६५. विश्वामित्रोपाध्यायः

१. विश्वामित्रो गाथिनः – ऋ. ३.2६.६

शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्तवानाम् ।
मेळिं मदन्तं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम् ।।६।।

७६६. विश्वावसुः

१. विश्वावसुर् देवगन्धर्वः – ऋ. १०.१३६.४–६

विश्वावसुं सोम गन्धर्वमापो ददृशुषीस्तदृतेना व्यायन् ।
तदन्ववैदिन्द्रो रारहाण आसां परि सूर्यस्य परिधींरपश्यत् ।।४।।
विश्वावसुरभि तन्नो गृणातु दिव्यो गन्धर्वो रजसो विमानः ।
यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ।।५।।
सस्निमविन्दच्चरणे नदीनामपावृणोद्दुरो अश्मव्रजानाम् ।
प्रासां गन्धर्वो अमृतानि वोचदिन्द्रो दक्षं परि जानादहीनाम् ।।६।।

७६७. विश्वेदेवा

१. ऋजिष्वा – ऋ. ६.४६.१–१५; ६.५०.१–१५; ६.५१.१.–१६; ६.५२.१–१७

ऋ. ६.४६.१–१५

स्तुषे जनं सुव्रतं नव्यसमीभिर्गीभिर्मित्रावरुणा सुम्नयन्ता ।
त आ गमन्तु त इह श्रुवन्तु सक्षत्रासो वरुणो मित्रे अग्निः ।।१।।
विशैविश ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः ।
दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै ।।2।।
अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या ।
मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने ।।३।।
प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयजयो ।।४।।
स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान्मनसा युजानः ।
येन नरा नासत्येषयध्यै वार्तिर्याथस्तनयाय त्मने च ।।५।।
पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ।
सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थतर्जगदा कृणुध्वम् ।।६।।
पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् ।।७।।
पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम् ।
स नो रासच्छुरुधन्द्राग्रा धियंधियं सीषधाति प्र पूषा ।।८।।
प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभवम् ।
होता यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सृहवं विभावा ।।९।।
भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ।
बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ।।१०।।
आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम् ।
अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अंगिरस्वत् ।।११।।
प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम् ।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः ।।१2।।
यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधिताय ।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३ तना च ।।१३।।
तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता चनो धात् ।
तदोषधीभिरभि रातिषाचो भगः पुरन्धिर्जिन्वतु प्र राये ।।१४।।
नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम् ।
क्षयं दाताजरं येन जनान्त्स्पृधो
अदेवीरभि च क्रमाम विश आदेवीरभ्य१ श्नवाम ।।१५।।

ऋ. ६.५०.१–१५

हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निम् ।
अभिक्षदामर्यमणं सुशेवं त्रातृन्देवान्त्सवितारं भगं च ।।१।।
सुजयोतिषः सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि देवान् ।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ।।2।।
उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने ।
महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः ।।३।।
आ नो रुद्रस्य सूनवो नमन्तामद्याा हूतासो वसवोऽधृष्टाः ।
यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ।।४।।
मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूष अभर्धयज्वा ।

श्रुतवा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ।।५।।
अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन ।
श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः ।।६।।
ओमनमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ।।७।।
आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ।।८।।
उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
स्यामहं ते सदमिद्रातौ तव स्यामग्नेऽवसा सुवीरः ।।६।।
उत त्या से हवमा जग्म्यातं नासत्या धीभिर्युवमंग विप्रा ।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके ।।१०।।
ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ।
दशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ।।११।।
ते नो रुद्रः सरस्वती सजोषा भीळहुष्मन्तो विष्णुर्मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः ।।12।।
उत स्य देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः ।
त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः ।।१३।।
उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु ।।१४।।
एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः ।
ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ।।१५।।

ऋ. ६.५१.१–६

उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रिय वरुणयोरदब्धम् ।
ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् ।।१।।
वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः ।
ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान् ।।2।।
स्तुष उ वो मह ऋतस्य गोपानदितिं मित्रं वरुणं सुजातान् ।
अर्यमणं भगमदब्धधीतीनच्छा वोचे सधन्यः पावकान् ।।३।।
रिशादसः सत्पतीँरदब्धान्महो राज्ञः सुवसनस्य दातॄन् ।
यूनः सुक्षत्रान्क्षयतो दिवो न्टृनादित्यान्याम्यदिति दुवोयु ।।४।।
द्यौ३ष्पितः पृथिवी मातरध्रुगग्ने भ्रातर्वसवो मृळता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ।।५।।
मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव ।।६।।
मा व एनो अन्यकृतं भुजेम मा तत्कर्म वसवो यच्चयध्वे ।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रिरिषीष्ट ।।७।।
नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम् ।
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ।।८।।
ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान् ।
ताँ आ नमोभिरुरुचक्षसो नॄन्विश्वान्व आ नमे महो यजत्राः ।।६।।
ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वनि दुरिता नयन्ति ।
सुक्षत्रासो वरुणे मित्रो अग्निऋतधीतयो वक्मराजसत्याः ।।१०।।
ते न इन्द्रः पृथिवी क्षम वर्धन् पूषा भगो अदितिः पंच जनाः ।
सुशम्र्नणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ।।११।।
नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।

आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववन्द ।।१2।।
अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् ।
दविष्ठमस्य सत्पते कृधी सुगम् ।।१३।।
ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः ।
जही न्य१ त्रिणं पणिं वृको हि षः ।।१४।।
यूयं हि ष्ठा सुदानव इन्द्रजयेष्ठज्ञ अभिद्यवः ।
कर्ता नो अध्वन्ना सुगं गोपा अमा ।।१५।।
अपि पन्थामगन्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ।।१६।।

ऋ. ६.५2.१–१७

नतद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः ।
उब्जन्तु तं सुभव१ः पर्वतासो नि हीयतामतियाजस्य यष्टा ।।१।।
अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः ।।2।।
किमंग त्वा ब्रह्मणः सोम गोपां किमंग त्वाहुरभिषस्तिपां नः ।
मिकंग नः पश्यसि निद्यमानान् ब्रह्मद्विषे तपुषिं हेतिमस्य ।।३।।
अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः ।
अवन्तु मा पर्वतासो ध्रुवासोऽवन्तु मा पितरो देवहूतौ ।।४।।
विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम् ।
तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः ।।५।।
इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना ।
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ।।६।।
विश्वे देवास आ गत शृणुता म इमं हवम्। एदं बर्हिर्नि षीदत ।।७।।
यो वो देवा घृतस्नुना हव्येन प्रति भूषति। तं विश्व उप गच्छथ ।।८।।
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृळीका भवन्तु नः ।।९।।
विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः। जुषन्तां युज्यं पयः ।।१०।।
स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान् मित्रो अर्यमा। इमा हव्या जुषन्त नः ।।११।।
इमं नो अग्ने अध्वरं होतर्वयुनशो यज। चिकित्वान्दैव्यं जनम् ।।१2।।
विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ।।१३।।
विश्वे देवा मम शृण्वन्तु यज्ञिया उभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ।।१४।।
ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा परिवस्यन्तु देवाः ।।१५।।
अग्नीपर्जन्याववतं धियं मेऽस्मिन्हवे सुहवा सुष्टुतिं नः ।
इळामन्यो जनयद् गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे ।।१६।।
स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।
अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम् ।।१७।।

2. भृगुः– अ. ६.१2३.१–५

एतं सधस्थाः परि वो ददामि यं शेवधिमावहाज्जातवेदाः ।
अन्वागन्ता यजमानः स्वस्ति तं स्म जानीत परमे व्योमन् ।।१।।
जानीत स्मैनं परमे व्योमन् देवाः सधस्था विद लोकमत्र ।
अन्वागन्ता यजमानः स्वस्तीष्टापूर्तं स्म कृणुताविरस्मै ।।2।।

देवाः पितरः पितरो देवाः। यो अस्मि सो अस्मि ।।३।।
स पचामि स ददामि स यजे स दत्तान्मा यूषम् ।।४।।
नाके राजन् प्रति तिष्ठ तत्रैतत् प्रति तिष्ठतु ।
विद्धि पूर्तस्य नो राजन्त्स देव सुमना भव ।।५।।

३. प्रतिप्रभ आत्रेयः – ऋ. ५.४६.१–५

देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः ।
आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन् ।।१।।
प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सवितारं दुवस्य ।
उप ब्रुवीत नमसा विजानंज्येष्ठं च रत्नं विभजन्तमायोः ।।2।।
अदत्रया दयते वार्य्याणि पूषा भगो अदितिर्वस्त उस्रः ।
इन्द्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयन्त दस्माः ।।३।।
तन्नो अनर्वा सविता वरूथं तत्सिन्धव इषयन्तो अनु ग्मन् ।
उप यद्वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः ।।४।।
प्र ये वसुभ्य ईवदा नमो दुर्य्ये मित्रे वरुणे सूक्तवाचः ।
अवैत्वभ्वं कृणुता वरीयां दिवस्पृथिव्योरवसा मदेम ।।५।।

७६८. विश्वेदेवा अंगिरसो वा

१. नाभानेदिष्ठो मानवः – ऋ. १०.६2.१–६

ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश ।
तेभ्यो भद्रमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ।।१।।
य उदाजन्पितरो गोमयं वस्वृतेनाभिन्दन्परिवत्सरे वलम् ।
दीर्घयुत्वमंगिरसो वो अस्तु प्रति गृभणीत मानवं सुमेधसः ।।2।।
य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन्पृथिवीं मातरं वि ।
सप्रजास्त्वमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ।।३।।
अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन ।
सुब्रह्मण्यमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ।।४।।
विरूपास इदृषयस्त इद्गम्भीरवेपसः ।
ते अंगिरसः सूनवस्ते अग्नेः परि जज्ञिरे ।।५।।
ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि ।
नवग्वो नु दशग्वो अंगिरस्तमः सचा देवेषु मंहते ।।६।।

७६९. विश्वेदेवा ऋत्विक् स्तुतिर् वाः

१. बुधः – अ. 20.१३७.2

कपृन्नरः कपृथमुद् दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ।।2।।

७७०. विश्वेदेवा ऋत्विजो वा

१. मेध्यः काण्वः – ऋ. ८.५८.१

यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति ।
यो अनूचानो ब्राह्मणो युक्त आसीत्का स्वित्तत्र यजमानस्य संवित् ।।१।।

2. बुधः सौम्यः – ऋ. १०.१०१.१–१2

उद्बुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः ।
दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः ।।१।।
मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।

इष्कृणुध्वमायुधारं कुणुध्वं प्रांचं यज्ञं प्र णयता सखायः ।।2।।
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ।।३।।
सीरा युंजन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ।।४।।
निराहावान्कृणोतन सं वरत्रा दधातन ।
सिंचामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम् ।।५।।
इष्कृताहावभवतं सुवरत्रं सुषेचनम्। उद्रिणं सिंचे अक्षितम् ।।६।।
प्रीणीताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृ ध्वम् ।
द्राणाहावमवतमश्मचक्रमंसत्रकोशं सिंचता नृपाणम् ।।७।।
व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि ।
पुरः कुणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ।।८।।
आ वो धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियामिह ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा मयसा मही गौः ।।६।।
आ तू षिंच हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।
परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वह्निं युनक्त ।।१०।।
उभे घुरौ वह्निरापिब्दमानोऽन्तर्योनेव चरति द्विजानिः ।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ।।११।।
कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ।।१2।।

७७१. विश्वेदेवाः

१. अगस्त्यो मैत्रावरुणिः – ऋ.१.१८६.१–११

आ न इळभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ।।१।।
आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।
भुवन्यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शवः ।।2।।
प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः ।
असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ।।३।।
उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः ।
समाने अहन्विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ।।४।।
उत नोऽहिर्बुध्न्यो३ मयस्कः शिशुं नपिप्पयुषीवं वेति सिन्धुः ।
येन नपातमपां जुनाम मनोजुवो वृषणो यं वहन्ति ।।५।।
उत न ईं त्वष्टा गन्त्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः ।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां न इह गम्याः ।।६।।
उत न ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति ।
तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ।।७।।
उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु ।
पृषदश्वासोऽवनयो न रथा रिशादसो मित्रायुजो न देवाः ।।८।।
प्र नु यदेषां महिना चिकित्रे प्र युंजते प्रयुजस्ते सुवृक्ति ।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः ।।६।।
प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।
अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ।।१०।।
इयं स वो अस्मे दीधिंतिर्यजत्रा अपिप्राणी च सदनी च भूयाः ।

नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीरदानुम् ।।११।।

2. अग्निः – य. २७.१२

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः। पथो अनक्तु मध्वा घृतेन।।१२।।

३. अग्निस् तापसः – ऋ. १०.१४१.१–६; सा. ६१; १५०३–१५०५

ऋ. १०.१४१.१–६

अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव। प्र नो यच्छ विशस्पते धनदा असि नस्त्वम् ।।१।।
प्र नो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः। प्र देवाः प्रोत सूनृता रायो देवी ददातु नः ।।२।।
सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे। यथा नः सर्व इज्जनः संगत्यां सुमना असत् ।।३।।
इन्द्रवायू बृहस्पतिं सुहवेह हवामहे। यथा नः सर्व इज्जनः संगत्यां सुमना असत् ।।४।।
अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वातं विष्णु सरस्वतीं सवितारं च वाजिनम् ।।५।।
त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय। त्वं नो देवतातये रायो दानाय चोदय ।।६।।

सा. ६१

सोमं राजानं वरुणमग्निमन्वारभामहे। आदित्यं विष्णु सूर्यं ब्रह्मणं च बृहस्पतिम् ।।१।।

सा. १५०३–१५०५

अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत। ये देवत्रा य आयुषु तेभिर्नो महया गिरः ।।१।।
प्र स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः। तनये तोके अस्मदा सम्यङ्वाजैः परीवृतः ।।२।।
त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय। त्वं नो देवतातये रायो दानाय चोदय ।।३।।

४. अग्निः सौचीकः – ऋ. १०.५२.१–६

विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै न्नषिद्य ।
प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ।।१।।
अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनन्ति ।
अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वाम्।।२।।
अयं यो होता किरु स यमस्य कमप्यूहे यत्समंजन्ति देवाः ।
अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहम्।।३।।
मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरन्तम् ।
अग्निर्विद्वान्यज्ञं नः कल्पयाति पंचयामं त्रिवृतं सप्ततन्तुम्।।४।।
आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः कराणि ।
आ बाह्वोव्रज्रमिन्द्रस्य धेयामथेमा विश्वाः पृतना जयाति।।५।।
त्रीणि शता त्री सहस्राण्यग्निं त्रिशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ।।६।।

५. अंगिराः प्रचेता यमश्च – अ. ६.४७.२

विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः ।
आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानां सुमतौ स्याम ।।२।।

६. अत्रिर् भौमः – ऋ. ५.४१.१–२०; ५.४२.१–१८; ५.४३.१–१७

ऋ. ५.४१.१–२०

को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थिवस्य वा दे ।
ऋतस्य वा सदसि त्रसीथां नो यज्ञायते वा पशुषो न वाजान् ।।१।।
ते नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतो जुषन्त ।
नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ।।२।।
आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्नथ्यस्यपुष्टौ ।
उत वा दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ।।३।।
प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः ।
पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः ।।४।।

प्र वो रयिं युक्ताश्वं भरध्वं राय एषेऽवसे दधीत धीः ।
सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणाम् ।।५।।
प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः ।
इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः ।।६।।
उप व एषे वन्द्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः ।
उषासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञम् ।।७।।
अभि वो अर्चे पोष्यावतो नृन्वास्तोष्पतिं त्वष्टारं रराणः ।
धन्या सजोषा धिषणा नमोभिर्वनस्पतीँरोषधी राय एषे ।।८।।
तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः ।
पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ ।।९।।
वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नमातमपां सुवृक्ति ।
गृणीते अग्निरेतरी न शूषैः शोचिष्केशो न रिणाति वना ।।१०।।
कथा महे रुद्रियाय ब्रवाम् कद्राये चिकितुषे भगाय ।
आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः ।।११।।
शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ।
शृण्वन्त्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ।।12।।
विदा चिन्नु महान्तो ये व एवा ब्रवाम दस्मा वार्यं दधानाः ।
वयश्चन सुभ्व१ आव यन्ति क्षुभा मर्तमनुयतं वधस्नैः ।।१३।।
आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचम् ।
वर्धन्तां द्यावो गिरश्चन्द्राग्ना उदा वर्धन्तामभिषाता अर्णाः ।।१४।।
पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च ।
सिषक्तु माता मही रसा नः स्मत्सूरिभिर्ऋजुहस्त ऋजुवनिः ।।१५।।
कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ ।
मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ।।१६।।
इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो वनते मर्त्यो वः ।
अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निर्ऋतिर्जग्रसीत।।१७।।
तां वो देवाः सुमतिमूर्जयन्तीमिषमश्याम वसवः शसा गोः ।
सा नः सुदानुर्मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः।।१८।।
अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः।।१९।।
सिषक्तु न ऊर्जव्यस्य पुष्टेः ।।20।।

ऋ. ५.४2.१–१८

प्र शंतमा वरुणं दीधिति गीर्मित्रं भगमदितिं नूनमश्याः ।
पृषद्योनिः पंचहोता शृणोत्वतूर्तपन्था असुरो मयोभुः।।१।।
प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवम् ।
ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु ।।2।।
उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन ।
स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ।।३।।
समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यज्ञियानाम् ।।४।।
देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम् ।
ऋभुक्षा वाज उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः ।।५।।
मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि ।
न ते पूर्वे मघवन्नापरासो न वीर्यं१ नूतनः कश्चनाप ।।६।।

उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनाानाम् ।
यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागमज्जोहुवानम् ।।७।।
तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।
ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास्तेषु रायः ।।८।।
विसर्माणं कृणुहि वित्तमेषां ये भुंजते अपृणन्तो न उक्थैः ।
अपव्रतान्प्रसवे वावृधानान्ब्रह्मद्विषः सूर्याद्यावयस्व ।।६।।
य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात ।
यो वः शमीं शशमानस्य निन्दात्तुच्छ्यान्कामान्करते सिष्विदानः ।।१०।।
तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुदं नमोभिर्देवमसुरं दुवस्य ।।११।।
दमूनसो अपसो ये सुहस्ता वृष्णाः पत्नीर्नद्यो विभ्वतष्टाः ।
सरस्वती बृहद्दिवोत राका दशस्यन्तीर्वरिवस्यन्तु शुभ्राः ।।12।।
प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम् ।
य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः ।।१३।।
प्र सुष्टुतिः स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः ।
यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ।।१४।।
एषः स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः ।
कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः ।।१५।।
प्रैष स्तोमः पृथिवीमन्तरिक्षं वनस्पतीँरोषधी राये अश्याः ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ।।१६।।
उरौ देवा अनिबाधे स्याम ।।१७।।
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीति गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ।।१८।।

ऋ. ५.४३.१–१७

आ धेनवः पयसा तूर्ण्यर्था अमर्धन्तीरुप नो यन्तु मध्वा ।
महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति ।।१।।
आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम् ।।2।।
अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम् ।
होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय ।।३।।
दश क्षिपो युंजते बाहू अद्रिं सोमस्य या शमितारा सुहस्ता ।
मध्वो रसं सुगभस्तिर्गिरिष्ठां चनिश्चदद् दुदुहे शुक्रमंशुः ।।४।।
असावि ते जुजुषाणाय सोमः ऋत्वे दक्षाय बृहते मदाय ।
हरी रथे सुधुरा योगे अर्वागिन्द्रं प्रिया कृणुहि हूयमानः ।।५।।
आ नो महीमरमतिं सजोषा ग्नां देवी नमसा रातहव्याम् ।
मधोर्मदाय बृहतीमृतजामाग्ने वह पथिभिर्देवयानैः ।।६।।
अंजन्ति यं प्रथयन्तो न बिप्रा वपावन्तं नाग्निना तपन्तः ।
पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि ।।७।।
अच्छा मही बृहती शंतमा गीर्दूतो न गन्त्वश्विना हुवध्यै ।
मयोभुवा सरथा यातमर्वाग्गन्तं निधिं धुरमाणिर्न नाभिम् ।।८।।
प्र तवयसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि ।
या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन् ।।६।।
आ नामभिर्मरुतो वक्षि विश्वानां रूपेभिर्जातवेदोऋ हुवानः ।

यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती ।।१०।।
आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ।।११।।
आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम् ।
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ।।१2।।
आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गन्त्वोमभिर्हुवानः ।
ग्ना वसान ओषधीरमृध्रस्त्रिधातुशृङ्गो वृषभो वयोधाः ।।१३।।
मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन् ।
सुशेव्यं नमसा रातहव्याः शिशुं मृजन्त्यायवो न वासे ।।१४।।
बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचन्त ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ।।१५।।
उरौ देवा अनिबाधे स्याम ।।१६।।
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ।।१७।।

७. अथर्वा – अ. 2.१३.४–५; ५.८.३; ६.७.३

अ. 2.१३.४–५

एह्यश्मानमा तिष्ठाश्मा भवतु ते तनूः ।
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम् ।।४।।
यस्य ते वासः प्रथमवास्यं१ हरामस्तं त्वा विश्वेऽवन्तु देवाः ।
तं त्वा भ्रातरः सुवृधा वर्धमानमनु जायन्तां बहवः सुजातम् ।।५।।

अ. ५.८.३

यदसावमुतो देवा अदेवः संश्चिकीर्षति ।
मा तस्याग्निर्हव्यं वाक्षीद्धवं देवा अस्य मोप गुर्ममैव हवमेतन ।।३।।

अ. ६.७.३

येन देवा असुराणामोजांस्यवृणीध्वम्। तेना नः शर्म यच्छत ।।३।।

८. अथर्वा (आयुष्कामः) – अ. १.३०.१–४

विश्वे देवा वसवो रक्षतेममुतादित्या जागृत यूयमस्मिन् ।
मेमं सनाभिरुत वान्यनाभिर्मेमं प्रापत् पौरुषेयो वधो यः ।।१।।
ये वो देवाः पितरो ये च पुत्राः सचेतसो मे शृणुतेदमुक्तम् ।
सर्वेभ्यो वः परि ददाम्येतं स्वस्त्ये नं जरसे वहाथ ।।2।।
ये देवा दिवि ष्ठ ये पृथिव्यां ये अन्तरिक्ष ओषधीषु पशुष्वप्स्व१न्तः ।
ते कृणुत जरसमायुरस्मै शतमन्यान् परि वृणक्तु मृत्यून् ।।३।।
येषां प्रयाजा उत वानुयाजा हुतभागा अहुतादश्च देवाः ।
येषां वः पंच प्रदिशो विभक्तास्तान् वो अस्मै सत्रसदः कृणोमि ।।४।।

९. अंहोमुग् वामदेव्यः – सा. ४2६

न तमंहो न दुरितं देवासो अष्ट मर्त्यम्।सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः।।८।।

१०. अंहोमुग् वामदेव्यः (साग्री. सास्वा. सार्षेदी.) कुल्मल वर्हिषः शैलूषि अंहोमुग् वा वामदेव्यः (ऋसर्व.) – ऋ. १०.१2६.१–८

न तमंहो दुरितं देवासां अष्ट मर्त्यम् ।
सजोषसो यमर्यमा मित्रो नयन्ति वरुणो अति द्विषः ।।१।।

तद्धि वयं वृणीमहे वरुण मित्रार्यमन् ।
येना निरंहसो यूयं पाथ नेथा च मर्त्यमति द्विषः ।।2।।
ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा ।
नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षण्यति द्विषः ।।३।।
यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा ।
युयष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः ।।४।।
आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा ।
उग्र मरुद्ध रुद्रं हुवेमेन्द्रमग्नि स्वस्तयेऽति द्विषः ।।५।।
नेतार ऊ षु णस्तिरो वरुणो मित्रो अर्यमा ।
अति विश्वानि दुरिता राजान□र्षणीनामति द्विषः ।।६।।
शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा ।
शर्म यच्छन्तु सप्रथ आदित्यासो यदीमहे अति द्विषः ।।७।।
यथा ह त्यद्वसवो गौर्यं चित्पदि षितामसुंचता यजत्राः ।
एवो ष्व१ स्मन्मुंचता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ।।८।।

११. आत्रेयः (साग्री. सास्वा.); वामदेव (सार्षेदी.) – सा. ४५५

ऊर्जा मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र ।।६।।

१2. आदित्या देवाः – य. ३५.६

कल्पन्तां ते दिशम्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः ।
अन्तरिक्षं शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः ।।६।।

१३. आदित्या देवा वा – य. ३५.८

शं वातः शं हि ते घृणिः शं ते भवन्त्विष्टकाः ।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वामि शूशुचन् ।।८।।

१४. आप्त्यस्त्रितः अंगिरसः कुत्सो वा – ऋ. १.१०५.१–१६

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति वित्तं मे अस्य रोदसी ।।१।।
अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम् ।
तुंजाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ।।2।।
मो षु देवा अदः स्व१रव पादि दिवस्परि ।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ।।३।।
यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति ।
क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ।।४।।
अमी ये देवाः स्थन त्रिष्वा रोचने दिवः ।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ।।५।।
कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम् ।
कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ।।६।।
अहं सो अस्मिः पुरा सुते वदामि कानि चित् ।
तं मा व्यन्त्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ।।७।।
सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी।।८।।
अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता ।
त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ।।६।।
अमी ये पंचोक्षणो मध्ये तस्थुर्महो दिवः ।

देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी ।।१०।।
सुपर्णा एत आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी ।।११।।
नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।
ऋतमर्षन्ति सिन्धवः सत्यं ततान सूर्यो वित्तं मे अस्य रोदसी ।।१2।।
अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम् ।
स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्ते मे अस्य रोदसी ।।१३।।
सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी ।।१४।।
ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ।।१५।।
असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ।।१६।।
त्रितः कूपेऽवहितो देवान्हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ।।१७।।
अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ।।१८।।
एनांगूषेण वयमिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।१६।।

१५. अवत्सारः काश्यपः अन्ये च दृष्टिलिंगाः – ऋ. ५.४४.१–१५

तं प्रत्नथा पूर्वथा बिश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे ।।१।।
श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते ।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते ।।2।।
अत्यं हविः सचते सच्च धातु चरिष्टगातुः स होता सहोभरिः ।
प्रसस्राणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः ।।३।।
प्र व एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः ।
सुयन्तुभिः सर्वशासैरभीषुभिः क्रिविर्नामानि प्रवणे मुषायति ।।४।।
संजर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः ।
धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ।।५।।
यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा ।
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः ।।६।।
वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः ।
घ्रंसं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः ।।७।।
ज्यायांसमस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते ।
यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ।।८।।
समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता ।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबन्धनी ।।६।।
स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः ।
अवत्साररस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम् ।।१०।।
श्येन आसामदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः ।
समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते ।।११।।
सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तर्यो वः सचा ।

उभा स वरा प्रतयेति भाति च यदी गणं भजते सुप्रयावभिः ।।12।।
सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदंचनः ।
भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रवाणो अध्येति न स्वपन् ।।१३।।
यो जागार् तमृचः कामयन्ते यो जागार तमु सामनि यन्ति ।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ।।१४।।
अग्निर्जागार तमृचः कामयन्तेऽतिग्नर्जागार तमु सामानि यन्ति ।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ।।१५।।

१६. उत्कीलः – य. १८.७६

धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः। सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ।।७६।।

१७. उत्तरनारायणः – य. ३१.21

रुचं ब्राह्मं जनयन्तो देवाऽअग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे ।।21।।

१८. उशना – य. १८.७७

त्वं यविष्ठ दाशुषो नॄँः पाहि श्रृणुधी गिरः। रक्षा तोकमुत त्मना ।।७७।।

१९. ऋजिश्वा भारद्वाजः – सा. ६१०; १५६५

सा. ६१०

विश्वे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ।।६।।

सा. १५६५

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः ।।१।।

२०. कक्षीवान (दैर्धतमसः औशिजः) – ऋ. १.122.१–१५

प्र वः पान्तं रघुमन्यवोऽन्धो यज्ञं रुद्राय मीळहुषे भरध्वम् ।
दिवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ।।१।।
पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।
स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ।।2।।
ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ।।३।।
उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै ।
प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ।।४।।
आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नशे ।
प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः ।।५।।
श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीम् ।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुरद्भिः ।।६।।
स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे ।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन्।।७।।
अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः ।
जनोयः पज्रेभ्यो वाजिनीवानश्वावतो रथिना मह्यं सूरिः ।।८।।
जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक् ।
स्वयं स यक्ष्मं हृदये नि धत्त् आप यदीं होत्राभिर्ऋतावा ।।९।।
स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।
विसृष्टरातिर्याति बाळहसृत्त्वा विश्वासु पृतसु सदमिच्छूरः ।।१०।।
अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।
नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ।।११।।
एतं शर्धं धाम यस्य सूरेरित्यवोचन्दशतयस्य नंशे ।

द्युम्नानि येषु वसुताती रारन्विश्वे सन्वन्तु प्रभृथेषु वाजम् ।।१2।।
मन्दामहे दशतयस्य धासेर्द्विर्यत्पंच बिभ्रतो यन्त्यन्ना ।
किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋंजते नॄन् ।।१३।।
हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवाः ।
अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ।।१४।।
चत्वारो मा मशर्शारस्य शिश्वस्त्रयो राज्ञ आयवसस्य जिष्णोः ।
रथो वां मित्रावरुणा दीर्घप्साः स्यूमगभस्तिः सूरो नाद्यौत् ।।१५।।

2१. कण्वः – य. ३३.८६

प्रैतु बृह्मणस्पतिः प्र देव्येतु सूनृता। अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु न ।।८६।।

22. कवष ऐलूषः – ऋ.१०.३१.१–११; १०.३३.१

ऋ. १०.३१.१–११

आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः ।
तेभिर्वयं सुषखयो भवेम तरन्तो विश्वा दुरिता स्याम ।।१।।
परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत ।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ।।2।।
अधायि धीतिरससृग्रमंशास्तीर्थे न दस्ममुप यन्त्यूमाः ।
अभ्यानश्म सुवितस्य शूषं नवेदसो अमृतानामभूम ।।३।।
नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सावती जजान ।
भगो वा गोभिरर्यमेमनज्यात्सो अस्मै चारुश्छदयदुत स्यात् ।।४।।
इयं सा भूया उषसामिव क्षा यद्ध क्षुमन्तः शवसा समायन् ।
अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यन्तु वाजाः ।।५।।
अस्येदेषा सुमतिः पप्रथानाभवत्पूर्व्या भूमना गौः ।
अस्य सनीळा असुरस्य योनौ समान आ भरणे बिभ्रमाणाः ।।६।।
किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त ।।७।।
नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति ।
त्वचं पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहन्ति ।।८।।
स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम ।
मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकम् ।।९।।
स्तरीर्यत्सूत सद्याो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा ।
पुत्रो यत्पूर्वः पित्रोर्जनिष्ट शमयां गौर्जगार यद्ध पृच्छान् ।।१०।।
उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी ।
प्र कृष्णाय रुषदपिन्वतोधर्ऋतमत्र नकिरस्मा अपीपेत् ।।११।।

ऋ. १०.३३.१

प्र मा ययुज्रे प्रयुजो जनानां वहामि स्म पूषणमन्तरेण ।
विश्वे देवासो अध मामरक्षन्दुः शासुरागादिति घोष आसीत् ।।१।।

2३. कसीदी काण्वः – ऋ. ८.८३.१–९

देवानामिदवो महत्तदा वृणीमहे वयम्। वृष्णामस्मभ्यमूतये ।।१।।
ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा। वृधासश्च प्रचेतसः ।।2।।
अति नो विष्पिता पुरु नौभिरपो न पर्षथ। यूयमृतस्य रथ्यः ।।३।।
वामं नो अस्त्वर्यमन्वामं वरुण शंस्यम्। वामं ह्यावृणीमहे ।।४।।
वामस्य हि प्रचेतस ईशानासो रिशादसः। नेमादित्या अघस्य यत् ।।५।।
वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना। देवा वृधाय हूमहे ।।६।।

अधि न इन्द्रैषां विश्णो सजात्यानाम्। इता मरुतो अश्विना ।।७।।
प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या। मातुर्गर्भे भरामहे ।।८।।
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः। अधा चिद्व उत ब्रुवे ।।६।।

२४. कुत्स आंगिरसः – ऋ. १.१०६.१–७; १.१०७.१–३

ऋ. १.१०६.१–७

इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ।।१।।
त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शंभुवः ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन।।2।।
अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ।।३।।
नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ।।४।।
बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ।।५।।
इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ।।६।।
देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।७।।

ऋ. १.१०७.१–३

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ।।१।।
उप नो देवा अवसा गमन्त्वंगिरसां सामभिः स्तूयमानाः ।
इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ।।2।।
तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।३।।

२५. कुत्सीदिः – य. ३३.४७

अधि न इन्द्रैषां विष्णे सजात्यानाम्। इता मरुतो ऽअश्विना। तं प्रत्नथा। अयं वेनः ।
ये देवासः।आ नऽइडाभिः। विश्वेभिः सोम्यं मधु। ओमासश्चर्षणीधृतः ।।४७।।

२६. कूर्मः – य. ३३.५१

अर्वांचोऽअद्या भवता यजत्राऽआ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्त्तादवपदो यजत्राः ।।५१।।

२७. कूर्मः गार्त्समदः गृत्समदो वा – ऋ. 2.2६.१–७

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ।।१।।
यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत ।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ।।2।।
किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ।।३।।
हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथे मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ।।४।।

प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशस ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ।।५।।
अर्वांचो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ।।६।।
माहं मघोनो बरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ।।७।।

२८. गयः प्लातः – ऋ. १०.६३.१–१४; १७; १०.६४.१–१७

ऋ. १०.६३.१–१४

परावतो ये दिधिषन्त आप्यं मनुप्रीतासो जनिमा विवस्वतः ।
ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रुवन्तु नः ।।१।।
विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यज्ञियानि वः ।
ये स्थ जाता अदितेरद्भ्यस्परि ये पृथिव्यास्ते म इह श्रुता हवम् ।।2।।
येभ्यो माता मधुमत्पिन्वते पयः पीयूषं द्यौरदितिरद्रिबर्हाः ।
उक्थशुष्मान वृषभरान्त्स्वप्नसस्ताँ आदित्याँ अनु मदा स्वस्तये ।।३।।
नृचक्षसो अनिमिषन्तो अर्हणा बृहद्देवासो अमृतत्वमानशुः ।
ज्योतीरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये ।।४।।
सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता दधिरे दिवि क्षयम् ।
ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ।।५।।
को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्ठन ।
को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्वस्तये ।।६।।
येभ्यो होत्रां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः ।
त आदित्या अभ्यं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ।।७।।
य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः ।
ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ।।८।।
भेरिष्वन्द्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनम् ।
अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ।।९।।
सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ।।१०।।
विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः ।
सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ।।११।।
अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रमघायतः ।
आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ।।१2।।
अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि ।
यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये ।।१३।।
यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने ।
प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये ।।१४।।

ऋ. १०.१६.१७

एवा प्लतेः सूनुरवीवृधद्वो विश्व आदित्या आदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ।।१७।।

ऋ. १०.६४.१–१७

कथा देवानां कतमस्य यामनि सुमन्तु नाम शृण्वतां मनामहे ।
को मृळाति कतमो नो मयस्करत्कतम ऊती अभ्या ववर्तति ।।१।।
क्रतूयन्ति क्रतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्या दिशः ।

न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ।।2।।
नरा वा शंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा ।
सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना ।।३।।
कथा कविस्तुवीरवान्कया गिरा बृहस्पतिर्वावृधते सुवृक्तिभिः ।
अज एकपात्सुहवेभिर्ऋक्वभिरहिः शृणोतु बुध्न्यो३ हवीमनि ।।४।।
दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ।
अतूर्तपन्थाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु ।।५।।
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रमा मेधसाताविव त्मना महो ये धनं समिथेषु जभ्रिरे ।।६।।
प्र वो वायुं रथयुजं पुरन्धिं स्तोमैः कृणुध्वं सख्याय पूषणम् ।
ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सचितः सचेतसः ।।७।।
त्रिः सप्त सस्रा नद्यो महीरपो वनस्पतीन्पर्वताँ अग्निमूतये ।
कृशानुमस्तृ□न्तिष्यं सधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे ।।८।।
सरस्वती सरयुः सिन्धुरूर्मिभिर्महो महीरवसा यन्तु वक्षणीः ।
देवीरापो मातरः सूदयित्न्वो घृतवत्पयो मधुमन्नो अर्चत ।।९।।
उत माता बृहद्दिवा शृणोतु नस्त्वष्टा देवेभिर्जनिभिः पिता वचः ।
ऋभुक्षा वाजो रथस्पतिर्भगो रण्वः शंसः शशमानस्य पातु नः ।।१०।।
रण्वः संदृष्टौ पितुमाँ इव क्षयो भद्रा रुद्राणां मरुतामुपस्तुतिः ।
गोभिः ष्याम यशसो जनेष्वा सदा देवास इळया सचेमहि ।।११।।
यां मे धियं मरुत इन्द्र देवा अददात वरुण मित्र यूयम् ।
तां पीपयत पयसेव धेनुं कुविद्गिरो अधि रथे वहाथ ।।१2।।
कुविदंग प्रति यथा चिदस्य नः सजात्यस्य मरुतो बुबोधथ ।
नाभा यत्र प्रथमं संनसामहे तत्र जामित्वमदितिर्दधातु नः ।।१३।।
ते हि द्यावापृथिवी मातरा मही देवी देवांजन्मना यज्ञिये इतः ।
उभे बिभृत उभयं भरीमभिः पुरू रेतांसि पितृभिश्च सिंचतः ।।१४।।
वि षा होत्रा विश्वमश्नोति वार्यं बृहस्पतिररमतिः पनीयसी ।
ग्रावा यत्र मधुषुदुच्यते बृहदवीवशन्त मतिभिर्मनीषिणः ।।१५।।
एवा कविस्तुवीरवाँ ऋतज्ञा द्रविणस्युर्द्रविणसश्चकानः ।
उक्थेभिरत्र मतिभिश्च विप्रोऽपीपयद्गयो दिव्यानि जन्म ।।१६।।
एवा प्लतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ।।१७।।

2६. गाथी कौशिकः — ऋ. ३.2०.१–५

अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः ।
सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः ।।१।।
अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ।।2।।
अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।
याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ।।३।।
अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।
स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणन्तम् ।।४।।

दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम् ।
अश्विना मित्रावरुणा भगं च वसून रुद्राँ आदित्याँ इह हुवे ।।५।।

३०. गृत्समदः – य. ७.३४

विश्वे देवासऽआगत शृणुता म इमं हवम्। एदं बर्हिर्निषीदत ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य ।।३४।।

३१. गृत्समदः शौनकः – ऋ. 2.३१.१–७; 2.४१.१३–१५

ऋ. 2.३१.१–७

अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ।।१।।
अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुभ् ।
यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ।।2।।
उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
अनु नु स्थात्यवृकाभिरूतिभि रथं महे सनये वाजसातये ।।३।।
उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम् ।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ।।४।।
उत त्ये देवी सुभगे मिथुदृशेषासानक्ता जगतामपीजुवा ।
स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ।।५।।
उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्यो३ऽज एकपादुत ।
त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ।।६।।
एता वो वश्म्युद्यता यजत्राअतक्षन्नायवो नव्यसे सम् ।
श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः ।।७।।

ऋ. 2.४१.१३–१५

विश्वे देवास आ गत शुणुता म इमं हवम्। एदं बर्हिर्नि षीदत ।।१३।।
तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः एतं पिबत काम्यम् ।।१४।।
इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः विश्वे मम श्रुता हवम् ।।१५।।

३2. गोतमः – य. १३.2७–2९; 2५.३५; ४६

य. १३.2७–2९

मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ।।2७।।
मधु नक्तमुतोषसो मधुमत्पार्थिवं रंजः। मधु द्यौरस्तु नः पिता ।।2८।।
मधुमान्नो वनस्पतिर्मधुमाँ2ऽ अस्तु सूर्य्यः। माध्वीर्गावो भवन्तु नः ।।2९।।

य. 2५.३५

ये वाजिनं परिपश्यन्ति पक्वं यऽईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो मांसभिक्षामुपासतऽउतो तेषामभिगूर्त्तिर्नऽइन्वतु ।।३५।।

य. 2५.४६

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
आदित्येरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधाति ।।४६।।

३३. गोतमो राहूगणः – ऋ. १.८९.१–१०; १.९०.१–९; सा. १८७४–१८७५

ऋ. १.८९.१–१०

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ।।१।।
देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ।।2।।

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ।।३।।
तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।।४।।
तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ।।५।।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वदेवाः ।
स्वस्ति नस्ताक्षर्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।६।।
पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ।।७।।
भद्रं कर्णेभि शुणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।।८।।
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।।९।।
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पंच जना अदितिर्जातमदितिर्जनित्वम् ।।१०।।

ऋ. १.९०.१–९

ऋजुनीति नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः ।।१।।
ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः। व्रता रक्षन्ते विश्वहा ।।2।।
ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः। बाधमाना अप द्विषः ।।३।।
वि नः पथः सुविताय चियन्त्विन्द्रो मरुतः। पूषा भगो वन्द्यासः ।।४।।
उत नो धियो गोअग्राः पूषन्विष्णवेवयावः। कर्ता नः स्वस्तिमतः ।।५।।
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ।।६।।
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता ।।७।।
मधुमान्नो वनस्पतिर्मधुमा□ अस्तु सूर्यः। मध्वीर्गावो भवन्तु नः ।।८।।
शं नो मित्रः शं वरुणः शं नो भवत्यवर्यमा। शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः।।९।।

सा. १८७४–७५

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
सिरैरंगैस्तुष्टुवा सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।2।।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।३।।

३४. घर्मः सौर्यः – ऋ. १०.१८१.३

तेऽविन्दन्मनसा दीध्याना यजुः ष्कन्नं प्रथमं देवयानम् ।
धातुर्द्युतानात्सवितुश्च विष्णोरा सूर्यादभरन्घर्ममेते ।।३।।

३५. जमदग्निः – य. ३३.३९

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रेरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ।।३९।।

३६. जुहुर्ब्रह्मजाया ऊर्ध्वनाभा वा ब्राह्मः – ऋ. १०.१०९.१–७

तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ।
वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन ।।१।।
सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छहणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ।।2।।
हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजाययेयमिति चेदवोचन् ।

न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ।।३।।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ।।४।।
ब्रह्मचारी चरति वेविंषद्विषः स देवानां भवत्येकमंगम् ।
तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं१न देवाः ।।५।।
पूनर्वै देवा अददुः पुनर्मनुष्या उत । राजानः सत्यं कृण्वाना ब्रह्मजाया पुनर्ददुः ।।६।।
पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्त्वायोरुगायमुपासते ।।७।।

३७. तान्वः पार्थ्यः – ऋ. १०.६३.१–१५

महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं नः।
तेभिर्नः पातं सह्यस एभिर्नः पातं शूषणि ।।१।।
यज्ञेयज्ञे स मर्त्यो देवान्त्सपर्यति। यः सुम्नैदीर्घश्रुत्तम आविवासात्येनान् ।।2।।
विश्वेषामिरज्यवो देवानां वार्महः। विश्वे हि विश्वमहसो विश्वे यज्ञेषु यज्ञियाः ।।३।।
ते घाराजानो अमृतस्य मन्द्रा अर्यमा मित्रो वरुणः परिज्मा ।
कद्रुद्रो नृणां स्तुतो मरुतः पूषणो भगः ।।४।।
उत नो नक्तमपां वृषण्वसू ससूर्यामासा सदनाय सधन्या ।
सचा यत्साद्येषामहिर्बुध्नेषु बुध्न्यः ।।५।।
उत नो देवावश्विना शुभस्पती धामभिर्मित्रावरुणा उरुष्यताम् ।
महः स राय एषतेऽति धन्वेव दुरिता ।।६।।
उत नो रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथस्पतिर्भगः ।
ऋभुर्वाज ऋभुक्षणः परिज्मा विश्ववेदसः ।।७।।
ऋभुर्ऋभुक्षा ऋभुर्विधतो मद आ ते हरी जूजुवानस्य वाजिना ।
दुष्टरं यस्य साम चिदृधग्यज्ञो न मानुषः ।।८।।
कृधी नो अह्रयो दव सवितः स च स्तुषे मघोना् ।
सही न इन्द्रो वह्निभिर्न्येषां चर्षणीनां चक्रं रश्मिं न योयुवे ।।६।।
ऐषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्षणि श्रवः ।
पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे ।।१०।।
एतं शंसमिन्द्रास्मयुष्ट्वं कूचित्सन्तं सहसावन्नभिष्टये सदा पाह्यभिष्टये ।
मेदतां वेदता वसो ।।११।।
एतं मे स्तोमं तना न सूर्ये द्युतद्यामनं वावृधन्त नृणाम् ।
संवननं नाश्व्यं तष्टेवानपच्युतम् ।।12।।
वावर्त येषां राया युक्तैषां हिरण्ययी ।
नेमधिता न पौंस्या वृथेव विष्टान्ता ।।१३।।
प्र तद्दुःशीमे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु ।
ये युक्त्वाय पंच शतास्मयु पथा विश्राव्येषाम् ।।१४।।
अधीन्वत्र सप्ततिं च सप्त च ।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः ।।१५।।

३८. त्रित आप्त्यः ;साग्री.सास्वा. सार्षेदी.द्ध त्रित आप्त्यः कुत्स आंगिरसो वा (ऋसर्व. १०.१०५.५ १०.१०५.१) – ऋ. १.१०५.१–१६; सा. ३६८; ४१७

ऋ. १.१०५.१–१६

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ।।१।।
अर्थमिद्वा न अर्थिन आ जाया युवते पतिम् ।
तुंजाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ।।2।।

मो षु देवा अदः स्व१रव पादि दिवस्परि ।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ।।३।।
यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति ।
क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ।।४।।
अमी ये देवाः स्थन त्रिष्वा रोचने दिवः ।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ।।५।।
कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम् ।
कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ।।६।।
अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।
तं मा व्यन्त्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ।।७।।
सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी ।।८।।
अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता ।
त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ।।९।।
अमी ये पंचोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतु र्वित्तं मे अस्य रोदसी ।।१०।।
सुपर्णा एत आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी ।।११।।
नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।
ऋतमर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी ।।१2।।
अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम् ।
स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी ।।१३।।
सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी ।।१४।।
ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ।।१५।।
असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ।।१६।।
त्रितः कूपेऽवहितो देवान्हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नहूरणादुरु वित्तं मे अस्य रोदसी ।।१७।।
अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ।।१८।।
एनाङ्गूषेण वयमिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।१९।।

सा. ३६८

अमी ये देवा स्थन मध्य आ रोचने दिवः। कद्व ऋतं कदमृतं का प्रत्ना व आहुतिः ।।९।।

सा. ४१७

चन्द्रमा अप्स्वा३न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ।। ९ ।।

३९. त्रिशोकः – य. ७.३2

आ घा येऽअग्निमिन्धते स्तृणन्ति बर्हिरानुषक्। येषामिन्द्रो युवा सखा। उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वैष ते योनिरग्नीन्द्राभ्यां त्वा ।।३2।।

४०. दीर्घतमा – य. ६.१९

घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा।
दिशः प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्भ्यः स्वाहा ।।१६।।

४१. दीर्घतमा औचथ्यः – ऋ. १.१६४.१–४१

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।
तृतीयो भ्राता घृतपुष्ठो अस्यात्रापश्यं विश्पति सप्तपुत्रम् ।।१।।
सप्त युंजन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्व भुवनाधि तस्थुः ।।2।।
इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वः ।
सप्त स्वसाारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ।।३।।
को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति ।
भूम्या असुरसृगात्मा क्व स्वित्को विद्वांस्मुप गात्प्रष्टुमेतत् ।।४।।
पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधिं सप्त तन्तून्वि तत्निरे कवय ओतवा उ ।।५।।
अचिकित्वांचितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान् ।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ।।६।।
इह ब्रवीतु य ईमंग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ।।७।।
माता पितरमृत आ बभज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ।।८।।
युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः ।
अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ।।६।।
तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ।।१०।।
द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ।।११।।
पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ।।12।।
पंचारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सुनादेव न शीर्यते सनाभिः ।।१३।।
सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ।।१४।।
साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ।।१५।।
स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ।।१६।।
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अन्तः ।।१७।।
अवः परेण पितरं यो अस्यानुवेद पर एनावरेण ।
कवीयमानः क इह प्र वोचद्देवं कुतो अधि प्रजातम् ।।१८।।
ये अर्वांचस्ताँ उ पराच आहुर्ये परांचस्ताँ उ अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ।।१६।।
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ।।20।।
यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ।।२१।।
यस्मिन्वृक्षे मध्वदः सुपुर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ।।22।।
यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ।।२३।।
गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ।।२४।।
जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ।।२५।।
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम् ।।२६।।
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ।।२७।।
गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवाउ ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ।।२८।।
अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ।।२६।।
अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ।।३०।।
अपश्यं गोपामनिपद्यमानसा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ।।३१।।
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ।।३2।।
द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ।।३३।।
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ।।३४।।
इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ।।३५।।
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ।।३६।।
न वि जानामि यदिवेदमस्मि निण्यः सन्नद्धो मनसा चरामि ।
यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ।।३७।।
अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न नि चिक्युरन्यम् ।।३८।।
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्त द्विदुस्त इमे समासते ।।३६।।
सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ।।४०।।
गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ।।४१।।

४2. देवाः – य. १८.३१

विश्वेऽअद्य मरुतो विश्वऽऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवाऽअवसागमन्तु विश्वमस्तु द्रविणं वाजोऽअस्मे ।।३१।।

४३. देवस्युर्वान्दनः — ऋ. १०.१००.१–१२

इन्द्र दृह्य मघवन्त्वावदिद्भुज इह स्तुतः सुतपा बोधि नो वृधे ।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे ।।१।।
भराय सु भरत भगमृत्वियं प्र वायवे शुचिपे क्रन्ददिष्टये ।
गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे ।।2।।
आ नो देवः सविता साविषद्वय ऋजूयते यजमानाय सुन्वते ।
यथा देवान्प्रतिभूषेम पाकवदा सर्वतातिमदितिं वृणीमहे ।।३।।
इन्द्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः ।
यथायथा मित्रधितानि सं दधुरा सर्वतातिमदितिं वृणीमहे ।।४।।
इन्द्र उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः ।
यज्ञो मनुः प्रमतिर्नः पिता हि कमा सर्वतातिमदितिं वृणीमहे ।।५।।
इन्द्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः ।
यज्ञश्च भूद्विदथे चारुरन्तम आ सर्वतातिमदितिं वृणीमहे ।।६।।
न वो गुहा चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनम् ।
माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ।।७।।
अपामीवां सविता साविषन्न्य१ ग्वरीय इदप सेधन्त्वद्रयः ।
ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ।।७।।
अपामीवां सविता साविषन्न्यृ ग्वरीय इदप सेधन्त्वद्रयः ।
ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ।।८।।
ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत ।
स नो देवः सविता पायुरीड्य आ सर्वतातिमदिति वृणीमहे ।।९।।
ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ध्वे ।
तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ।।१०।।
क्रतुप्रावा जरिता शश्वतामव इन्द्र इदभद्रा प्रमतिः सुतावताम् ।
पूर्णमूधर्दिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ।।११।।
चित्रस्ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।
राजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्यु ।।१2।।

४४. नाभानेदिष्ठो मानवः — ऋ. १०.६१.१–2७; १०.६2.७

ऋ. १०.६१.१–2७

इदमित्था रौद्रं गूर्तवाचा ब्रह्म क्रत्वा शच्यामन्तराजौ ।
क्राणा यदस्य पितरा मंहनेष्ठाः पर्षत्पक्थे अहन्ना सप्त होतॄन् ।।१।।
स इद्दानाय दभ्याय वन्वंच्यवानः सूदैरमिमीत वेदिम् ।
तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिंचत् ।।2।।
मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।
आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ।।३।।
कृष्णा यद्गोभिष्वरुणीषुसीदद्दिवो नपाताश्विना हुवे वाम् ।
वीतं मे यज्ञमा गतं मे अन्नं ववन्वांसा नेषमस्मृतध्रू ।।४।।
प्रथिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो अपौहत् ।
पुनस्तदा वृहति यत्कनाया दुहितुरा अनुभृतमनर्वा ।।५।।
मध्या यत्कर्त्वमभवदभीके कामं कृण्वाने पितरि युवत्याम् ।
मनानग्रेतो जहतुर्वियन्ता सानौ निषिक्तं सुकृतस्य यानौ ।।६।।
पिता यत्स्वां दुहितरमधिष्कन्क्ष्मया रेतः संजग्मानो नि षिंचत् ।

स्वाध्योऽजनयन्ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन् ।।७।।
स ईं वृषा न फेनमस्यदाजौ स्मदा परैदप दभ्रचेताः ।
सरत्पदा न दक्षिणा परावृङ् न ता नु मे पृशन्यो जगृभ्रे ।।८।।
मक्षू न वह्निः प्रजाया उपब्दिरग्निं न नग्न उप सीददूधः ।
सनितेध्मं सनितोत वाजं स धर्ता जज्ञे सहसा यवीयुत् ।।९।।
मक्षू कनायाः सख्यं नवग्वा ऋतं वदन्त ऋतयुक्तिमग्मन् ।
द्विबर्हसो य उप गोपमागुरदक्षिणासो उच्युता दुदुक्षन् ।।१०।।
मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतमित्तुरण्यन् ।
शुचि यत्ते रेकण आयजन्त सबर्दुघायाः पय उस्रियायाः ।।११।।
पश्वा यत्पश्चा वियुता बुध्न्तेति ब्रवीति वक्तरी रराणः ।
वसोर्वसुत्वा करवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु ।।१2।।
तदिन्न्वस्य परिषद्वानो अग्मन्पुरू सदन्तो नार्षदं बिभित्सन् ।
वि षुष्णस्य संग्रथितमनर्वा विदत्पुरुप्रजातस्य गुहा यत् ।।१३।।
भर्गो ह नामोत यस्य देवाः स्व१र्ण ये त्रिषधस्थे निषेदुः ।
अग्निर्ह नामोत जातवेदाः श्रुधी नो होतर्ऋतस्य होताध्रुक् ।।१४।।
उत त्या मे रौद्रावर्चिमन्ता नासत्याविन्द्र गूर्तये यजध्यै ।
मनुष्वद्वृक्तबर्हिषे रराणा मन्दू हितप्रयसा विक्षु यज्यू ।।१५।।
अयं स्तुतो राजा वन्दि वेधा अपश्च विपस्तरति स्वसेतुः ।
स कक्षीवन्तं रेजयत्सो अग्निं नेमिं न चक्रमर्वतो रघुद्रु ।।१६।।
स द्विबन्धुर्वैतरणो यष्टा सबर्धुं धेनुमस्वं दुहध्यै ।
सं यन्मित्रावरुणा वृंज उक्थैर्ज्येष्ठभिरर्यमणं वरूथैः ।।१७।।
तद्बन्धुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन् ।
सा नो नाभिः परमास्य वा घाहं तत्पश्चा कतिथश्चिदास ।।१८।।
इयं मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः ।
द्विजा अह प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना ।।१९।।
अधासु मन्द्रो अरतिर्विभावाव स्यति द्विवर्तनिर्वनेषाट् ।
ऊर्ध्वा यच्छ्रेणिर्न शिशुर्दन्मक्षू स्थिरं शेवृधं सूत माता ।।2०।।
अधा गाव उपमातिं कनाया अनु श्वान्तस्य कस्य चित्परेयुः ।
श्रुधि त्वं सुद्रविणो नस्त्वं याळाश्वघ्नस्य वावृधे सूनृताभिः ।।2१।।
अध त्वमिन्द्र विद्ध्य१ स्मान्महो राये नृपते वज्रबाहुः ।
रक्षा च नो मघोनः पाहि सूरीननेहस्ते हरिवो अभिष्टौ ।।22।।
अध यद्राजाना गविष्टौ सरत्सरण्युः कारवे जरण्युः ।
विप्रः प्रेष्ठः स ह्येषां बभूव परा च वक्षदुत पर्षदेनान् ।।2३।।
अधा न्वस्य जेन्यस्य पुष्टौ वृथा रेभन्त ईमहे तदू नु ।
सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ ।।2४।।
युवोर्यदि सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान् ।
विश्वत्र यस्मिन्ना गिरः समीचीः पूर्वीव गातुर्दाशत्सूनृतायै ।।2५।।
स गृणानो अद्भिर्देववानिति सुबन्धुर्नमसा सूक्तैः ।
वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वैति पयस उस्रियायाः ।।2६।।
त ऊ षु णो महो यजत्रा भूत देवास ऊतये सजोषाः ।
ये वाजाँ अनयता वियन्तो ये स्था निचेतारो अमूराः ।।2७।।

ऋ. १०.६2.७

इन्द्रेण युजा निः सृजन्त वाघतो व्रजं गोमन्तमश्विनम् ।
सहस्रं मे ददतो अष्टकर्ण्य१ः श्रवो देवेष्वक्रत ।।७।।

४५. परमेष्ठी – य. १५.१४

अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्ता
त्रिणवत्रयस्त्रिंशौ त्वा स्तोमौ पृथिव्यां श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभनीतां शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ताचायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ।।१४।।

४६. परमेष्ठी प्रजापतिः – य. 2.१८

संस्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः। इमां वाचमभि विश्वे गृणन्तऽआसद्यास्मिन्बर्हिषि मादयध्वं स्वहा वाट् ।।१८।।

४७. परुच्छेपो दैवोदासिः – ऋ. १.१३६.१; ११; सा. ४६१

ऋ. १.१३६.१

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वति नाभा सन्दायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ।।१।।

ऋ. १.१३६.११

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ।।११।।

सा. ४६१

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु त्यच्छर्द्धो दिव्यं वृणीमहे इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वते नाभा सन्दाय नव्यसे ।
अध प्र नूनमुप यन्ति धीतयो देवाँ अच्छा न धीतयः ।।५।।

४८. प्रजापतिः – य. 20.12; 22.४; 2४.५; 2५.१६

य. 20.12

प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूंषि सामभिः
सामान्यृग्भिर्ऋचः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या
वषट्कारैर्वषट्काराऽआहुतिभिराहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहा ।।12।।

य. 22.४

स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम्।
तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ।।४।।

य. 2४.५

शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविज्ञाताऽ आदित्यै सरूपा
धात्रे वत्सतर्यो देवानां पत्नीभ्यः ।।५।।

य. 2५.१६

तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ।१६।

४६. प्रजापतिर् वैश्वामित्रो वाच्यो वा – ऋ. ३.५४.१–22; ३.५६.१–८

ऋ. ३.५४.१–22

इमं महे विदथ्याय शूषं शश्वत्कृत्व ईड्याय प्र जभ्रुः ।
शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्रः ।।१।।
महि महे दिवे अर्चा पृथिव्यै कामो म इच्छंचरति प्रजानन् ।
ययोर्ह स्तोमे विदथेषु देवाः सपर्यवो मादयन्ते सचायोः ।।2।।
युवोर्ऋतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूत् ।
इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नम् ।।३।।
उतो हि वां पूर्व्या आविविद्र ऋतावरो रोदसी सत्यवाचः ।

नरश्विद्वां समिथे शूरसातौ ववन्दिरे पृथिवी वेविदानाः ।।४।।
को अद्धा वेद क इह प्र वोचद्देवाँ अच्छा पथ्या३का समेति ।
ददृश्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ।।५।।
कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदन्ती ।
नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ।।६।।
समान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके ।
उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम ।।७।।
विश्वेदेते जनिमा सं विविक्तो महो देवान्बिभ्रती न व्यथेते ।
एजद् ध्रुवं पत्यते विश्वमेकं चरत्पतत्रि विषुणं वि जातम् ।।८।।
सना पुराणमध्येम्यारान्महः पितुर्जनितुर्जामि तन्नः ।
देवासो यत्र पनितार एवैरुरौ पथि व्युते तस्थुरन्तः ।।९।।
इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः शृणवन्नग्निजिह्वाः ।
मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः ।।१०।।
हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः ।
देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिम् ।।११।।
सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात् ।
पूषण्वन्त ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ।।12।।
विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः ।
सरस्वती शृणवन्यज्ञियासो धाता रयिं सहवीरं तुरासः ।।१३।।
विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन् ।
उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धन्ति युवतयो जनित्रीः ।।१४।।
इन्द्रो विश्वैर्वीर्यै३ः पत्यमान उभे आ पप्रौ रोदसी महित्वा ।
पुरन्दरो वृत्रहा धृष्णुषेणः संगभ्या न आ भरा भूरि पश्वः ।।१५।।
नासत्या मे पितरा बन्धुपृच्छा सजात्यमश्विनोश्चारु नाम ।
युवं हि स्थे रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा ।।१६।।
महत्तद्वः कवयश्चरु नाम यद्ध देवा भवथ विश्व इन्द्रे ।
सख ऋभुभिः पुरुहूत प्रियेभिरिमां धियं सातये तक्षता नः ।।१७।।
अर्यमा णो अदितिर्यज्ञियासोऽदब्धानि वरुणस्य व्रतानि ।
युयोत नो अनपत्यानि गन्तोः प्रजावान्नः पशुमाँ अस्तु गातुः ।।१८।।
देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वताता ।
शुणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्व१न्तरिक्षम् ।।१९।।
शृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः ।
आदित्यैर्नो अदितिः शृणोतु यच्छन्तु नो मरुतः शर्म भद्रम् ।।20।।
सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ।।21।।
स्वदस्व हव्या समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि ।
विश्वँ अग्ने पृत्सु तांजेषि शत्रूनहा विश्वा सुमना दीदिही नः ।22।

ऋ. ३.५६.१—८

वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीद्ये पूर्व्याणि ।
समिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकम् ।।३।।
न ता मिनन्ति मायिनो न धीरा व्रता देवानां प्रथमा ध्रुवाणि ।
न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः ।।१।।
षड् भाराँ एको अचरन्बिभर्त्यृतं वर्षिष्ठमुप गाव आगुः ।

तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका ।।2।।
त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान् ।
त्र्यनीकः पत्यते माहिनावान्त्स रेतोधा वृषभः शश्वतीनाम् ।।३।।
अभीक आसां पदवीरबोध्यादित्या नामह्वे चारु नाम ।
आपश्चिदस्मा अरमन्त देवीः पृथग्व्रजन्तीः परि षीमवृंजन् ।।४।।
त्री षधस्था सिन्धवस्त्रिः कवीनामुत त्रिमाता विदथेषु सम्राट् ।
ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः ।।५।।
त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः ।
त्रिधातु राय आ सुवा वसूनि भग त्रातर्धिषणे सातये धाः ।।६।।
त्रिरा दिवः सविता सोषवीति राजाना मित्रावरुणा सुपाणि ।
आपश्चिदस्य रोदसी चिदुर्वी रत्नं भिक्षन्त सवितुः सवाय ।।७।।
त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः ।
ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे सन्तु देवाः ।।८।।

५०. प्रतिक्षत्रः – य. ३३.४८

अग्नऽइन्द्र वरुण मित्र देवाः शर्द्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रोऽअध ग्नाः पूषा भगः सरस्वती जुषन्त ।।४८।।

५१. प्रतिक्षत्र आत्रेयः – ऋ. ५.४६.१–६

हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम् ।
नास्या वश्मि वमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति ।।१।।
अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ।।2।।
इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवी द्यां मरुतः पर्वताँ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ।।३।।
उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् ।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते ।।४।।
उत त्यन्नो मारुतं शर्ध आ गमद्दिविक्षयं यजतं बर्हिरासे ।
बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं१ वरुणो मित्रो अर्यमा ।।५।।
उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्य१ स्त्रामणे भुवन् ।
भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवम् ।।६।।

५२. प्रतिभानुर् आत्रेयः – ऋ. ५.४८.१–५

कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।
आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ।।१।।
ता अत्नत वयुनं वीरवक्षणं समान्या वृतया बिश्वमा रजः ।
अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः ।।2।।
आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि ।
शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयन्तो वि च वर्तयन्नहा ।।३।।
तामस्य रीतिं परशेरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः ।
सचा यदि पितुमन्तमिव क्षयं रत्नं दधाति भरहूतये विशे ।।४।।
स जिह्वया चतुरनीक ऋंजते चारु वसानो वरुणो यतन्नरिम्।
न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यम् ।।५।।

५३. प्रतिरथ आत्रेयः – ऋ. ५.४७.१–७

प्रयुंजती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयन्ती ।
आविवासन्ती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना ।।१।।
अजिरासस्तदप इर्यमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तास उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः ।।2।।
उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुराविवेश ।
मध्ये दिवो निहित पृश्निरश्मा वि चक्रमे रजस्पात्यन्तौ ।।३।।
चत्वार ईं बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ।।४।।
इदं वपुर्निवचनं जनासश्चरन्ति यन्नद्यस्तस्थुरापः ।
द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या३ सबन्धू ।।५।।
वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति ।
उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ ।।६।।
तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ।।७।।

५४. प्रथो वासिष्ठः – ऋ. १०.१८१.१; सा. ५६६

ऋ. १०.१८१.१

प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ।।१।।

सा. ५६६

प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषा हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ।।५।।

५५. प्रियमेध आंगिरसः (साग्री. –३५४३६०) प्रियमेधः (ऋसर्व.) – ऋ. ८.६६.११[१]

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत ।
वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ।।११।।

५६. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः – ऋ. १०.५७.१–६

मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः। मान्तः स्थुर्नो अरातयः ।।१।।
यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः। तमाहुतं नशीमहि ।।2।।
मनो न्वा हुवामहे नाराशंसेन सोमेन। पितॄणां च मन्मभिः ।।३।।
आ त एतु मनः पुनः क्रत्वे दक्षाय जीवसे। ज्योक् च सूर्यं दृशे ।।४।।
पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातं सचेमहि ।।५।।
वयं सोम व्रते तव मनस्तनू षु बिभ्रतः। प्रजावन्तः सचेमहि ।।६।।

५७. बृहद्दिवोऽथर्वा – अ. ५.३.६; ६; १०

अ. ५.३.६

दैवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह मादयध्वम् ।
मा नो विददभिभा मो अशस्तिर्मा नो विदद् वृजिना द्वेष्या या ।।६।।

अ. ५.३.६

धाता विधाता भुवनस्य यस्पतिर्देवः सविताभिमातिषाहः।
आदित्या रुद्रा अश्विनोभा देवाः पान्तु यजमानं निर्ऋथात् ।।६।।

अ. ५.३.१०

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामह एनान् ।
आदित्या रुद्रा उपरिस्पृशो न उग्रं चेत्तारमधिराजमक्रत ।।१०।।

५८. ब्रह्म – अ. ६.५५.१; ६.७१.३; ६.११४.१–३; ६.११५.१–३

अ. ६.५५.१

ये पन्थानो बहवो देवयानां अन्तरा द्यावापृथिवी संचरन्ति ।
तेषामज्यानिं यतमो वहाति तस्मै मा देवाः परि धत्तेह सर्वे।।१।।

अ. ६.७१.३

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि ।
वैश्वानरस्य महतो महिम्ना शिवं मह्यं मधुमदस्त्वन्नम् ।।३।।

अ. ६.११४.१–३

यद् देवा देवहेडनं देवासश्चकृमा वयम्। आदित्यास्तस्मान्नो यूयमृतस्यर्तेन मुंचत ।।१।।
ऋतस्यर्तेनादित्या यजत्रा मुंचतेह नः। यज्ञं यद् यज्ञवाहसः शिक्षन्तो नोपशेकिम ।।2।।
मेदस्वता यजमानाः स्रुचाज्यानि जुह्वतः। अकामा विश्वे वो देवाः शिक्षन्तो नोप शेकिम ।।३।।

अ. ६.११५.१–३

यद् विद्वांसो यद्रविद्वांस एनांसि चकृमा वयम्। यूयं नस्तस्मान्मुंचत विश्वे देवाः सजोषसः ।।१।।
यदि जाग्रद् यदि स्वपन्नेन एनस्योऽकरम्। भूतं मा तस्माद् भव्यं च द्रुपदादिव मुंचताम् ।।2।।
द्रुपदादिव मुमुचानः स्विन्नः स्नात्वा मलादिव। पूतं पवित्रेणेवाज्यं विश्वे शुम्भन्तु मैनसः।।३।।

५६. भरद्वाजः – य. ७.2४; ३३.१३

य. ७.2४

मूर्द्धानं दिवोऽअरतिं पृथिव्या वैश्वानर मृतऽआ जातमग्निम् ।
कविं सम्राजमतिथि जनानामासन्ना पात्रं जनयन्त देवाः ।।2४

य. ३३.१३

त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्र न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ।।१३।।

६०. भुवन आप्त्यः साधनो वा भौवनः – ऋ. १०.१५७.१–५; सा. ४५2; १११०–१११2

ऋ. १०.१५७.१–५

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।।१।।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ।।2।।
आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ।।३।।
हत्वाय देवा असुरान्यदायन्देवा देवत्वमभिरक्षमाणाः ।।४।।
प्रतयंचमर्कमनयंछचीभिरादित्स्वधामिषिरां पर्यपश्यन् ।।५।।

सा. ४५2

इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ।।६।।

सा. १११०–१११2

इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ।।१।।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधातु ।।2।।
आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।।३।।

६१. मधुच्छन्दाः – य. ७.३३

ओमासश्चर्षणीधृतो विश्वे देवासऽआगत। दाश्वांसो दाशुषः सुतम् ।
उपयामगृहीतोऽसि विश्वेभ्यस्तवा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।।३३।।

६2. मधुच्छन्दा वैश्वामित्रः – ऋ. १.३.७–६

ओमासश्चर्षणीधृतो विश्वे देवास आ गत। दाश्वांसो दाशुषः सुतम् ।।७।।
विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः। उस्रा इव स्वसराणि ।।८।।
विश्वे देवासो अस्रिध एहिमायासो अद्रुहः। मेधं जुषन्त वह्नयः ।।६।।

६३. मनुः – य. ३३.६१; ६४

य. ३३.६१

देवंदेवं वोऽवसे देवंदेवमाभिष्टये। देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ।।६१।।

य. ३३.६४

देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।
ते नोऽअद्य तेऽअपरं तुचे तु नो भवन्तु वरिवोविदः ।।६४।।

६४. मनुर्वैवस्वतः – ऋ. ८.27.१–22; ८.2८.१–५; ८.2६.१–१०

ऋ. ८.27.१–22

अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ।।१।।
आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।
विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ।।2।।
प्र सू न एत्वध्वरा३ ग्ना देवेषु पूर्व्यः ।
आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ।।३।।
विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशादसः ।
आरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः ।।४।।
आ नो अद्य समनसो गन्ता विश्वे सजोषसः ।
ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि ।।५।।
अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।
आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ।।६।।
वयं वो वृक्तबर्हिषो हितप्रयस अनुषक् ।
सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः ।।७।।
आ प्र यात मरुतो विष्णो अश्विना पूषन्माकीनया धिया ।
इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ।।८।।
वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।
न यद्दूराद्वसवो नू चिदन्तितो वरूथमादधर्षति ।।६।।
अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।
प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे ।।१०।।
इदा हि व उपस्तुतिमिदा वामस्य भक्तये ।
उप वो विश्ववेदसो नमस्युरा असृक्ष्यन्यामिव ।।११।।
उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः ।
नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः ।।१2।।
देवंदेवं वोऽवसे देवंदेवमभिष्टये । देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ।।१३।।
देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः ।।१४।।
प्र वः शंसाम्यद्रुहः संस्थ उपस्तुतीनाम्।
न तं धूर्तिर्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ।।१५।।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।
प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्टः सर्व एधते ।।१६।।
ऋते स विन्दते युधः सुगेभिर्यात्यध्वनः ।
अर्यमा मित्रो वरुणः सरातयो यं त्रायन्ते सजोषसः ।।१७।।
अज्रे चिदस्मै कृणुथा न्यंचनं दुर्गे चिदा सुसरणम् ।
एषा चिदस्मादशनिः परो नु सास्रेधन्ती वि नश्यतु ।।१८।।

यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध ।
यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यंदिने दिवः ।।१६।।
यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे ।
वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ।।20।।
यदद्य सूर उदिते यन्मध्यन्दिन आतुचि ।
वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे ।।21।।
वयं तद्वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम् ।
अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहै ।।22।।

ऋ. ८.2८.१–५

ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन्। विदन्नह द्वितासनन् ।।१।।
वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः। पत्नीवन्तो वषट्कृताः ।।2।।
ते नो गोपा अपाच्यास्त उदक्त इत्था न्यक्। पुरस्तात्सर्वया विशा ।।३।।
यथा वशन्ति देवास्तथेदसत्तदेषां नकिरा मिनत्। अरावा चन मर्त्यः ।।४।।
सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम्। सप्तो अधि श्रियो धिरे ।।५।।

ऋ. ८.2६.१–१०

बभ्रुरेको विषुणः सूनरो युवांज्यङ्क्ते हिरण्ययम् ।।१।।
येनिमेक आ ससाद द्योतनोऽन्तर्देवेषु मेधिरः ।।2।।
वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः ।।३।।
वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ।।४।।
तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ।।५।।
पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ।।६।।
त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ।।७।।
विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ।।८।।
सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ।।६।।
अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ।।१०।।

६५. मातरिश्वा काण्वः – ऋ. ८.५४.३–४

आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।
वसवो रुद्रा अवसे न आ गमंछृण्वन्तु मरुतो हवम् ।।३।।
पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः ।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम् ।।४।।

६६. मेधातिथिः – य. ३३.८१–८३

इमाऽउ त्वा पुरूवसो गिरो वर्द्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ।।८१।।
यस्यायं विश्वऽआर्यो दासः शेवधिपाऽ अरिः ।
तिरश्चिदर्य्ये रुशमे पवीरवि तुभ्येत्सोऽअज्यते रयिः ।।८2।।
अयं सहस्रमृषिभिः सहस्कृतः समुद्रऽइव पप्रथे ।
सत्यः सोऽअस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ।।८३।।

६७. मेधातिथिः काण्वः – ऋ. १.१४.१–१2; १.2३.१०–१2

ऋ. १.१४.१–१2

ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये। देवेभिर्याहि यक्षि च ।।१।।
आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः। देवेभिरग्न आ गहि ।।2।।
इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम्। आदित्यान् मारुतं गणम् ।।३।।

प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः। द्रप्सा मध्वश्चमूषदः ।।४।।
ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः। हविष्मन्तो अरंकृतः ।।५।।
घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः। आ देवान्त्सोमपीतये ।।६।।
तान् यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि। मध्वः सुजिह्व पायय ।।७।।
ये यजत्रा य ईड्यास्ते ते पिबन्तु जिह्वया। मधोरग्ने वषट्कृति ।।८।।
आकीं सूर्यस्य रोचनाद् विश्वान् देवाँ उषर्बुधः। विप्रो होतेह वक्षति ।।९।।
विश्वेभिः सोम्यं मध्वऽग्न इन्द्रेण वायुना। पिबा मित्रस्य धामभिः ।।१०।।
त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि। सेमं नो अध्वरं यज ।।११।।
युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः। ताभिर्देवाँ इहा वह ।।१२।।

ऋ. १.२३.१०–१२

विश्वान्देवान्हवामहे मरुतः सोमपीतये। उग्रा हि पृश्निमातरः ।।१०।।
जयतामिव तन्यतुर्मरुतामेति धृष्णुया। यच्छुभं याथना नरः ।।११।।
हस्काराद्विद्युतस्पर्यतो जाता अवन्तु नः। मरुतो मृळयन्तु नः ।।१२।।

६८. मेध्यः काण्वः – ऋ. ८.५८.२–३

एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम् ।।२।।
ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम् ।
चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अति रिक्तं पिबध्यै ।।३।।

६९. याज्ञवल्क्यः – य. ३.२१

रेवती रमध्वमस्मिन्योनावस्मिन् गोष्ठेऽस्मिँल्लोकेऽस्मिन् क्षये। इहैव स्त मापगात ।।२१।।

७०. लुशः – य. ३३.५२

विश्वेऽअद्य मरुतो विश्वऽऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवाऽअवमा गमन्तु विश्वमस्तु द्रविणं वाजोऽअस्मै ।।५२।।

७१. लुशो धानाकः – ऋ. १०.३५.१–१४; १०.३६.१–१४

ऋ. १०.३५.१–१४

अबुध्रमु त्य इन्द्रवन्तो अग्नयो ज्योतिर्भरन्त उषसो व्युष्टिषु ।
मही द्यावापृथिवी चेततामपोऽद्या देवनामव आ वृणीमहे ।।१।।
दिवस्पृथिव्योरव आ वृणीमहे मातॄन्त्सिन्धून्पर्वतांछर्यणावतः ।
अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ।।२।।
द्यावा नो अद्य पृथिवी अनागसो मही त्रायेतां सुविताय मातरा ।
उषा उच्छन्त्यप बाधतामघं स्वस्त्य१ग्निं समिधानमीमहे ।।३।।
इयं न उस्रा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु ।
आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्य१ग्निं समिधानमीमहे ।।४।।
प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरन्तीरुषसो व्युष्टिषु ।
भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्य१ग्निं समिधानमीमहे ।।५।।
अनमीवा उषस आ चरन्तु न उदग्नयो जिहतां ज्योतिषा बृहत् ।
आयुक्षातामश्विना तूतुजिं रथं स्वस्त्य१ग्निं समिधानमीमहे ।।६।।
श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि ।
रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ।।७।।
पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३ अमन्महि ।
विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे ।।८।।

अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साध ईमहे ।
आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्य१ग्निं समिधानमीमहे ।।९।।
आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतृन् ।
इन्द्रं मित्रं वरुणं सातये भगं स्वस्त्य१ग्निं समिधानमीमहे ।।१०।।
त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः ।
बृहस्पतिं पूषणमश्विना भगं स्वस्त्य१ग्निं समिधानमीमहे ।।११।।
तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यम् ।
पश्वे तोकाय तनयाय जीवसे स्वस्त्य१ग्निं समिधानमीमहे ।।१2।।
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ।।१३।।
यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः ।
यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ।।१४।।

ऋ. १०.३६.१–१४

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा ।
इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः ।।१।।
द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः ।
मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे ।।2।।
विश्वस्मान्नो आदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः ।
स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ।।३।।
ग्रावा वदन्नप रक्षांसि सेधतु दुष्वप्न्यं निर्ऋतिं विश्वमत्रिणम् ।
आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ।।४।।
एन्द्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु ।
सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ।।५।।
दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये ।
प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ।।६।।
उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शंभुवम् ।
रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे ।।७।।
अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियम् ।
सुरश्मिं सोममिन्द्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ।।८।।
सनेम तत्सुसनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः ।
ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ।।९।।
ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्ददातन ।
जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे ।।१०।।
महदद्य महतामा वृणीमहेऽवो देवानो बृहतामनर्वणाम् ।
यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे ।।११।।
महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ।।१2।।
ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ।
ते सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे ।।१३।।
सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ।।१४।।

७2. वसुकर्णो वासुक्रः – ऋ. १०.६५.१–१५; १०.६६.१–१५

ऋ. १०.६५.१–१५

अग्निरिन्द्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः ।
आदित्या विष्णुर्मरुतः स्वर्बृहत्सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः ।।१।।
इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा ।
अन्तरिक्षं मह्या पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन् ।।2।।
तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम् ।
ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः ।।३।।
स्वर्णरमन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कम्भुरोजसा ।
पृक्षाइव महयन्तः सुरातयो देवाः स्तवन्ते मनुषाय सूरयः ।।४।।
मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः ।
ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ ।।५।।
या गौर्वर्तानिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः ।
सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ।।६।।
दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशन्त आसते ।
द्यां स्कभित्व्य१ प आ चक्रुरोजसा यज्ञं जनित्वी तन्वी३ नि मामृजुः ।।७।।
परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा ।
द्यावापृथिवी वरुणाय सव्रते घृतवत्पयो महिषाय पिन्वतः ।।८।।
पर्जन्यावाता वृषभा पुरीषिणेन्द्रवायू वरुणो मित्रे अर्यमा ।
देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ।।६।।
त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये ।
बृहस्पतिं वृत्रखादं सुमेधसमिन्द्रियं सोमं धनसा उ ईमहे ।।१०।।
ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन्पृथिवीं पर्वताँ अपः ।
सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ।।११।।
भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतम् ।
कमद्युवं विमदायोहथुर्युवं विष्णाप्वं१ विश्वकायाव सृजथः ।।१2।।
पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः ।
विश्वे देवाः सह धीभिः पुरन्ध्या मनोर्यजत्रा अमृता ऋतज्ञाः ।
रातिषाचो अभिषाचः स्वर्विदः स्व१ र्गिरो ब्रह्म सूक्तं जुषेरत ।।१४।।
देवान्वसिष्ठो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ।।१५।।

ऋ. १०.६६.१–१५

देवान्हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतसः ।
ये वावृधुः प्रतरं विश्ववेदस इन्द्रजयेष्ठासो अमृता ऋतावृधः ।।१।।
इन्द्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागमानशुः ।
मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयन्त सूरयः ।।2।।
इन्द्रो वसुभिः परि पातु नो गयमादित्यैर्नो अदितिः शर्म यच्छतु ।
रुद्रो रुद्रेभिर्देवो मृळयाति नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ।।३।।
अदितिर्द्यावापृथिवी ऋतं महदिन्द्राविष्णू मरुतः स्वर्बृहत् ।
देवाँ आदित्याँ अवसे हवामहे वसुन्रुद्रान्त्सवितारं सुदंससम् ।।४।।
सरस्वान्धीभिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना ।
ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन् त्रिवरूथमंहसः ।।५।।
वृषा यज्ञो वृषणः सन्तु यज्ञिया वृषणो देवा वृषणो हविषकृतः ।
वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभः ।।६।।
अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे ।

यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः ।।७।।
धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः ।
अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृत्रतूर्ये ।।८।।
द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनानि यज्ञिया ।
अन्तरिक्षं स्व१रा पप्रुरूतये वशं देवासस्तन्वी३नि मामृजुः ।।९।।
धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः ।
आप ओषधीः प्र तिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ।।१०।।
समुद्रः सिन्धू रजो अन्तरिक्षमज एकपात्तनयित्नुरर्णवः ।
अहिर्बुध्न्यः शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ।।११।।
स्याम वो मनवो देववीतये प्रांचं नो यज्ञं प्र णयत साधुया ।
आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ।।१२।।
दैव्या होतारा प्रथमा पुरोहित ऋतस्य पन्थामन्वेमि साधुया ।
क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान्देवाँ अमृताँ अप्रयुच्छतः ।।१३।।
वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये ।
प्रीता इव ज्ञातयः काममेत्यास्मे देवासो□व धूनुता वसु ।।१४।।
देवान्वसिष्ठो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ।।१५।।

७३. वत्सारः – य. ३३.४९

इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ2ऽ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ।।४९।।

७४. वत्सारः काश्यपः – य. ७.१२–१७; १९; 22–2३

य. ७.१२–१७

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम्। प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्द्धसे। उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरतां पाह्यपमृष्टः शण्डो दवास्त्वा शुक्रपाः प्रणयन्त्वनाधृष्टासि ।।१२।।
सुवीरो वीरान् प्रजनयन् परीह्यभि रायस्पोषेण यजमानम् ।
संजग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा निरस्तः शण्डः शुक्रस्याधिष्ठानमसि ।।१३।।
अच्छिन्नस्य ते देव सोम सुवीर्य्यस्य रायस्पोषस्य ददितारः स्याम ।
सा प्रथमा सँस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रोऽअग्निः ।।१४।।
स प्रथमो बृहस्पतिश्चिकित्वाँस्तस्माऽइन्द्राय सुतमाजुहोत स्वाहा ।
तृम्पन्तु होत्रा मध्वो याः स्विष्टा याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहायाडग्नीत् ।।१५।।
अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इममपां संगमे सूर्य्यस्य शिशुं न विप्रा मतिभि रिहन्ति। उपयामगृहीतोऽसि मर्काय त्वा ।।१६।।
मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता। आ यः शर्य्याभिस्तुविनृम्णोऽअस्या श्रीणीतादिशं गभस्तावेष ते योनिः प्रजाः पाह्यपमृष्टो मर्को देवास्त्वा मन्थिपाः प्रणयन्त्वनाधृष्टासि।।१७।।

य. ७.१२–१९

ये देवासो दिव्येक दश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ।।१९।।
उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वतऽउक्थाव्यं गृह्णामि। यत्तऽइन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरुक्थे भयस्त्वा देवेभ्पस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ।।22।।
मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राय त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राबृहस्पतिभ्यां

त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राविष्णुभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ।।2३।।

७५. वरुणः — य. ६.३५—३६

एष ते निर्ऋते भागस्तं जुषस्व स्वाहाऽग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहा विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्यऽउत्तरासद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्यऽउपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ।।३५।।

ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा ये देवा विश्ववेदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ।।३६।।

७६. वसिष्ठः — ऋ. ७.३४.१—१५; १८—2५; ७.३५.१—१५; ७.३६.१—६; ७.३७.१—८; ७.३६.१—७; ७.४०.१—७; ७.४2.१—६; ७.४३.१—५; ७.५०.३; य. ८.५७—६१

ऋ. ७.३४.१—१५

प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी ।।१।।
विदुः पृथिव्या दिवो जमित्रं शृण्वन्त्यापो अध क्षरन्तीः ।।2।।
आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ।।३।।
आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ।।४।।
अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्तमना हिनोत ।।५।।
त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम् ।।६।।
उदस्य शुष्माद्भानुर्नार्त बिभर्ति भारं पृथिवी न भूम ।।७।।
ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ।।८।।
अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम्।।६।।
आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ।।१०।।
राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ।।११।।
अविष्टो अस्मान्विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः ।।१2।।
व्येतु दिद्युद् द्विषामशेवा युयोत विष्वग्रपस्तनूनाम् ।।१३।।
अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ।।१४।।
सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ।।१५।।

ऋ. ७.३४.१८—2५

उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ।।१८।।
तपन्ति शत्रुं स्व१र्ण भूमा महासेनासो अमेभिरेषाम् ।।१६।।
आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ।।2०।।
प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ।।2१।।
ता नो रासन्रातिषाचो वसून्या रोदसी वरुणानी शृणोतु ।
वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ।।22।।
तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः ।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ।।2३।।
अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इन्द्रसखा ।
अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै ।।2४।।
तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ।।2५।।

ऋ. ७.३५.१—१५

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ।।१।।

शं नो भगः शमु नः शंसो अस्तु शं नः पुरन्धिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ।।2।।
शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ।।३।।
शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ।।४।।
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ।।५।।
शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ।।६।।
शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्व१ः शम्वस्तु वेदिः ।।७।।
शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ।।८।।
शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ।।९।।
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शम्भुः ।।१०।।
शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ।।११।।
शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ।।१2।।
शं नो अज एकपाद्देवो अस्तु शं नोऽहिर्बुध्न्य१ः शं समुद्रः ।
शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ।।१३।।
आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ।।१४।।
ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ।।१५।।

ऋ. ७.३६.१–९

प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः ।
वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे अग्निः ।।१।।
इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः ।
इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ।।2।।
आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः ।
महो दिवः सदने जायमानोऽचिक्रदद् वृषभः सस्मिन्नूधन् ।।३।।
गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू ।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम् ।।४।।
यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन् ।
वि पृक्षा बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम् ।।५।।
आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता ।
याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ।।६।।
उत त्ये नो मरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु ।
मा नः परि ख्यदक्षरा चरन्त्यवीवृधन्युज्यं ते रयिं नः ।।७।।

प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं१ न वीरम् ।
भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरन्धिम् ॥८॥
अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः ।
उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः ॥६॥

ऋ. ७.३७.१–८

आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः ।
अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वम् ॥१॥
यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृश ऋभुक्षणो अमृक्तम् ।
सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम् ॥2॥
उवोचिथ हि मघवन्देष्णं महो अर्भस्य वसुनो विभागे ।
उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ॥३॥
त्वमिन्द्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा ।
वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः ॥४॥
सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः ।
ववन्मा नु ते युज्याभिरूती कदा न इन्द्र राय आ दशस्येः ॥५॥
वासयसीव वेधसस्त्वं नः कदा न इन्द्र वचसो बुबोधः ।
अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥६॥
अभि यं देवी निर्ऋतिश्चिदीशे नक्षन्त इन्द्रं शरदः सुपृक्षः ।
उप त्रिबन्धुर्जरदष्टिमेत्यस्ववेशं यं कृणवन्त मर्ताः ॥७॥
आ नो राधांसि सवितः स्तवध्या आ रायो यन्तु पर्वतस्य रातौ ।
सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥८॥

ऋ. ७.३६.१–७

ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्प्रतीची जूर्णिर्देवतातिमेति ।
भेजाते अद्री रथ्येव पन्थामृतं होता न इषितो यजाति ॥१॥
प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥2॥
ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः ।
अर्वाक् पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥३॥
ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि सन्ति देवाः ।
ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरन्धिम् ॥४॥
आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिन्द्रमग्निम् ।
आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयन्ताम् ॥५॥
ररे हव्यं मतिभिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन् ।
धाता रयिमविदस्यं सदासां सक्षीमहि युज्येभिर्नु देवैः ॥६॥
नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥७॥

ऋ. ७.४०.१–७

ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणाम् ।
यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ॥१॥
मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु ।
दिदेष्टु देव्यदिति रेक्णो वायुश्च यन्नियुवैते भगश्च ॥2॥
सेदुग्रो अस्तु मरुतः स शुष्मी ये मर्त्यं पृषदश्वा अवाथ ।
उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति ॥३॥
अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः ।

सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ।।४।।
अस्य देवस्य मीळहुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ।।५।।
मात्र पूषन्नाधृण इरस्यो वरूत्री यद्रातिषाचश्च रासन् ।
मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु ।।६।।
नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमे नो अर्कं यूयं पात स्वस्तिभिः सदा नः ।।७।।

ऋ. ७.४२.१–६

प्र ब्रह्मणो अंगिरसो नक्षन्त प्र क्रन्दनुर्नभन्यस्य वेतु ।
प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः ।।१।।
सुगस्ते अग्ने सनवित्तो अध्वा युङ्क्ष्व सुते हरितो रोहितश्च ।
ये वा सद्मन्नरुषा वीरवाहो हुवे देवानां जनिमानि सत्तः ।।2।।
समु वो यज्ञं महयन्नमोभिः प्र होता मन्द्रो रिरिच उपाके ।
यजस्व सु पुर्वणीक देवाना यज्ञियामरमतिं ववृत्याः ।।३।।
यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत् ।
सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै ।।४।।
इमं नो अग्ने अध्वरं जुषस्व मरुस्तिवन्द्रे यशसं कृधी नः ।
आ नक्ता बर्हिः सदतामुषासोशन्ता मित्रावरुणा यजेह ।।५।।
एवाग्नि सहस्यं१ वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत् ।
इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्तिभिः सदा नः ।।६।।

ऋ. ७.४३.१–५

प्र वो यज्ञेषु देवयन्तो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै ।
येषां ब्रह्माण्यस्मानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः ।।१।।
प्र यज्ञ एतुं हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः ।
स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि देवयून्यस्थुः ।।2।।
आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु ।
आ विश्वची विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः ।।३।।
ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः ।
ज्येष्ठं वो अद्य मह आ वसूनामा गन्तन समनसो यति ष्ठ ।।४।।
एवा नो अग्ने विक्ष्वा दशस्य त्वया वयं सहसावन्नास्क्राः ।
राया युजा सधमादो अरिष्टा यूयं पात स्वस्तिभिः सदा नः ।।५।।

ऋ. ७.५०.३

यच्छल्मलौ भवति यन्नदीषु यदोषधीभ्यः परि जायते विषम् ।
विश्वे देवा निरितस्तत्सुवन्तु मा मां पद्येन रपसा विदत्त्सरुः ।।३।।

य. ८.५७–६१

विश्वे देवाऽअंशुषु न्युप्तो विष्णुराप्रीतपाऽआप्याय्यमानो यमः सूयमानो विष्णुः सम्भ्रियमाणो वायुः पूयमानः शुक्रः पूतः। शुक्रः क्षीरश्रीर्मन्थी सक्तुश्रीः ।।५७।।
विश्वे देवाश्चमसेषून्नीतोऽसुर्होमायोद्यतो रुद्रो हूयमानो वातोऽभ्यावृतो नृचक्षाः प्रतिख्यातो भक्षो भक्ष्यमाणः पितरो नारशंसाः ।।५८।।
सन्नः सिन्धुरवभृथायोद्यतः समुद्रोऽभ्यवह्रियमाणः सलिः प्रप्लुतो ययोरोजसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा। या पत्येतेऽअप्रतीता सहोभिर्विष्णूऽअगन्वरुणा पूर्वहूतौ ।।५९।।
देवान् दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु पितॄन् पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूत् ।।६०।।
चतुस्त्रिंशत्तन्तवो ये वितत्निरे यऽइमं यज्ञं स्वधया ददन्ते ।

तेषां छिन्नं सम्वेतद्दधामि स्वाहा घर्मोऽअप्येतु देवान् ।।६१।।

७७. वामदेवः — य. ३३.५४

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम् ।
आदिद्दामानं सवि तर्व्यूणुर्षेऽनूचीना जीविता मानुषेभ्यः ।।५४।।

७८. वामदेवो गौतमः — ऋ. ४.५५.१—१०; सा. ५६१

ऋ. ४.५५.१—१०

को वस्त्राता वसवः को वरूता द्यावाभूमही अदिते त्रासीथां नः ।
सहीयसो वरुण मित्र मर्तात्को वोऽध्वरे वरिवो धाति देवाः ।।१।।
प्र ये धामानि पूर्व्याण्यर्चान्वि यदुच्छान्वियोतारो अमूराः ।
विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचन्त दस्माः ।।2।।
प्र पस्त्या३मदितिं सिन्धुमर्कैः स्वस्तिमीळे सख्याय देवीम् ।
उभे यथा नो अहनी निपात उषासानक्ता करतामदब्धे ।।३।।
व्यर्यमा वरुणश्चेति पन्थामिषस्पतिः सुवितं गातुमग्निः ।
इन्द्राविष्णू नृवदु षु स्तवाना शर्म नो यन्तममवद्वरूथम् ।।४।।
आ पर्वतस्य मरुतामवांसि देवस्य त्रातुरव्रि भगस्य ।
पात्पतिर्जन्यादंहसो नो मित्रो मित्रियादुत न उरुष्येत् ।।५।।
नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः ।
समुद्रं न संचरणे सनिष्यवो घर्मस्वरसो नद्यो३ अप व्रन् ।।६।।
देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः ।।७।।
अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य। तान्यस्मभ्यं रासते ।।८।।
उषो मघोन्या वह सूनृते वार्या पुरु। अस्मभ्यं वाजिनीवति ।।६।।
तत्सु नः सविता भगो वरुणो मित्रो अर्यमा। इन्द्रो नो राधसा गमत् ।।१०।।

सा. ५६१

इमं वृषणं कृणुतैकमिन्माम् ।।६।।

७६. वैखानसः — य. १६.४४

वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः समधमादेषु वयं स्याम पतयो रयीणाम् ।।४४।।

८०. विश्वमना वैयश्वः — ऋ. ८.25.१०—12

उत नो देव्यदितिरुरुष्यतां नासत्या। उरुष्यन्तु मरुतो वृद्धशवसः ।।१०।।
ते नो नावमुरुष्यत दिवा नक्तं सुदानवः। अरिष्यन्तो नि पायुभिः सचेमहि ।।११।।
अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे। श्रुधि स्वयावन्त्सिन्धो पूर्वचित्तये ।।12।।

८१. विश्वामित्रः — ऋ. ३.५७.१—६

प्र मे विविक्वाँ अविदन्मनीषां धेनुं चरन्तीं प्रयुतामगोपाम् ।
सद्यश्चिद्या दुदुहे भूरि धासोरिन्द्रस्तदग्निः पनितारो अस्याः ।।१।।
इन्द्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे ।
विश्वे यदस्यां रणयन्त देवाः प्र वोऽत्र वसवः सुम्नमश्याम् ।।2।।
या जामयो वृष्ण इच्छन्ति शक्ति नमस्यन्तीर्जानते गर्भमस्मिन् ।
अच्छा पुत्रं धेनवो वावशाना महश्चरन्ति बिभ्रतं वपूंषि ।।३।।
अच्छा विवक्मि रोदसी सुमेके ग्रावणो युजानो अध्वरे मनीषा ।
इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवन्ति दर्शता यजत्राः ।।४।।
या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची ।
तयेह विश्वाँ अवसे यजत्राना सादय पायया चा मधूनि ।।५।।

या ते अग्ने पर्वतस्येव धारासश्चन्ती पीपयद्देव चित्रा ।
तामस्मभ्यं प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्याम् ।।६।।

८2. विश्वामित्रो गाथिनः – ऋ. ३.८.१–११

अंजन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैवयेन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ।।१।।
समिद्धस्य श्रयमाणः पुरस्ताद् ब्रह्म वन्वानो अजरं सुवीरम् ।
आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय ।।2।।
उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि ।
सुमिती मीयमानो वर्चो धा यज्ञवाहसे ।।३।।
युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः ।।४।।
जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः ।
पुनन्ति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचम् ।।५।।
यान्वो नरो देवयन्तो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ।
ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषन्तु रत्नम् ।।६।।
ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः ।
ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः ।।७।।
आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम् ।
सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम् ।।८।।
हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।
उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यन्ति पाथः ।।९।।
शृंगाणीवेच्छृंगिणां सं ददृश्रे चषालवन्तः स्वरवः पृथिव्याम् ।
बाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु ।।१०।।
वनस्पते शतवल्शो वि रोह सहस्रवलशा वि वयं रुहेम ।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ।।११।।

८३. विहव्यः – ऋ. १०.१२८.१–९

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ।।१।।
मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन् ।।2।।
मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहुतिः ।
दैव्या होतारो वनुषन्त पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः ।।३।।
मह्यं यजन्तु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता नः ।।४।।
देवीः षळुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वम् ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ।।५।।
अग्ने मन्युं प्रतिनुदन्परेषामदब्धो गोपाः परि पाहि नस्त्वम् ।
प्रत्यंचो यन्तु निगुतः पुनस्ते३ मैषां चित्तं प्रबुधां वि नेशत् ।।६।।
धाता धातॄणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहम् ।
इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात् ।।७।।
उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः ।

स नः प्रजायै हर्यश्व मृळयेन्द्र मा नो रीरिषो मा परा दाः ।।८।।
ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ।।६।।

८४. वृहदुक्थो वामदेव्यः – ऋ. १०.५६.१–७

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्व१श्चरुरेधि प्रियो देवानां परमे जनित्रे ।।१।।
तनूष्टे वाजिन्तन्वं१ नयन्ती वाममस्मभ्यं धातु शर्म तुभ्यम् ।
अह्रुतो महो धरुणाय देवान्दिवीव ज्योतिः स्वमा भिमीयाः ।।2।।
वाज्यसि वाजिनेना सुवेनीः सुवितः स्तोमं सुवितो दिवं गाः ।
सुवितो धर्म प्रथमानु सत्या सुवितो देवान्त्सुवितोऽनु पत्म ।।३।।
महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुम् ।
समविव्यचुरुत यान्यत्विषुरैषां तनूषु नि विविशुः पुनः ।।४।।
सहोभिर्विश्वं परि चक्रमू रजः पूर्वा धामान्यमिता मिमानाः ।
तनू षु विश्वा भुवना नि येमिरे प्रासारयन्त पुरुध प्रजा अनु ।।५।।
द्विधा सूनवोऽसुरं स्वर्विदमास्थापयन्त तृतीयेन कर्मणा ।
स्वां प्रजां पितरः पित्र्यं सह आवरेष्वदधुस्तन्तुमाततम् ।।६।।
नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा ।
स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधादा परेषु ।।७।।

८५. शन्तातिः – अ. ६.५६.१; ४.१३.१–७

अ. ६.५६.१

मा नो देवा अहिर्वधीत् सतोकान्त्सहपूरुषान् ।
संयतं न वि ष्परद् व्यात्तं न सं यमन्नमो देवजनेभ्यः ।।१।।

अ. ४.१३.१–७

उत देवा अवहितं देवा उन्नयथा पुनः ।
उतागश्चक्रुषं देवा देवा जीवयथा पुनः ।।१।।
द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।
दक्षं ते अन्य आवातु व्य१न्यो वातु यद् रपः ।।2।।
आ वात वाहि भेषजं वि वात वाहि यद् रपः ।
त्वं हि विश्वभेषज देवानां दूत ईयसे ।।३।।
त्रायन्तामिमं देवास्त्रायन्तां मरुतां गणाः ।
त्रायन्तां विश्वा भूतानि यथायमरपा असत् ।।४।।
आ त्वागमं शन्तातिभिरथो अरिष्टतातिभिः ।
दक्षं त उग्रमाभारिषं परा यक्ष्मं सुवामि ते ।।५।।
अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ।।६।।
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।
अनामयित्नुभ्यां हस्ताभ्यां ताभ्यां त्वाभि मृशामसि ।।७।।

८६. शार्यातो मानवः – ऋ. १०.६2.१–१५

यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरतिथिं विभावसुम् ।
शोचंछुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो द्यामशायत ।।१।।
इममंजस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।
अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते ।।2।।
बळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरत्तवे ।

यदा घोरासो अमृतत्वमाशतादिज्जनस्य दैव्यस्य चर्किरन् ।।३।।
ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्य१रमतिः पनीयसी ।
इन्द्रो मित्रो वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः ।।४।।
प्र रुद्रेण ययिना यन्ति सिन्धवस्तिरो महीमरमतिं दधन्विरे ।
येभिः परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते ।।५।।
क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः ।
तेभिश्चष्टे वरुणो मित्रो अर्यमेन्द्रो देवेभिरर्वशेभिरर्वशः ।।६।।
इन्द्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च पौंस्ये ।
प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः ।।७।।
सुरश्चिदा हरितो अस्य रीरमदिन्द्रादा कश्चिद्भयते तवीयसः ।
भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरिः स्तन्नबाधितः ।।८।।
स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन ।
येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः ।।६।।
ते हि प्रजाया अभरन्त वि श्रवो बृहस्पतिर्वृषभः सोमाजामयः ।
यज्ञैरथर्वा प्रथमो वि धारयद्देवा दक्षैर्भृगवः सं चिकित्रिरे ।।१०।।
ते हि द्यावापृथिवी भूरिरेतसा नराशंसश्चतुरंगो यमोऽदितिः ।
देवस्त्वष्टा द्रविणोदा ऋभुक्षणः प्र रोदसी मरुतो विष्णुरर्हिरे ।।११।।
उत स्य न उशिजामुर्विया कविरहिः शृणोतु बुध्न्यो३ हवीमनि ।
सूर्यामासा विचरन्ता दिविक्षिता धिया शमीनहुषी अस्य बोधतम् ।।12।।
प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये ।
आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम् ।।१३।।
विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि ।
ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिम् ।।१४।।
रेभदत्र जनुषा पूर्वो अंगिरा ग्रावाण ऊर्ध्वा अभि चक्षुरध्वरम् ।
येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्वनन्वति ।।१५।।

८७. शिरिम्बिठोभारद्वाजः – ऋ. १०.१५५.५

परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ।।५।।

८८. सदापृण आत्रेयः – ऋ. ५.४५.१–११

विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः ।
अपावृत व्रजिनीत्स्वर्गाद्वि दुरो मनुषीर्देव आवः ।।१।।
वि सूर्यो अमतिं न श्रियं सादोर्वाद् गवां माता जानती गात् ।
धन्वर्णसो नद्य१ः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः ।।2।।
अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।
वि पर्वतो जिहीत साधत द्यौराविवासन्तो दसयन्त भूम ।।३।।
सूक्तेभिर्वो वचोभिर्देवजुष्टैरिन्द्रा न्व१ग्नी अवसे हुवध्यै ।
उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति ।।४।।
एतो न्व१द्य सुध्यो३ भवाम प्र दुच्छुना मिनवामा वरीयः ।
आरे द्वेषांसि सनुतर्दधामायाम प्रांचो यजमानमच्छ ।।५।।
एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः ।
यया मनुर्विशिशिप्रं जिगाय यया वणिग्वङ्कुरापा पुरीषम् ।।६।।
अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो नवग्वाः ।
ऋतं यती सरमा गा अविन्दद्विश्वानि सत्यांगिरश्चकार ।।७।।

विश्वे अस्या व्युषि महिनायाः सं यद् गोभिरंगिरसो नवन्त ।
उत्स आसां परमे सधस्थ ऋतस्य पथा सरमा विदद् गाः ।।८।।
आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे ।
रघुः श्येनः पतयदन्धो अच्छा युवा कविर्दीदयद् गोषु गच्छन् ।।६।।
आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः ।
उद्ना न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन् ।।१०।।
धियं वो अप्सु दधिषे सवर्षां ययातरन्दश मासो नवग्वाः ।
अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः ।।११।।

८६. **सध्रिर्वैरुपो धर्मोगवा तापसः – ऋ. १०.११४.१–१०**

घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।
दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कम् ।।१।।
तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानन्ति वह्नयः ।
तासां नि चिक्युः कवयो निदानं परेषु या गुह्येषु व्रतेषु ।।2।।
चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ।
तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम् ।।३।।
एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसापश्यमन्तितस्तं माता रेळिह स उ रेळिह मातरम् ।।४।।
सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।
छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्यं मिमते द्वादश ।।५।।
षट्त्रिंशाँश्च चतुरः कल्पयन्तश्छन्दांसि च दधत आद्वादशम् ।
यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयन्ति ।।६।।
चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त ।
आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबन्ते सुतस्य ।।७।।
सहस्रधा पंचदशान्युक्था यावद् द्यावापृथिवी तावदित्तत् ।
सहस्रधा महिमानः सहस्रं यावद् ब्रह्म विष्ठितं तावती वाक् ।।८।।
कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद ।
कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित् ।।६।।
भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः।
श्रमस्य दायं वि भजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः ।।१०।।

६०. **सप्तर्षयः एकर्चाः – ऋ. १०.१३७.१–७**

उत देवा अवहितं देवा उन्नयथा पुनः ।
उतागश्चक्रुषं देवा देवा जीवयथा पुनः ।।१।।
द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।
दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः ।।2।।
आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ।।३।।
आ त्वागमं शन्तातिभिरथो अरिष्टतातिभिः ।
दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते ।।४।।
त्रायन्तामिह देवास्त्रायतां मरुतां गणः ।
त्रायन्तां विश्वा भूतानि यथायमरपा असत् ।।५।।
आप इद्वा उ भेषजीरापो अमीवचातनीः ।
आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ।।६।।
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ।
अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि ।।७।।

६1. सप्रथो भारद्वाजः – ऋ. १०.१८1.2

अविन्दन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् ।
धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ।।2।।

६2. सुहोत्रः – य. ३३.५३; ७७

य. ३३.५३

विश्वे देवाः श्रृणुतेमं हवं मे येऽअन्तरिक्षे यऽउप द्यवि ष्ठ ।
येऽअग्निजिह्वाऽउत वा यजत्राऽआसद्यास्मिन् बर्हिषि मादयध्वम् ।।५३।।

य. ३३.७७

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः ।।७७।।

६३. स्वस्त्यात्रेयः – ऋ. ५.५०.१–५; ५.५१.१–१५; य. 21.१७–21; 2४; 2६; 2८

ऋ. ५.५०.१–५

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ।।१।।
ते ते देव नेतर्ये चेमाँ अनुशसे ।
ते राया ते ह्या३ पृचे सचेमहि सचथ्यैः ।।2।।
अतो न आ नॄनतिथीनतः पत्नीर्दशस्यत ।
आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः ।।३।।
यत्र वह्निरभिहितो दुद्रवद् द्रोण्यः पशुः ।
नृमणा वीरपस्त्योऽर्णा धीरेव सनिता ।।४।।
एष ते देव नेता रथस्पतिः शं रयिः ।
शं राये शं स्वस्तयइषःस्तुतो मनामहे देवस्तुतो मनामहे ।।५।।

ऋ. ५.५१.१–१५

अग्ने सुतस्य पीतये विश्वेरूमभिरा गहि। देवेभिर्हव्यदातये ।।१।।
ऋतधीतय आ गत सत्यधर्माणो अध्वरम्। अग्नेः पिबत जिह्वया ।।2।।
विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि। देवेभिः सोमपीतये ।।३।।
अयं सोमश्चमू सुतोऽमत्रे परि षिच्यते। प्रिय इन्द्राय वायवे ।।४।।
वायवा याहि वीतये जुषाणो हव्यदातये। पिबा सुतस्यान्धसो अभि प्रयः ।।५।।
इन्द्रश्च वायवेषां सुतानां पीतिमर्हथः। तांजुषेथामरेपसावभि प्रयः ।।६।।
सुता इन्द्राय वायवे सोमासो दध्याशिरः। निम्नं न यन्ति सिन्धवोऽभि प्रयः ।।७।।
सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः। आ याह्यग्ने अत्रिवत्सुते रण ।।८।।
सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना। आ याह्यग्ने अत्रिरवत्सुते रण ।।९।।
सजूरादित्यैर्वसुभिः सजूरिन्द्रेण वायुना। आ याह्यग्ने अत्रिवत्सुते रण ।।१०।।
स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ।।११।।
स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तये आदित्यासो भवन्तु नः ।।१2।।
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ।।१३।।
स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चरग्निश्च स्वस्ति नो अदिते कृधि ।।१४।।

स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव। पुनर्ददताघ्नता जानता सं गमेमहि ।।१५।।

य. २१.१७–२१

उषे यह्वी सुपेशसा विश्वे देवाऽअमर्त्याः ।
त्रिष्टुप् छन्दऽइहेन्द्रियं पष्ठवाड् गौर्वयो दधुः ।।१७।।
दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ।
जगती छन्दऽइन्द्रियमनडवान् गौर्वयो दधुः ।।१८।।
तिस्रऽइडा सरस्वती भारती मरुतो विशः ।
विराट् छन्दऽइहेन्द्रियं धेनुर्गौर्न वयो दधुः ।।१९।।
त्वष्टा तुरीपोऽअद्भुतऽइन्द्राग्नी पुष्टिवर्धना ।
द्विपदा छन्दऽइन्द्रियमुक्षा गौर्न वयो दधुः ।।२०।।
शमिता नो वनस्पतिः सविता प्रसुवन् भगम् ।
ककुप् छन्दऽइहेन्द्रियं वशा वेहद्वयो दधुः ।।२१।।

य. २१.२४

ग्रीष्मेणऽऋतुना देवा रुद्राः पंचदशे स्तुताः ।
बृहता यशसा बलं हविरिन्द्रे वयो दधुः ।।२४।।

य. २१.२६

शारदेनऽऋतुना देवाऽएकविंश ं ऋभव स्तुताः ।
वैराजेन श्रिया श्रियं हविरिन्द्रे वयो दधुः ।।२६।।

य. २१.२८

शैशिरेणऽऋतुना देवास्त्रयस्त्रिंशेऽमृता स्तुताः।
सत्येन रेवतीः क्षत्रं हविरिन्द्रे वयो दधुः ।।२८।।

७७२. विश्वेदेवाः (साग्री. सास्वा.); इन्द्रः (सार्षेदी.)

१.कवष ऐलूषः (साग्री. सास्वा.)ए वामदेवः (सार्षेदी.) – सा. ४५३

वि स्रुतयो यथा पथा इन्द्र त्वद्यन्तु रातयः ।।७।।

७७३. विश्वेदेवाः इन्द्रः

१. वसिष्ठः – अ. ३.१९.१–८

संशितं म इदं ब्रह्म संशितं वीर्यं१ बलम्। संशितं क्षत्रमजरमस्तु जिष्णु येषामस्मि पुरोहितः ।।१।।
समहमेषां राष्ट्रं श्यामि समोजो वीर्यं१ बलम्। वृश्चामि शत्रूणां बाहूननेन हविषाहम् ।।२।।
नीचैः पद्यन्तामधरे भवन्तु ये नः सूरिं मघवानं पृतन्यान् ।
क्षिणामि ब्रह्मणामित्रानुन्नयामि स्वानहम् ।।३।।
तीक्ष्णीयांसः परशोरग्नेस्तीक्ष्णतरा उत। इन्द्रस्य वज्रात् तीक्ष्णीयांसो येषामस्मि पुरोहितः ।।४।।
एषामहमायुधा सं श्याम्येषां राष्ट्रं सुवीरं वर्धयामि ।
एषां क्षत्रमजरमस्तु जिष्ण्वे३षां चित्तं विश्वेऽवन्तु देवाः ।।५।।
उद्धर्षन्तां मघवन् वाजिनान्युद् वीराणां जयतामेतु घोषः ।
पृथग् घोषा उलुलयः केतुमन्त उदीरताम्। देवा इन्द्रजयेष्ठा मरुतो यन्तु सेनया ।।६।।
प्रेता जयता नर उग्रा वः सन्तु बाहवः। तीक्ष्णेषवोबलधन्वनो हतोग्रायुधा अबलानुग्रबाहवः ।।७।।
अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते। जयामित्रान् प्र पद्यस्व जह्येषां वरंवरं मामीषां मोचि कश्चन।।८।।

७७४. विश्वेदेवाः गृहपतयः

१. अत्रिः – य. ८.१७; १९

य. ८.१७

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवोऽअग्निः ।
त्वष्टा विष्णुः प्रजया सं रराणा यजमानाय द्रविणं दधात स्वाहा ।।१७।।

य. ८.१९

यँ 2ऽआवहऽउशतो देव देवाँस्तान् प्रेरय स्वे ऽअग्ने सधस्थे ।
जक्षिवांसः पपिवांसश्च विश्वेऽसुं घर्म्मं स्वरातिष्ठतानु स्वाहा ।।१६।।

2. **भरद्वाजः – य. ८.८**

उपयामगृहीतोऽसि सुशर्म्मासि सुप्रतिष्ठानो बृहदुक्षाय नमः ।
विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।।८।।

७७५. विश्वेदेवाः गृहस्थाः

१. **वसिष्ठः – य. ८.५६**

प्रोह्यमाणः सोम आगतो वरुण आसन्द्यामासन्नो ऽग्निराग्नीध्र इन्द्रो
हविर्धानेऽथर्वोपावह्रियमाणः ।।५६।।

७७६. विश्वेदेवाः बृहस्पतिः

१. **ब्रह्म – अ. १६.४०.१–४**

यन्मे छिद्रं मनसो यच्च वाचः सरस्वती मन्युमन्तं जगाम ।
विश्वैस्तद् देवैः सह संविदानः सं दधातु बृहस्पतिः ।।१।।
मा न आपो मेधां मा ब्रह्म प्र मथिष्टन ।
शुष्यदा यूयं स्यन्दध्वमुपहूतोऽहं सुमेधा वर्चस्वी ।।2।।
मा नो मेधां मा नो दीक्षां मा नो हिंसिष्टं यत् तपः ।
शिवा नः शं सन्त्वायुषे शिवा भवन्तु मातरः ।।३।।
या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः। तामस्मे रासतामिषम् ।।४।।

७७६अ. विश्वेदेवाः बृहस्पतिः वर्चः

१. **वसिष्ठः – अ. ३.22.१–६**

हस्तिवर्चसं प्रथतां बृहद् यशो अदित्या यत् तन्वः संबभूव ।
तत् सर्वे समदुर्मह्यमेतद् विश्वे देवा अदितिः सजोषाः ।।१।।
मित्रश्च वरुणश्चेन्द्रो रुद्रश्च चेततु। देवासो विश्वधायसस्ते मांजन्तु वर्चसा ।।2।।
येन हस्ती वर्चसा संबभूव येन राजा मनुष्येष्वप्स्व१न्तः ।
येन देवा देवतामग्र आयन् तेन मामद्य वर्चसाग्ने वर्चस्विनं कृणु ।।३।।
यत् ते वर्चो जातवेदो बृहद् भवत्याहुतेः ।
यावत् सूर्यस्य वर्च आसुरस्य च हस्तिनः। तावन्मे अश्विना वर्च आ धत्तां पुष्करस्रजा ।।४।।
यावच्चतस्रः प्रदिशश्चक्षुर्यावत् समश्नुते। तावत् समैत्विन्द्रियं मयि तद्धस्तिवर्चसम् ।।५।।
हस्ती मृगाणां सुषदामतिष्ठावान् बभूव हि। तस्य भगेन बर्चसाऽभि षिंचामि मामहम् ।।६।।

७७७. विषम्

१. **गरुत्मान् – अ. ४.६.४–८**

यस्त आस्यत् पंचाङ्गुरिर्वक्राच्चिदधि धन्वनः। अपस्कम्भस्य शल्यान्निरवोचमहं विषम् ।।४।।
शल्याद् विषं निरवोचं प्रांजनादुत पर्णधेः। अपाष्ठाच्छृङ्गात् कुल्मलान्निरवोचमहं विषम् ।।५।।
अरसस्त इषो शल्योऽथो ते अरसं विषम्। उतारसस्य वृक्षस्य धनुष्टे अरसासरसम् ।।६।।
ये अपीषन् ये अदिहन् ये आस्यन् ये अवासृजन्। सर्वे ते वध्रयः कृता वाध्रिर्विषगिरिः कृतः।।७।।
वध्रयस्ते खनितारो वध्रिस्त्वमस्योषधे। वध्रिः स पर्वतो गिरिर्यतो जातमिदं विषम् ।।८।।

७७८. विषनिवारणम्

१. **गरुत्मान् – अ. ६.१2.१–३**

परि द्यामिव सूर्योऽहीनां जनिमागमम्। रात्री जगदिवान्यद्धंसात् तेना ते वारये विषम् ।।१।।
यद् ब्रह्मभिर्यदृषिभिर्यद् देवैर्विदितं पुरा। यद् भूतं भव्यमासन्वत् तेना ते वारये विषम् ।।2।।
मध्वा पृंचे नद्य१ः पर्वता गिरयो मधु। मधु परुष्णी शीपाला शमास्ने अस्तु शं हृदे ।।३।।

७७६. विष्णुः

१. आगस्त्यः अग्रे द्रष्टव्यम् – य. ५.३८; ४१

य. ५.३८

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ।।३८।।

य. ५.४१

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ।।४१।।

2. गोतमः – य. ५.१–2; १३.३३

य. ५.१–2

अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वाऽतिथेरातिथ्यमसि विष्णवे त्वावा श्येनाय
तवा सोमभृते विष्णवे त्वाऽग्नये त्वा रायस्पोषदे विष्णवे त्वा ।।१।।
अग्नेर्जनित्रमसि वृषणौ स्थऽउर्वश्यस्यायुरसि पुरूरवाऽअसि। गायत्रेण त्वा छन्दसा मन्थामि
त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि ।।2।।

य. १३.३३

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ।।३३।।

३. दीर्घतमा – य. ६.३

या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृंगाऽअयासः ।
अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरि।
ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्य्यूहामि।
ब्रह्म दृंह क्षत्रं दृंहायुर्दृंह प्रजां दृंह ।।३।।

४. दीर्घतमा औचथ्यः – ऋ. १.१५४.१–६; १.१५५.१–६; १.१५६.१–५

ऋ. १.१५४.१–६

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विमसे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ।।१।।
प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।।2।।
प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ।।३।।
यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ।।४।।
तदस्य प्रियमभि पाथे अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ।।५।।
ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः ।
अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ।।६।।

ऋ. १.१५५.१–६

प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत ।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ।।१।।
त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति ।
या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ।।2।।
ता ईं वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे ।
दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ।।३।।
तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः ।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ।।४।।

द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति ।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ।।५।।
चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं वयतीँरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रतयेत्याहवम् ।।६।।

ऋ. १.१५६.१–५

भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः ।
अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ।।१।।
यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।
यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ।।2।।
तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।
आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ।।३।।
तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः ।
दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते ।।४।।
आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः ।
वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ।।५।।

५. दीर्घतमा औतथ्यः – य. ५.१८–2१

विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ।
योऽअस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ।।१८।।
दिवो वा विष्णऽउत वा पृथिव्या महो वा विष्णऽउरोरन्तरिक्षात्।
उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ।।१९।।
प्र तद्विष्णु स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणे ष्वधिक्षियन्ति भुवनानि विश्वा ।।2०।।
विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोऽर्ध्रुवोऽसि ।
वैष्णवमसि विष्णवे त्वा ।।2१।।

६. परमेष्ठी प्रजापतिः – य. १.४; ९; 2.६; ८

य. १.४

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भागं सोमेनातनच्मि विष्णो हव्यं रक्ष ।।४।।

य. १.९

अह्रुतमसि हविर्धानं दृंहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ।
विष्णुस्त्वा क्रमतामुरु वातायापहतं रक्षो यच्छन्तां पंच ।।९।।

य. 2.६

घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रियं सद ऽ आसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रियं सदऽ आसीद घृताचयसि ध्रुवा नाम्ना सेदं प्रियेण धाम्ना प्रियं सद ऽ आसीद प्रियेण धाम्ना प्रियं सदऽ आसीद। ध्रुवा ऽ असदन्नृतस्य योनौ ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम् ।।६।।

य. 2.८

अस्कन्नमद्य देवेभ्य ऽ आजयं संभ्रियासमंघ्रिणा विष्णो मा त्वावक्रमिषं वसुमतीमग्ने ते च्छायामुपस्थेषं विष्णो स्थानमसीत ऽ इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर ऽ आस्थात् ।।८।।

७. ब्रह्म – अ. ५.2६.७

विष्णुर्युनक्तु बहुधा तपांस्यस्मिन् यज्ञे सुयुजः स्वाहा ।।७।।

८. मेधातिथिः – अ. ७.2५.१–2; ७.2६.१–८

अ. ७.2५.१–2

ययोरोजसा स्कभिता रजांसि यौ वीर्यै वीरतमा शविष्ठा ।
यौ पत्येते अप्रतीतौ सहोभिर्विष्णुमगन् वरुणं पूर्वहूतिः ।।१।।
यस्येदं प्रदिशि यद् विरोचते प्र चानति वि च चष्टे शचीभिः पुरा देवस्य
धर्मणा सहोभिर्विष्णुमगन्वरुणं पूर्वहूतिः ।।2।।

अ. ७.2६.१–८

विष्णोर्नु कं प्रा वोचं वीर्याणि यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ।।१।।
प्र तद् विष्णु स्तवते वीर्या णि मृगो न भीमः कुचरो गिरिष्ठाः।
परावत आ जगम्यात् परस्याः ।।2।।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।
उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर ।।३।।
इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा। समूढमस्य पांसुरे ।।४।।
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। इतो धर्माणि धारयन् ।।५।।
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ।।६।।
तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिविव चक्षुराततम् ।।७।।
दिवो विष्ण उत वा पृथिव्या मही विष्ण उरोरन्तरिक्षात् ।
हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात् ।।८।।

९. मेधातिथिः काण्वः – ऋ. १.22.१७–2१; सा. १६६९–१६७३

ऋ. १.22.१७–2१

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूळहमस्य पांसुरे ।।१७।।
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन् ।।१८।।
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ।।१९।।
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ।।2०।।
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम् ।।2१।।

सा. १६६९–१६७३

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पांसुले ।।१।।
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन् ।।2।।
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ।।३।।
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ।।४।।
तद्विप्रासो विपन्जुवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम् ।५।।

१०. वसिष्ठः – ऋ. ७.९९.१–३; ७; ७.१००.१–७

ऋ. ७.९९.१–३

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ।।१।।
न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप ।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः ।।2।।
इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या ।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः ।।३।।

ऋ. ७.९९.७

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।

वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ।।७।।

ऋ. ७.१००.१–७

नू मर्तो दयते सनिष्यन्यो विष्णव उरुगायाय दाशत् ।
प्र यः सत्राचा मनसा यजात एतावन्त नर्यमाविवासात् ।।१।।
त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः ।
पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ।।2।।
त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ।।३।।
वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ।।४।।
प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ।।५।।
किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ।।६।।
वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ।।७।।

११. वासिष्ठो मैत्रावरुणिः – सा. १६2५–१६2७

किमित्ते विष्णो परिचक्षि नाम प्र यद्ववक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ।।१।।
प्र तत्ते अद्य शिपिविष्ट हव्यमर्यः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्त मस्य रजसः पराके ।।2।।
वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ।।३।।

१2. वामदेवः – य. 2.2५

दिवि विष्णुर्व्यक्रंस्त जागतेन च्छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मो ऽन्तरिक्षे
विष्णुर्व्यक्रंस्त त्रैष्टुभेन च्छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मः पृथिव्यां
विष्णुर्व्य क्रंस्त गायत्रेण च्छन्दसा ततो निर्भक्तो योस्मान्द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै
प्रतिष्ठायाऽअगन्म स्वः सं ज्योतिषाभूम ।।2५।।

१३. श्यावाश्वः – य.१2.५

विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्दऽआरोह पृथिवीमनु विक्रमस्व विष्णोः क्रमोऽस्यभिमातिहा
त्रैष्टुभं छन्दऽआरोहान्तरिक्षमनु विक्रमस्व विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्दऽआरोह
दिवमनु विक्रमस्व विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभं छन्दऽआरोह दिशोऽनु विक्रमस्व।।५।।

७८०. विष्णुर् देवा वा

१. मेधातिथिः काण्वः – ऋ. १.22.१६; सा. १६७४

ऋ. १.22.१६

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धामभिः ।।१६।।

सा. १६७४

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्या अधि सानवि ।।६।।

७८१. वीरः

१. बृहस्पतिः – य. ६.६

जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तोऽअचरच्च वाते ।
तेन नो वाजिन् बलवान् बलेन वाजजिच्च भव समने च पारयिष्णुः ।

वाजिनो वाजजितो वाजं सरिष्यन्तो बृहस्पतेर्भागमवजिघ्रत ।।६।।

2. **भरद्वाजः – य. २६.५२–५४**

वनस्पते वीड्वंगो हि भूयाऽअस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धोऽअसि वीडयस्वास्थाता ते जयतु जेत्वानि ।।५२।।
दिवः पृथिव्याः पर्योजऽउद्भृतं वनस्पतिभ्यः पर्य्याभृतं सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज ।।५३।।
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ।।५४।।

७८२. वीराः

१. **भरद्वाजः – य. २६.३९–४६; ४८–५०; ५५**

य. २६.३९–४६

धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ।।३९।।
वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वंज्या इयं समने पारयन्ती ।।४०।।
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ।।४१।।
बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः संका पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ।।४२।।
रथे तिष्ठन् नयति वाजिनः पुरो यत्र–यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ।।४३।।
तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः ।।४४।।
रथवाहणं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ।।४५।।
स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेनाः इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ।।४६।।

य. २६.४८–५०

सुपर्णं वस्ते मृगोऽअस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ।।४८।।
ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः ।
सोमोऽअधि ब्रवीतु नोऽदितिः शर्म यच्छतु ।।४९।।
आ जङ्घन्ति सान्वेषां जघनाँ२ऽ उप जिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ।।५०।।

य. २६.५५

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ।।५५।।

७८३. वीरुधः

१. **अथर्वा – अ. ४.१५.२–३**

समीक्षयन्तु तविषाः सुदानवोऽपां रसा ओषधीभिः सचन्ताम् ।
वर्षस्य सर्गा महयन्तु भूमिं पृथग् जायन्तामोषधयो विश्वरूपाः ।।२।।
समीक्षयस्व गायतो नभांस्यपां वेगासः पृथगुद् विजन्ताम् ।
वर्षस्य सर्गा महयन्तु भूमिं पृथग् जायन्तां वीरुधो विश्वरूपाः ।।३।।

७८४. वृश्चिकादयः

१. अथर्वा – अ. ७.५६.१; ३; ५–८

अ. ७.५६.१

तिरश्चिराजेरसितात् पृदाकोः परि संभृतम्। तत् कङ्कपर्वणो विषमियं वीरुदनीनशत् ।।१।।

अ. ७.५६.३

यतो दष्टं यतो धीतं ततस्ते निर्ह्वयामसि। अर्भस्य तृप्रदंशिनो मशकस्यारसं विषम् ।।३।।

अ. ७.५६.५–८

अरसस्य शर्कोटस्य नीचीनस्योपसर्पतः। विषं ह्य१स्यादिष्यथो एनमजीजभम् ।।५।।
न ते बाह्वोर्बलमस्ति न शीर्षे नोत मध्यतः। अथ किं पापयामुया पुच्छे बिभर्ष्यर्भकम् ।।६।।
अदन्तिं त्वा पिपीलिका वि वृश्चन्ति मयूर्यः। सर्वे भल ब्रवाथ शर्कोटमरसं विषम् ।।७।।
य उभाभ्यां प्रहरसि पुच्छेन चास्येन च। आस्ये३ न ते विषं किमु ते पुच्छधावसत् ।।८।।

७८५. वृषभः स्वापनम्

१. ब्रह्म – अ. ४.५.१–७

सहस्रशृंगो वृषभे यः समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ।।१।।
न भूमिं वातो अति वाति नाति पश्यति कश्चन ।
स्त्रियश्च सर्वाः स्वापय शुनश्चेन्द्रसखा चरन् ।।2।।
प्रोष्ठेशयास्तल्पेशया नारीर्या बह्यशीवरीः ।
स्त्रियो याः पुण्यगन्धयस्ताः सर्वाः स्वापयामसि ।।३।।
एजदेजदजग्रभं चक्षुः प्राणमजग्रभम् ।
अंगान्यजग्रभं सर्वा रात्रीणामतिशर्वरे ।।४।।
या आस्ते यश्चरति यश्च तिष्ठन् विपश्यति ।
तेषां सं दध्मो अक्षीणि यथेदं हर्म्यं तथा ।।५।।
स्वप्तु माता स्वप्तु पिता स्वप्तु श्वा स्वप्तु विश्पतिः ।
स्वपन्त्वस्यै ज्ञातयः स्वप्त्वयमभितो जनः ।।६।।
स्वप्न स्वप्नाभिकरणेन सर्वं नि ष्वापया जनम् ।
ओत्सूर्यमन्यान्त्स्वापयाव्युषं जागृतादहमिन्द्रइवारिष्टो अक्षितः ।।७।।

७८६. वृषा

१. वरुणः – य. १०.2

वृष्णऽऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्णऽऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि।।2।।

७८७. वेदः

१. मेधातिथिः – य. ६.४–५; ५.१५; अ. ७.2८.१

य. ६.४–५

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ।।४।।
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ।।५।।

य. ५.१५

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पांसुरे स्वाहा ।।१५।।

अ. ७.2८.१

वेदः स्वस्तिर्द्रुघणः स्वसितः परशुर्वेदिः परर्शुर्नः स्वस्ति ।
हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो यज्ञमिमं जुषन्ताम् ।।१।।

७८८. वेदिः

१. अथर्वा – अ. ७.६६.१

परि स्तृणीहि परि धेहि वेदिं मा जामिं मोषीरमुया शयानाम् ।

होतृषदनं हरितं हिरण्ययं निष्का एते यजमानस्य लोके ।।१।।

७८६. वैद्यः

१. भिषग् – य. १२.७५–७७; ७६; ८१; ८५–८७

य. १२.७५–७७

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च ।।७५।।
शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अधा शतक्रत्वो यूयमिमं मेऽअगदं कृत ।।७६।।
ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः। अश्वाऽइव सजित्वरीर्वीरुधः पारयिष्ण्वः ।।७७।।

य. १२.७६

अश्वत्थे वो वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम् ।।७६।।

य. १२.८१

अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्। अऽवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ।।८१।।

य. १२.८५–८७

यदिमा वाजयन्नहमोषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ।।८५।।
यस्यौषधीः प्रसर्पथांगमंग परुष्परुः। ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ।।८६।।
साकं यक्ष्म प्र पत चाषेण किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया।।८७।।

७६०. वैद्याः

१. भिषग् – य. १२.८३–८४; ८८–६०

य. १२.८३–८४

इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः। सीराः पतत्रिणी स्थन यदामयति निष्कृथ ।।८३।।
अति विश्वाः परिष्ठा स्तेनऽइव व्रजमक्रमुः। ओषधीः प्राचुच्यवुर्यत्कि च तन्वो रपः ।।८४।।

य. १२.८८–६०

अन्या वोऽअन्यामवत्वन्यान्यस्याऽउपावत। ताः सर्वा संविदानाऽइदं मे प्रावता वचः ।।८८।।
याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः ।।८६।।
पुंचन्तु मा शपथ्यादथो वरुण्यादुत। अथो यमस्य पड्वीशात्सर्वस्माद् देवकिल्विषात् ।।६०।।

2. वरुणः – य. १२.६१–६३; ६५; ६६; ६८; १००

य. १२.६१–६३

अवपतन्तीरवदन्दिवऽओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः ।।६१।।
याऽओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः। तासामसि त्वमुत्तमारं कामाय शं हृदे ।।६2।।
याऽओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु। बृहस्पतिप्रसूताऽअस्यै संदत्त वीर्य्यम् ।।६३।।

य. १२.६५–६६

मा वो रिषत् खनिता यस्मै चाहं खनामि वः। द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम् ।।६५।।
ओषधयः समवदन्त सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ।।६६।।

य. १२.६८

त्वां गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत।।६८।।

य. १२.१००

दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूतवा शतवल्शा वि रोहतात् ।।१००।।

७६१. वेनः

१. वेनः – ऋ. १०.१२३.१–८

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ।।१।।
समुद्रादूर्मिमुदियर्ति वेना नभोजाः पृष्ठं हर्यतस्य दर्शि ।

ऋतस्य सानावधि विष्टपि भ्राट् समानं योनिमभ्यनूषत व्राः ।।2।।
समानं पूर्वीरभि वावशानास्तिष्ठन्वत्सस्य मातरः सनीळाः ।
ऋतस्य सानावधि चक्रमाणा रिहन्ति मध्वो अमृतस्य वाणीः ।।३।।
जानन्तो रूपमकृषन्त विप्रा मृगस्य घोषं महिषस्य हि ग्मन् ।
ऋतेन यन्तो अधि सिन्धुमस्थुर्विदद्गन्धर्वो अमृतानि नाम ।।४।।
अप्सरा जानमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन् ।
चरत्प्रियस्य योनिषु प्रियः सन्त्सीदत्पक्षे हिरयये स वेनः ।।५।।
नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ।।६।।
ऊर्ध्वो गन्ध्र्वो अधि नाके अस्थात्प्रत्यङ् चित्रा बिभ्रदस्यायुधानि ।
वसानो अत्कं सुरभिं दृशे कं स्व१र्ण नाम जनत प्रियाणि ।।७।।
द्रप्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् ।
भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ।।८।।

2. वेनो भार्गवः – सा. ३2०; १८४६–१८४८

सा. ३2०

नाके सुपर्णमुप यत्पतन्त हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ।।८।।

सा. १८४६–१८४८

नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ।।१।।
ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि ।
वसानो अत्कं सुरभिं दृशे कं स्वा३र्ण नाम जनत प्रियाणि ।।2।।
द्रप्सः समुद्रमभि यज्जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन् ।
भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ।।३।।

३. सुनीतिः – य. ३३.2१

आ सुते सिंचत श्रियं रोदस्योरभि श्रियम्। रसा दधीत वृषभम्। तं प्रत्नथा। अयं वेनः ।।2१।।

७६2. वैश्वानरः

१. अथर्वा (पण्यकामः) – अ. ३.१५.७

उप त्वा नमसा वयं होतर्वैश्वानर स्तुमः। स नः प्रजास्वात्मसु गोषु प्राणेषु जागृहि ।।७।।

2. कुत्सः – य. 2६.८–६

वैश्वानरो नऽऊतयऽआ प्र यातु परावतः ।
अग्निरुक्थेन वाहसा। उपयाम गृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ।।८।।
अगिनर्ऋषिः पवमानः पंचजन्यः पुरोहितः। तमीमहे महागयम् ।
उपयामगृहीतोऽस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ।।६।।

३. कौशिकः – अ. ६.३५.१–३

वैश्वनरो न ऊतय आ प्र यातु परावतः। अग्निर्नः सुष्टुतीरुप ।।१।।
वैश्वनरो न आगमदिमं यज्ञं सजूरुप। अग्निरुक्थेष्वंहसु ।।2।।
वैश्वानरोऽंगिरसां स्तोममुक्थं च चाक्लृपत्। ऐषु द्यु स्यर्यमत् ।।३।।

४. प्रादुराक्षिः – य. 2६.६

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ।।६।।

५. **भरद्वाजः — य. ७.2५**

उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमऽएष ते योनिर्वैश्वानराय त्वा। ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि। अथा नऽइन्द्र इद्विशोऽसपत्नाः समनसस्करत् ।2५।

६. **भरद्वाजो बार्हस्पत्यः — ऋ. ६.७.१—७; ६.८.१—७; ६.९.१—७**

ऋ. ६.७.१—७

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ।।१।।
नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त ।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ।।2।।
त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः ।
वैश्वानर त्वमस्मासु धेहि वसूनि राजन्त्पृहयाय्याणि ।।३।।
त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ।।४।।
वैश्वानर तव तानि व्रतानि महान्यग्ने नकिरा दधर्ष ।
यज्जायमानः पित्रोरुपस्थेऽविन्दः केतुं वयुनेष्वह्नाम् ।।५।।
वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना ।
तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः ।।६।।
वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः ।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता ।।७।।

ऋ. ६.८.१—७

पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः ।
वैश्वानराय मतिर्नव्यसी शुचिः सोमइव पवते चारुरग्नये ।।१।।
स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ।
व्य१न्तरिक्षमिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् ।।2।।
व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदकृणोज्ज्योतिषा तमः ।
वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम् ।।३।।
अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियम् ।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ।।४।।
युगेयुगे विदथ्यं गृणद्भ्योग्ने रयिं यशसं धेहि नव्यसीम् ।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ।।५।।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ।।६।।
अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन् ।
रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ।।७।।

ऋ. ६.९.१—७

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ।।१।।
नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।
कस्य स्वित्पुत्र इह वक्त्वानि पुरो वदात्यवरेण पित्रा ।।2।।
स इत्तन्तुं स वि जानात्योतुं स वक्तवान्यृतुथा वदाति ।
य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन् ।।३।।
अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तोऽमतर्यस्तन्वा३ वर्धमानः ।।४।।
ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः ।

विश्वे देवाः समनसः सकेता एकं ऋतुमभि वि यन्ति साधु ।।५।।
वि मे कर्णा पतयतो वि चक्षुर्वी३ दं ज्योतिर्हृदय आहितं यत् ।
वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ।।६।।
विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसम् ।
बैश्वनरोऽवतूतये नोऽमर्त्योऽवतूतये नः ।।७।।

७. **मेधः – य. ३३.९२**

दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहन् ।
क्ष्मया वृधानऽओजसा चनोहितो ज्योतिषा बाधते तमः ।।९2।।

८. **वसिष्ठः – ऋ. ७.५.१–९; ७.६.१–७; ७.१३.१–३**

ऋ. ७.५.१–९

प्राग्नये तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः ।
यो विश्वेषाममृतानामुपस्थे वैश्वानरो वावृधे जागृवद्भिः ।।१।।
पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिन्धूनां वृषभः स्तियानाम्।
स मानुषीरभि विशा वि भाति वैश्वानरो वावृधानो वरेण ।।2।।
त्वद्भिया विश आयन्नसिक्नीरसमना जहतीर्भोजनानि ।
वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः ।।३।।
तव त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त ।
त्वं भासा रोदसी आ ततन्थाजस्रेण शोचिषा शोशुचानः ।।४।।
त्वामग्ने हरितो वावशााना गिरः सचन्ते धुनयो घृताचीः ।
पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम् ।।५।।
त्वं असुर्यं१ वसवो न्यृण्वन्क्रतुं हि ते मित्रमहो जुषन्त ।
त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय ।।६।।
स जायमानः परमे व्योमन्वायुर्न पाथः परि पासि सद्यः ।
त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन् ।।७।।
तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः ।
यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय ।।८।।
तं नो अग्ने मघवद्भ्यः पुरुक्षु रयिं नि वाजं श्रुत्यं युवस्व ।
वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः ।।९।।

ऋ. ७.६.१–७

प्र सम्राजो असुरस्य प्रशस्तिं पुसंः कृष्टीनामनुमाद्यस्य ।
इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ।।१।।
कविं केतुं धासिं भानुमद्रेर्हिन्वन्ति शं राज्यं रोदस्योः ।
पुरन्दरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि ।।2।।
न्यक्रतून् ग्रथिनो मृध्रवाचः पूणींरश्रद्धाँ अवृधाँ अयज्ञान् ।
प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून् ।।३।।
यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नुतमः शचीभिः ।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून् ।।४।।
यो देह्यो३ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार ।
स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ।।५।।
यस्य शर्मन्नुप विश्वसे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः ।
वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थम् ।।६।।
आ देवो ददे बुध्न्या३ वसूनि वैश्वानर उदिता सूर्यस्य ।
आ समुद्रादवरादा परस्माददाग्निर्ददे दिव आ पृथिव्याः ।।७।।

ऋ. ७.१३.१–३

प्राग्नये विश्वशुचे धियन्धेऽसुरघ्ने मन्म धीतिं भरध्वम् ।
भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम् ।।१।।
त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।
त्वं देवाँ अभिशस्तेरमुंचो वैश्वानर जातवेदो महित्वा ।।2।।
जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा ।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः ।।३।।

९. वामदेवो गौतमः – ऋ. ४.५.१–१५

वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृहद्भाः ।
अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः ।।१।।
मा निन्दत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान् ।
पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः ।।2।।
साम द्विबर्हा महि तिग्मभृष्टिः सहस्ररेता वृषभस्तुविष्मान् ।
पदं न गोरपगूळहं विविद्वानग्निर्मह्यं प्रेदु वोचन्मनीषाम् ।।३।।
प्र ताँ अग्निर्बभसत्तिग्मजम्भस्तपिष्ठेन शोचिषा यः सुराधाः ।
प्र ये मिनन्ति वरुणस्य धाम प्रिया मित्रस्य चेततो ध्रुवाणि ।।४।।
अभ्रातरो न योषणो व्यन्तः पतिरिपो न जनयो दुरेवाः ।
पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम् ।।५।।
इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म ।
बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु ।।६।।
तमिन्वेइव समना समानमभि क्रत्वा पुनती धीतिरश्याः ।
ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारु ।।७।।
प्रवाच्यं वचसः किं मे अस्य गुहा हितमुप निणिग्वदन्ति ।
यदुस्रियाणामप वारिव व्रन्पाति प्रियं रुपो अग्रं पदं वेः ।।८।।
इदमु त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः ।
ऋतस्य पदे अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद ।।९।।
अध द्युतानः पित्रो सचासामनुत गुह्यं चारु पृश्नेः ।
मातुष्पदे परमे अन्ति षद् गोर्वृष्णः शोचिषः प्रयतस्य जिह्वा ।।१०।।
ऋतं वोचे नमसा पृच्छ्यमानस्तवाशसा जातवेदो यदीदम् ।
त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत्पृथिव्याम् ।।११।।
किं नो अस्य द्रविणं कद्ध रत्नं वि नो वोचो जातवेदश्चिकित्वान् ।
गुहाध्वनः परमं यन्नो अस्य रेकु पदं न निदाना अगन्म ।।१2।।
का मर्यादा वयुना कद्ध वाममच्छा गमेम रघवो न वाजम् ।
कदा नो देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः ।।१३।।
अनिरेण वचसा फल्ग्वेन प्रतीत्येन कृधुनातृपासः ।
अधा ते अग्ने किमिहा वदन्त्यनायुधास आसता सचन्ताम् ।।१४।।
अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच।
रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत् ।।१५।।

१०. विश्वामित्रः – य. ३३.६०

नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ।
एमेनमवृधन्नमृताऽअमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ।।६०।।

११. विश्वामित्रो गाथिनः – ऋ. ३.2६.१–३

वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तो अनुषत्यं स्वर्विदम् ।

सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे ।।१।।
तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यम् ।
बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदम् ।।2।।
अश्वो न क्रन्दंजनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे ।
स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नमभृतेषु जागृविः ।।३।।

७६३. वैश्वानरादयः

१. अथर्वा – अ. ६.६2.१–३

वैश्वानरो रशिमभिर्नः पुनातु वातः प्राणेनेषिरो नभोभिः ।
द्यावापृथिवी पयसा पयस्वती ऋतावरी यज्ञिये नः पुनीताम् ।।१।।
वैश्वानरीं सूनृतामा रभध्वं यस्या आशास्तन्वो वीतपृष्ठाः ।
तया गृणन्तः सधमादेषु वयं स्याम् पतयो रयीणाम् ।।2।।
वैश्वानरीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।
इहेडया सधमादं मदन्तो ज्योक् पश्येम सूर्यमुच्चरन्तम् ।।३।।

७६४. वैश्वानरोऽग्निः

१. कुत्सः ऋ– य. 2६.७

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानमभि श्रीः। इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण। उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय तवा ।।७।।

2. कौशिकः (अनृणकामः) – अ. ६.११६.१–३

यददीव्यन्नृणमहं कृणोम्यदास्यन्नग्न उत संगृणामि ।
वैश्वनरो नो अधिपा वसिष्ठ उदिन्न्याति सुकृतस्य लोकम् ।।१।।
वैश्वानराय प्रति वेदयामि यद्यृणं संगरो देवतासु ।
स एतान् पाशान् वि चृतं वेद सर्वानथ पक्वेन सह सं भवेम ।।2।।
वैश्वानरः पविता मा पुनातु यत् संगरमभिधावाम्याशाम् ।
अनाजानन् मनसा याचमानो यत् तत्रैनो अप तत् सुवामि ।।३।।

७६५. श्रद्धा

१. श्रद्धा कामायनी – ऋ. १०.१५१.१–५

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि ।।१।।
प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः। प्रियं भोजेषु यज्वस्विदं म उदितं कृधि ।।2।।
यथा देवा असुरेषु श्रद्धामुगेषु चक्रिरे। एवं भोजेषु यज्वस्वस्माकमुदितं कृधि ।।३।।
श्रद्धा देवा यजमाना वायुगोपा उपासते। श्रद्धा हृदय्य१याकूत्या श्रद्धया विन्दते वसु ।।४।।
श्रद्धां प्रातर्हवामहे श्रद्धां मध्यन्दिनं परि। श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ।।५।।

७६६. शकधूमः

१. दीर्घतमा औचथ्यः – ऋ. १.१६४.४३

शकमयं धूमारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ।।४३।।

७६७. शकधूमः सोमः

१. अंगिराः – अ. ६.१2८.१–४

शकधूमं नक्षत्राणि यद् राजानमकुर्वत ।

भद्राहमस्मै प्रायच्छन्निदं राष्ट्रमसादिति ।।१।।
भद्राहं नो मध्यंदिने भद्राहं सायमस्तु नः ।
भद्राहं नो अह्नां प्रातां रात्री भद्राहमस्तु नः ।।2।।
अहोरात्रभ्यां नक्षत्रेभ्यः सूर्याचन्द्रमसाभ्याम् ।
भद्राहमस्मभ्यं राजंछकधूम त्वं कृधि ।।३।।
यो नो भद्राहमकरः सायं नक्तमथो दिवा ।
तस्मै ते नक्षत्रराज शकधूमं सदा नमः ।।४।।

७९८. शङ्खमणिः कृशनः

१. अथर्वा – अ. ४.१०.१–७

वाताज्जातो अन्तरिक्षाद् विद्युतो ज्योतिषस्परि ।
स नो हिरण्यजाः शङ्खः कृशनः पात्वंहसः ।।१।।
यो अग्रतो रोचनानां समुद्रादधि जज्ञिषे ।
शङ्खेन हत्वा रक्षांस्यत्त्रिणो वि षहामहे ।।2।।
शङ्खेनाभीवाममतिं शङ्खेनोत सदान्वाः ।
शङ्खो नो विश्वभेषजः कृशनः पात्वंहसः ।।३।।
दिवि जातः समुद्रजः सिन्धुतस्पर्याभृतः ।
स नोहिरण्यजाः शङ्ख आयुष्प्रतरणो मणिः ।।४।।
समुद्राज्जातो मणिर्वृत्राज्जातो दिवाकरः ।
सो अस्मान्त्सर्वतः पातु हेत्या देवासुरेभ्यः ।।५।।
हिरण्यानामेकोऽसि सोमात् त्वमधि जज्ञिषे ।
रथे त्वमसि दर्शत इषुधौ रोचनस्त्वं प्र ण आयूंषि तारिषत् ।।६।।
देवानामस्थि कृशनं बभूव तदात्मन्वच्चरत्यप्स्व१न्तः ।
तत् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वायशतशारदाय कार्शनस्त्वाभि रक्षतु ।।७।।

७९९. शची पौलोमी

१. शची पौलौमी – ऋ. १०.१५९.१–६

उदसौ सूर्यो अगादुदयं मामको भगः ।
अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः ।।१।।
अहं केतुरहं मूर्धाहमुग्रा विवाचनी ।
ममेदनु क्रतुं पतिः सेहानाया उपाचरेत् ।।2।।
मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् ।
उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः ।।३।।
येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः ।
इदं तदक्रि देवा असपत्ना किलाभुवम् ।।४।।
असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी ।
आवृखमन्यासां वर्चो राधो अस्थेयसामिव ।।५।।
समजैषमिमा अहं सपत्नीरभिभूवरी ।
यथाहमस्य वीरस्य वीराजानि जनस्य च ।।६।।

८००. शतवारः

१. ब्रह्म – अ. १९.३६.१–६

शतवारो अनीनशद् यक्ष्मान् रक्षांसि तेजसा। आरोहन् वर्चसा सह मणिर्दुर्णामचातनः ।।१।।
शृंगाभ्यां रक्षो नुदते मूलेन यातुधान्यः। मध्येन यक्ष्मं बाधते नैनं पाप्माति तत्रति ।।2।।

ये यक्ष्मासो अर्भका महान्तो ये च शब्दिनः। सर्वान् दुर्णामहा मणिः शतवारो अनीनशत् ।।३।।
शतं वीरानजनयच्छतं यक्ष्मानपावपत्। दुर्णाम्नः सर्वान् हत्वाव रक्षांसि धूनुते ।।४।।
हिरण्यशृंग ऋषभः शातवारो अयं मणिः। दुर्णाम्नः सर्वांस्तृड्ढ्वाव रक्षांस्यक्रमीत् ।।५।।
शतमहं दुर्णाम्नीनां गन्धर्वाप्सरसां शतम्। शतं शश्वन्वतीनां शतवारेण वारये ।।६।।

८०१. शतौदनाः

१. अथर्वा – अ. १०.६.१–27

अघायतामपि नह्या मुखानि सपत्नेषु वज्रमर्पयैतम् ।
इन्द्रेण दत्ता प्रथमा शतौदना भ्रातृव्यघ्नी यजमानस्य गातुः ।।१।।
वेदिष्टे चर्म भवतु बर्हिर्लोमानि यानि ते ।
एषा त्वा रशनाग्रभीद् ग्रावा त्वैषोऽधि नृत्यतु ।।2।।
बालास्ते प्रोक्षणीः सन्तु जिह्वा सं माष्ट्र्वघ्न्ये ।
शुद्धा त्वं यज्ञिया भूतवा दिवं प्रेहि शतौदने ।।३।।
यः शतौदनां पचति कामप्रेण स कल्पते ।
प्रीता ह्यस्य ऋत्विजः सर्वे यन्ति यथा यथम् ।।४।।
स स्वर्गमा रोहति यत्रादस्त्रिादिवं दिवः ।
अपूपनाभि कृत्वा यो ददाति शतौदनाम् ।।५।।
स ताल्लोँकान्त्समाप्नोति ये दिव्या ये च पार्थिवाः ।
हिरण्यज्योतिषं कृत्वा यो ददाति शतौदनाम् ।।६।।
ये ते देवि शमितारः पक्तारो ये च ते जनाः ।
ते त्वा सर्वे गोप्स्यन्ति मैभ्यो भैषीः शतौदने ।।७।।
वसवस्त्वा दक्षिणत उत्तरान्मरुतस्त्वा ।
आदित्याः पश्चाद् गोप्स्यन्ति साग्निष्टोममति द्रव ।।८।।
देवाः पितरो मनुष्या गन्धर्वाप्सरसश्च ये ।
ते त्वा सर्वे गोप्स्यन्ति सातिरात्रमतिं द्रव ।।६।।
अन्तरिक्षं दिवं भूमिमादित्यान् मरुतो दिशः ।
लोकान्त्स सर्वानाप्नोति यो ददाति शतौदनाम् ।।१०।।
घृतं प्रोक्षन्ती सुभगा देवी देवान् गमिष्यति ।
पक्तारमघ्न्ये मा हिंसीर्दिवं प्रेहि शतौदने ।।११।।
ये देवा दिविषदो अन्तरिक्षसदश्च ये ये चेमे भूम्यामधि ।
तेभ्यस्त्वं धुक्ष्व सर्वदा क्षीरं सर्पिरथो मधु ।।12।।
यत् ते शिरो यत् ते मुखं यौ कर्णौ ये च ते हनू ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।१३।।
यौ त ओष्ठौ ये नासिके ये शृङ्गे ये च तेऽक्षिणी ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।१४।।
यत्ते क्लोमा यद्धृदयं पुरीतत् सहकण्ठिका ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।१५।।
यत् ते यकृद्ये मतस्ने यदान्त्रं याश्च ते गुदाः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।१६।।
यस्ते प्लाशिर्यो वनिष्ठुर्यौ कुक्षी यच्च चर्म ते ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।१७।।
यत्ते मज्जा यदस्थि यन्मांसं यच्च लोहितम् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।१८।।
यौ ते बाहू ये दोषणी यावंसौ या च ते ककुत् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।१६।।

यास्ते ग्रीवा ये स्कन्धा याः पृष्टीर्याश्च पर्शवः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।२०।।
यौ त ऊरू अष्ठीवन्तौ ये श्रोणी या च ते भसत् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।२१।।
यत् ते पुच्छं ये ते बाला यदूधो ये च ते स्तनाः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।22।।
यास्ते जङ्घा याः कुष्ठिका ऋच्छरा ये च ते शफाः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।2३।।
यत् ते चर्म शतौदने यानि लोमान्यघ्न्ये ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ।।2४।।
क्रोडौ ते स्तां पुरोडाशावाज्येनाभिघारितौ ।
तौ पक्षौ देवि कृतवा सा पक्तारं दिवं वह ।।2५।।
उलूखले मुसले यश्च चर्मणि यो वा शूर्पे तण्डुलः कणः ।
यं वा वातो मातरिश्वा पवमानो ममाथाग्निष्टद्धोता सुहुतं कृणोतु ।।2६।।
अपो देवीर्मधुमतीर्घृतश्चतुतो ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदमभिषिंचामि वोऽहं तन्मे सर्वं सं पद्यतां वयं स्याम पतयो रयीणाम् ।।2७।।

८०2. शमी

१. उपरिबभ्रवः – अ. ६.३०.१–३

देवा इमं मधुना संयुतं यवं सरस्वत्यामधि मणावचर्कृषुः ।
इन्द्र आसीत् सीरपतिः शतक्रतुः कीनाशा आसन् मरुतः सुदानवः ।।१।।
यस्ते मदोऽवकेशो विकेशो येनाभिहस्यं पुरुषं कृणोषि ।
आरात् त्वदन्या वनानि वृक्षि त्वं शमि शतवल्शा वि रोह ।।2।।
बृहत् पलाशे सुभगे वर्षवृद्ध ऋतावरि मातेव पुत्रेभ्यो मृड केशेभ्यः शमि ।।३।।

८०३. श्रीः

१. प्रजापतिः – य. 2३.2६–2७

ऊर्ध्वामेनामुच्छ्रापय गिरौ भारं हरन्निव ।
अथास्यै मध्यमेधतां शीते वाते पुनन्निव ।।2६।।
ऊर्ध्वमेनमुच्छ्रयताद् गिरौ भारं हरन्निव ।
अथास्य मध्यमेजतु शीते वाते पुनन्निव ।।2७।।

८०४. शरदर्तुः

१. परमेष्ठी – य. १५.१८

अयमुत्तरात्संयद्वसुस्तस्य तार्क्ष्यश्चरिष्टनेमिश्च सेनानीग्रामण्यौ। विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।१८।।

८०५. शशीयसी तरन्तमहिषी

१. श्यावाश्व आत्रेयः – ऋ. ५.६१.५–८

सनत्साश्वयं पशुमुत गव्यं शतावयम्। श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत् ।।५।।
उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी। अदेवत्रादराधसः ।।६।।
वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम्। देवत्रा कृणुते मनः ।।७।।
उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः। स वैरदेय इत्समः ।।८।।

८०६. शाला

१. भृग्वंगिरा – अ. ६.३.१–३१

उपमितां प्रतिमितामथो परिमितामुत। शालाया विश्ववाराया नद्धानि वि चृतामसि ।।१।।
यत् ते नद्धं विश्ववारे पाशो ग्रन्थिश्च यः कृतः।
बृहस्पतिरिवाहं बलं वाचा वि स्रंसयामि तत्।।2।।
आ ययाम सं बबर्ह ग्रन्थींश्चकार ते दृढान्। परूंषि विद्वांछस्तेवेन्द्रेण वि चृतामसि ।।३।।
वंशानां ते नहनानां प्राणाहस्य तृणस्य च। पक्षाणां विश्ववारे ते नद्धानि वि चृतामसि ।।४।।
संदंशानां पलदानां परिष्वंजल्यस्य च। इदं मानस्य पत्नया नद्धानि वि चृतामसि ।।५।।
यानि तेऽन्तः शिक्यान्याबेधू रण्याय कम् ।
प्र ते तानि चृतामसि शिवा मानस्य पत्नी न उद्धिता तन्वे भव ।।६।।
हविर्धानमग्निशालं पत्नीनां सदनं सदः। सदो देवानामसि देवि शाले ।।७।।
अक्षुमोपशं विततं सहस्राक्षं विषूवति। अवनद्धमभिहितं ब्रह्मणा वि चृतामसि ।।८।।
यस्त्वा शाले प्रतिगृह्णाति येन चासि मिता त्वम्। उभौ मानस्य पत्नि तौ जीवतां जरदष्टी।।६।।
अमुत्रैनमा गच्छताद् दृढा नद्धा परिष्कृता। यस्यास्ते विचृतामस्यंगमङ्गं परुष्परुः ।।१०।।
यस्त्वा शाले निमिमाय संजभार वनस्पतीन्। प्रजायै चक्रे त्वा शाले परमेष्ठी प्रजापतिः ।।११।।
नमस्तस्मै नमो दात्रे शालापतये च कृण्मः। नमोऽग्नये प्रचरते पुरुषाय च ते नमः ।।१2।।
गोभ्यो अश्वेभ्यो नमो यच्छालायां विजायते। विजावति प्रजावति वि ते पाशांश्चृतामसि ।।१३।।
अग्निमन्तश्छादयसि पुरुषान् पशुभिः सह। विजावति प्रजावति वि ते पाशांश्चृतामसि ।।१४।।
अन्तरा द्यां च पृथिवीं च यद् व्यचस्तेन शालां प्रति गृह्णामि त इमाम् ।
यदन्तरिक्षं रजसो विमानं तत् कृण्वेऽहमुदरं शेवधिभ्यः। तेन शालां प्रति गृह्णामि तस्मै ।।१५।।
ऊर्जस्वती पयस्वती पृथिव्यां निमिता मिता। विश्वान्नं बिभ्रती शाले मा हिंसीः प्रतिगृह्णतः।१६।।
तृणैरावृता पलदान् वसाना रात्रीव शाला जगतो निवेशनी ।
मिता पृथिव्यां तिष्ठसि हस्तिनीव पद्वती ।।१७।।
इटस्य ते वि चृताम्यपि नद्धमपोर्णुवन्। वरुणेन समुब्जितां मित्रः प्रातर्व्युब्जतु ।।१८।।
ब्रह्मणा शालां निमितां कविभिर्निमितां मिताम्। इन्द्राग्नी रक्षतां शालाममृतौ सोम्यं सदः ।।१६।।
कुलायेऽधि कुलायं कोशे कोशः समुब्जितः। तत्र मर्तो वि जायते यस्माद् विश्वं प्रजायते ।।2०।।
या द्विपक्षा चतुष्पक्षा षट्पक्षा या निमायेत ।
अष्टापक्षां दशपक्षां शालां मानस्य पत्नीमग्निर्गर्भइवा शये ।।2१।।
प्रतीचीं त्वा प्रतीचीनः शाले प्रैम्यहिंसतीम्। अग्निर्ह्य१न्तरापश्च ऋतस्य प्रथमा द्वाः ।।22।।
इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः। गृहानुप प्र सीदाम्यमृतेन सहाग्निना ।।2३।।
मा नः पाशं प्रति मुचो गुरुर्भारो लघुर्भव। वधूमिव त्वा शाले यत्र कामं भरामसि ।।2४।।
प्राच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।2५।।
दक्षिणाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।2६।।
प्रतीच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।2७।।
उदीच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।2८।।
ध्रुवाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।2६।।
ऊर्ध्वाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।३०।।
दिशोदिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ।।३१।।

८०७. शाला वास्तोष्पतिः

१. ब्रह्म – अ. ३.१2.१–६

इहैव ध्रुवां नि मिनोमि शालां क्षेमे तिष्ठाति घृतमुक्षमाणा ।
तां त्वा शाले सर्ववीराः सुवीरा अरिष्टवीरा उप सं चरेम ।।१।।
इहैव ध्रुवा प्रति तिष्ठ शालेऽश्वावती गोमती सूनृतावती ।
ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय ।।2।।
धरुण्यसि शाले बृहच्छन्दाः पूतिधान्या ।
आ त्वा वत्सो गमेदा कुमार आ धेनवः सायमास्पन्दमानाः ।।३।।
इमां शालां सविता वायुरिन्द्रो बृहस्पतिर्नि मिनोतु प्रजानन् ।
उक्षन्तूदना मरुतो घृतेन भगो नो राजा नि कृषिं तनोतु ।।४।।
मानस्य पत्नि शरणा स्योना देवी देवेभिर्निमितास्यग्रे ।
तृणं वसाना सुमना असस्त्वमथास्मभ्यं सहवीरं रयिं दाः ।।५।।
ऋतेन स्थूणामधि रोह वंशोग्रो विराजन्नप वृङ्क्ष्व शत्रून् ।
मा ते रिषन्नुपसत्तारो गृहाणां शाले शतं जीवेम शरदः सर्ववीराः ।।६।।
एमां कुमारस्तरुणा आ वत्सो जगता सह ।
एमां परिस्रुतः कुम्भ आ दध्नः कलशैरगुः ।।७।।
पूर्णं नारि प्र भर कुम्भमेतं घृतस्य धाराममृतेन संभृताम् ।
इमां पात्रीममृतेना समङ्ग्धीष्टापूर्तमभि रक्षात्येनाम् ।।८।।
इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः ।
गृहानुप प्र सीदाम्यमृतेन सहाग्निना ।।९।।

८०८. शितिपाद् अविः

१. उद्दालकः – अ. ३.2९.१–६

यद् राजानो विभजन्त इष्टापूर्तस्य षोडशं यमस्यामी सभासदः ।
अविस्तस्मात् प्र मुंचति दत्तः शितिपात् स्वधा ।।१।।
सर्वान् कामान् पूरयत्याभवन् प्रभवन् भवन् ।
आकूतिप्रोऽविर्दत्तः शितिपान्नोप दस्यति ।।2।।
यो ददाति शितिपादमविं लोकेन संमितम् ।
स नाकमभ्यारोहति यत्र शुल्को न क्रियते अवलेन बलीयसे ।।३।।
पंचापूपं शितिपादमविं लोकेन संभितम् ।
प्रदातोप जीवति पितॄणां लोकेऽक्षितम् ।।४।।
पंचापूपं शितिपादमविं लोकेन संमितम् ।
प्रदातोप जीवति सूर्यामासयोरक्षितम् ।।५।।
इरेव नोप दस्यति समुद्रइव पयो महत् ।
देवौ सवासिनाविव शतिपान्नोप दस्यति ।।६।।

८०९. शिशिरर्तुः

१. परमेष्ठी – य. १५.५७

तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तः श्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः। ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे । शैशिरावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद्ध्रुवे सीदतम्।।५७।

८१०. शुनाशीरौ

१. वामदेवो गौतमः – ऋ. ४.५७.५; ८

ऋ. ४.५७.५

शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः। तेनेमामुप सिंचतम् ।।५।।

ऋ. ४.५७.८

शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ।।८।।

८११. शूनः

१. वामदेवो गौतमः – ऋ. ४.५७.४

शुनं वाहाः शुनं नरः शुनं कृषतु लांगलम्। शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिंगय ।।४।।

८१2. शेपोऽर्कः

१. अथर्वांगिरा – अ. ६.७2.१–३

यथासितः प्रथयते वशाँ अनु वपूंषि कृण्वन्नसुरस्य मायया ।
एवा ते शेपः सहसायमर्कोऽङ्गेनाङ्गं संसमकं कृणोतु ।।१।।
यथा पसस्तायादरं वातेन स्थूलभं कृतम् ।
यावत् परस्वतः पसस्तावत् ते वर्धतां पसः ।।2।।
यावदंगीनं पारस्वतं हास्तिनं गार्दभं च यत् ।
यावदश्वस्य वाजिनस्तावत् ते वर्धतां पसः ।।३।।

८१३. श्येनः

१. प्रस्कण्वः – अ. ७.४१.१–2

अति धन्वान्यत्यपस्ततर्द श्येनो नृचक्षा अवसानदर्शः ।
तरन् विश्वान्यबरा रजांसीन्द्रेण सख्या शिव आ जगम्यात् ।।१।।
श्येनो नृचक्षा दिव्यः सुपर्णः सहस्रपाच्छतयोनिर्वयोधाः ।
स नो नि यच्छाद् वसु यत् पराभृतमस्माकमस्तु पितृषु स्वधावत् ।।2।।

८१४. श्येनादयः

१. अथर्वा – अ. ७.७०.१–५

यत् किं चासौ मनसा यच्च वाचा यज्ञेर्जुहोति हविषा यजुषा ।
तन्मृत्युना निर्ऋतिः संविदाना पुरा सत्यादाहुतिं हन्त्वस्य ।।१।।
यातुधाना निर्ऋतिरादु रक्षस्ते अस्य घ्नन्त्वनृतेन सत्यम् ।
इन्द्रेषिता देवा आज्यमस्य मथ्नन्तु मा तत् सं पादि यदसौ जुहोति ।।2।।
आजिराधिराजौ श्येनौ संपातिनाविव ।
आज्यं पृतन्यतो हतां यो नः कश्चाभ्यघायति ।।३।।
अपांचौ त उभौ बाहू अपि नह्याम्यास्यम् ।
अग्नेर्देवस्य मन्युना तेन तेऽवधिषं हविः ।।४।।
अपि नह्यामि ते बाहू अपि नह्याम्यास्यम् ।
अग्नेर्घोरस्य मन्युना तेन तेऽवधिषं हविः ।।५।।

८१५. श्री

१. वैखानसः – य. १६.४६

ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः ।।४६।।

८१६. श्रीः

१. दीर्घतमा – य. ३६.४

मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूनां रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ।।४।।

८१७. श्रुतवर्ण आर्क्षस्य दानस्तुतिः

१. गोपवन आत्रेयः – ऋ. ८.७४.१३–१५

अहं हुवान आर्क्षे श्रुतर्वणि मदच्युति।। शर्धांसीव स्तुकाविनां मृक्षा शीर्षा चतुर्णाम् ।।१३।।
मां चत्वार आशवः शविष्ठस्य द्रवित्नवः। सुरथासो अभि प्रयो वक्षन्वयो न तुग्रयम् ।।१४।।
सत्यमित्तवा महेनदि परुष्ण्यव देदिशम्। नेमापो अश्वदातरः शविष्ठादस्ति मर्त्यः।।१५।।

८१८. श्वानौ

१. यमः – ऋ. १०.१४.१०–१२

अति द्रव सारमेयौ श्वानौ चतुरक्षौ शब्लौ साधुनां पथा ।
अथा पितॄन्त्सुविदत्राँ उपेहि यमेन ये सधमादं मदन्ति ।।१०।।
यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परि दोहि राजन्त्स्वस्ति चास्मा अन्मीवं च धेहि ।।११।।
उरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ।।१2।।

८१६. सान्तवनाग्निः

१. कबन्धः – अ. ६.७६.१–४

य एनं परिषीदन्ति समादधति चक्षसे। स्रप्रेद्धो अग्निर्जिह्वाभिरुदेतु हृदयादधि ।।१।।
अग्नेः सांतपनस्याहमायुषे पदमा रभे। अद्धातिर्यस्य पश्यति धूममुद्यन्तमास्यतः ।।2।।
यो अस्य समिधं वेद क्षत्रियेण समाहिताम्। नाभिह्वारे पदं नि दधाति स मृत्यवे ।।३।।
नैनं घ्नन्ति पर्यायिणो न सन्नाँ अव गच्छति। अग्नेर्य क्षत्रियो विद्वान्नाम गृह्णात्यायुषे ।।४।।

८2०. स्रष्टा

१. नारायणः–य. ३१.५

ततो विराडजायत विराजोऽअधि पुरुषः। स जातोऽअत्यरिच्यत पश्चद्भूमिमथो पुरः ।।५।।

८2१. सुदासः पैजवनस्य दानस्तुतिः

१. वसिष्ठः – ऋ. ७.१८.22–2५

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः ।
अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन् ।।22।।
चत्वारो मा पैजवनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके ।
ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहन्ति ।।2३।।
यस्य श्रवो रोदसी अन्तरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता ।
सप्तेदिन्द्रं न स्रवतो गृणन्ति नि युध्यामधिमशिशादभीके ।।2४।।
इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः ।
अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु ।।2५।।

८22. स्रष्टेश्वरः

१. नारायणः – य. ३१.७

तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिर तस्माद्यजुस्त स्मादजायत ।।७।।

८2३. हरिणः

१. भृग्वंगिरा – अ. ३.७.१–३

हरिणस्य रघुष्यदोऽधि शीर्षाणि भेषजम्। स क्षेत्रियं विषाणया विषूचीनमनीनशत् ।।१।।
अनु त्वा हरिणो वृषा पद्भिश्चतुर्भिरक्रमीत्। विषाणे वि ष्य गुष्पितं यदस्य क्षेत्रियं हृदि ।।2।।
अदो यदवरोचते चतुष्पक्षमिवच्छदिः। तेना ते सर्वं क्षेत्रियामंगेभ्यो नाशयामसि ।।३।।

८2४. हरिस्तुतिः

१. बरुः सर्वहरिर्वा ऐन्द्रः – ऋ. १०.६६.१–१३

प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदम् ।

घृतं न यो हरिभिश्चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः ।।१।।
हरिं हि योनिमभि ये समस्वरन्हिन्वन्तो हरी दिव्यं यथा सदः ।
आ यं पृणन्ति हरिभिर्न धेनव इन्द्राय शूषं हरिवन्तमर्चत ।।2।।
सो अस्य वज्रो हरितो य आयसो हरिर्निकामो हरिरा गभस्त्योः ।
द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता मिमिक्षिरे ।।३।।
दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या ।
तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिंभरः ।।४।।
त्वं त्वमहर्यथा उपस्तुतः पूर्वेभिरिन्द्र हरिकेश यज्वभिः ।
त्वं हर्यसि तव विश्वमुक्थ्य१ मसामि राधो हरिजात हर्यतम् ।।५।।
ता वज्रिणं मन्दिनं स्तोम्यं मद इन्द्रं रथे वहतो हर्यता हरी ।
पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे ।।६।।
अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरी तुरा ।
अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवन्तमानशे ।।७।।
हरिश्मशारुर्हरिकेश आयसस्तुरस्पेये यो हरिपा अवर्धत ।
अर्वद्भिर्यो हरिभर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी ।।८।।
स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः ।
प्र यत्कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यान्धसः ।।९।।
उत स्म सद्म हर्यतस्य पस्त्यो३ रत्यो न वाजं हरिवाँ उचिक्रदत् ।
मही चिद्धि धिषणाहर्यदोजसा बृहद्वयो दधिषे हर्यतश्चिदा ।।१०।।
आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियम् ।
प्र पस्त्यमसुर हर्यतं गोरविष्कृधि हरये सूर्याय ।।११।।
आ त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र ।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिम् ।।१2।।
अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ।
ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषंजठर आ वृषस्व ।।१३।।

८2५. हविर्धाने

१. विवस्वान् आदित्यः – ऋ. १०.१३.१–५

युजे वां ब्रह्मा पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ।।१।।
यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः ।
आ सीदतं स्वमु लोकं विदाने स्वास्थे भवतमिन्दवे नः ।।2।।
पंच पदानिं रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन ।
अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि ।।३।।
देवेभ्यः कमवृणीत मृत्युं प्रजायै कममृतं नावृणीत ।
बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं१ प्रारिरेचीत् ।।४।।
सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतम् ।
उभे इदस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः ।।५।।

८2६. हस्तः

१. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः – ऋ. १०.६०.१2

अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ।।१2।।

८2७. हस्तघ्नः

१. पायुर् भरद्वाजः – ऋ. ६.७५.१४.

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान्पुमांसं परि पातु विश्वतः ।।१४।।

८२८. हिरण्यम्

१. अथर्वा (आयुष्कामः) – अ. १.३५.१–४

यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।
तत् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय ।।१।।
नैनं रक्षांसि न पिशाचाः सहन्ते देवानामोजः प्रथमजं ह्ये३तत् ।
योबिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः ।।2।।
अपां तेजो ज्योतिरोजो बलं च वनस्पतीनामुत वीर्याणि ।
इन्द्रइवेन्द्रियाण्यधि धारयामो अस्मिन् तद् दक्षमाणो विभरद्धिरण्यम् ।।३।।
समानां मासामृतुभिष्टवा वयं संवत्सरस्य पयसा पिपर्मि ।
इन्द्राग्नी विश्वे देवास्तेऽनु मन्यन्तामहृणीयमानाः ।।४।।

८2९. हिरण्यगर्भः

१. प्रजापतिः – य. 2५.१०

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।१०।।

2. हिरण्यगर्भः – य. १३.६; ७

नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।।६।।
याऽइषवो यातुधानानां ये वा वनस्पतीँ१ऽरनु। ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ।।७।।

८३०. हिरण्यगर्भः परमात्मा

१. स्वयम्भुर् ब्रह्म – य. ३2.३

न तस्य प्रतिमाऽअस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भऽइत्येष मा मा हिंसीदित्येषा यस्मान्न जातऽइत्येषः ।।३।।

८३१. हिरण्यतेजः

१. दक्षः – य. ३४.५०–५2

आयुष्यं वर्च्चस्यं रायस्पोषमौद्भिदम्। इदं हिरण्यं वर्च्चस्वज्जैत्रायाविशतादु माम् ।।५०।।
न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत् ।
यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ।।५१।।
यदाबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।
तन्मऽआ बध्नामि शतशारदायायुष्मांजरदष्टिर्यथासम् ।।५2।।

८३2. हिरण्यम् भगः

१. प्रतिवेदनः – अ. 2.३६.७.

इदं हिरण्यं गुल्गुल्वयमौक्षो अथो भगः। एते पतिभ्यस्त्वामदुः प्रतिकामाय वेत्तवे ।।७।।

८३३. हेमन्तर्तुः

१. परमेष्ठी – य. १५.१६

अयमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ। उर्वशी च पूर्वचित्तिश्चाप्सरसाववस्फूर्जन् हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।१६।।

८३४. हेमिः

१. अथर्वा – अ. ५.६.६

चक्षुषो हेते मनसो हेते ब्रह्मणो हेते तपसश्च हेते ।
मेन्या मेनिरस्यमेनयस्ते सन्तु ये३स्माँ अभ्यघयन्ति ।।६।।

८३५. संग्रामाशिषः

१. पायुर् भरद्वाजः – सा. १८६६

यत्र बाणः संपतन्ति कुमारु विशिखा इव ।
तत्र नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ।।३।।

८३६. संज्ञानम्

१. संवननः – ऋ. १०.१६१.2–४

संगच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजनाना उपासते ।।2।।
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ।।३।।
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ।।४।।

८३७. संवत्सरः

१. भरद्वाजः – य. 2६.१४

ऋतवस्ते यज्ञं वि तन्वन्तु मासा रक्षन्तु ते हविः ।
संवत्सरस्ते यज्ञं दधातु नः प्रजां च परि पातु नः ।।१४।।

८३८. संवत्सरात्मा

१. दीर्घतमा औचथ्यः – ऋ. १.१६४.४८

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तस्मिन्त्साकं त्रिशता न शंकवोऽर्पिताः षष्टिर्न चलाचलासः ।।४८।।

८३६. संस्फानम्

१. अथर्वा – अ. ६.७६.१–३

अयं नो नभसस्पतिः संस्फानो अभि रक्षतु। असमातिं गृहेषु नः ।।१।।
त्वं नो नभसस्पत ऊर्जं गृहेषु धारय। आ पुष्टमेत्वा वसु ।।2।।
देव संस्फान सहस्रापोषस्येशिषे। तस्य नो रास्व तस्य नो धेहि तस्य ते भक्तिवांसः स्याम।।३।।

८४०. संस्तवो वसिष्ठस्य सपुत्रस्य इन्द्रेण वा संवादः

१. वसिष्ठपुत्राः – ऋ. ७.३३.१–१४

श्वित्यंचो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।
उत्तिष्ठन्वोचे परि बर्हिषो नॄन्न मे दूरादवितवे वसिष्ठाः ।।१।।
दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम् ।
पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणीता वसिष्ठान् ।।2।।
एवेन्नु कं सिन्धुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान ।
एवेन्नु कं दाशराज्ञे सुदासं प्राविदिन्द्रो ब्रह्मणा वो वसिष्ठाः ।।३।।
जुष्टी नरो ब्रह्मणा वः पितॄणामक्षमव्ययं न किला रिषाथ ।
यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधाता वसिष्ठाः ।।४।।
उद् द्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम् ।।५।।
दण्डाइवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः ।

अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त ।।६।।
त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः ।
त्रयो घर्मास उषसं सचन्ते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः ।।७।।
सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ।।८।।
त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति ।
यमेन ततं परिधिं वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः ।।९।।
विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा ।
तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ।।१०।।
उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ।।११।।
स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः ।
यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ।।१2।।
सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम् ।
ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठम् ।।१३।।
उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत्प्र वदात्यग्रे ।
उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः ।।१४।।

८४१. स्कम्भः (अध्यात्मम्)

१. अथर्वा – अ. १०.७.१–४४

कस्मिन्नङ्गो तपो अस्याधि तिष्ठति कस्मिन्नङ्ग ऋतमस्याध्याहितम् ।
क्व व्रतं क्व ऋद्धास्य तिष्ठति कस्मिन्नङ्गे सत्यमस्य प्रतिष्ठितम् ।।१।।
कस्मादङ्गाद् दीप्यते अग्निरस्य कस्मादङ्गात् पवते मातरिश्वा ।
कस्मादङ्गाद् वि मिमीतेऽधि चन्द्रमा मह स्कम्भस्य मिमानो अङ्ग।।2।।
कस्मिन्नङ्गे तिष्ठति भूमिरस्य कस्मिन्नङ्गे तिष्ठत्यन्तरिक्षम् ।
कस्मिन्नङ्गे तिष्ठत्याहिता द्यौः कस्मिन्नङ्गे तिष्ठत्युत्तरं दिवः ।।३।।
क्व१ प्रेप्सन् दीप्यत ऊर्ध्वो अग्निः क्व१ प्रेप्सन् पवते मातरिश्वा ।
यत्र प्रेप्सन्तीरभियन्त्यावृतः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।४।।
क्वा र्धमासाः क्व यन्ति मासाः संवत्सरेण सह संविदानाः ।
यत्र यन्त्यृतवो यत्रार्तवाः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।५।।
क्व१ प्रेप्सन्ती युवती विरूपे अहोरात्रे द्रवतः संविदाने ।
यत्र प्रेप्सन्तीरभियन्त्यापः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।६।।
यस्मिन्त्स्तब्ध्वा प्रजापतिर्लोकान्त्सँर्वा अधारयत् ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।७।।
यत् परममवमं यच्च मध्यमं प्रजापतिः ससृजे विश्वरूपम् ।
कियता स्कम्भः प्र विवेश तत्र यन्न प्राविशत् कियत् तद् बभूव।।८।।
कियता स्कम्भः प्र विवेश भूतं कियद् भविष्यदन्वाशयेऽस्य ।
एकं यदङ्गमकृणोत् सहस्रधा कियता स्कम्भः प्र विवेश तत्र ।।९।।
यत्र लोकांश्च कोशांश्चापो ब्रह्म जना विदुः ।
असच्च यत्र सच्चान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।१०।।
यत्र तपः पराक्रम्य व्रतं धारयत्युत्तरम्। ऋतं च यत्र श्रद्धा चापो ब्रह्म समाहिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।११।।
यस्मिन् भूमिरन्तरिक्षं द्यौर्यस्मिन्नध्याहिता। यत्राग्निश्चन्द्रमाः सूर्यो वातस्तिष्ठन्त्यार्पिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।१2।।

यस्य त्रयस्त्रिांशद् देवा अङ्गे सर्वे समाहिताः ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।१३।।
यत्र ऋषयः प्रथमजा ऋचः साम यजुर्मही ।
एकर्षिर्यस्मिन्नार्पितः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।१४।।
यत्रामृतं च मृत्युश्च पुरुषेऽधि समाहिते। समुद्रो यस्य नाड्य१ः पुरुषेऽधि समाहिताः स्कम्भं तं ब्रहि कतमः स्विदेव सः ।।१५।।
यस्य चतस्रः प्रदिशो नाड्य१स्तिष्ठन्ति प्रथमाः ।
यज्ञो यत्र पराक्रान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।१६।।
ये पुरुषे ब्रह्म विदुस्ते विदुः परमेष्ठिनम्। यो वेद परमेष्ठिनं यश्च वेद प्रजापतिम्।
ज्येष्ठं ये ब्राह्मणं विदुस्ते स्कम्भमनुसंविदुः ।।१७।।
यस्य शिरो वैश्वानरश्चक्षुरंगिरसोऽभवन् ।
अङ्गानि यस्य यातवः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।१६।।
यस्माद्दचो अपातक्षन् यजुर्यस्मादपाकषन्।
सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखं स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।2०।।
असच्छाखां प्रतिष्ठन्तीं परममिव जना विदुः ।
उतो सन्मन्यन्तेऽवरे ये ते शाखमुपासते ।।2१।।
यत्रादित्याश्च रुद्राश्च वसवश्च समाहिताः।
भूतं च यत्र भवयं च सर्वे लोकाः प्रतिष्ठिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।22।।
यस्य त्रयस्त्रिांशद् देवा निधिं रक्षन्ति सर्वदा ।
निधिं तमद्य को वेद यं देवा अभिरक्षथ ।।2३।।
यत्र देवा ब्रह्मविदो ब्रह्म ज्येष्ठमुपासते ।
यो वै तान् विद्यात् प्रत्यक्षं स ब्रह्मा वेदिता स्यात् ।।2४।।
बृहन्तो नाम ते देवा येऽसतः परि जज्ञिरे ।
एकं तदङ्गं स्कम्भस्यासदाहुः परो जनाः ।।2५।।
यत्र स्कम्भः प्रजनयन् पुराणं व्यवर्तयत् ।
एकं तदङ्गं स्कम्भस्य पुराणमनुसंविदुः ।।2६।।
यस्य त्रयस्त्रिांशद् देवा अङ्गे गात्रा विभेजिरे ।
तान् वै त्रयस्त्रिांशद् देवानेके ब्रह्मविदो विदुः ।।2७।।
हिरण्यगर्भं परममनत्युद्यं जना विदुः ।
स्कम्भस्तदग्रे प्रासिंचद्धिरण्यं लोके अन्तरा ।।2८।।
स्कम्भे लोकाः स्कम्भे तपः स्कम्भेऽध्यृतमाहितम् ।
स्कम्भं त्वा वेद प्रत्यक्षमिन्द्रे सर्वं समाहितम् ।।2६।।
इन्द्रे लोका इन्द्रे तप इन्द्रेऽध्यृतमाहितम् ।
इन्द्रं त्वा वेद प्रत्यक्षं स्कम्भे सर्वं प्रतिष्ठितम् ।।३०।।
नाम नाम्ना जोहवीति पुरा सूर्यात् पुरोषसः।
यदजः प्रथमं संबभूव स ह तत् स्वराज्यमियाय यस्मान्नान्यत् परमस्ति भूतम् ।।३१।।
यस्य भूमिः प्रमान्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।३2।।
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं१ तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।३३।।
यस्य वातः प्राणापानौ चक्षुरंगिरसोऽभवन् ।
दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।३४।।
स्कम्भो दाधार द्यावापृथिवी उभे इमे स्कम्भो दधारोर्व१न्तरिक्षम् ।
स्कम्भो दाधार प्रदिशः षडुर्वीः स्कम्भ इदं विश्वं भुवनमा विवेश।।३५।।

यः श्रमात् तपसो जातो लोकान्त्सर्वान्त्समानशे ।
सोमं यश्चक्रे केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।३६।।
कथं वातो नेलयति कथं न रमते मनः ।
किमापः सत्यं प्रेप्सन्तीर्नेलयन्ति कदा चन ।।३७।।
महद् यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृष्ठे ।
तस्मिंछ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परितइव शाखाः।।३८।।
यस्मै हस्ताभ्यां पादाभ्यां वाचा श्रोत्रेण चक्षुषा।
यस्मै देवाः सदा बलिं प्रयच्छन्ति विमितेऽमितं स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।३६।।
अप तस्य हतं तमो व्यावृत्तः स पाप्मना ।
सर्वाणि तस्मिंज्योतींषि यानि त्रीणि प्रजापतौ ।।४०।।
यो वेतसं हिरण्ययं तिष्ठन्तं सलिले वेद। स वै गुह्यः प्रजापतिः ।।४१।।
तन्त्रमेके युवती विरूपे अभ्याक्रामं वयतः षण्मयूखम् ।
प्रान्या तन्तूंस्तिरते धत्ते अन्या नाप वृंजाते न गमातो अन्तम्।।४2।।
तयोरहं परिनृत्यन्त्योरिव न वि जानामि यतरा परस्तात् ।
पुमानेनद् वयत्युद् गृणात्ति पुमानेनद् वि जभाराधि नाके ।।४३।।
इमे मयूखा उप तस्तभुर्दिवं सामानि चक्रुस्तसराणि वातवे ।।४४।।

८४2. स्त्रियः

१. जमदग्निः – य. 2६.३०–३१

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ।।३०।।
आ सुष्वयन्ती यजतेऽउपाकेऽउषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मेऽअधि श्रियं शुक्रपिशं दधाने ।।३१।।

2. प्रजापतिः – य. 2३.३६–३७

नार्य्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया ।
देवानां पत्न्यो दिशः सूचीभिः शम्यन्तु त्वा ।।३६।।
रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः ।
अश्वस्य वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः ।।३७।।

८४३. स्मरः

१. अथर्वा – अ. ६.१३०.१–४; ६.१३१.१–३; ६.१३2.१–५

अ. ६.१३०.१–४

रथजितां राथजितेयीनामप्सरसामयं स्मरः। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ।।१।।
असौ मे स्मरतादिति प्रियो मे स्मरतादिति। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ।।2।।
यथा मम स्मरादसौ नामूष्यासब कदा चन। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ।।३।।
उन्मादयत मरुत उदन्तरिक्ष मादय। अग्न उन्मादया त्वमसौ मामनु शोचतु ।।४।।

अ. ६.१३१.१–३

नि शीर्षतो नि पत्तत आध्यो३ नि तिरामि ते। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ।।१।।
अनुमतेऽन्विदं मन्यस्वाकूते समिदं नमः। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ।।2।।
यद् धावसि त्रियोजनं पंचयोजनमाश्विनम्। ततस्त्वं पुनरायसि पुत्राणां नो असः पिता ।।३।।

अ. ६.१३2.१–५

य देवाः स्मरमसिंचन्नप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ।।१।।
यं विश्वे देवाः स्मरमसिंचन्नप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ।।2।।
यमिन्द्राणी स्मरमसिंचदप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ।।३।।

यमिन्द्राग्नी स्मरमसिंचतामप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ।।४।।
यं मित्रावरुणौ स्मरमसिंचतामप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ।।५।।

८४४. स्वर्गः ओदनः अग्निः

१. यमः – अ. १2.३.१–६०

पुमान् पुंसोऽधि तिष्ठ चर्मेहि तत्र ह्वयस्व यतमा प्रिया ते ।
यावन्तावग्रे प्रथमं समेयथुस्तद् वां वयो यमराज्ये समानम् ।।१।।
तावद् वां चक्षुस्तति वीर्याणि तावत् तेजस्ततिधा वाजिनानि ।
अग्निः शरीरं सचते यदैधोऽधा पक्वान्मिथुना सं भवाथः ।।2।।
समस्मिँल्लोके समु देवयाने सं स्मा समेतं यमराज्येषु ।
पूतौ पवित्रैरुप तद्ध्वयेथां यद्यद् रेतो अधि वां संबभूव ।।३।।
आपस्पुत्रासो अभि सं विशध्वमिमं जीवं जीवधन्याः समेत्य ।
तासां भजध्वममृतं यमाहुर्यमोदनं पचति वां जनित्री ।।४।।
यं वां पिता पचति यं च माता रिप्रान्निर्मुक्त्यै शमलाच्च वाचः ।
स ओदनः शतधारः स्वर्ग उभे व्याप नभसी महित्वा ।।५।।
उभे नभसी उभयांश्च लोकान् ये यज्वनामभिजिताः स्वर्गाः ।
तेषां ज्योतिष्मान् मधुमान् यो अग्रे तस्मिन् पुत्रैर्जरसि सं श्रयेथाम् ।।६।।
प्राचींप्राचीं प्रदिशमा रभेथामेतं श्रद्दधानाः सचन्ते ।
यद् वां पक्वं परिविष्टमग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम् ।।७।।
दक्षिणां दिशमभि नक्षमाणौ पर्यावर्तेथामभि पात्रमेतत् ।
तस्मिन् वां यमः पितृभिः संविदानः पक्वाय शर्म बहुलं नि यच्छात् ।।८।।
प्रतीचीं दिशामियमिद् वरं यस्यां सोमो अधिपा मृडिता च ।
तस्यां श्रयेथां सुकृतः सचेथामधा पक्वान्मिथुना सं भवाथः ।।९।।
उत्तरं राष्ट्रं प्रजयोत्तरावद् दिशामुदीची कृणवन्नो अग्रम् ।
पान्क्तं छन्दः पुरुषो बभूव विश्वैर्विश्वंगैः सह सं भवेम ।।१०।।
ध्रुवेयं विराण्नमो अस्त्वस्यै शिवा पुत्रेभ्य उत मह्यमस्तु ।
सा नो देव्यदिते विश्ववार इर्यइव गोपा अभि रक्ष पक्वम् ।।११।।
पितेव पुत्रानभि सं स्वजस्व नः शिवा नो वाता इह वान्तु भूमौ ।
यमोदनं पचतो देवते इह तन्नस्तप उत सत्यं च वेत्तु ।।१2।।
यद्यत् कृष्णः शकुन एह गत्वा त्सरन् विषक्तं बिल आससाद ।
यद्वा दास्या३र्द्रहस्ता समङ्क्त उलूखलं मुसलं शुम्भतापः ।।१३।।
अयं ग्रावा पृथुबुध्नो वयोधाः पूतः पवित्रैरप हन्तु रक्षः ।
आ रोह चर्म महि शर्म यच्छ मा दम्पती पौत्रमघं नि गाताम् ।।१४।।
वनस्पतिः सह देवैर्न आगन् रक्षः पिशाचाँ अपबाधमानः ।
स उच्छ्रयातै प्र वदाति वाचं तेन लोकाँ अभि सर्वांरजयेम ।।१५।।
सप्त मेधान् पशवः पर्यगृह्णन् य एषां ज्योतिष्माँ उत यश्चकर्श ।
त्रयस्त्रिंशद् देवतास्तान्त्सचन्ते स नः स्वर्गमभि नेष लोकम् ।।१६।।
स्वर्गं लोकमभि नो नयासि सं जायया सह पुत्रैः स्याम ।
गृह्णामि हस्तमनु मैत्वत्र मा नस्तारीन्निर्ऋतिर्मो अरातिः ।।१७।।
ग्राहिं पाप्मानमति ताँ अयाम तमो व्यस्य प्र वदासि वल्गु ।
वानस्पत्य उद्यतो मा जिहिंसीर्मा तण्डुलं वि शरीर्देवयन्तम् ।।१८।।

विश्वव्यचा घृतपृष्ठो भविष्यन्त्सयोनिर्लोकमुप याह्येतम् ।
वर्षवृद्धमुप यच्छ शूर्पं तुषं पलावानप तद् विनक्तु ।।१६।।
त्रयो लोकाः संमिता ब्राह्मणेन द्यौरेवासौ पृथिव्य१न्तरिक्षम् ।
अंशून् गृभीत्वान्वारभेथामा प्यायन्तां पुनरा यन्तु शूर्पम् ।।20।।
पृथग् रूपाणि बहुधा पशूनामेकरूपो भवसि सं समृद्ध्या ।
एतां त्वचं लोहिनीं तां नुदस्व ग्रावा शुम्भाति मलगइव वस्त्रा ।।21।।
पृथिवीं त्वा पृथिव्यामा वेशयामि तनूः समानि विकृता त एषा ।
यद्यद् द्युत्तं लिखितमर्पणेन तेन मा सुस्रोर्ब्रह्मणापि तद् वपामि ।।22।।
जनित्रीव प्रति हर्यासि सूनुं सं त्वा दधामि पृथिवीं पृथिव्या ।
उखा कुम्भी वेद्यां मा व्यथिष्ठा यज्ञायुधैराज्येनातिषक्ता ।।2३।।
अग्निः पचन् रक्षतु त्वा पुरस्तादिन्द्रो रक्षतु दक्षिणतो मरुत्वान् ।
वरुणास्त्वा दृंहाद्धरुणे प्रतीच्या उत्तरात् त्वा सोमः सं ददातै ।।2४।।
पूताः पवित्रैः पवन्ते अभ्राद् दिवं च यन्ति पृथिवीं च लोकान् ।
ता जीवलाः जीवधन्याः प्रतिष्ठाः पात्र आसिक्ताः पर्यग्निरिन्धाम् ।।2५।।
आ यन्ति दिवः पृथिवीं सचन्ते भूम्याः सचन्ते अध्यन्तरिक्षम् ।
शुद्धाः सतीस्ता उ शुम्भन्त एव ता नः स्वर्गमभि लोकं नयन्तु ।।2६।।
उतेव प्रभ्वीरुत संमितास उत शुक्राः शुचयश्चामृतासः ।
ता ओदनं दंपतिभ्यां प्रशिष्टा आपः शिक्षन्तीः पचता सुनाथाः ।।2७।।
संख्याता स्तोकाः पृथिवीं सचन्ते प्राणापानैः संमिता ओषधीभिः ।
असंख्याता ओप्यमानाः सुवर्णाः सर्व व्यापुः शुचयः शुचित्वम् ।।2८।।
उद्योधन्त्यभि वल्गन्ति तप्ताः फेनमस्यन्ति बहुलांश्च बिन्दून् ।
योषेव दृष्ट्वा पतिमृत्वियायैतैस्तण्डुलैर्भवता समापः ।।2९।।
उत्थापय सीदतो बुध्न एनानद्भिरात्मानमभि सं स्पृशन्ताम् ।
अमासि पात्रैरुदकं यदेतन्मितास्तण्डुलाः प्रदिशो यदीमाः ।।३०।।
प्र यच्छ पर्शुं त्वरया हरौषमहिंसन्त ओषधीर्दान्तु पर्वन् ।
यासां सोमः परि राज्यं बभूवामन्युता नो वीरुधो भवन्तु ।।३१।।
यां नवं बर्हिरोदनाय स्तृणीत प्रियं हृदश्चक्षुषो वल्ग्वस्तु ।
तस्मिन् देवाः सह दैवीर्विशन्त्विमं प्राश्नन्त्वृतुभिर्निषद्य ।।३2।।
वनस्पते स्तीर्णमा सीद बर्हिरग्निष्टोमैः संमितो देवताभिः ।
त्वष्ट्रेव रूपं सुकृतं स्वधित्यैना एहाः परि पात्रे ददृश्राम् ।।३३।।
षष्ट्यां शरत्सु निधिपा अभीच्छात् स्वः पक्वेनाभ्यश्नवातै ।
उपैनं जीवान् पितरश्च पुत्रा एतं स्वर्गं गमयान्तमग्नेः ।।३४।।
धर्ता ध्रियस्व धरुणे पृथिव्या अच्युतं त्वा देवताश्च्यावयन्तु ।
तं त्वा दम्पती जीवन्तौ जीवपुत्रावुद् वासयातः पर्यग्निधानात् ।।३५।।
सर्वान्त्समागा अभिजित्य लोकान् यावन्तः कामाः समतीतृपस्तान् ।
बि गाहेथामायवनं च दर्विरेकस्मिन् पात्रे अध्युद्धरैनम् ।।३६।।
उप स्तृणीहि प्रथय पुरस्ताद् घृतेन पात्रमभि घारयैतत् ।
वाश्रेवोस्रा तरुणं स्तनस्युमिमं देवासो अभिहिङ्कृणोत ।।३७।।
उपास्तरीकरो लोकमेतमुरुः प्रथतामसमः स्वर्गः ।
तस्मिंछ्रयातै महिषः सुपर्णो देवा एनं देवताभ्यः प्र यच्छान् ।।३८।।

यद्यज्जाया पचति त्वत् परःपरः पतिर्वा जाये त्वत् तिरः ।
सं तत् सृजेथां सह वां तदस्तु संपादयन्तौ सह लोकमेकम् ।।३६।।
यावन्तो अस्याः पृथिवीं सचन्ते अस्मत् पुत्राः परि ये संबभूवुः ।
सर्वांस्ताँ उप पात्रे ह्वयेथां नाभिं जानानाः शिशवः समायान् ।।४०।।
वसोर्या धारा मधुना प्रपीना घृतेन मिश्रा अमृतस्य नाभयः ।
सर्वास्ता अव रुन्धे स्वर्गः षष्ट्यां शरत्सु निधिपा अभीच्छात् ।।४१।।
निधिं निधिपा अभ्येनमिच्छादनीश्वरा अभितः सन्तु येऽन्ये ।
अस्माभिर्दत्तो निहितः स्वर्गस्त्रिभिः काण्डैस्त्रीन्त्स्वर्गानरुक्षत् ।।४2।।
अग्नी रक्षस्तपतु यद् विदेवं क्रव्यात् पिशाच इह मा प्र पास्त ।
नुदाम एनमप रुध्मो अस्मदादित्या एनमंगिरसः सचन्ताम् ।।४३।।
आदित्येभ्यो अंगिरोभ्यो मध्विदं घृतेन मिश्रं प्रति वेदयामि ।
शुद्धहस्तौ ब्राह्मणस्यानिहत्यैतं स्वर्गं सुकृतावपीतम् ।।४४।।
इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात् परमेष्ठी समाप ।
आ सिंच सर्पिर्घृवत् समङ्ग्ध्येष भागो अंगिरसो नो अत्र ।।४५।।
सत्याय च तपसे देवताभ्यो निधिं शेवधिं परि दद्म एतम् ।
मा नो द्यूतेऽव गान्मा समित्यां मा स्मान्यस्मा उत्सृजता पुरा मत् ।।४६।।
अहं पचाम्यहं ददामि ममेदु कर्मन् करुणेऽधि जाया ।
कौमारो लोको अजनिष्ट पुत्रोऽन्वारभेथां वय उत्तरावत् ।।४७।।
न किल्विषमत्र नाधारो अस्ति न यन्मित्रैः सममान एति ।
अनूनं पात्रं निहितं न एतत् पक्तारं पक्वः पुनरा विशाति ।।४८।।
प्रियं प्रियाणां कृणवाम तमस्ते यन्तु यतमे द्विषन्ति ।
धेनुरनड्वान् वयोवय आयदेव पौरुषेयमप मृत्युं नुदन्तु ।।४६।।
समग्नयो विदुरन्यो अन्यं य ओषधीः सचते यश्च सिन्धून् ।
यावन्तो देवा दिव्याऽतपन्ति हिरण्यं ज्योतिः पचतो बभूव ।।५०।।
एषा त्वचां पुरुषे सं बभूवानग्नाः सर्वे पशवो ये अन्ये ।
क्षत्रेणात्मानं परि धापयाथोऽमोतं वासो मुखमोदनस्य ।।५१।।
यदक्षेषु वदा यत् समित्यां यद्वा वदा अनृतं वित्तकाम्या ।
समानं तन्तुमभि संवसानौ तस्मिन्त्सर्वं शमलं सादयाथः ।।५2।।
वर्षं वनुष्वापि गच्छ देवांस्त्वचो धूमं पर्युत्पातयासि ।
विश्वव्यचा घृतपृष्ठो भविष्यन्त्सयोनिर्लोकमुप याह्येतम् ।।५३।।
तन्वं स्वर्गो बहुधा वि चक्रे यथा विद आत्मन्नन्यवर्णाम् ।
अपाजैत् कृष्णां रुशतीं पुनानो या लोहिनी तां ते अग्नौ जुहोमि ।।५४।।
प्राच्यै त्वा दिशेऽग्नयेऽधिपतयेऽसिताय रक्षित्र आदित्यायेमुषमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ।।५५।।
दक्षिणायै त्वा दिश इन्द्रायाधिपतये तिरश्चिराजये रक्षित्रे यमायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ।।५६।।
प्रतीच्यै त्वा दिशे वरुणायाधिपतये पृदाकवे रक्षित्रेऽन्नायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।

दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ।।५७।।
उदीच्यै त्वा दिशे सोमायाधिपतये स्वजाय रक्षित्रेऽशन्या इषुमत्यै ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ।।५८।।
ध्रुवायै त्वा दिशे विष्णवेऽधिपतये कल्माषग्रीवाय रक्षित्र ओषधीभ्य इषुमतीभ्यः ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ।।५६।।
ऊर्ध्वायै त्वा दिशे बृहस्पतयेऽधिपतये श्वित्राय रक्षित्रे वर्षायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ।।६०।।

८४५. स्वर्ग्याणौ

१. गयः प्लातः – य. 21.६

सुनावमा रुहेयमस्रवन्तीमनागसम्। शतारित्राα स्वस्तये ।

८४६. स्वाहाकृतयः

१. मेधातिथिः काण्वः – ऋ. १.१३.12

स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे। तत्र देवाँ उप ह्वये ।।12।।

८४७. स्वाहाकृतिः

१. दीर्घतमा औचथ्यः – ऋ. १.१४2.12

पूषण्वते मरुत्वते विश्वदेवाय वायवे। स्वाहा गायत्रवेपसे हव्यमिन्द्राय कर्तन ।।12।।

८४८. सकामा अविष्यवः

१. अथर्वा – अ. ३.2६.2

येऽ३स्यां स्थ दक्षिणायां दिश्य विष्यवो नाम देवास्तेषां वः काम इषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ।।2।।

८४६. सत्यगुणविशिष्टोऽग्निः शुद्धोऽग्निर् वा

१. कुत्स आंगिरसः – ऋ. १.६५.१–११

द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते ।
हरिरन्यस्यां भवति स्वधावांछुक्रो अन्यस्यां ददृशे सुवर्चाः ।।१।।
दशेमं त्वष्टुर्जनयन्त गर्भमतन्द्रासो युवतयो विभृत्रम् ।
तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयन्ति ।।2।।
त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु ।
पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशासद्धि दधावनुष्ठु ।।३।।
क इमं वो निण्यमा चिकेत वत्सो मातृर्जनयत स्वाधभिः ।
बह्वीनां गर्भो अपसामुपस्थान्महान्कविर्निश्चरति स्वधावान् ।।४।।
आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे ।
उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते ।।५।।
उभे भद्रे जोषयेत ने मेने गाधो न वाश्रा उप तस्थुरेवैः ।
स दक्षाणां दक्षपतिर्बभूवांजन्ति यं दक्षिणतो हविर्भिः ।।६।।
उद्यमीति सवितेव बाहू उभे सिचौ यतते भीम ऋंजन् ।
उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ।।७।।
त्वेषं रूपं कृणुत उत्तरं यत्संपृंचानः सदने गोभिरद्भिः ।

कविर्बुध्नं परि ममृज्यते धीः सा देवताता समितिर्बभूव ।।८।।
उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम ।
विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान् ।।६।।
धन्वन्त्स्रोतः कृणुते गातुमूर्मिं शुक्रैरुर्मिभिरभि नक्षति क्षाम् ।
विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ।।१०।।
एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।११।।

८५०. सदस्पतिः

१. मेधातिथिः काण्वः – ऋ. १.१८.६–८

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम् ।।६।।
यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन। स धीनां योगमिन्वति ।।७।।
आदृध्नोति हविष्कृतिं प्रांचं कृणोत्यध्वरम्। होत्रा देवेषु गच्छति ।।८।।

८५१. सदस्पतिर् नाराशंसो वा

१. मेधातिथिः काण्वः – ऋ. १.१८.६

नराशंसं सुधृष्टममपश्यं सप्रथस्तमम्। दिवो न सद्ममखसम् ।।६।।

८५2. सपत्नघ्नम्

१. ऋषभो वैराजः शाक्वरो वा – ऋ. १०.१६६.१–५

ऋषभं मा समानानां सपत्नानां विषासहिम् ।
हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ।।१।।
अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः ।
अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ।।2।।
अत्रैव वोऽपि नह्याम्युभे आर्त्नी इव ज्यया ।
वाचस्पते नि षेधेमान्यथ मदधरं वदान् ।।३।।
अभिभूरहमागमं विश्वकर्मेण धाम्ना ।
आ वश्चित्तमा वो व्रतमा वोऽहं समिति ददे ।।४।।
योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीम् ।
अधस्पदान्म उद्वदत मण्डूकाइवोदकान्मण्डूका उदकादिव ।।५।।

८५३. सभा

१. शौनकः – अ. ७.१2.2

विद्म ते सभे नाम नरिष्टा नाम वा असि। ये ते के च सभासदस्ते मे सन्तु सवाचसः ।।2।।

८५४. सभा समितिः पितरश्च

१. शौनकः – अ. ७.१2.१

सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने ।
येना संगच्छा उप मा स शिक्षाच्चारु वदानि पितरः संगतेषु ।।१।।

८५५. सभापतिः

१. प्रजापतिः – य. 2०.४–६; ८

य. 2०.४–६

कोऽसि कतमोऽसि मस्मै त्वा काय त्वा। सुश्नलोक सुमंगल सत्यराजन् ।।४।।
शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्राणोऽ अमृतं सम्राट् चक्षुर्विराट् श्रोत्रम् ।।५।।
जिह्वा मे भद्रं वाङ् महो मनो मन्युः स्वराड् भामः ।

मोदाः प्रमोदाऽअंगलीरंगानि मित्रं मे सहः ।।६।।

य. २०.८

पृष्ठीर्मेराष्ट्रमुदग्मंसौ ग्रीवाश्च श्रोणी। ऊरूऽअरत्नी जानुनी विशो मेऽंगानि सर्वतः ।।८।।

८५६. सभापतिर्यजमानः

१. **नाभानेदिष्टः – य. ११.८2**

उदेषां बाहूऽअतिरमुद्वर्चोऽअथो बलम्। क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ2ऽअहम् ।।८2।।

८५७. सभापति राजा

१. **मधुच्छन्दाः – य. ६.३2**

इन्द्राय त्वा वसुमते रुद्रवतऽइन्द्राय त्वादित्यवतऽइन्द्राय त्वाभिमातिघ्ने ।
श्येनाय त्वा सोमभृतेऽग्नये त्वा रायस्पोषदे ।।३2।।

८५८. सभासदः

१. **प्रजापतिः – य. 2३.३८**

कुविदंग यवमन्तो यवंचिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिं यजन्ति ।।३८।।

८६०. सभेशः

१. **अश्विनौ – य. २०.३**

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। श्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभि षिंचामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभि षिंचामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभि षिंचामि ।।३।।

2. **सभेशः– य. २०.१; 2; ९; १०**

य. २०.१–2

क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि। मा त्वा हिंसीन्मा मा हिंसीः ।।१।।
निषसाद धृतव्रतो वरुणः पस्त्यास्वा। साम्राज्याय सुक्रतुः। मृत्योः पाहि विद्योत्पाहि ।।2।।

य. २०.९–१०

नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भि सत्। आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ।
जंघाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ।।९।।
प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु। प्रत्यंगेषु प्रति तिष्ठाम्यात्मन् प्रति प्राणेषु प्रति तिष्ठामि पुष्टे प्रति द्यावापृथिव्योः प्रति तिष्ठामि यज्ञे ।।१०।।

८६१. समाधाता

१. **प्रजापतिः – य. 2३.५४; ५६; ६०; ६2–६३**

य. 2३.५४

द्यौरासीत्पूर्वचित्तिरश्वऽआसीद् बृहद्वयः। अविरासीत्पिलिप्पिला रात्रिरासीत्पिशंगिला ।।५४।।

य. 2३.५६

अजारे पिशंगिला श्वावित्कुरुपिशंगिला। शशऽआस्कन्दमर्षत्यहिः पन्थां वि सर्पति ।।५६।।

य. 2३.६०

वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम् ।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः ।।६०।।

य. 2३.६2–६३

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ।।६2।।
सुभूः स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे। दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ।।६३।।

८६2. समिधा

१. **प्रजापतिः – य. 2३.५८**

षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यज्ञस्य ते विदथा प्र ब्रवीमि सप्त होतारऽऋतुशो यजन्ति ।।५८।।

८६३. सम्राट्

१. **तापसः – य. ६.३०**

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिंचाम्यसौ ।।३०।।

८६४. सम्राड्माण्डलिकौ राजानौ

१. **विवस्वान् – य. ८.३७**

इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्रऽएतम् ।
तयोरहमनु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा ।।३७।।

८६५. सरण्यूः

१. **देवश्रवा यामायनः – ऋ. १०.१७.१–2**

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ।।१।।
अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामदवुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ।।2।।

८६६. सरमा

१. **प्रणयः असुराः – ऋ. १०.१०८.१; ३; ५; ७; ६**

ऋ. १०.१०८.१

किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः ।
कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि ।।१।।

ऋ. १०.१०८.३

कीदृङ्ङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात् ।
आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति ।।३।।

ऋ. १०.१०८.५

इमा गावः सरमे या ऐच्छः परि दिवो अन्तान्सुभगे पतन्ती ।
कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा ।।५।।

ऋ. १०.१०८.७

अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः ।
रक्षिन्ति तं पणयो ये सुगोपा रेकु पदमलकमा जगन्थ ।।७।।

ऋ. १०.१०८.६

एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन ।।८।।
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ।।६।।

८६७. सरस्वतिः

१. **गृत्समदः – य. ३४.११**

पंच नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पंचधा सो देशेऽभवत्सग्ति् ।।११।।

८६८. सरस्वती

१. **अर्थवणः – य. ३८.2; ४**

य. ३८.2

इडऽएह्यदितऽएहि सरस्वत्येहि। असावेह्यसावेह्यसावेहि ।।2।।

य. ३८.४

अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व। स्वाहेन्द्रवत् स्वाहेन्द्रवत् स्वाहेन्द्रवत् ।।४।।

2. अथर्वांगिरा – अ. ६.६४.१–३

सं वो मनांसि सं व्रता समाकूतीर्नमामसि ।
अमी ये विव्रता स्थन तान् व सं नमयामसि ।।१।।
अहं गृभ्णामि मनसा मनांसि मम चित्तमनु चित्तेभिरेत
मम वशेषु हृदयानि वः कृणोमि मम यातमनुवर्त्मान एत ।।2।।
ओते मे द्यावापृथिवी ओता देवी सरस्वती ।
ओतौ म इन्द्रश्चाग्निश्चर्ध्यास्मेदं सरस्वति ।।३।।

३. गृत्समदः शौनकः – ऋ. 2.४१.१६–१८

अम्बितमे नदीतमे देवितमे सरस्वति। अप्रशस्ता इव स्मासि प्रशस्तिमम्ब नस्कृधि ।।१६।।
त्वे विश्वा सरस्वति श्रितायूंषि देवयाम्। शुनहोत्रेषु मत्स्व प्रजा देवि दिदिड्ढि नः ।।१७।।
इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति।
या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति।।१८।।

४. बृहदुक्थो वामदेव्यः – य. 2६.८

आदित्यैर्नो भारती वष्टु यज्ञं सरस्वती सह रुद्रैर्नऽआवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ।।८।।

५. मधुच्छन्दाः – य. 2०.८४–८६

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसु५ ।।८४।।
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती ।।८५।।
महोऽअर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति ।।८६।।

६. मधुच्छन्दा वैश्वामित्रः – ऋ. १.३.१०–१2

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः ।।१०।।
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती ।।११।।
महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति ।।१2।।

७. वसिष्ठः – ऋ. ७.६५.१–2; ४–६; ७.६६.१–३

ऋ. ७.६५.१–2

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः ।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ।।१।।
एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात् ।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ।।2।।

ऋ. ७.६५.४–६

उत स्या नः सरस्वती जुषाणोप श्रवत् सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ।।४।।
इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।
तव शर्मन्प्रियतमे दधाना उपस्थेयाम शरणं न वृक्षम् ।।५।।
अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः ।
वर्ध शुभ्रे स्तुवते रासि वाजान् यूयं पात स्वस्तिभिः सदा नः ।।६।।

ऋ. ७.६६.१–३

बृहदु गायिषो वचोऽसुर्या नदीदाम् ।
सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी ।।१।।
उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।

सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम् ।।2।।
भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती ।
गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत् ।।३।।

८. **वामदेवः – अ. ७.५७.१–2**

यदाशसा वदतो मे विचुक्षुभे यद् याचमानस्य चरतो जनाँ अनु।
यदात्मनि तन्वो मे विरिष्टं सरस्वती तदा पृणद् घृतेन ।।१।।
सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवृतन्नृतानि।
उभे इदस्योभे अस्य राजत उभे यतेते उभे अस्य पुष्यतः ।।2।।

६. **शन्तातिः – अ. ७.६८.१–३**

सरस्वति व्रतेषु ते दिव्येषु देवि धामसु ।
जुषस्व हव्यमाहुतं प्रजां देवि ररास्व नः ।।१।।
इदं ते हव्यं घृतवत् सरस्वतीदं पितॄणां हविर यं१ यत् ।
इमानि त उदिता शंतमानि तेभिर्वयं मधुमन्तः स्याम ।।2।।
शिवा नः शंतमा भव सुमृडीका सरस्वति। मा ते युयोम संदृशः ।।३।।

१०. **शौनकः – अ. ७.१०.१; ७.११.१**

अ. ७.१०.१

यस्ते स्तनः शशयुर्यो मयोभूर्यः सुम्नयुः सुहवो यः सुदत्रः ।
येन विश्वा पुष्यसि वीर्याणि सरस्वति तमिह धातवे कः ।।१।।

अ. ७.११.१

यस्ते पृथु स्तनयित्नुर्य ऋष्वो दैवः केतुर्विश्वमाभूषतीदम् ।
मा नो वधीर्विद्युता देव सस्यं मोत वधी रश्मिभिः सूर्यस्य ।।१।।

११. **शङ्खः – य. १६.८३; ८८; ६०; ६४**

य. १६.८३

सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ।।८३।।

य. १६.८८

मुखं सदस्य शिरऽइत् सतेन जिह्वा पवि त्रमश्विनासन्त्सरस्वती ।
चप्यं न पायुर्भिषगस्य बालो वस्तिर्न शेपो हरसा तरस्वी ।।८८।।

य. १६.६०

अविर्न मेषो नसि वीर्याय प्राणस्य पन्थाऽअमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ।।६०।।

य. १६.६४

सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्त्ति ।
अपां रसेन वरुणो न साम्नेन्द्रं श्रियै जनयन्नप्सु राजा ।।६४।।

१2. **दीर्घतमा औचथ्यः – ऋ. १.१६४.४६**

यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि ।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः ।।४६।।

१३. **देवश्रवा यामायनः – ऋ. १०.१७.७–६**

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ।।७।।
सरस्वति या सरथं ययाथ स्वधाभिर्देवि पितृभिर्मदन्ती ।
आसद्यास्मिन्बर्हिषि मादयस्वानमीवा इष आ धेह्यस्मे ।।८।।
सरस्वतीं यां पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः ।

सहस्रार्घमिळो अत्र भागं रायस्पोषं यजमानेषु धेहि ।।६।।

१४. भरद्वाजो बार्हस्पत्यः – ऋ. ६.६१.१–१४; सा. १४६१

ऋ. ६.६१.१–१४

इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।
या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ।।१।।
इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः ।।2।।
सरस्वति देवनिदो निबर्हय प्रजां विश्वस्य बृहसयस्य मायिनः ।
उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति ।।३।।
प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्र्यवतु ।।४।।
यस्त्वा देवि सरस्वत्युपब्रूते धने हिते। इन्द्रं न वृत्रतूर्ये ।।५।।
त्वं देवि सरस्वत्यवा वाजेषु वाजिनि। रदा पूषेव नः सनिम् ।।६।।
उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः। वृत्रघ्नी वष्टि सुष्टुतिम् ।।७।।
यस्या अनन्तो अह्रुतत्वेषश्चरिष्णुरर्णवः। अमश्चरति रोरुवत् ।।८।।
सा नो विश्वा अतिद्विषः स्वसॄरन्या ऋतावरी। अतन्नहेव सूर्यः ।।६।।
उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत् ।।१०।।
आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम्। सरस्वती निदस्पातु ।।११।।
त्रिषधस्था सप्तधातुः पंच जाता वर्धयन्ती। वाजेवाजे हव्या भूत् ।।12।।
प्र या महिम्ना महिनासु चेकिते द्युम्नेभिरन्या अपसामपस्तमा ।
रथइव बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती ।।१३।।
सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ धक् ।
जुषस्वः न सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म ।।१४।।

सा. १४६१

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत् ।।१।।

८६६. सरस्वती लाभारत्यः

१. दीर्घतमा औचथ्यः – ऋ. १.१४2.६

शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती। इळा सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ।।६।।

८७०. सरस्वतीः

१. अथर्वाः – अ. ५.७.४–५; १८.१.४१–४2

अ. ५.७.४–५

सरस्वतीमनुमतिं भगं यन्तो हवामहे। वाचं जुष्टां मधुमतीमवादिषं देवानां देवहूतिषु ।।४।।
यं याचाम्यहं वाचा सरस्वत्या मनोयुजा। श्रद्धा तमद्य विन्दतु दत्ता सोमेन बभ्रुणा ।।५।।

अ. १८.१.४१–४2

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात् ।।४१।।
सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः ।
आसद्यास्मिन् बर्हिषि मादयध्वमनमीवा इष आ धेह्यस्मे ।।४2।।

2. गृत्समदः – य. ३४.११

पंच नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पंचधा सो देशेऽभवत्सग्ति् ।।११।।

८७१. सरस्वत्यादयः

१. प्रजापतिः – य. 2५.१

शादं दद्भिरवकांदन्तमूलैर्मृदं बर्स्वैस्तेगान्दंष्ट्राभ्यां सरस्वत्याऽअग्रजिह्वं

जिह्वायाऽउत्सादमवक्रन्देनतालु वाजं हनुभ्यामपऽआस्येन वृषणमाण्डाभ्यामादित्याँ श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावापृथिवी वर्त्तोभ्यां विद्युतं कनीनकाभ्यां शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्याऽइक्षवोऽवार्याणि पक्ष्माणि पार्याऽइक्षवः ।।१।।

2. **स्वस्त्यात्रेयः – य. २१.३२; ४८**

य. २१.३२

होता यक्षदिडेडितऽआजुह्वानः सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजं यवैः कर्कन्धुभिर्मधु लाजैर्न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ।।३२।।

य. २१.४८

देवं बर्हिः सरस्वती सुदेवमिन्द्रेऽअश्विना ।
तेजो न चक्षुरक्ष्योर्बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ।।४८।।

८७२. सरस्वान्

१. **प्रस्कण्वः – अ. ७.४०.१–२**

यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रत उपतिष्ठन्त आपः ।
यस्य व्रते पुष्टपतिर्निविष्टस्तं सरस्वन्तमवसे हवामहे ।।१।।
आ प्रत्यंचं दाशुषे दाश्वांसं सरस्वन्तं पुष्टपतिं रयिष्ठाम् ।
रायस्पोषं श्रवस्युं वसाना इह हुवेम सदनं रयीणाम् ।।2।।

2. **वसिष्ठः – ऋ. ७.९५.३; ७.९६.४–६**

ऋ. ७.९५.३

स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु ।
स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ।।३।।

ऋ. ७.९६.४–६

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः। सरस्वन्तं हवामहे ।।४।।
ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः। तेभिर्नोऽविता भव ।।५।।
पीपिवासं सरस्वतः स्तनं यो विश्वदर्शतः। भक्षीमहि प्रजामिषम् ।।६।।

३. **वासिष्ठो मैत्रावरुणिः – सा. १४६०**

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः। सरस्वन्तं हवामहे ।।१।।

८७३. सरस्वान् सूर्यो वा

१. **दीर्घतमा औचथ्यः – ऋ. १.१६४.५2**

दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् ।
अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ।।५2।।

८७४. सर्पविषनिवारणम्

१. **गरुत्मान् – अ. ५.१३.१–११**

ददिर्हि मह्य वरुणो दिवः कविर्वचोभिरुग्रैर्नि रिणामि ते विषम् ।
खातमखतमुत सक्तमग्रभमिरेव धन्वन्नि जजास ते विषम् ।।१।।
यत् ते अपोदकं विषं तत् त एतास्वग्रभम् ।
गृह्णामि ते मध्यममुत्तमं रसमुतावमं भियसा नेशदादु ते ।।2।।
वृषा मे रवो नभसा न तन्यतुरुग्रेण ते वचसा बाध आदु ते अहं तमस्य ।
नृभिरग्रभं रसं तमसइव ज्योतिरुदेतु सूर्यः ।।३।।
चक्षुपा ते चक्षुर्हन्मि विषेण हनिम ते विषम् ।
अहे म्रियस्व मा जीवीः प्रत्यगभ्येतु त्वा विषम् ।।४।।
कैरात् पृश्न उपतृण्य बभ्र आ मे शृणुतासिता अलीकाः ।
मा मे सख्युः स्तामानमपि ष्ठाताश्रावयन्तो नि विषे रसध्वम् ।।५।।

असितस्य तैमातस्य बभ्रोरपोदकस्य च ।
सात्रासाहस्याहं मन्योरव ज्यामिव धन्वनो वि मुंचामि रथाँइव ।।६।।
आलिगी च विलिगी च पिता च माता च ।
विद्म वः सर्वतो बन्ध्वरसाः किं करिष्यथ ।।७।।
उरुगूलाया दुहिता जाता दास्यसिक्न्या ।
प्रतंकं दद्रुषीणां सर्वासामरसं विषम् ।।८।।
कर्णा श्वावित् तदब्रवीद् गिरेरवचरन्तिका ।
याः काश्चेमाः खनित्रिमास्तासामरसतमं विषम् ।।९।।
ताबुवं न ताबुवं न घेत त्वमसि ताबुवम्। ताबुवेनारसं विषम् ।।१०।।
तस्तुवं न तस्तुवं न घेत् त्वमसि तस्तुवम्। तस्तुवेनारसं विषम् ।।११।।

८७५. सर्पविषापाकरणम्

१. गरुत्मान् – अ. ७.८८.१; १०.४.१–२६

अ. ७.८८.१

अपेह्यरिरस्यरिर्वा असि। विषे विषमपृक्था विषमिद् वा अपृक्थाः। अहिमेवाभ्यपेहि तं जहि ।।१।।

अ. १०.४.१–२६

इन्द्रस्य प्रथमो रथो देवानामपरो रथो वरुणस्य तृतीय इत्। अहीनामपमा रथः स्थाणुमारदथार्षत्।।१।।
दर्भः शोचिस्तरूणकमश्वस्य वारः परुषस्य वारः। रथस्य बन्धुरम् ।।2।।
अव श्वेत पदा जहि पूर्वेण चापरेण च। उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम् ।।३।।
अरंघुषो निमज्योन्मज्य पुनरब्रवीत्। उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम् ।।४।।
पैद्वो हन्ति कसर्णीलं पैद्वः श्वित्रमुतासितम्। पैद्वो रथर्व्याः शिरः सं बिभेद पृदाक्वाः ।।५।।
पैद्व प्रेहिं प्रथमोऽनु त्वा वयमेमसि। अहीन् व्यस्यतात् पथो येन स्मा वयमेमसि ।।६।।
इदं पैद्वो अजायतेदमस्य परायणम्। इमान्यर्वतः पदाहिघ्न्यो वाजिनीवतः ।।७।।
संयतं न वि ष्परद् व्यात्तं न सं यमत्। अस्मिन् क्षेत्रे द्वावही स्त्री च पुमांश्च तावुभावरसा ।।८।।
अरसास इहाहयो ये अन्ति ये च दूरके। घनेन हन्मि वृश्चिकमहिं दण्डेनागतम् ।।९।।
अघाश्वस्येदं भेषजुमुभ्योः स्वजस्य च। इन्द्रो मेऽहिमघायन्तमहिं पैद्वो अरन्धयत् ।।१०।।
पैद्वस्य मन्महे वयं स्थिरस्य स्थिरधाम्नः। इमे पश्चा पृदाकवः प्रदीध्यत आसते ।।११।।
नष्टासवो नष्टविषा हता इन्द्रेण वज्रिणा। जघानेन्द्रो जघ्निमा वयम् ।।१2।।
हतास्तिरश्चिराजयो निपिष्टासः पृदाकवः। दर्विं करिक्रतं श्वित्रं दर्भेष्वसितं जहि ।।१३।।
कैरातिका कुमारिका सका खनति भेषजम्। हिरण्ययीभिरभ्रिभिर्गिरीणामुप सानुषु ।।१४।।
आयमगन् युवा भिषक् पृश्निहापराजितः। स वै स्वजस्य जम्भन् उभयोवृश्चिकस्य च ।।१५।।
इन्द्रो मेऽहिमरन्धयन्मित्रश्च वरुणश्च। वातापर्जन्योउभा ।।१६।।
इन्द्रो मेऽहिमरन्धयत् पृदाकुं च पृदाक्वम्। स्वजं तिरश्चिराजिं कसर्णीलं दशोनसिम् ।।१७।।
इन्द्रो जघान प्रथमं जनितारमहे तव। तेषामु तृह्यमाणानां कः स्वित् तेषामसद् रसः ।।१८।।
स हिं शीर्षाण्यग्रभं पौंजिष्ठइव कर्वरम्। सिन्धोर्मध्यं परेत्य व्यनिजमहेर्विषम् ।।१९।।
अहीनां सर्वेषां विषं परा वहन्तु सिन्धवः। हतास्तिरश्चिराजयो निपिष्टासः पृदाकवः ।।2०।।
ओषधीनामहं वृण उर्वरीरिव साधुया। नयाम्यर्वतीरिवाहे निरैतु ते विषम् ।।2१।।
यदग्नौ सूर्ये विषं पृथिव्यामोषधीषु यत्। कान्दाविषं कनक्नकं निरैत्वैतु ते विषम् ।।22।।
ये अग्निजा ओषधिजा अहीनां ये अप्सुजा विद्युत आबभूवुः ।
येषां जातानि बहुधा महान्ति तेभ्यः सर्पेभ्यो नमसा विधेम ।।2३।।
तौदी नमासि कन्या घृताची नाम वा असि। अधस्पदेन ते पदमा ददे विषदूषणम् ।।2४।।
अंगादंगात् प्र च्यावय हृदयं परि वर्जय। अधा विषस्य यत् तेजोऽवाचीनं तदेतु ते ।।2५।।
आरे अभूद् विषमरौद् विषे विषमप्रगपि ।

अग्निर्विषमहेर्निदधात् सोमो निरणयीत्। दंष्टारमन्वगाद् विषमहिरमृत ।।2६।।

८७६. सर्वरुपा सर्वात्मिका सर्वदेवमयी वाक्

१. अथर्वा – अ. ४.३०.१–८

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ।।१।।
अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तः ।।2।।
अहमेव स्वयमिदं वदामि जुष्टं देवानामुत मानुषाणाम् ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।।३।।
मया सोऽन्नमत्ति यो विपश्यति यः प्राणति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धेयं ते वदामि ।।४।।
अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ।।५।।
अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणा हविष्मते सुप्राव्या३ यजमानाय सुन्वते ।।६।।
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्व१न्तः समुद्रे ।
ततो वि तिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ।।७।।
अहमेव वातइव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिम्ना सं बभूव ।।८।।

८७७. सर्व शीर्षामयापकरणम्

१. भृग्वंगिरा – अ. ६.८.१–22

शीर्षक्तिं शीर्षमयं कर्णशूलं विलोहितम्। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ।।१।।
कर्णाभ्यां ते कङ्कूषेभ्यः कर्णशूलं विसल्पकम्। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ।।2।।
यस्य हेतोः प्रच्यवते यक्ष्मः कर्णत आस्यतः। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ।।३।।
यः कृणोति प्रमोतमन्धं कृणोति पूरुषम्। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ।।४।।
अङ्गभेदमंगज्वरं विश्वांगयं विसल्पकम्। सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ।।५।।
यस्य भीमः प्रतीकाश उद्वेपयति पूरुषम्। तक्मानं विश्वशारदं बहिर्निर्मन्त्रयामहे ।।६।।
य ऊरू अनुसर्पत्यथो एति गवीनिके। यक्ष्मं ते अन्तरंगेभ्यो बहिर्निर्मन्त्रयामहे ।।७।।
यदि कामादपकामाद्धृदयाज्जायते परि। हृदो बलासमंगेभ्यो बहिर्निर्मन्त्रयामहे ।।८।।
हरिमाणं ते अंगेभ्योऽप्वामन्तरोदरात्। यक्ष्मोधामन्तरात्मनो बहिर्निर्मन्त्रयामहे ।।६।।
आसो बलासो भवतु मूत्रं भवत्वामयत्। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ।।१०।।
बहिर्बिलं निर्द्रवतु काहाबाहं तवोदरात्। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ।।११।।
उदरात् ते क्लोम्नो नाभ्या हृदयादधि। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ।।१2।।
याः सीमानं विरुजन्ति मूर्धानं प्रत्यर्षणीः। अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् ।।१३।।
या हृदयमुपर्षन्त्यनुतन्वन्ति कीकसाः। अहिंसन्तीरनामया निर्द्रवन्तु बर्हिर्बिलम् ।।१४।।
याः पार्श्वे उपर्षन्त्यनुनिक्षन्ति पृष्टीः। अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् ।।१५।।
यास्तिरश्चीरुपर्षन्त्यर्षणीर्वक्षणासु ते। अहिंसन्तीरनामया निर्द्रवन्तु बर्हिर्बिलम् ।।१६।।
या गुदा अनुसर्पन्त्यान्त्राणि मोहयन्ति च। अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् ।।१७।।
या मज्ज्ञो निर्धयन्ति परूंषि विरुजन्ति व। अहिंसन्तीरनामया निर्द्रवन्तु बर्हिर्बिलम् ।।१८।।
ये अंगानि मदयन्ति यक्ष्मासो रोपणास्तव। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ।।१६।।
विसल्पस्य विद्रधस्य वातीकारस्य वालजेः। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ।।2०।।
पादाभ्यां ते जानुभ्यां श्रोणिभ्यां परि भंससः। अनूकादर्षणीरुष्णिहाभ्यः शीर्ष्णो रोगमनीनशम्।।2१।।

सं ते शीर्ष्णाः कपालानि हृदयस्य च यो विधुः ।
उद्यन्नादित्य रश्मिभिः शीर्ष्णो रोगमनीनशोऽंगभेदमशीशमः ।।22।।

८७८. सर्वात्मको रुद्रः

१. अथर्वा – अ. ५.६.११–१४

इन्द्रस्य गृहोऽसि। तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः सर्वातमा सर्वतनूः
सह यन्मेऽस्ति तेन ।।११।।
इन्द्रस्य शर्मासि। तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः
सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ।।१2।।
इन्द्रस्य वर्मासि। तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः
सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ।।१३।।
इन्द्रस्य वरूथमसि। तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः
सह यन्मेऽस्ति तेन ।।१४।।

८७९. सवाता प्रविध्यन्तः

१. अथर्वा – अ. ३.2६.४

ये३स्यां स्थोदीच्यां दिशि प्रविध्यन्तो नाम देवास्तेषां वो वात इषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ।।४।।

८८०. सविता

१. अगस्त्यः – य. ३३.३४

आ नऽइडाभिर्विदथे सुशस्ति विश्वानरः सविता देवऽएतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदाभिपित्वे मनीषा ।।३४।।

2. अर्थवणः – य. ३८.१

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम। आ ददऽदित्यै रास्नासि ।।१।।

३. अथर्वा – अ. ५.2४.१; ७.१४.१–४

अ. ५.2४.१

सविता प्रसवानामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।१।।

अ. ७.१४.१–४

अभि त्यं देवं सवितारमोण्योः कविक्रतुम् ।
अर्चामि सत्यसवं रत्नधामभि प्रियं मतिम् ।।१।।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत् सवीमनि ।
हिरण्यपाणिरमिमीत सुक्रतुः कृपात् स्वः ।।2।।
सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै ।
अथास्मभ्यं सवितर्वार्याणि दिवोदिव आ सुवा भूरि पश्वः ।।३।।
दमूना देवः सविता वरेण्यो दधद् रत्नं दक्षं पितृभ्य आयूंषि ।
पिबात् सोमं ममददेनमिष्टे परिज्मा चित् क्रमते अस्य धर्मणि ।।४।।

४. अथर्वा (स्वस्त्ययनकामः) – अ. ६.१.१–३

दोषो गाय बृहद् गाय द्युमद्धेह्याथर्वण। स्तुहि देवं सवितारम् ।।१।।
तमु ष्टुहि यो अन्तः सिन्धौ सूनुः सत्यस्य युवानम्। अद्राघवाचं सुशेवम् ।।2।।
स घा नो देवः सविता साविषदमृतानि भूरि। उभे सुष्टुती सुगातवे ।।३।।

५. आगस्त्यः अग्रे द्रष्टव्यम् – य. ६.१

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददे नार्यसीदमहं रक्षसां

ग्रीवाऽअपिकृन्तामि। यवोऽसि यवयास्मद्द्वेषो यवयारराती र्दिवे त्वाऽनतरिक्षाय त्वा पृथिव्यै
त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ।।१।।

६. **आथर्वणः दध्यङ् – य. ३७.११**

यमाय त्वा मखाय त्वा सूर्य्यम्य त्वा तपसे ।
देवस्त्वा सविता मध्वानक्रु पृथिव्याः सं स्पृशम्पाहि। अर्चिरसि शोचिरसि तपोऽसि ।।११।।

७. **आदित्या देवाः – य. ३५.2**

सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु। तस्मै युजयन्तामुस्रियाः ।।2।।

८. **आदित्या देवा वा – य. ३५.३**

वायुः पुनातु सविता पुनाव्वग्नर्भ्राजसा सूर्य्यस्य वर्चसा। वि मुच्यन्तामुस्रियाः ।।३।।

९. **अर्चन्हैरण्यस्तूपः – ऋ. १०.१४९.१–५**

सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत् ।
अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्ते बद्धं सविता समुद्रम् ।।१।।
यत्रा समुद्रः स्कभितो व्यौनदपां नपात्सविता तस्य वेद ।
अतो भूरत आ उत्थितं रजोऽतो द्यावापृथिवी अप्रथेताम् ।।2।।
पश्चेदमन्यदभवद्यजत्रममर्त्यस्य भुवनस्य भूना ।
सुपर्णो अंग सवितुर्गरुत्मान्पूर्वो जातः स उ अस्यानु धर्म ।।३।।
गाव इव ग्रामं यूयुधिरिवाश्वान्वाश्रेव वत्सं सुमना दुहाना ।
पतिरिव जायामभि नो न्येतु धर्ता दिवः सविता विश्ववारः ।।४।।
हिरण्स्तूपः सवितर्यथा त्वांगिरसो जुह्वे वाजे अस्मिन् ।
एवा त्वार्चन्नवसे वन्दमानः सोमस्येवांशुं प्रति जागराहम् ।।५।।

१०. **इन्द्राबृहस्पती – य. ९.१**

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय। दिव्यो गन्धर्वः केतपूः केतं नः पुनातु
वाचस्पतिर्वाजं नः स्वदतु स्वाहा ।।१।।

११. **कण्वः – य. १७.७४**

तां सवितुर्वरेणयस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ।
यामस्य कणवो अदुहत्प्रपीनां सहस्रधारां पयसा महीं गाम् ।।७४।।

१2. **गोतमः – य. ५.१४**

युंजते मनऽउत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ।।१४।।

१३. **गृत्समदः शौनकः – ऋ. 2.३८.१–११**

उदु ष्य देवः सविता सवाय शश्वत्तमम तदपा वह्निरस्थात् ।
नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ।।१।।
विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति ।
आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ।।2।।
आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः ।
अह्यर्षूणां चिन्नययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ।।३।।
पुनः सभव्यद्वितत्तं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः ।
उत्संहायास्थद्व्यृ१तूँरदर्धररमतिः सविता देव आगात् ।।४।।
ना नौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः ।
ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ।।५।।
समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरताममाभूत् ।
शश्वँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ।।६।।

त्वया हितमप्यमप्सु भागं धन्वान्या मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनन्ति ।।७।।
याद्राध्यं१ वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः ।
विश्वो मार्ताण्डो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः ।।८।।
न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः ।
नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ।।६।।
भगं धियं वाजयन्तः पुरन्धिं नराशंसो ग्नास्पतिर्नो अव्याः ।
आये वामस्य सङ्गथे रयीणां प्रिया देवस्य सवितुः स्याम ।।१०।।
अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात् ।
शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे ।।११।।

१४. दध्यङ् आथर्वणः – य. ३७.११

यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे।
देवस्त्वा सविता मध्वानक्तु पृथिव्याः सं स्पृशस्पाहि। अर्चिरसि शोचिरसि तपोऽसि ।। ११ ।।

१५. नारायणः – य. ३०.१–३

देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ।।१।।
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदचात् ।।2।।
विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्नऽआ सुव ।।३।।

१६. परमेष्ठी प्रजापतिः – य. १.१६; 2.१2

य. १.१६

कुक्कुटोऽसि मधुजिह्व ऽ इषमूर्जमावद त्वया वयं सङ्घात ं सङ्घातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्ध वेत्तु परापूतं रक्षः परापूता अरातयोऽपहतं रक्षो वायुर्वो विविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ।।१६।।

य. 2.१2

एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन यज्ञपतिं तेन मामव ।।१2।।

१७. प्रजापतिः – य. ११.१–११

युंजानः प्रथमं मनस्तत्त्वाय सविता धियः। अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअध्याभरत् ।।१।।
युक्तेन मनसा वयं देवस्य सवितुः सवे। स्वर्ग्याय शक्त्या ।।2।।
युक्त्वाय सविता देवान्त्स्वर्य्यतो धिया दिवम्। बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान।।३।।
युंजते मनऽउत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः ।।४।।
युजे वां ब्रह्म पूवर्यं नमोभिर्वि श्लोकऽएतु पथ्येव सूरेः ।
शृणवन्तु विश्वेऽअमृतस्य पुत्राऽआ ये धामानि दिव्यानि तस्थुः ।।५।।
यस्य प्रयाणमन्वन्यऽइद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे सऽएतशो रजांसि देवः सविता महित्वना ।।६।।
देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ।।७।।
इमं नो देव सवितर्यज्ञं प्रणय देवाव्यं सखिविदं सत्राजितं धनजितं स्वर्जितम् ।
ऋचा स्तोमं समर्ध य गायत्रेण रथन्तरं बृहद्गायत्रवर्त्तनि स्वाहा ।।८।।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददे गायत्रेण
छन्दसांगिरस्वत्पृथिव्याः सधस्थादग्निं पुरीष्यमंगिरस्वदाभर त्रैष्टुभेन छन्दसांगिरस्वत् ।।६।।
अभ्रिरसि नार्यसि त्वया वयमग्निं शकेम खनितुं सधस्थ आ। जागतेन छन्दसांगिरस्वत् ।।१०।।
हस्तऽआधाय सविता बिभ्रदभ्रिंहिरण्ययीम् ।

अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअध्याभरदानुष्टुभेन छन्दसांगिरस्वत् ।।११।।

१८. बृहस्पतिः – य. ९.५; १३

इन्द्रस्य वज्रोऽसि वाजसास्त्वयाऽयंवाजं सेत् ।
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म सविषत् ।।५।।
देवस्याहं सवितुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजं जेषम् ।
वाजिनो वाजजितोऽध्वन स्कभ्नुवन्तो योजना मिमानाः काष्ठां गच्छत ।।१३।।

१९. ब्रह्म – अ. ५.2९.2; ७.2४.१; १९.५१.2

अ. ५.2९.2

युनक्तु देवः सविता प्रजानन्नस्मिन् यज्ञे महिषः स्वाहा ।।2।।

अ. ७.2४.१

यन्न इन्द्रो अखनद् यदग्निर्विश्वे देवा मरुतो यत् स्वर्काः ।
तदस्मभ्यं सविता सत्यधर्मा प्रजापतिरनुमातिर्नि यच्छात् ।।१।।

अ. १९.५१.2

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूत आ रभे ।।2।।

२०. भरद्वाजः – य. ३३.८४

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नोऽअघशंस ईशत ।।८४।।

2१. भरद्वाजो बार्हस्पत्यः – ऋ. ६.७१.१–६

उदु ष्य देवः सविता हिरण्यया बाहु अयंस्त सवनाय सुक्रतुः ।
घृतेन पाणी अभि प्रष्णुते मखो युवा सुदक्षो रजसो विधर्मणि ।।१।।
देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने ।
यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः ।।2।।
अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परिपाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षो माकिर्नो अघशंस ईशत ।।३।।
उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात् ।
अयोहनुर्यजतो मन्द्रजिह्व आ दाशुषे सुवति भूरि वामम् ।।४।।
उदू अयाँ उपवक्तेव बाहू हिरण्यया सविता सुप्रतीका ।
दिवा रोहांस्यरुहत्पृथिव्या अरीरमत्पतयत् कच्चिदभ्वम् ।।५।।
वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ।।६।।

22. भृगुः – अ. ७.१५.१; ७.१६.१

अ. ७.१५.१

तां सवितः सत्यसवां सुचित्रामाहं वृणे सुमतिं विश्ववाराम् ।
यामस्य कण्वो अदुहत् प्रपीनां सहस्रधारां महिषो भगाय ।।१।।

अ. ७.१६.१

बृहस्पते सवितर्वर्धयैनं ज्योतयैनं महते सौभगाय ।
संशितं चित् संतरं सं शिशाधि विश्व एनमनु मदन्तु देवाः ।।१।।

2३. मेधातिथिः – य. 22.१०; ३०.४

य. 22.१०

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम् ।।१०।।

य. ३०.४

विभक्तारं हवामहे वसोश्चित्ररस्य राधसः। सवितारं नृचक्षसम् ।।४।।

२४. मेधातिथिः काण्वः – ऋ. १.22.५–८

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम् ।।५।।
अपां नपातमवसे सवितारमुप स्तुहि। तस्य व्रतान्युश्मसि ।।६।।
विभक्तारं हवामहे वसोश्चित्रस्य राधसः। सवितारं नृचक्षसम् ।।७।।
सखाय आ नि षीदत सविता स्तोम्यो नु नः। दाता राधांसि शुम्भति ।।८।।

२५. लुशो धानाकः – य. ३३.१७

महोऽअग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवोऽअद्या वृणीमहे ।।१७।।

२६. वसिष्ठः – ऋ. ७.३८.१–६[१]; ७.४५.१–४; य. ३३.20

ऋ. ७.३८.१–६

उदु ष्य देवः सविता ययाम हिरण्ययीममतिं यामशिश्रेत् ।
नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति ।।१।।
उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे प्रभृतावृतस्य ।
व्यु१र्वी पृथ्वीममति सृजान आ नृभ्यो मर्त भोजनं सुवानः ।।2।।
अपि ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो गृणन्ति ।
स नः स्तोमान्नमस्य१ श्चनो धाद्विश्वेभिः पातु पायुभिर्नि सूरीन् ।।३।।
अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा ।
अभि सम्राजो वरुणो गृणन्त्यभि मित्रासो अर्यमा सजोषाः ।।४।।
अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः ।
अहिर्बुधन्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु ।।५।।
अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः ।
भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम् ।।६।।

ऋ. ७.४५.१–४

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः ।
हस्ते दधानो नर्या पुरूणि निवेशयंच प्रसुवंच भूम ।।१।।
उदस्य बाहू शिथिरा बृहन्ता हिरण्यया दिवो अन्ताँ अनष्टाम् ।
नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम् ।।2।।
स घा नो देवः सविता सहावा साविषद्वसुपतिर्वसूनि ।
विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः ।।३।।
इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीळते सुपाणिम् ।
चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः ।।४।।

य. ३३.20

यदद्य सूरऽउदितेऽनागा मित्रोऽअर्य्यमा। सुवाति सविता भगः ।।2०।।

२७. वामदेवो गौतमः – ऋ. ४.५४.१–६

अभूद्देवः सविता वन्द्यो नु नु इदानीमह्न उपवाच्यो नृभिः ।
वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत् ।।१।।
देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम् ।
आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ।।2।।
अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता ।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ।।३।।

न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धारयिष्यति ।
यत्पृथिव्या वरिमन्ना स्वङ्गुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत् ।।४।।
इन्द्रजयेष्ठान् बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः ।
यथायथा पतयन्तो बियेमिर एवैव तस्थुः सवितः सवाय ते ।।५।।
ये ते त्रिरहन्त्सवितः सवासो दिवेदिवे सौभगमासुवन्ति ।
इन्द्रो द्यावापृथिवी सिन्धुरद्भिरादित्यैनो अदितिः शर्म यंसत् ।।६।।

२८. विश्वामित्रः – य. ३.३५; ११.६३; 22.६; ३६.३

य. ३.३५

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ।।३५।।

य. ११.६३

देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या।
अव्यथमाना पृथिव्यामाशा दिशऽआपृण ।।६३।।

य. 22.६

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ।।६।।

य. ३६.३

भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ।।३।।

२९. विश्वामित्रो गाथिनः – ऋ. ३.६2.१०–१2; सा. १४६2

ऋ. ३.६2.१०–१2

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ।।१०।।
देवस्य सवितुर्वयं वाजयन्तः पुरंध्या। भगस्य रातिमीमहे ।।११।।
देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः। नमस्यन्ति धियेषिताः ।।१2।।

सा. १४६2

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ।।१।।

३०. विश्वावसुर्देवगन्धर्वः – ऋ. १०.१३९.१–३

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ अजस्रम् ।
तस्य पूषा प्रसवे याति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ।।१।।
नुचक्षा एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम् ।
स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ।।2।।
रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः ।
देवइव सविता सत्यधर्मेन्द्रो न तस्थौ समरे धनानाम् ।।३।।

३१. वैखानसः – य. १९.४३

उभाभ्यां देव सवितः पवित्रेण सवेन च। मां पुनीहि विश्वतः ।।४३।।

३2. शाकल्य – य. ६.2

अग्रेणीरसि स्वावेशऽउन्नेतृणामेतस्य वित्तादधि त्वा स्थास्यति देवस्त्वा सविता मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधीभ्यः। द्यामाग्रेणास्पृक्षऽआन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृंहीः ।।2।।

३३. शङ्खः – य. १९.८०; ८५–८६

य. १९.८०

सीसेन तन्त्रं मनसा मनीषिणऽऊर्णा सूत्रेण कवयो वयन्ति ।
अश्विना यज्ञं सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ।।८०।।

य. १९.८५–८६

इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान ।
यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यैर्न मिनाति पित्तम् ।।८५।।

आन्त्राणि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुधा न धेनुः ।
श्येनस्य पत्रं न प्लीहा शचीभिरासन्दी नाभिरुदरं न माता ।।८६।।

३४. श्यावाश्वः – य. 12.३; ३७.2

य. 12.३

विश्वा रूपाणि प्रतिमुंचते कविः प्रासावीद् भद्रं द्विपदे चतुष्पदे।
वि नाकमख्यत् सविता वरेण्योऽनु प्रयाणमुषसो विराजति ।।३।।

य. ३७.2

युंजते मनऽउत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः ।।2।।

३५. श्यावाश्व आत्रेयः – ऋ. ५.८1.1–५

युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होता दधे वायुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ।।1।।
विश्वा रूपाणि प्रति मुंचते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ।।2।।
यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ।।३।।
उत यासि सवितस्त्रीणि रोचनोात सूर्यस्य रश्मिभिः समुच्यसि ।
उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः ।।४।।
उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः ।
उतेदं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोममानशे ।।५।।

३६. हिरण्यस्तूपः आंगिरसः – ऋ. 1.३५.2–11; य. ३४.21–27

ऋ. 1.३५.2–11

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।।2।।
याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम् ।
आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ।।३।।
अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम् ।
आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तमिषीं दधानः ।।४।।
वि जनांछ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः ।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ।।५।।
तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् ।
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ।।६।।
वि सुपर्णो अन्तरिक्षाण्यख्यद् गभीरवेपा असुरः सुनीथः ।
क्वे३दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ।।७।।
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ।।८।।
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ।
अपामीवा बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ।।६।।
हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ।।1०।।
ये ते पन्थाः सवित पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभि रक्षा च नो अधि च ब्रूहि देव ।।11।।

य. ३४.२१–२७

सोमो धेनुं सोमोऽअर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ।।२१।।
त्वमिमाऽओषधीः सोम विश्वास्त्वमपोऽअजनयस्त्वं गाः ।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ।।22।।
देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्य्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ।।२३।।
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देवऽ आगाद्दधद्रत्ना दाशुषे वार्य्याणि ।।२४।।
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवीऽअन्तरीयते ।
अपामीवां बाधते वेति सूर्य्यमभि कृष्णेन रजसा द्यामृणोति ।।२५।।
हिरण्यहस्तोऽअसुरः सुनीथः सुमृडीकः स्वँवा यात्वर्वाङ् ।
अपसेधनूक्षमो यातुधानानस्थाद्दवः प्रतिदोषं गृणानः ।।२६।।
ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृताऽअन्तरिक्षे ।
तेभिर्नोऽअद्य पथिभिः सुगेभी रक्षा च नोऽअधि च ब्रूहि देव ।।२७।।

८८१. सवितादयः

१. दीर्घतमा – य. ३६.६

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुम्तृतीयऽआदित्यश्चतुर्थे चन्द्रमाः पंचमऽऋतुः षष्ठे
मरुतः सप्तमे बृहस्पतिरष्टमे। मित्रो नवमे वरुणो दशमऽइन्द्रऽएकादशे विश्वे देवा द्वादशे।।६।।

८८2. सविता अग्निः सरस्वती ब्रह्मणस्पतिः

१. अथर्वा – अ. ४.४.६

अद्याग्ने अद्य सवितरद्य देवि सरस्वति। अद्यास्य ब्रह्मणस्पते धनुरिबा तानया पसः ।।६।।

८८३. सविता अश्विनौ पूषा

१. दीर्घतमा – य. ६.६

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बा हुभ्यां पूष्णो हस्ताभ्याम्। अग्नीषोमाभ्यां जुष्टं नियुनज्मि।
अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूत्थ्यः।
अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ।।६।।

८८४. सविता गृहपतिः

१. भरद्वाजः – य. ८.७

उपयामगृहीतोऽसि सवित्रोऽसि चनोधाश्चनोधाऽअसि चनो मयि धेहि ।
जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ।।७।।

८८५. सविता जातवेदा

१. अथर्वांगिरा – अ. ७.११५.१–४

प्र पतेतः पापि लक्ष्मि नश्येतः प्रामुतः पत। अयस्मयेनांकेन द्विषते त्वा सजामसि ।।१।।
या मा लक्ष्मीः पतयालूरजुष्टाभिचस्कन्द वन्दनेव वृक्षम् ।
अन्यत्रास्मत् सवितस्तामितो धा हिरण्यहस्तो वसु नो रराणः ।।2।।
एकशतं लक्ष्म्यो३ मर्त्यस्य साकं तन्वा जनुषोऽधिं जाताः ।
तासां पापिष्ठा निरितः प्र हिण्मः शिवा अस्मभ्यं जातवेदो नि यच्छ ।।३।।
एता एना व्याकरं खिले गा विष्ठिताइव। रमन्ता पुण्या लक्ष्मीर्याः पापीस्ता अनीनशम् ।।४।।

८८६. सविता भगो

१. **शुनःशेप आजीगर्ति कृत्रिमो देवरातो वैश्वामित्रो वा (साग्री. सास्वा.) शुनःशेप आजगर्ति कृत्रिमो देवरातो वैश्वामित्रः (ऋसर्व.) शुनःशेपः (सार्षेदी.) – ऋ. १.2४.३–५**

अभि त्वा देव सवितरीशानं वार्याणाम्। सदावन्भागमीमहे ।।३।।
यश्चिद्धि त इत्था भगः शशमानः पुरा निदः। अद्वेषो हस्तयोर्दधे ।।४।।
भगभक्तस्य ते वयमुदशेम तवावसा। मूर्धानं राय आरभे ।।५।।

८८७. सविता भगो वा

१. **वसिष्ठः – ऋ. ७.३८.६²**

अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः ।
भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम् ।।६।।

८८८. सवित्रादयः

१. **अथर्वा – अ. ६.६८.१–३**

आयमगन्त्सविता क्षुरेणोष्णेन वाय उदकेनेहि ।
आदित्या रुद्रा वसव उन्दन्तु सचेतसः सोमस्य राज्ञो वपत प्रचेतसः।।१।।
अदितिः शमश्रु वपत्वाप उन्दन्तु वर्चसा ।
चिकित्सतु प्रजापतिर्दीर्घायुत्वाय चक्षसे ।।2।।
येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्राह्मणो वपतेदमस्य गोमानश्ववानयमस्तु प्रजावान् ।।३।।

८८६. सवित्रादयो मन्त्रोक्ताः

१. **द्रविणोदाः – अ. १.१८.१–४**

निर्लक्ष्म्यं ललाम्यं१ निनरातिं सुवामसि ।
अथ या भद्रा तानि नः प्रजाया अरातिं नयामसि ।।१।।
निररणिं सविता साविषत् पदोर्निर्हस्तयोर्वरुणो मित्रां अर्यमा ।
निरस्मभ्यमनुमती रराणा प्रेमां देवा असाविषुः सौभगाय ।।2।।
यत्त आत्मनि तन्वां घोरमस्ति यद्वा केशेषु प्रतिचक्षणे वा ।
सर्वं तद् वाचाप हन्मो वयं देवस्त्वा सविता सूदयतु ।।३।।
रिश्पदीं वृषदीतं गोषेधां विधमामुत ।
विलीढ्यं ललाम्यं१ ता अस्मन्नाशयामसि ।।४।।

2. **वसिष्ठः – अ. ३.2१.८–१०**

हिरण्यपाणि सवितारमिन्द्रं बृहस्पतिं वरुणं मित्रमग्निम् ।
विश्वान् देवानंगिरसो हवामह इमं क्रव्यादं शमयन्त्वग्निम् ।।८।।
शान्तो अग्निः क्रव्याच्छान्तः पुरुषरेषणः। अथा यो विश्वदाव्य१स्तं क्रव्यादमशीशमम् ।।६।।
ये पर्वताः सोमपृष्ठा आप उत्तानशीवरीः। वातः पर्जन्य आदग्निस्ते क्रव्यादमशीशमन्।।१०।।

८६०. सवित्रादिमन्त्रोक्ताः

१. **शुनः शेपः – य. १०.३०**

सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मे बृहस्पतिना ब्रह्मणा वरुणेनौजसाऽग्निना तेजसा सोमेन राज्ञा विष्णुना दशम्या देवतया प्रसूतः प्रसर्पामि ।।३०।।

८६१. सविताः

१. **नकुलः – सा. ४६४**

अभि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मतिम्।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ।।८।।

८९2. साग्नयो हेतयः

१. अथर्वा – अ. ३.2६.१

येऽ३स्यां स्थ प्राच्यां दिशि हेतयो नाम देवास्तेषां वो अग्निरिषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो नमस्तेभ्यो वः स्वाहा ।।१।।

८९३. साध्याः

१. दीर्घतमा औचथ्यः – ऋ. १.१६४.५०

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।५०।।

८९४. सामनस्यम्

१. अथर्वा – अ. ६.६४.१–३

सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ।।१।।
समानो मन्त्रः समितिः समानी समानं व्रतं सह चित्तमेषाम् ।
समानेन वो हविषा जुहोमि समानं चेतो अभिसंविशध्वम् ।।2।।
समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति ।।३।।

८९५. सामनस्यम् अश्विनौः

१. अथर्वा – अ. ७.५2.१–2

संज्ञानं नः स्वेभिः संज्ञानमरणेभिः ।
संज्ञानमश्विना युवमिहास्मासु नि यच्छतम् ।।१।।
सं जानामहै मनसा सं चिकित्वा मा युत्स्महि मनसा दैव्येन ।
मा घोषा उत्थुर्बहुले विनिर्हते मेषुः पप्तदिन्द्रस्याहन्यागते ।।2।।

८९६. सामिधेन्यः

१. अग्निः – य. 2७.2

सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ।।2।।

८९९. सारथिः

१. पायुर् भरद्वाजः – ऋ. ६.७५.६

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ।।६।।

९००. सावर्णे दानस्तुतिः

१. नाभानेदिष्ठो मानवः – ऋ. १०.६2.८–११

प्र नूनं जायतामयं मनुस्तोक्मेव रोहतु। यः सहस्रं शताश्वं सद्यो दानाय मंहते ।।८।।
न तमश्नोति कश्चन दिवइव सान्वारभम्। सावर्ण्यस्य दक्षिणा वि सिन्धुरिव पप्रथे ।।९।।
उत दासा परिविषे स्मद्दिष्टी गोपरीणसा। यदुस्तुर्वश्च मामहे ।।१०।।
सहस्रदा ग्रामणीर्मा रिषन्मनुः सूर्येणास्य यतमानैतु दक्षिणा ।
सावर्णेर्देवाः प्र तिरन्त्वायुर्यस्मिन्नश्रान्ता असनाम वाजम् ।।११।।

९०१. सावित्री सूर्य चन्द्रश्च

१. अथर्वा – अ. ७.८१.१–६

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोऽर्णवम् ।

विश्वान्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नवः ।।१।।
नवोनवो भवसि जायमानोऽह्नां केतुरुषसामेष्यग्रम् ।
भागं देवेभ्यो वि दधास्यायन् प्र चन्द्रमस्तिरसे दीर्घमायुः ।।2।।
सोमस्यांशो युधां पुतेऽनूनो नाम वा असि ।
अनूनं दर्शमा कृधि प्रजया च धनेन च ।।३।।
दर्शोऽसि दर्शतोऽसि समग्रोऽसि समन्तः ।
समग्रः समन्तो भूयासं गोभिरश्वैः प्रजया पशुभिर्गृहैर्धनेन ।।४।।
यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तस्य त्वं प्राणेना प्यायस्व ।
आ वयं प्यासिषीमहि गोभिरश्वैः प्रजया पशुभिर्गृहैर्धनेन ।।५।।
यं देवा अंशुमाप्याययन्ति यमक्षितमक्षिता भक्षयन्ति।
तेनास्मानिन्द्रो वरुणो बृहस्पतिरा प्यायन्तु भुवनस्य गोपाः ।।६।।

६०2. सिनीवाली

१. अथर्वा – अ. ७.४६.१–३

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हवयमाहुतं प्रजां देवि दिदिड्ढि नः ।।१।।
या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी ।
तस्य विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ।।2।।
या विश्पत्नीन्द्रमसि प्रतीची सहस्रस्तुकाभियन्ती देवी ।
विष्णोः पत्नि तुभ्यं राता हवींषि पतिं देवि राधसे चोदयस्व ।।३।।

2. गृत्समदः – य. ३४.१०

सिनीवालि पृथुष्टके या देवानामसि स्वमा। जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ।।१०।।

३. गृत्समदः शौनकः – ऋ. 2.३2.६–७

सिनीवालि पृथुष्टके या देवानामसि स्वसा। जुषस्व हव्यमाहुतं प्रजा देवि दिदिड्ढि नः ।।६।।
याः सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी। तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ।।७।।

६०३. सिनीवालीः

१. सिन्धुद्वीपः – य. ११.५५

सं सृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् ।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ।।५५।।

६०४. सिन्धुः आपः वरुणः

१. भृगुः – अ. ३.१३.१–७

यददः संप्रयतिरहावनदता हते ।
तस्मादा नद्यो३ नाम स्थ तावो नामानि सिन्धवः ।।१।।
य त्प्रेषिता वरुणेनाच्छीभं समवल्गत ।
तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु ष्ठन ।।2।।
अपकामं स्यन्दमाना अवीरत वो हि कम् ।
इन्द्रो वः शक्तिभिर्देवीस्तस्माद् वार्नाम वो हितम् ।।३।।
एको वो देवेऽप्यतिष्ठत् स्यन्दमाना यथावशम् ।
उदानिषुर्महीरिति तस्मादुदकमुच्यते ।।४।।
आपो भद्रा घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत् ताः ।
तीव्रो रसो मधुपृचारमरंगम आ मा प्राणेन सह वर्चसा गमेत् ।।५।।
आदित् पश्याम्युतवा शृणोम्यामा घोषो गच्छति वाङ् मासाम् ।
मन्ये भेजानो अमृतस्य तर्हि हिरण्वर्णा अतृपं यदा वः ।।६।।

इदं व आपो हृदयमयं वत्स ऋतावरीः ।
इहेत्थमेत शक्वरीर्यत्रेदं वेशयामि वः ।।७।।

६०५. सिन्धुद्वीपः

१. सिन्धुद्वीपः – य. ११.५६–५७; ५६

य. ११.५६–५७

सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा ।
सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ।।५६।।
उखां कृणोतु शक्त्या बाहुभ्यामदितिर्धिया माता पुत्रं
यथोपस्थे साग्नि बिभर्त्तु गर्भऽआ। मखस्य शिरोऽसि ।।५७।।

य. ११.५६

अदित्यै रास्नास्यदितिष्टे बिलं गृभ्णातु। कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये।
पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति ।।५६।।

६०६. सिन्ध्वादयः

१. अथर्वा – अ. १.१५.१–४

सं सं स्रवन्तु सिन्धवः सं वाताः सं पतत्रिणः ।
इमं यज्ञं प्रदिवो मे जुषन्तां संस्राव्येण हविषा जुहोमि ।।१।।
इहैव हवमा यात म इह संस्रावणा उतेमं वर्धयता गिरः ।
इहैतु सर्वो यः पशुरस्मिन् तिष्ठतु या रयिः ।।2।।
ये नदीनां संस्रवन्त्युत्सासः सदमक्षिताः ।
तेभिर्मे सर्वैः संस्रावैर्धनं सं स्रावयामसि ।।३।।
ये सर्पिषः संस्रवन्ति क्षीरस्य चोदकस्य च ।
तेभिर्मे सर्वैः संस्रावैर्धनं सं स्रावयामसि ।।४।।

६०७. सीता

१. विश्वामित्रः – अ. ३.१७.१–७

सीरा युजंन्ति कवयो युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नयौ ।।१।।
युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम् ।
विराजः श्नुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमा यवन् ।।2।।
लांगलं पवीरवत् सुशीमं सोमसत्सरु ।
उदिद् वपतु गामविं प्रस्थावद् रथवाहनं पीवरीं च प्रफर्व्यम् ।।३।।
इन्द्रः सीतां नि गृह्णातु तां पूषासि रक्षतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ।।४।।
शुनं सुफाला वि तुदन्तु भूमिं शुनं कीनाशा अनु यन्तु वाहान् ।
शुनासीरा हविषा तोशमाना सुपिप्ला ओषधीः कर्तमस्मै ।।५।।
शुनं वाहाः शुनं नरः शुनं कृषतु लांगलम् ।
शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिंगय ।।६।।
शुनासीरेह स्म मे जुषेथाम्। यद् दिवि चक्रथुः पयस्तेनेमामुप सिंचतम् ।।७।।

2. वामदेवो गौतमः – ऋ. ४.५७.६–७

अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगाससि यथा नः सुफलाससि ।।६।।
इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ।।७।।

६०८. सीसम्

१. **चातनः — अ. १.१६.३—४**

इदं विष्कन्धं सहत इदं बाधते अत्त्रिणः। अनेन विश्वा ससहे या जातानि पिशाच्याः ।।३।।
यदि नो गां हंसि यद्यश्वं यदि पूरुषम्। तं त्वा सीसेन विध्यामो यथा नोऽसो अवीरहा ।।४।।

६०६. सुखम्

१. **शन्तातिः — अ. ७.६६.१**

शं नो वातो वातु शं नस्तपतु सूर्यः ।
अहानि शं भवन्तु नः शं रात्री प्रति धीयतां शमुषा नो व्युच्छतु ।।१।।

६१०. सुधन्वा

१. **अंगिराः प्रचेता यमश्च — अ. ६.४७.३**

इदं तृतीयं सवनं कवीनामृतेन ये चमसमैरयन्त ।
ते सौधन्वनाः स्वरानशानाः स्विष्टिं नो अभि वस्यो नयन्तु ।।३।।

६११. सुपर्णः

१. **गरुत्मान् — अ. ४.६.३**

सुपर्णस्त्वा गुरुत्मान् विष प्रथममावयत्। नामीमदो नारूरुप उतास्मा अभवः पितुः ।।३।।

६12. सुबन्धोर् जीविताह्वानम्

१. **बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः — ऋ. १०.६०.७—११**

अयं मातायं पितायं जीवातुरागमत् ।
इदं तव प्रसर्पणं सुबन्धवेहि निरिहि ।।७।।
यथा युगं वरत्रया नह्यन्ति धरुणाय कम् ।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ।।८।।
यथेयं पृथिवी मही दाधारेमान्वनस्पतीन् ।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ।।९।।
यमादहं वैवस्वतात्सुबन्धोर्मन आभरम् ।
जीवातवे न मृत्यवेऽथो अरिष्टतातये ।।१०।।
न्यग्वातोऽव वाति न्यक्तपति सूर्यः ।
नीचीनमघ्न्या दुहे न्यग्भवतु ते रपः ।।११।।

६१३. सूर्यः

१. **अग्निः — य. 2७.१०**

उद्वयन्तमसस्परि स्वः पश्यन्तऽउत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तम् ।।१०।।

2. **अत्रिर् भौमः — ऋ. ५.४०.५**

यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः। अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ।।५।।

३. **अथर्वा — अ. 2.2१.१—५; ५.2४.६**

अ. 2.2१.१—५

सूर्य यत् ते तपस्तेन तं प्रति तप यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।१।।
सूर्य यत् ते हरस्तेन तं प्रति हर यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।2।।
सूर्य यत् तेऽर्चिस्तेन तं प्रत्यर्च यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।।३।।
सूर्य यत् ते शोचिस्तेन तं प्रति शोच यो३स्मान् द्वेष्टि यं वयं द्विष्मः।।४।।
सूर्य यत् ते तेजस्तेन तमतेजसं कृणु यो३स्मान् द्वेष्टि यं वयं द्विष्मः।।५।।

अ. ५.2४.६

सूर्यश्चक्षुषामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ।।६।।

४. अथर्वा (द्विषोवर्चो हर्तुकामः) – अ. ७.१३.१–2

यथा सूर्यो नक्षत्राणामुद्यंस्तेजांस्याददे। एवा स्त्राीणां च पुंसां च द्विषतां वर्च आ ददे ।।१।।
यावन्तो मा सपत्नानामायन्तं प्रतिपश्यथ। उद्यन्त्सूर्यइव सुप्तानां द्विषतां वर्च आ ददे ।।2।।

५. अभितपाः सौर्यः – ऋ. १०.३७.१–१2

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिस्पुत्राय सूर्याय शंसत ।।१।।
सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च ।
विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः ।।2।।
न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि ।
प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ।।३।।
येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना ।
तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुःष्वप्न्यं सुव ।।४।।
विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु ।
यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम् ।।५।।
तं नो द्यावापृथिवी तन्न आप इन्द्रः शृण्वन्तु मरुतो इवं वचः ।
मा शूने भूम सूर्यस्य संदृशि भद्रं जीवन्तो जरणामशीमहि ।।६।।
विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः ।
उद्यन्त त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ।।७।।
महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषे चक्षुषे मयः ।
आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ।।८।।
यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशन्ते अक्तुभिः ।
अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसोदिहि ।।६।।
शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन ।
यथा शमध्वंछमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रम् ।।१०।।
अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे ।
अदतिपबदूर्जयमानमाशितं तदस्मे शं योररपो दधातन ।।११।।
यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनम् ।
अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि घेतन ।।१2।।

६. आथर्वणः दध्यङ् – य. ३६.2४

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः
शतं प्र ब्रवाम शरदः शतमदीना स्याम शग्दः शतं भूयश्च शग्दः शतात् ।।2४।।

७. आदित्या देवाः – य. ३५.१४

उद्वयं तमसस्परि स्वृः पश्यन्तऽउत्तरम्। देवं देवत्रा सूर्य्यमगन्म ज्योतिरुत्तमम् ।।१४।।

८. उत्तरनारायणः – य. ३१.2०

यो देवेभ्यऽआतपति यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ।।2०।।

६. कुत्सः – अ. 2०.१०७.१५; 2०.१2३.१–2; य. ७.४2; ३३.३७; ३८; ४2

अ. 2०.१०७.१५

सूर्यो देवीमुषसं रोचमानां मर्यो न येषामभ्यते ति पश्चात्।

यत्रा नरोदेवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ।।१५।।

अ. २०.१2३.१–2

तत् सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ।।१।।
तन्मित्रस्य वरुणयाभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद् रुशदस्य पाजः कृष्णमन्यदधरितः सं भरन्ति ।।2।।

य. ७.४2

चित्रं देवनामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवीऽअन्तरिक्षं सूर्य्यऽआत्मा जगतस्तस्थुषश्च स्वाहा।।४2।।

य. ३३.३७–३८

तत्सूर्य्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थदाद्रात्री वासस्तनुते सिमस्मै ।।३७।।
तन्मित्रस्य वरुणस्याभिचक्षे सूर्य्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ।।३८।।

य. ३३.४2

अद्या देवाऽउदिता सूर्य्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउत द्यौः ।।४2।।

१०. कुत्स आंगिरसः – ऋ. १.११५.१–६; सा. ६2६

ऋ. १.११५.१–६

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ।।१।।
सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ।।2।।
भद्रा अश्वा हरतिः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ।।३।।
तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ।।४।।
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्यौरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ।।५।।
अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।६।।

सा. ६2६

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ।।३।।

११. गौर् आंगिरसः – सा. ४५८

अयं सहस्रमानवो दृशः कवीनां मतिर्ज्योतिर्विधर्म ।
ब्रध्नः समीचीरुषसः समैरयदरेपसः सचेतसः स्वसरे मन्युमनश्चिता गोः ।।2।।

१2. चक्षुः सौर्यः – ऋ. १०.१५८.१–५

सूर्यो नो दिवस्पातु वातो अन्तरिक्षात्। अग्निर्नः पार्थिवेभ्यः ।।१।।
जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति। पाहि नो दिद्युतः पतन्त्याः ।।2।।
चक्षुर्नो देवः सविता चक्षुर्न उप पर्वतः। चक्षुर्धाता दधातु नः ।।३।।
चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः। सं चेदं वि च पश्येम ।।४।।
सुमन्दृशं त्वा वयं प्रति पश्येम सूर्य। वि पश्येम नृचक्षसः ।।५।।

१३. जमदग्निः भार्गवः – ऋ. ८.१३.११–12; सा. १७८८– ८६;

ऋ. ८.१३.११–12

तूतुजानो महेमतेऽश्वभिः प्रुषितप्सुभिः। आ याहि यज्ञमाशुभिः शमिद्धिते ।।११।।
इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय। श्रयः सुरिभ्यो अमृतं वसुत्वनम्।।12।।

सा. १७८८–८६

बण्महाँ असि सूर्य बडादित्य महाँ असि ।
महस्ते सतो महिमा पनिष्टम् मह्वास देव महाँ असि ।।१।।
बट् सूर्य श्रवसा महाँ असि सत्रा देवा महाँ असि ।
मह्वा देवानामसूर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ।।2।।

१४. दध्यङ् आथर्वणः – य. ३६.2४

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।।2४।।

१५. दीर्घतमा औचथ्यः – ऋ. १.१६४.४६–४७

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।।४६।।
कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ।।४७।।

१६. नृमेधः – य. ३३.४१

श्रायन्तऽइव सूर्य्यं विश्वेदिन्द्रस्य भक्षत।
वसूनि जाते जनमानऽओजसा प्रति भागं न दीधिम।।४१।।

१७. प्रतिवेदनः – अ. 2.३६.५

भगस्य नावमा रोह पूर्णामनुपदस्वतीम्। तयोपप्रतारय यो वरः प्रतिकाम्यः ।।५।।

१८. प्रजापतिः – य. ३.१०; 20.१६; ३३.७४

य. ३.१०

सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या। जुषाणोऽअग्निर्वेतु स्वाहा ।
सजूर्देवेन सवित्रा सजूरुष्षसेन्द्रवत्या। जुषाणः सूर्य्यो वेतु स्वाहा ।।१०।।

य. 20.१६

यदि जाग्रद्यदि स्वप्नऽएनांसि चकृमा वयम्। सूर्यो मा तस्मादेनसो विश्वान्मुंचत्वंहसः ।।१६।।

य. ३३.७४

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिः परस्तात् ।।७४।।

१६. प्रस्कण्वः – य. ७.४१; ८.४१; 20.21; ३३.३१; ३2; ३६; अ. 20.४७.१३–21

य. ७.४१

उद त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्य्यं स्वाहा ।।४१।।

य. ८.४१

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय विश्वाय सूर्य्यम् ।
उपयामगृहीतोऽसि सूर्य्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजाय ।।४१।।

य. 20.21

उद्वयं तमसस्परि स्वः पश्यन्तऽउत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।।21।।

य. ३३.३१–३2

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्य्यम् ।।३१।।

येना पावक चक्षसा भुरएयन्तं जनाँ2ऽ अनु। त्वं वरुण पश्यसि ।।३2।।

य. ३३.३६

तरणिविश्वदर्शतो ज्योतिष्कृदसि सूर्य्य। विश्वमा भासि रोचनम् ।।३६।।

अ. 2०.४७.१३–2१

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ।।१३।।
अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे ।।१४।।
अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ।।१५।।
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचन ।।१६।।
प्रत्यङ् देवानां विशः प्रतयङ्ङुदेषि मानुषीः। प्रत्यङ् विश्वं स्वर्दृशे ।।१७।।
येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि ।।१८।।
वि द्याामेषि रजस्पृथ्वहर्मिमानो अक्तुभिः पश्यंजन्मानि सूर्य ।।१६।।
सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षणम् ।।2०।।
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः ।।2१।।

2०. प्रस्कण्वः काण्वः – ऋ. १.५०.१–१३; सा. ६३३–६४०

ऋ. १.५०.१–१३

अदु त्यं जातवेदसं देवं वहन्ति केतवः। द्दशे विश्वाय सूर्यम् ।।१।।
अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः सूराय विश्वचक्षसे ।।2।।
अदुश्रमस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ।।३।।
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचनम् ।।४।।
प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। प्रत्यङ् विश्वं स्वर्दृशे ।।५।।
येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि ।।६।।
वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तभिः। पश्यंजन्मानि सूर्य ।।७।।
सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षण ।।८।।
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः ।।६।।
उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।।१०।।
उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय ।।११।।
शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ।१2।।
उदगादयमादित्यो विश्वेन सहसा सह। द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ।।१३।।

सा. ६३३–६४०

अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे ।।७।।
अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ।।८।।
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम् ।।६।।
प्रत्यङ् देवानां विशः प्रतयङ्ङुदेषि मानुषान्। प्रत्यङ् विश्वं स्वर्दृशे ।।१०।।
येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुणं पश्यसि ।।११।।
उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः। पश्यंजन्मान सूय ।।१2।।
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्र्यः। ताभिर्याति स्वयुक्तिभिः ।।१३।।
सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षण ।।१४।।

2१. बृहदुक्थो वामदेव्यः – य. 2६.१०

अश्वो घृतेन त्मन्या समक्तऽउप देवां2ऽ ऋतुशः पाथऽएतु ।
वनस्पतिर्देवलोकं प्रजा नन्नग्निना हव्या स्वदितानि वक्षत् ।।१०।।

22. ब्रह्म – अ. 2०.१०७.१३–१४; १६.६७.१–८

अ. 2०.१०७.१३–१४

चित्रं देवानां केतुरनीकं ज्योतिष्मान् प्रदिशः सूर्य उद्यन् ।

दिवाकरोऽति द्युम्नैस्तमांसि विश्वातारीद् दुरितानि शुक्रः ।।१३।।
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्राद् द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ।।१४।।

अ. १६.६७.१–८

पश्येम शरदः शतम् ।।१।।
जीवेम शरदः शतम् ।।2।।
बुध्येम शरदः शतम् ।।३।।
रोहेम शरदः शतम् ।।४।।
पूषेम शरदः शतम् ।।५।।
भवेम शरदः शतम् ।।६।।
भूयेम शरदः शतम् ।।७।।
भूयसीः शरदः शतम् ।।८।।

2३. भरद्वाजः – अ. २०.५८.३–४

बण्महाँ असि सूर्य बडादित्य महाँ असि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ।।३।।
बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ।।४।।

2४. भागलिः – अ. ६.५2.१

उत् सूर्यो दिव एति पुरो रक्षांसि निजूर्वन्। आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ।।१।।

2५. यमः – अ. १६.६.३–४

अगन्म स्व१ः स्वरगन्म सं सूर्यस्य ज्योतिषागन्म ।।३।।
वस्योभूयाय वसुमान् यज्ञो वसु वंशिषीय वसुमान् भूयासं वसु मयि धेहि ।।४।।

2६. रम्याक्षी – य. 2६.५

इन्द्रा याहि वृत्रहन् पिबा सोमं शत क्रतो। गोमद्भिर्ग्रावभिः सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वा गोमतऽएष ते योनिरिन्द्राय त्वा गोमते ।।५।।

2७. वसिष्ठः – ऋ. ७.६०.१; ७.६2.१–३; ७.६३.१–४; ५; ७.६६.१४–१६

ऋ. ७.६०.१

यदद्य सूर्य ब्रवोऽ नागा उद्यन्मित्राय वरुणाय सत्यम् ।
वयं देवत्रादिते स्याम तव प्रियासो अर्यमन् गृणन्तः ।।१।।

ऋ. ७.६2.१–३

उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम् ।
समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् ।।१।।
स सूर्य प्रति पुरो न उद्‌गा एभिः स्तोमेभिरेतशेभिरेवैः ।
प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे अग्नये च ।।2।।
वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कमा नः काम पूपुरन्तु स्तवानाः ।।३।।

ऋ. ७.६३.१–५

उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम् ।
चक्षुर्मित्रस्य वरुणस्य देवश्चमेर्व यः समविव्यक्तमांसि ।।१।।
उद्वेति प्रसवीता जनानां महान् केतुरर्णवः सूर्यस्य ।
समानं चक्रं पर्याविवृत्सन्यदेतशो वहति धूर्षु युक्तः ।।2।।

विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः ।
एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम ।।३।।
दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः ।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ।।४।।
यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ।।५।।

ऋ. ७.६६.१४–१६

उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे ।
यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम् ।।१४।।
शीर्ष्णः शीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः ।
सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ।।१५।।
तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ।।१६।।

२८. वामदेवो गौतमः – ऋ. ४.४०.५

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ।।५।।

२९. विभ्राट् – य. ३३.३०

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपताविवह्रुतम् ।
वातजूतो योऽभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ।।३०।।

३०. विभ्राट् सौर्यः – ऋ. १०.१७०.१–४; सा. ६२८; १४५३–१४५५

ऋ. १०.१७०.१–४

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ।।१।।
विभ्रड् बृहत्सुभृतं वाजसातमं धर्मन्दिवो धरुणे सत्यमर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ।।2।।
इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ।।३।।
विभ्राजंज्योतिषा स्व१रगच्छो रोचनं दिवः ।
येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता ।।४।।

सा. ६2८

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ।।2।।

सा. १४५३–१४५५

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ।।१।।
विभ्राड् बृहत्सुभृतं वाजसातमं धर्मं दिवो धरुणे सत्यमर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं जयोतिर्जज्ञे असुरहा सपत्नहा ।।2।।
इदं श्रेष्ठं जयोतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ।।३।।

३१. विरुपः – य. १३.४६

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणास्याग्नेः ।
आप्रा द्यावापृथिवीऽअन्तरिक्षं सूर्य्यऽआत्मा जगतस्तस्थुषश्च ।।४६।।

३2. **शन्तातिः – अ. ६.१०.३**

दिवे चक्षुषे नक्षत्रेभ्यः सूर्यायाधिपतये स्वाहा ।।३।।

३३. **श्रुतकक्ष–सुकक्षौ – य. ३३.३५**

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। भर्वं तदन्द्रि ते वशे ।।३५।।

३४. **हिरण्यस्तूपः – य. ३४.३१; ३३.४३**

य. ३४.३१

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।।३१।।

य. ३३.४३

आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।।४३।।

६१४. सूर्यः (ऋसर्व.८.१०१.११; सार्षेदी.); इन्द्रः (साग्री.सास्वा.)

१. **जमदग्निः भार्गवः – सा. 2७६**

वण्महाँ असि सूर्य बडादित्य महाँ असि। महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि।।४।।

६१५. सूर्यः पर्जन्यो अग्नयो वा

१. **दीर्घतमा औचथ्यः – ऋ. १.१६४.५१**

समानमेतदुदकमुच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ।।५१।।

६१६. सूर्य्यः

१. **जमदग्निः – य. ३३.४०**

बट् सूर्य्य श्रवसा महाँ2ऽअसि सत्रा देव महाँ2ऽअसि ।
मह्ना देवानामसुर्य्यः पुरोहितो विभु ज्योतिरदाभ्यम् ।।४०।।

2. **वत्सः – य. ४.३५–३६**

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्य्याय शंसत ।।३५।।
वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि
वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ।।३६।।

३. **वामदेवः – य. १०.2४; 2५**

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऽऋतजा ऽअद्रिजा ऽऋतं बृहत् ।।2४।।
इयदस्यायुरस्यायुर्मयि धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेह्यूर्गस्यूर्ज्जं मयि धेहि।
इन्द्रस्य वां वीर्यकृतो बाहूऽअभ्युपावहरामि ।।2५।।

४. **हिरण्यगर्भः – य. १३.८**

ये वामी रोचने दिवो ये वा सूर्य्यस्य रश्मिषु। येषमप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ।।८।।

६१७. सूर्य्यविद्वांसौ

१. **दीर्घतमा औतथ्यः – य. ५.2४**

स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्यमित्रहा ।।2४।।

६१८. सूर्यादयः

१. **प्रजापतिः – य. 2३.६–१०; ४६**

य. 2३.६–१०

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः। किं स्विद्धिमस्य भेषजं किम्वावपनं महत् ।।६।।
सूर्यऽएकाकी चरति चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ।।१०।।

य. 2३.४६

सूर्यऽएकाकी चरति चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ।।४६।।

2. भगः – अ. ६.८३.१–४

अपचितः प्र पतत सुपर्णो वसतेरिव। सूर्यः कृणोतु भेषजं चन्द्रमा वोऽपोच्छतु ।।१।।
एन्येका श्येन्येका कृष्णैका रोहिणी द्वे। सर्वासामग्रभं नामावीरघ्नीरपेतन ।।2।।
असूतिका रामायण्यपचित् प्र पतिष्यति। ग्लौरितः प्र पतिष्यति स गलुन्तो नशिष्यति ।।३।।
वीहि स्वामाहुतिं जुषाणो मनसा स्वाहा मनसा यदिदं जुहोमि ।।४।।

६१६. सूर्य आत्मा वा

१. सार्पराज्ञी – सा. ६३०–६३2; १३७६–१३७८

सा. ६३०–६३2

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः ।।४।।
अन्तश्चरति रोचनास्य प्राणादपानती। व्यख्यन्महिषो दिवम् ।।५।।
त्रिंशद्धाम वि राजति वाक्पतंगाय धीयते। प्रति वस्तोरह द्युभिः ।।६।।

सा. १३७६–१३७८

आयंगौः पृश्निक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः ।।१।।
अन्तश्चरति रोचनास्य प्राणादपानती। व्यख्यन्महिषो दिवम् ।।2।।
त्रिंशद्धाम वि राजति वाक्पतंगाय धीयते। प्रति वस्तोरह द्युभिः ।।३।।

६2०. सूर्य्य विद्वांसौ

१. वत्सः – य. ४.३३

उस्रावेतं धूर्षाहौ युज्येथामनश्रूऽअवीरहणो ब्रह्मचोदनौ। स्वस्ति यजमानस्य गृहान् गच्दतम्।।३३।।

६2१. सूर्यवैश्वानरौ

१. मूर्धन्वान्आंगिरसो वामदेव्यो वा – ऋ.१०.८८.१–१६

हविष्यान्तमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ।
तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथन्त ।।१।।
गीर्णं भुवनं तमसापगूळहमाविः स्वरभवज्जाते अग्नौ ।
तस्य देवाः पृथिवी द्यौरुतापोऽरणयन्नोषधीः सख्ये अस्य ।।2।।
देवेभिर्न्विषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहन्तम् ।
यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अन्तरिक्षम् ।।३।।
यो होतासीत्प्रथमो देवजुष्टो यं समांजन्नाज्येना वृणानाः ।
स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः ।।४।।
यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन ।
तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः ।।५।।
मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।
मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ।।६।।
दृशेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा ।
तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः ।।७।।
सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयन्त देवाः ।
स एषां यज्ञो अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ।।८।।
यं देवासोऽजनयन्ताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा ।
सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ।।६।।

स्तोमेन हि दिवि देवासो अग्निमजीजनंछक्तिभी रोदसिप्राम् ।
तमू अकृण्वन् त्रेधाभुवेकं स ओषधीः पचति विश्वरूपाः ।।१०।।
यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम् ।
यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ।।११।।
विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् ।
आ यस्ततानोषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन् ।।१2।।
वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यम् ।
नक्षत्रं प्रतनममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहन्तम् ।।१३।।
वैश्वानरं विश्वहा दीदिवांसं मन्त्रैरग्निं कविमच्छा वदामः ।
यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् ।।१४।।
द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ।।१५।।
द्वे समीची बिभृतश्चरन्तं शीर्षतो जाते मनसा विमृष्टम् ।
स प्रत्यंविश्वा भुवनानि तस्थावप्रयुच्छन्तरणिर्भ्राजमानः ।।१६।।
यत्रा वेदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद ।
आ शेकूरित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत् ।।१७।।
कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः ।
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम् ।।१८।।
यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः ।
तावद्दधात्युप यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन् ।।१९।।

६22. सूर्यः हरिमा हृदयरोगश्च

१. ब्रह्म – अ. १.22.१–४; 2.१६.३

अ. १.22.१–४

अनु सूर्यमुदयतां हृद्द्योतो हरिमा चे ते। गो रोहितस्य वर्णेन तेन त्वा परि दध्मसि ।।१।।
परि त्वा रोहितैर्वर्णैर्दीर्घायुत्वाय दध्मसि। यथायमरपा असदथो अहरितो भुवत् ।।2।।
या रोहिणीर्देवत्या३ गावो या उत रोहिणीः। रूपरूपं वयोवयस्ताभिष्ट्वा परि दध्मसि ।।३।।
शुकेषु ते हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु ते हरिमाणं नि दध्मसि ।।४।।

अ. 2.१६.३

सूर्य चक्षुषा मा पाहि स्वाहा ।।३।।

६2३. सूर्या

१. सूर्या सावित्री – ऋ. १०.८५.३2–४७

मा विदन्परिपन्थिनो य आसीदन्ति दंपती। सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ।।३2।।
सुमङ्गलीरियं वधूरिमां समेत पश्यत। सौभग्यमस्यै दत्वायाथास्तं वि परेतन ।।३३।।
तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवन्नेतदत्तवे। सूर्यां यो ब्रह्मा विद्यात्स इद्वाधूयमर्हति ।।३४।।
आशसनं विशसनमथो अधिविकर्तनम्। सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ।।३५।।
गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ।।३६।।
तां पूषंछिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।
या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेषम् ।।३७।।
तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ।।३८।।
पुनः पत्नीमग्निरदादायुषा सह वर्चसा। दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ।।३९।।
सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ।।४०।।
सोमो ददद् गन्धर्वाय गन्धर्वो ददग्नये। रयिं च पुत्राँश्चदादाग्निर्मह्यमथो इमाम् ।।४१।।

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्। क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानो स्वे गृहे ।।४२।।
आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त वर्यमा ।
अदुर्मंगलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ।।४३।।
अघोरचक्षुरपतिघ्न्योधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवृकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ।।४४।।
इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु। दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ।।४५।।
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ।।४६।।
समंजन्तु विश्वे देवाः समापो हृदयानि नौ। सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ।।४७।।

६२४. सूर्य्यादयो मन्त्रोक्ताः

१. वरुणः — य. १०.४

सूर्य्यत्वचस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्य्यत्वचस स्थ राष्ट्रदा राष्ट्रमुष्मै दत्त सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहाव्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त वाशा स्थ राष्ट्रदा राष्ट्रं मं दत्त स्वाहा वाशा स्थ राष्ट्रदा

राष्ट्रममुष्मै दत्त शविष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शविष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः स्वराज स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त।
मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रं क्षत्रियाय वन्वानाऽअनाधृष्टाः सीदत सहौजसो महि क्षत्रं क्षत्रियाय दधतीः ।।४।।

६२५. सूर्या विवाहः

१. सूर्या सावित्री — ऋ. १०.८५.६–१६

रैभ्यासीदनुदेयी नाराशंसी न्योचनी ।
सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतम् ।।६।।
चित्तिरा उपबर्हणं चक्षुरा अभ्यंजनम् ।
द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिम् ।।७।।
स्तोमा आसन्प्रतिधयः कुरीरं छन्द ओपशः ।
सूर्याया अश्विना वराग्निरासीत्पुरोगवः ।।८।।
सोमो वधूयुरभवदश्विनास्तामुभा वरा ।
सूर्यां यत्पत्ये शंसन्तीं मनसा सवितादादात् ।।९।।
मनो अस्या अन आसीद् द्यौरासीदुत छदिः ।
शुक्रावनड्वाहावास्तां यदयात्सूर्या गृहम् ।।१०।।
ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः ।
श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश्चराचरः ।।११।।
शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।
अनो मनस्मयं सूर्यारोहत्प्रयती पतिम् ।।१२।।
सूर्याया वहतुः प्रागात्सविता यमवासृजत् ।
अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते ।।१३।।
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
विश्वे देवा अनु तद्वामजानन्पुत्रः पितराववृणीत पूषा ।।१४।।
यदयातं शुभस्पती वरेयं सूर्यामुप ।
क्वैकं चक्रं वामासीत्क्व देष्ट्राय तस्थथुः ।।१५।।
द्वे ते चक्रं सूर्ये ब्रह्माण ऋतुथा विदुः ।

अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ।।१६।।

६२६. सूर्यो जातवेदा

१. ब्रह्म – अ. १६.६५.१

हरिः सुपर्णो दिवमारुहोऽर्चिषा ये त्वा दिप्सन्ति दिवमुत्पतन्तम् ।
अव तां जहि हरसा जातवेदो बिभ्यदुग्रोऽर्चिषा दिवमा रोह सूर्य ।।१।।

६२७. सूर्यो जातवेदा वज्रः

१. ब्रह्म – अ. १६.६६.१

अयोजाला असुरा मायिनोऽयस्मयैः पाशैरंकिनो ये चरन्ति ।
तांस्ते रन्ध्यामि हरसा जातवेदः सहस्रऋष्टिः सपत्नान् प्रमृणन् पाहि वज्रः ।।१।।

६२८. सेनापतिः

१. दीर्घतमा – य. ६.२१

समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवं सवितारं गच्छ स्वाहा।
मित्रावरुणौ गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दांसि गच्छ स्वाहा द्यावापृथिवी
गच्छ स्वाहा यज्ञं गच्छ स्वहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाग्नि वैश्वानरं गच्छ
स्वाहा मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहा ।।२१।।

2. नाभानेदिष्टः – य. ११.७६

ये जनेषु मलिम्लव स्तेनासस्तस्करा वने। ये कक्षेष्वघायवस्ताँस्ते दधामि जम्भयोः ।।७६।।

३. बृहस्पतिः – य. ६.७

वातो वा मनो वा गन्धर्वाः सप्तविंशतिः। तेऽअग्रेऽश्वमयुंजँस्तेऽअस्मिन् जवमादधुः ।।७।।

६२६. सोम

१. विश्वामित्रो गाथिनः – ऋ. ३.६2.१३–१५

सोमो जिगाति गातुविद् देवानामेति निष्कृतम्। ऋतस्य योनिमासदम् ।।१३।।
सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे। अनमीवा इषस्करत् ।।१४।।
अस्माकमायुर्वर्धयन्नभिमातीः सहमानः। सोमः सधस्थमासदत् ।।१५।।

६३०. सोमः

१. अग्निवरुणसोमानांइनिहवः – ऋ. १०.१2४.६

इदं स्वरिदमिदास वाममयं प्रकाश उर्व१न्तरिक्षम् ।
हनाव वृत्रं निरेहि सोम हविष्ट्वा सन्तं हविषा यजाम ।।६।।

2. अथर्वा – अ. ६.६.2–३; ६.७.१–2; ७.६४.१

अ. ६.६.2–३

यो नः सोम सुशंसिनो दुःशंस आदिदेशति। वज्रेणास्य मुखे जहि स संपिष्टो अपायति ।।2।।
यो नः सोमाभिदासति सनाभिर्यश्च निष्ट्यः। अप तस्य बलं तिर महीव द्यौर्वधत्मना ।।३।।

अ. ६.७.१–2

येन सोमादितिः पथा मित्रा वा यन्त्यद्रुहः। तेना नोवसा गाहि ।।१।।
येन सोम साहन्त्यासुरान् रन्धयासि नः। तेना नो अधि वोचत ।।2।।

अ. ७.६४.१

ध्रुवं ध्रुवेण हविषाव सोमं नयामसि। यथा न इन्द्रः केवलीर्विशः संमनसस्करत् ।।१।।

३. आथर्वणः दध्यङ् – य. ३६.2३

सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।।2३।।

४. आभूतिः – य. १६.४–५; ८–६

य. १६.४–५

पुनाति ते परिस्रुतं सोमं सूर्य्यस्य दुहिता। वारेण शश्वता तना ।।४।।
ब्रह्म क्षत्रं पवते तेजऽइन्द्रियं सुरया सोमः सुतऽ आसुतो मदाय ।
शुक्रोण देव देवताः पिपृग्धि रसेनान्नं यजमानाय धेहि ।।५।।

य. १६.८–६

उपयामगृहीतोऽस्याश्विनं तेजः सारस्वतं वीर्यमैन्द्रं बलम् ।
एष ते योनिर्मोदाय त्वानन्दाय त्वा महसे त्वा ।।८।।
तेजोऽसि तेजो मयि धेहि वीर्यमसि वीर्यं मयि धेहि बलमसि बलं मयि धेह्योजोऽस्योजो मयि धेहि मन्युरसि मन्युं मयि धेहि सहोऽसि सहो मयि धेहि ।।६।।

५. कण्वो घौरः – ऋ. १.४३.७–६

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम्। महि श्रवस्तुविनृम्णम् ।।७।।
मा नः सोमपरिबाधो मारातयो जुहुरन्त। आ न इन्दो वाजे भज ।।८।।
यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य। मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः।।६।।

६. कृत्नुर् भार्गवः – ऋ. ८.७६.१–६

अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित्सोमः। ऋषिर्विप्रः काव्येन ।।१।।
अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरम्। प्रेमन्धः ख्यन्निः श्रोणो भूत् ।।2।।
त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः। उरु यन्तासि वरूथम् ।।३।।
त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन्। यावीरघस्य चिद् द्वेषः ।।४।।
अर्थिनो यन्ति चेदर्थं गच्छानिद्ददुषो रातिम्। ववृज्युस्तृष्यतः कामम् ।।५।।
विदद्यत्पूर्व्यं नष्टमुदीमृतायुमीरयत्। प्रेमायुस्तारीदतीर्णम् ।।६।।
सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः। भवा नः सोम शं हृदे ।।७।।
मा नः सोम सं वीविजो मा वि बीभिषथा राजन्। मा नो हार्दि त्विषा वधीः ।।८।।
अव यत्स्वे सधस्थे देवानां दुर्मतीरीक्षे। राजन्नप द्विषः सेध मीढ्वो अप स्रिधः सेध ।।६।।

७. काक्षीवत् सुकीर्ति – य. 20.३३

उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णऽएष ते येनिरश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ।।३३।।

८. गर्गः – ऋ. ६.४७.१–५

स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्व१स्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु ।।१।।
अयं स्वादुरिह मदिष्ठ आस यस्येन्द्रो वृत्रहत्ये ममाद ।
पुरूणि यश्च्यौत्ना शम्बरस्य वि नवतिं नव च द ३ हन् ।।2।।
अयं मे पीत उदियर्ति वाचमयं मनीषमुशतीमजीगः ।
अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे ।।३।।
अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः ।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्व१न्तरिक्षम् ।।४।।
अयं विदच्चित्रदृशीकर्मणः शुक्मद्मनामुषसामनीके ।
अयं महान्महता स्कम्भनेनोद् द्यामस्तभ्नाद् वृषभो मरुतवान् ।।५।।

६. गोतमः – य. ५.७; ७.2; १2.११2–११४; ३४.20–2३

य. ५.७

अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व ।
आप्याययास्मान्त्सखीन्त्सन्न्या मेधया स्वस्ति ते देव सोम सुत्यामशीय ।
एष्टा रायः प्रेषे भगायऽऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम् ।।७।।

य. ७.2

मधुमतीर्नऽइषस्कृधि यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय
स्वाहा स्वाहोवृन्रिक्षमन्वेमि ।।2।।

य. १2.११2–११४

आप्यायस्व स्मेतु ते विश्वतः सोम वृष्ण्यम् ।
भवा वाजस्य संगथे ।।११2।
सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानोऽअमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ।।११३।।
आप्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः ।
भवा नः सप्रथस्तमः सखा वृधे ।।११४।।

य. ३४.2०–2३

अषाढं युत्सु पृत्नासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ।।2०।।
सोमो धेनुं सोमोऽअर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ।।2१।।
त्वमिमाऽओषधीः सोम विश्वास्त्वमपोऽअजनयस्त्वं गाः ।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ।।22।।
देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्य्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ।।2३।।

१०. गोतमो राहूगणः – ऋ. १.६१.१–2३; सा. ६०३–६०४

ऋ. १.६१.१–2३

त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ।।१।।
त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ।।2।।
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ।।३।।
या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेळन्नाजन्त्सोम प्रति हव्या गृभाय ।।४।।
त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा। त्वं भद्रो असि क्रतुः ।।५।।
त्वं च सोम नो वशो जीवातुं न मरामहे। प्रियस्तोत्रो वनस्पतिः ।।६।।
त्वं सोम महे भगं त्वं यून ऋतायते। दक्षं दधासि जीवसे ।।७।।
त्वं नः सोम विश्वतो रक्षा राजन्नघायतः। न रिष्येत्त्वावतः सखा ।।८।।
सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे। ताभिर्नोऽविता भव ।।९।।
इमं यज्ञमिदं वाचो जुजुषाण उपागहि। सोम त्वं नो वृधे भव ।।१०।।
सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः। सुमृळीको न आ विश ।।११।।
गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः। सुमित्रः सोम नो भव ।।१2।।
सोम रारन्धि नो हृदि गावो न यवसेष्वा। मर्य इव स्व ओक्ये ।।१३।।
यः सोम सख्ये तव रारणद्देव मर्त्यः। तं दक्षः सचते कविः ।।१४।।
उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः। सखा सुशेव एधि नः ।।१५।।
आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे ।।१६।।
आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः। भवा नः सुश्रवस्तमः सखा वृधे ।।१७।।
सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।

आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ।।१८।।
या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ।।१९।।
सोमो धेनुं सोमो अर्वन्तमांशु सोमो वीरे कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ।।20।।
अषाळहं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ।।2१।।
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततन्थोर्व१न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ।।22।।
देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ।।2३।।

सा. ६०३–६०४

सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ।।2।।
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमातनोरुर्वा३न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थः ।।३।।

११. दध्यङ् आथर्वणः – य. ३६.2३

सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु। योऽस्मान् द्वेष्टि यं च वयं द्विष्मः।।2३।।

१2. दीर्घतमा औचथ्यः – ऋ. १.१६४.४३[2]

शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ।।४३।।

१३. देवलः – य. ३३.६2

उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ2ऽ इयक्षते ।।६2।।

१४. प्रगाथः काण्वः –ऋ. ८.४८.१–१५

स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।
विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ।।१।।
अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य ।
इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ।।2।।
अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ।।३।।
शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ।।४।।
इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु ।
ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः ।।५।।
अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः ।
अथा हि ते मद आ सोम मन्ये रेवाँ इव प्र चरा पुष्टिमच्छ ।।६।।
इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।
सोम राजन् प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ।।७।।
सोम राजन् मृळया नः स्वस्ति तव स्मसि व्रत्या३ स्तस्य विद्धि ।
अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः ।।८।।

त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः ।
यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ।।६।।
ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्च पीतः ।
अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ।।१०।।
अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः ।
आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त आयुः ।।११।।
यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्यां आविवेश ।
तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ।।१2।।
त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ।।१३।।
त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः ।
वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ।।१४।।
त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।
त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ।।१५।।

१५. बन्धुः – य. ३.५६

वयं सोम व्रते तव मनस्तनूषु विभ्रतः। प्रजावन्तः सचेमहि ।।५६।।

१६. ब्रह्म – अ. ५.2६.१०

सोमो युनक्तु बहुधा पयांस्यस्मिन् यज्ञे सुयुजः स्वाहा ।।१०।।

१७. भरद्वाजः – य. १६.2–३

परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वा यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ।।2।।
वायोः पूतः पवित्रेण प्रतयङ्क्सोमो अतिद्रुतः। इन्द्रस्य युज्यः सखा ।
वायोः पूतः पवित्रेण प्राङ्क्सोमो अतिद्रुतः। इन्द्रस्य युज्यः सखा ।।३।।

१८. भृग्वंगिरा – अ. ६.९६.३

यच्चक्षुषा मनसा यच्च वाचोपारिम जाग्रतो यत् स्वपन्तः। सोमस्तानि स्वधया नः पुनातु ।।३।।

१६. मधुच्छन्दाः – य. ६.३३; 2६.2५

य. ६.३३

यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे ।
तेनास्मै यजमानायोरु राये कृद्ध्यधि दात्रे वोचः ।।३३।।

य. 2६.2५

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः ।।2५।।

2०. वत्सारः काश्यपः – य. ७.2१

सोमः पवते सोमः पवतेऽस्मै ब्रह्मणेऽस्मै क्षत्रायास्मै सुन्वते यजमानाय पवत इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।।2१।।

2१. वसिष्ठः – ऋ. ७.१०४.६; १2; १३

ऋ. ७.१०४.६

ये पाकशसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान् प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ।।६।।

ऋ. ७.१०४.१2–१३

सुवज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।
तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत् ।।१२।।
न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम् ।
हन्ति रक्षो हन्त्यासद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते ।।१३।।

22. विमद ऐन्द्रः वसुकृद्वा वासुक्रः (साग्री. सास्वा.)
विमद ऐन्द्रः वसुकृद्वा वसुक्रो वा प्राजापत्यः (ऋसर्व.)
वसुकृदृषि विमदो वा (सार्षेदी) – ऋ. १०.२५.१–११

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
अधा ते सख्ये अन्धसो वि वो मदे रणन्गावो न यवसे विवक्षसे ।।१।।
हृदिस्पृशस्त आसते विश्वेषु सोम धामसु ।
अधा कामा इमे मम वि वो मदे तिष्ठन्ते वसूयवो विवक्षसे ।।2।।
उत व्रतानि सोम ते प्राहं मिनामि पाक्या ।
अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे ।।३।।
समु प्र यन्ति धीतयः सर्गासोऽवताँ इव ।
क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँ इव विवक्षसे ।।४।।
तव त्ये सोम शक्तिभिर्निकामासो व्यृण्विरे ।
गृत्सस्य धीरास्तवसो वि वो मदे व्रजं गोमन्तमश्विनं विवक्षसे ।।५।।
पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत् ।
समाकृणोषि जीवसे वि वो मदे विश्वा सम्पश्यन्भुवना विवक्षसे ।।६।।
त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।
सेध राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ।।७।।
त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि ।
क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहोः नः पाह्यंहसो विवक्षसे ।।८।।
त्वं नो वृत्रहन्तमेन्द्रस्येन्दो शिवः सखा ।
यत्सीं हवन्ते समिथे वि वो मदे युध्यमानास्तोकसातौ विवक्षसे ।।९।।
अयं घ स तुरो मद इन्द्रस्य वर्धत प्रियः ।
अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद्विवक्षसे ।।१०।।
अयं विप्राय दाशुषे वाजाँ इयर्ति गोमतः ।
अयं सप्तभ्य आ वरं वि वो मदे प्रान्धं श्रोणं च तारिषद्विवक्षसे ।।११।।

२३. वृहद्दिवोऽथर्वा – अ. ५.३.७

तिस्रो देवीर्महि नः शर्म यच्छत प्रजायै नस्तन्वे३ यच्च पुष्टम् ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ।।७।।

२४. शङ्खः – य. १९.७२; ७४; ८४

य. १९.७२

सोमो राजामृतं सुतऽऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।।७२।।

य. १९.७४

सोममद्भ्यो व्यपिबच्छन्दसा हंसः शुचिषत् ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।।७४।।

य. १९.८४

पयसा शुक्रममृतं जनित्रं सुरया मूत्रा ज्जनयन्त रेतः ।
अपामतिं दुर्मतिं बाधमानाऽऊवध्यं वातं सब्व तदारात् ।।८४।।

२५. सावित्री सूर्या – अ. १४.१–५

सत्येनोत्तम्भिता भूमिः सूर्येणोत्तम्भिता द्यौः । ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः।।१।।
सोमेनादित्या बलिनः सोमेन पृथिवी मही ।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः ।।2।।
सोमं मन्यते पपिवान् यत् संपिंषन्त्योषधिम् ।
सोमं यं ब्रह्मणो विदुर्न तस्याश्नाति पार्थिवः ।।३।।
यत् त्वा सोम प्रपिबन्ति तत आ प्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ।।४।।
आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः । ग्राव्णामिच्छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः।।५।।

2६. सूर्या सावित्री – ऋ. १०.८५.१–५

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ।।१।।
सोमेनादित्या बलिनः सोमेन पृथिवी मही ।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः ।।2।।
सोमं मन्यते पपिवान्यत्सांपिंषन्त्योषधिम् ।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ।।३।।
आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः ।
ग्राव्णामिच्छृण्वन्तिष्ठसि न ते अश्नाति पार्थिवः ।।४।।
यत्त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ।।५।।

६३१. सोमः अग्निः आदित्य विष्णुः ब्रह्मा बृहस्पतिः

१. वसिष्ठः – अ. ३.2०.४

सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे। आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ।।४।।

६३2. सोमः अर्यमा धाता

१. प्रतिवेदनः – अ. 2.३६.2

सोमजुष्टं ब्रह्मजुष्टमर्यम्णा संभृतं भगम्। धातुर्देवस्य सत्येन कृणोमि पतिवेदनम् ।।2।।

६३३. सोमः पर्णमणिः

१. अथर्वा – अ. ३.५.१–८

आयमगन् पर्णमणिर्बली बलेन प्रमृणन्त्सपत्नान् ।
ओहो देवानां पय ओषधीनां वर्चसा मा जिन्वत्वप्रयावन् ।।१।।
मयि क्षत्रं पर्णमणे मयि धारयताद् रयिम् ।
अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः ।।2।।
यं निदधुर्वनस्पतौ गुह्यं देवाः प्रियं मणिम् ।
तमस्मभ्यं सहायुषा देवा ददतु भर्तवे ।।३।।
सोमस्य पर्णः सह उग्रमागन्निन्द्रेण दत्तो वरुणेन शिष्टः ।
तं प्रियासं बहु रोचमानो दीर्घायुत्वाय शतशारदाय ।।४।।
आ मारुक्षत् पर्णमणिर्मह्या अरिष्टतातये ।
यथाहमुत्तरोऽसान्यर्यम्ण उत संविदः ।।५।।
ये धीवानो रथकाराः कर्मारा ये मनीषिणः ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ।।६।।
ये राजानो राजकृतः सूताग्रामण्यश्च ये ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ।।७।।
पर्णोऽसि तनूपानः सयोनिर्वीरो वीरेण मया ।
संवत्सरस्य तेजसा तेन बध्नामि त्वा मणे ।।८।।

६३४. सोमः पवमानः

१. **ययातिः – अ. २०.१३७.४–६**

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ।।४।।
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ।।५।।
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ।।६।।

६३५. सोमः मरुतश्च

१. **अथर्वा – अ. १.२०.१**

अदारसृद् भवतु देव सोमास्मिन् यज्ञे मरुतो मृडता नः ।
मा नो विददभिभा मो अशस्तिर्मा नो विदद् वृजिना द्वेष्या या ।।१।।

६३६. सोमः वरुणः देवश्च

१. **अथर्वांगिरा – अ. ७.११८.१**

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्पते कृणोतु जयन्तं त्वानु देवा मदन्तु ।।१।।

६३७. सोमवरुणदेवाः

१. **अप्रतिरथः – य. १७.४६**

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ।।४६।।

६३८. सोमसवितारौ

१. **आगस्त्यः अग्रे द्रष्टव्यम् – य. ५.३६**

देव सवितरेष ते सोमस्तं रक्षस्व मा त्वा दभन्। एतत्त्वं देव सोम देवो देवाँ२ऽऽउपागाऽइदमहं मनुष्यान्त्सह रायस्पोषेण स्वाहा निर्वरुणस्य पाशान्मुच्ये ।।३६।।

६३९. सोमाः

१. **विमद ऐन्द्रः (साग्री. सास्वा.) प्राजापत्यो वा वसुकृद्वा वासुक्र (ऋसर्व. १०.२१.१; १०. २५.१) गोतमः (सार्षेदी.) – सा. ४२२**

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
अथा ते सख्ये अन्धसो वि वो मदे राणा गावो न यवसे विवक्षसे ।।४।।

६४०. सोमाग्नयादित्यविष्णुसूर्य्य बृहस्पतयः

१. **तापसः – य. ६.२६**

सोमं राजानमवसेऽग्निमन्वारभामहे। आदित्यान्विष्णुं सूर्य्यं ब्रह्माणं च बृहस्पतिं स्वाहा ।।२६।।

६४१. सोमादयः

१. **प्रजापतिः – य. २३.३२; २४.२**

य. २३.३२

दधिक्रावणोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र णाऽआयूंषि तारिषत् ।।३२।।

य. २४.२

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः शितिरन्ध्रोऽन्यतः शतिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतः शितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुणयः ।।२।।

६४२. सोमानः सोमः

१. व्याघ्रपाद् वासिष्ठः – ऋ. ६.६७.१६–१८

जुष्ट्वी न इन्दो सुपथा सुगान्युरौ पवस्व वारिवांसि वृण्वन् ।
घनेव विष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ।।१६।।
वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुम् ।
स्तुकेव वीता धन्वा विचिन्वन् बन्धूँरिमाँ अवराँ इन्दो वयून् ।।१७।।
ग्रन्थिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम ।
अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् ।।१८।।

६४३. सोमापूषणौ

१. गृत्समदः शौनकः – ऋ. 2.४०.१–५

सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ।।१।।
इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा ।
आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ।।2।।
सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम् ।
विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पंचरश्मिम् ।।३।।
दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे ।
तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ।।४।।
विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति ।
सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम ।।५।।

६४४. सोमापूषणौ अदितिश्च

१. गृत्समदः शौनकः – ऋ. 2.४०.६

धियं पूषां जिन्वतु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु ।
अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः ।।६।।

६४५. सोमार्कौ

१. सावित्री सूर्या – अ. १४.१.2३

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोऽर्णवम् ।
विश्वान्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नव।।2३।।

2. सूर्या सावित्री – ऋ. १०.८५.१८

पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ।
विश्वन्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ।।१८।।

६४६. सोमारुद्रौ

१. अथर्वा – अ. ५.६.५–८

न्वे३तेनारात्सीरसौ स्वाहा ।
तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृडतं नः ।।५।।
अवैतेनारात्सीरसौ स्वाहा ।
तिग्मायुधौ तिग्महेति सुशेवौ सोमारुद्राविह सु मृडतं नः ।।६।।
अपैतेनारात्सीरसौ स्वाहा ।
तिग्मायुधौ तिग्महेति सुशेवौ सोमारुद्राविह सु मृडतं नः ।।७।।
मुमुक्तमस्मान्दुरितादवद्याज्जुषेथां यज्ञममृतमस्मासु धत्तम् ।।८।।

2. भरद्वाजो बार्हस्पत्यः – ऋ. ६.७४.१–४

सोमारुद्रा धारयेथामसुर्यं१ प्र वामिष्टयोऽरमश्नुवन्तु ।

दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ।।१।।
सोमारुद्रा वि बृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ।।2।।
सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुंचतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ।।३।।
तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं न ।
प्र नो मुंचतं वरुणस्य पाशाद् गोपायतं नः सुमनस्यमानाः ।।४।।

६४७. सोमारुद्रौः

१. प्रस्कण्वः—अ.७.४2.१—2

सोमारुद्राविबृहतं विषूचीममीवा या नो गयमाविवेश ।
बाधेथां दूरं निर्ऋति पराचैः कृतं चिदेनः प्र मुमक्तमस्मत् ।।१।।
सोमारुद्रा युवमेतान्यस्मद् विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुंचतं यन्नो असत् तनूषु बद्धं कृतमेनो अस्मत।।2।।

६४८. सोमोवनस्पतिः

१. अथर्वा—अ. ६.2.१—३

इन्द्राय सोममृत्विजः सुनोता च धावत। स्तोतुर्यो वचः शृणवद्धवं च मे ।।१।।
आ यं विशन्तीन्दवो वयो न वृक्षमन्धसः। विरप्शिन्वि मृधो जहि रक्षस्विनीः ।।2।।
सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे। युवा जेतेशानः स पुरुष्टुतः ।।३।।

६४६. सोषधिका निलिम्पाः

१. अथर्वा — अ. ३.2६.५

येऽस्यां स्थ ध्रुवायां दिशि निलिम्पा नाम देवास्तेषां वः ओषधीरिषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ।।५।।

६५०. होता

१. देवश्रवो देववातः — य. ११.३५

सीद होतः स्वऽउ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ ।
देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ।।३५।।

६५१. होत्रादयः

१. स्वस्त्यात्रेयः — य. 2१.४2; ४३

होता यक्षदश्विनौ सरस्वतीमिन्द्रं सुत्रामाणमिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न
तोक्मभिर्लाजैर्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोऽमृताः प्रस्थिता
वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्तां सोम्यं मधु पिबन्तु
मदन्तु व्यन्तु होतर्यज ।।४2।।
होता यक्षदश्विनौ छागस्य हविषऽआत्तामद्य मध्यतो मेदऽउद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या
गृभो घस्तां नूनं घासेऽअज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां
पीवोपवसनानां पार्श्वतः श्रोणितः शितामतऽउत्सादतोऽङ्गादंगादवत्तानां
करतऽएवाश्विना जुषेतां हविर्होतर्यज ।।४३।।